The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR MICROFILMING BY :-
SHREE. P. H. KARANI
Date 17-10-2008

1/1914

140760

ZZ. a. 21.

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

Rig veda Dvitiyashtaka Bashia

Commentary of the 2nd Ashtak of the Rig veda.

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशाय नमः ॥ ॥ ॐ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥ ॥ यस्य निश्वसितं वेदा यो 3
वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ प्रक्रिया प्रथमे कांडे साकल्येनोपवर्णिता ॥ अत ऊर्ध्वं न नास्त्येयाम्नाय - - - - न ॥ 19
अथ द्वितीयाष्टके प्रथमोऽध्याय आरभ्यते ॥ तत्राग्निना माद्यमंडले चतुर्विंशत्यनुवाकाः ॥ तेषु कद्रिछत्यष्टादशानुवाके षड्सूक्तानि ॥ तत्र प्रवः
पांतमिति द्वितीयं सूक्तं पंचावनेत्यनुवर्तमानात्पंचदशर्चं कक्षिश्वान्यस्मादृषिरिति परिभाषया कक्षीवानृषिः ॥ अनादेशपरिभाषया त्रिष्टुप् विश्वे
देवा देवता ॥ प्रवो विश्वदेवमित्यनुक्रमणिका ॥ अस्य विशेषविनियोगो लैंगिकः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ ॐ प्रवः पांतं रघुमन्यवोंऽधो यज्ञं
रुद्राय मीळ्हुषे भरध्वं ॥ दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥ हे रघुमन्यवः लघुक्रोधा अक्रोधिनः कुविज्ञा वा युष्माकं पांतं पाल
नशीलं पातव्यं वा यज्ञं यागसाधनमंधोऽन्नं आत्यसोमादिलक्षणं रुद्राय रुत् दुःखं तद्धेतुभूतं दुरितं वा तस्य द्रावयित्रे एतन्नामकाय देवाय मीः
ळ्हुषे फलस्य वर्षित्रे तदर्थं प्रभरध्वं प्रकर्षेण संपादयत ॥ अहं च इषुध्येव इषुध्या बाणेन यथा निरस्यति तथा वीरैः शत्रूणां विविधमीरकैर्मायोपे
तैर्वा तद्वनुच ॥ रेभैर्दासादिभिः स हादिवो द्युलोकसकाशात् उपलक्षणमेतत् लोकत्रयादपि अकरस्य निरसितस्तथा वोस्तराणां निरसितुः कर्मणि षष्ठि
निरसितारं तमेव देवं रोदस्योर्निरोधनवत्योः द्यावापृथिव्योर्मध्ये वर्तमानान् मरुतश्च अस्तोषि स्तौमि ॥ पांतं पातमित्यत्र पातेः औणादि
को अतनुर्मद्रूपदाश्वान साकानिति क्रकप्रत्ययो निपात्यते ॥ चतुर्थ्येकवचनवयोः संप्रसारणमिति संप्रसारणं शासिवसीत्यादिना षत्वं ॥ दिवः इदम
त्यादिना विभक्तेरुदात्तत्वं ॥ अस्तोषि स्तौतेश्छांदसो लुङ् ॥ इषुध्येव इषवो धीयंते अत्रेति इषुधिः समस्याधिकरणे चेति दधातेः किः कृत्स्वरेणांतोदात्त
त्वं उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥ ॥ द्वितीयामृचमाह ॥ ॥ पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ॥ स्तरीर्नात्कं व्युतं
वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥ ॥ पत्नीव पत्नी यथा पूर्वहूतिं पूर्वाह्वानं वावृधध्यै वर्धयितुं शीघ्रं गामिनी भवति ॥ तद्वत् उषासानक्ता अहो
रात्रे देवते अपि पुरुधा बहुप्रकारं बहुविधैः स्तोत्रैः विदाने ज्ञायमाने सती पूर्वहूतिं वावृधध्यै अस्मदीयं पूर्वाह्वानं वर्धयितुं शीघ्रमागच्छतामिति शे
षः ॥ यद्वा वावृधध्यै अस्मद् वर्धमानाय पुरुधा बहुप्रकारं विदाने वर्धनानि प्रयान ज्ञानत्यौ भवतमिति शेषः ॥ उषासानक्ता उषासोषस इति पूर्वप
दस्य षासादेशः ॥ देवताद्वंद्वे च उभयपदप्रकृतिस्वरत्वं ॥ अथ कोषासा उच्यते ॥ स्तरीः शत्रूणां हिंसकः तेजसा छंदोभिर्वा आदित्याः स उ बहिरः
ण्यवर्णैः रश्मिभिः व्युतं विशेषेण संबंधं अत्कं अत्कं सततं वा स्वरूपं वसाना आच्छादयंती धारयंती सूर्यस्य श्रिया शोभया सुदृशी शोभनं दृश्यमा
ना सूर्यस्य पुरोगामिभिः रश्मिभिः सर्वं वा जगद्भासयति ॥ तादृश्युषा अस्मत्पूर्वहूतिं पालयत्वित्यर्थः ॥ यद्वा हिरण्यैः हिरमणीयैः प्रकाशैर्धन
विशेषैर्वा सह आगच्छतु ॥ व्युतं वा आ त्रिधायां वसि स्वपीभिः ग्रहिज्यादिना संप्रसारणं ॥ स्तरीः अवितॄ स्तृभ्य ईडिति ईकाप्रत्ययः ॥ ॥ तृतीयामृ
चमाह ॥ ॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ॥ शिशीतमिंद्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यंतु देवाः ॥ नोऽस्मान् वसर्हा वसना
र्हो गार्हपत्यादिरूपेण यद्वा वासुकानामाच्छादकानां वा अग्निः अथवा वसर्हा वासा हर्ता वासस्य गमिता परिज्मा परितो गंता आदित्यो ममत्तु मादयतु तथा
अपां वृष्टेरुदकानां वर्षप्रयानवृषण्वान् इत्यादिको वातो वायुः अस्मान् ममत्तु ॥ किंच हे इंद्रापर्वता इंद्रः प्रसिद्धः पर्वतः पर्ववान् इत्यादिपूरण
वान् पर्जन्यः तौ युवं युवां नोऽस्मान् सम्यक् शिशीतं तीक्ष्णीकुरुतं शोधयतमित्यर्थः ॥ ततस्मा द्यस्माद् हंसवीनदेवान् स्तोमितस्मादुक्षे सर्वे विदुः

नोऽस्माकं व रिवस्यं नु प्रभूतमन्नं प्रदानुमित्रं नु सम्यक् अन्नप्रदानेन प्रीणयन्नित्यर्थः॥ ममत्तु मदीदयोः अंतर्भावितण्यर्थात् क्वादिभ्यो द सोविकरणस्य श्लुः॥ द्विर्वचनं
द्विर्भाव इत्यभ्यासस्य लोपः हलोऽन्तस्य सस्यत्वं॥ इत्था पर्वतस्य वद्रेतो दंद्रु चति पूर्वपदस्यान्तोदात्तत्वं॥ ॥ चतुर्थीमृचमाह॥ ॥ उत त्याम यश सा श्विनेना
ये ध्यंतापां नाद्भिशा हुवध्यै॥ प्रवोनपातमपांकृणुध्वं प्र मातरा रास्पिनस्यायोः॥ ॥ औशिजः उशिजः पुत्रः कक्षीवान् हं मतास्थ्यं च तुर्थः॥ मद र्थं यश सा य
शस्यत्वं वलं कार्तिश्वाध्यते॥ तद्वंतात्यं ताभक्षयंतोचर पुरा दाशादिकेषां ताथिवं वा वाऽयसामासिकं तत्द्र्यर्थसमानार्थः त्यतदुच्यः॥ यो रूतत्यतन प्रसिद्धोता
वश्विना अ त्र य द्या पिविदा यानस्तुनः॥ तथापिमन्तस्यापि श्वत्वादुपः संबंधाद्विर्वचनलिंगाच्च अश्विनावेवाभ्यते॥ ताद्वा वश्विनौ श्वेतनाय्ये प्रपथ्ये चतुर्थी
॥ विश्वं जगत श्वेत पत्याउषसः तत्संबंधिकालं द्वयः कालोनाकालानायय नयमितिद्वापः॥ हक्लिवतः वायुः सप्रथमार्थे द्वितीया अपामुदकानां नपातं नपाः
तथितारं ता मान प्रा रं वाग्निं अद्भ्य आपधिवनस्पतयः नोऽभ्याग्निरित्यपान्नपानमग्ने॥ तं देवं प्र कृणुध्वं कुरुतेति क्रियास वा बाक्रियाक्रिया ऽवस्ता
न पितारं ता मान मातरं वा सन् अत्रैवं रास्पिनस्यायोः नायस्यायते तस्य कृतापतनस्य रास्य इति भवति तद्स्यास्तीति रास्पिनस्तोत्रं तद्वा
न पर्यवस्यति प्रकर्षेण कृणुध्वमित्यर्थः॥ किं च रास्पिनस्य रपतेरसते वा शब्दनार्थस्य यत्र तस्य रुतस्य कृतापतनस्य रास्य इति भवति तद्स्यास्तीति रास्पिनस्तोत्रं
न रास्पिनः स्तोता तस्य आयोः तादृशमनुष्यस्य मम स्थं मातरा मानवित्रिकारिण्या वन्तोरा ञद्वंते अपि प्रकृणुध्वं॥ अथ रास्पिनस्य एकामतयं प्रत्ययश्छंदसः
॥ प्रकर्षेण ध्वनियुक्तस्य रवस्य दकस्य गमनश्ीलस्यनिर्माश्वायद्दोरात्रं प्रकृणुध्वं॥ व्यंतापांता द्रुभ यत्र सुपांसुलुगित्याकारः॥ ॥ पंचमीमृ० ॥ आ वो रुवण्यु
मौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे॥ प्र वः पूषणं दावन आं अच्छा वोचेय वसुतातिमग्नेः॥ ॥ हे देवा औशिजः कक्षीवान् हं वो युष्माकं संबंधिनं रुवण्यु
रणी यज्ञाध्वनी यंज्ञां संस्ता वं आहुवध्यै युष्मद्दानाय अभ्या वो चेय अभिमुखेन ब्रवीमि॥ यद्वा आप्यश्विना॥ व वाच्यनेन स्मिन्पक्षेव हु वचनं पूजार्थं॥
हे अश्विनौ वा युष्मा घोषेव एतन्नामिका ब्रह्मवादिनी वस्तयथा अर्जुनस्य श्वेतवर्णस्य स्वशरीरगतत्वग्रोगस्य नंशोनाशनाय यथाश्विनौ ऋ समकायां तन्नत
द्वदहमपीत्यर्थः॥ हे देवाः युष्मत्संबंधिने दावन आभिमुख्येन कल्पयदा त्वं पूषण पायकाय एतन्नाम कायादेवायापि आकारस्याद्रो नुनासिकश्छंदसीः
ति प्रकृतिभावः अच्छा आभिमुख्येन गमनेन वा वोचेय स्तोमि॥ वचपरिभाषणे लिङ्याशिष्यङ्॥ वोच आमित्यम॥ किं च अग्नेर्वसुतातिं तत्संबंधिनमपि वो
चे स्तौमि तमवाप्तिं॥ ॥ इति द्वितीयस्य प्रथमो वर्गः॥ ॥ षष्ठीमृचमाह॥ श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीं॥ श्रोतु नः श्रोतुरातिः
सुश्रोतुः सुक्षेत्रा सिंधुरद्भिः॥ हे मित्रावरुणा एतन्नामानावहोरात्राभिमानिदेवौ युवां इमाइमानि मे हवा अस्मदाह्वानानि श्रुतं शृणुतं न केवलमस्मदा
ह्वानं इत अपि च सदने यागगृहे विश्वतः इद्रुत्विग्भिः सर्वतः क्रियमाणं सी एतत् स्तोत्रमपि श्रुतं शृणुतं किं च श्रोतुराति सर्वत्र श्रूयमाणधनः तादृ
शदानो वा सुश्रोतुः समीचीनस्य सम्यक् श्रोता सिंधुः तदभिमानी देवः सुक्षेत्रा सुक्षेत्राणि अद्भिरुदकैः कुर्वन्निति शेषः॥ यद्वा अस्मत् क्षेत्राण्य
द्भिः सुक्षेत्राणि सस्यादिसमृद्धानि कुर्वन्नो हवं शृणोतु सुक्षेत्रत्वादिकाभायशृणोतित्यर्थः॥ हवा इमा उभयत्र विभक्त्या आकारः॥ श्रुतमित्यत्र बहुलं छंद
सीति विकरणस्य लुक्॥ ॥ सप्तमीमृ०॥ स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे॥ श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुंधानासो अग्मन॥ हे मित्र हे वरुण हे इत्ययुवा युवाम हं स्तुषे स्तुवे व्यत्ययेन मध्यमः॥ युवयोः संबंधिनी सा प्रसिद्धा रातिर्दानं शताशतानां शतसंख्याना मपरिमिता
नां गवां संबंधिनी असंख्यातगोविषया रातिः पज्रे कक्षीवति मयि पृक्षयामेषु पृक्षइत्यन्नकारं तोयामा प्राप्तिः पृक्षाणामन्नानां नियमनं येषु तो त्रेषु यद्वा पृक्षयुक्ता युवा
ते यानिमित्तभूते पृभवति तिशेषः किं च मित्रावरुणयोर्देवाः श्रुतरथे सर्वत्र प्रसिद्धरथोपेते प्रियरथे प्रियमाणरथयुक्ते सर्वदा रथप्रियपज्रे मय्यवदधा

ना प्रीतिं धारयंतः सद्यः आगमनानंतरमेव पुष्टिं गवादिपोषं निरुंधानासः अवरुंधाना अस्मास्ववस्थापयंतः यद्वा मयि पुष्टिं दधानाः कुर्वाणाः नि
रुंधानासः कृतामेव पुष्टिं स्थिरीकुर्वंतः संतः अग्मन आगच्छंतु गताः॥ रातिर्भावेक्तिन मंत्रे वृषेत्यादिनाक्तिन उदात्तत्वं सुपांसुलुगितिषष्ठ्याः पूर्वसवर्ण
दीर्घः दधानाः जुहोत्यादिभ्यः श्लुः॥ अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ अग्मन गमेर्लुङि छंदसि मंत्र घसेत्यादिना च्लेर्लुक्॥ गमहनेत्युपधालोपः
॥ ॥ अष्टमीमृचमाह॥ ॥ अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः॥ जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः॥ म
हिमघस्य महिमस्तुत्यं मघं धनं मंनवा यस्य देवसंघस्य स्थतोकः तादृशस्यास्य राधो धनं स्तुषे स्तुवे व्यत्ययेन मध्यमः धनलाभाय प्रभूतधनं देवसं
घं स्तौमि इत्यर्थः॥ किं च नहुषः मनुष्यनामैतत् परस्परसंबंधापन्ना मनुष्या वयं कक्षीवंतः सुवीराः शोभनपुत्राद्युपेताः संतः सचा सह परस्परेण सम
त्ययेन सनेम त्व दत्तं धनं संभजेम लभेमहि देवसंघा विशेष्यते॥ वाजिनो देवजनः यश्च देवसंघः यज्ञेभ्यः अंगिरोगोत्रपुत्रेभ्यः कक्षीवद्भ्यः॥ पज्रा
य अंगिरस इति श्रुतः तेभ्यो वाजिनीवान वाजोऽन्नं तद्वती क्रिया वाजिनीतद्वान् भवति यद्वा कामस्यर्थं प्रत्ययश्छांदसः अस्मभ्यं प्रदेयनास्मभ्यं देनेन वान्ने
न दान भवतीत्यर्थः॥ यश्च देवसंघोऽश्वावतः बहुभिरश्वैर्दत्तैः स्थिरस्य दत्तः रथिनो रथवता मह्यं मम सूरिः प्रेरको भवति अश्वानां प्रेरयितारं देवसंघं स्तुष इ
त्यर्थः॥ सुवीराः क्रिर्वा वीरत्वं ज़रायुदात्तत्वं॥ अश्वावतः अश्वशब्दस्य मंत्रसोमाश्वेत्यादिना मतुप दीर्घत्वं॥ ॥ नवमीमृचमाह॥ ॥ जनो यो मित्राव
रुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक्॥ स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा॥ हे मित्रावरुणा युष्माकं योजनः अभिध्रुक् अभितो द्रो
ग्धा भवति अयष्टा भवतीत्यर्थः॥ यश्च अक्ष्णयाध्रुक् वक्रेण मार्गेण द्रुह्यति॥ अन्यथा प्रकारेण द्रुह्यति द्रोह प्रकारो यद्वा तवां युवां अयः सोमस्या
नेन सुनोति अभिषवं न करोति युवामितरस्य अन्यदेवतार्थं सुनोतीत्यभिप्रायः अयमेव अक्ष्णया द्रोहः स द्रोहादिविधो जनः स्वयं यक्ष्मं व्याधिं हृदय
स्वचित्ते निधत्ते स्थापयति अनुवाद्त्वेणाभोगान्दृश्यन व्यथितो भवतीत्यर्थः॥ यन्निगमव्ययः॥ यदक्ष्णः पुमान् ऋतावा यज्ञवान् परिगृहीत
यज्ञः होत्राभिर्वाङ्नामैतत् स्तुतिवाग्भिः ईं मनं सोमरसं आपद्याप्नोति स्तुवन् सोममभिषुणोतीति यावत् स जनः प्रख्यातीति वक्ष्यमाणेन सह संबं
धः॥ अभिध्रुक् द्रुहः सत्सूद्विषेति क्विप् सहितायां भवत्यभावश्छांदसः॥ अक्ष्णया वक्र छंदसीवनिपातमितिमत्वर्थीय यावनिपः अन्येषामपि दृ
श्यत इति संहितायां दीर्घत्वं॥ ॥ दशमीमृचमाह॥ ॥ स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः॥ विसृष्टरातिर्याति बाळ्हसृत्वा वि
श्वासु पृत्सु सदमिच्छूरः॥ हे मित्रावरुणा युवां गतमत्र व सोमानां सलक्षणो युष्मदर्थं दंसुजूतः दंसुजूतो नरां गूर्तश्रवाः शर्धस्तरः अत
एव नरां नराणां शर्धस्तरः॥ अतिशयेनाभिभवति॥ अतिशयेन बलवान्॥ नराणां समानानां मध्ये गूर्तश्रवाः उद्घोषितकीर्तिः प्रख्यातान्नो वा विसृ
ष्टरातिः॥ अर्थिभ्यः प्रदत्तधनः एवं महानुभावः॥ शूरः सन् विश्वासु सर्वासु पृत्सु संग्रामेषु आधत्तः मर्दनाम नित्य हिंसकान् महतापि न दुः
षां मनुष्यनामैतत् मनुष्यान् शत्रून् प्रति बाळ्हसृत्वा भृशं सर्वाभिसंकितगमनः सन् सदमित सर्वदा याति गच्छति॥ दंसुजूतः दंसावित्वतीयाक
र्णोति पूर्वपद प्रकृतिस्वरत्वं॥ गूर्तश्रवाः॥ गुरी उद्यमने नसत्ताभिसन्नेत्यादिना निपातनान्निष्ठानत्वाभावः॥ विसृष्टरातिर्विपूर्वो सृजतेः कर्मणि निष्ठा ग
तिरनंतर इति गतेः प्रकृतिस्वरत्वं॥ बहुव्रीहौ पूर्वपद प्रकृतिस्वरत्वेन पवशिष्यते॥ पृत्सु पदादिषु मांस्पृत्नो नाम्नुपसंख्यानमिति पृतनाशब्दस्य पृदा
देशः॥ सांविकात इति विभक्तेरुदात्तत्वं॥ बाळ्हसृत्वा सर्तेरन्येभ्योपिदृश्यन्त इति क्वनिप्॥ ॥ इति प्रथमस्य द्वितीयस्य प्रथमे द्वितीयो वर्गः॥ एका

भा० अ० २ दशीमृचमाह ॥ ॥ अधस्मं तानहुवो हवं नरः श्रोतारा आनो अमृतस्य मंत्राः ॥ न भ्रातृव्यो निरस्य रथः प्रशस्तये महिनारथवते ॥ हे राजानो राजमा अ० १
नाः सर्वे विश्वे देवा विश्वे देवा मंत्राः मातृपितारा यूयं अमृतस्यामरणस्य नरेः स्तोत्राणि प्ररकस्य नहुषो मनुष्यस्य ममहवमाह्वानं श्रोत शृणुत बहु
२ लं छंदसीति शपो लुक् ॥ अमृतस्येत्यत्र बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥ अध अथश्च वर्णानंतरं मंत्रं आगच्छत गमः
लोटि छंदसो लुक् ॥ मध्यमबहुवचनस्य तस्यात्थनतुमः ॥ बहुलं छंदसीति शपो लुक् ॥ गमहनेत्युपधालोपः विसर्गमागमनं उच्यते ॥ नभोजुवानमभि
व्याप्य यः पस्मान्निरवस्यनिर्गतरथस्य युष्मन्निति रक्षणरहितकालररहितस्य अथवा निर्गतो मुखाद्रश्मितोरवः शब्दः स्तोत्ररूपो यस्य तादृशस्य
रथवतो रथवतो यजमानस्य पसूर्थे चतुर्थी महिना महिम्ना माहात्म्येन मकार लोपश्छांदसः ॥ महात्म्येन मकारलोपश्छांदसः ॥ तेन युक्ताथः समर्थिः
साधनं हविर्लक्षणं सराधकं स्तोत्रं वा प्रशस्तये प्रशंसितुं कामयध्वेन समादायकानं शृणुत आगच्छतेति ॥ ॥ द्वादशीमृचमाह ॥ ॥ एतं शर्धं धाम यस्य
सूरेरित्यवोचं दशगस्वेषं नशं ॥ धृष्णानि येषु वसतानी रारन्विश्वे सन्वंतु प्रभृथेषु वाजं ॥ यस्य सूरेर्विद्वान् प्ररकस्य यजमानस्य संबंधिनो दशत य
स्य दशांह्रियसंवत्सरे तेन दशनार्थेनस्यांनस्य नंशेप्राप्नम यवयमाहुता: स्मत स्मेय उमानायेनं इदानीं शतत्यलन वर्तमानं शर्धंपरस्यामभिभावुकं
र्नं तत्यामि हूतुं बालं वा धाम कारवाम इत्यवोचं वयं देवाः येषु देवेषु धृष्णानि धातमानानि अन्नानि वसूलाति: वसनीयधनानां तातिर्विस्तारश्च वस्त्वं
वहारारतरसं तेभ्यो ॥ तनानेंकनिश्चलयोनानंमर इत्याहिलात्पूर्वपदांतोदात्तत्वं ॥ यद्वा स्वार्थिकस्ताति: वारारन्निति रमतेर्यङ् लुगंतस्य लुङि रूपं
विश्वे सर्वे देवाः प्रभृथेषु प्रकर्षेण भरणेषु यागेषु वाजमन्नं सन्वंतु संभजंतु प्रयच्छंतु षण दाने यस्य सूरेः संभृतस्य च दर्शनस्य दशव म स
म वर्जितस्य सा मस्य प्राप्तयेवयमाहूता: स्मतस्मात् तं शर्धं धामेत्यवोचं ॥ यस्मादेवं तस्मात् प्रभृथेषु प्रकर्षेण भरणेषु यागेषु वाजं तादृशं सा
मलक्षणमन्नं विश्वे देवाः सन्वंतु ॥ संभजंतां ॥ वनषण संभक्तौ विलिस्य व्यत्ययेन उत्प्रत्ययः कीदृशेषु यज्ञेषु वसतानि वसनीयानि तादृशविलक्षणानां ध
नानां वा विस्तारयितारः कविनां वचनव्यत्ययः ॥ धृष्णानि द्योतमानानि हवींषि रारन्नदृदाति रा दाने लोटि छांदसः श्लापः श्लुः ॥ छंदस्यपि दृश्यत इत्या
र्धधातुकत्वाद् तां लोपदृतित्यत्र आकारलोपः ॥ अनन्ववाभ्यस्तानामादिरित्याद्युदात्तत्वं भावश्च ॥ ॥ त्रयोदशीमृचमाह ॥ मंदामहे दशतयस्य धासेर्द्विर्यत्पंच बिभ्रतो यंत्यन्ना ॥ किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋंजते नॄन् ॥ ॥ मंदामहे स्तुमः स्तोत्रं वयं देवानस्थितौ ॥ इति दितानुमं किमर्थं
दशतयस्य धासेः दशंह्रियतः प्रिमाधनस्य नदशावयवस्या नरस्ययतस्मात् द्विः पंच दश विधासंतानि दशवसन शरीरत्वादन्नस्य दशविधत्वं एवंविधमं
नं धारयंतो दशावमभ्ययेवं यंति होमाय गच्छंत्या हवनीयं प्रतियद्वाश्वमेथ कामिदशान्नानि जुहोतीत्याम्नातान्यान्नमथादीनि दशविधान्नानि विश्वे २
भ्यो देवेभ्यो होतु धारयतिवदात दामंदामहदुतिनेवं सोश्वप्रभृतानविहावक्स्मारस्मान प्रत्याग मिष्यंतीति वाच्यं ॥ तरषः शत्रूणां तारकान्नतरे
नेताणाद्विजानुन ॥ नृनन नृन कर्मणा एवंमहानुभावानवरणादीमिष्टाश्वः एतन्नामकोपि राजाकिंमृजं तोकिंप्रसाधयितितथेष्टरश्मिः किंमृजंति
एत इदानीं वर्तमाना ईशानासः पृथिव्या ईश्वराः राजानो यं तिय द्वायेपां सोनृणाम स्माकमेतेस्तुतादेवा ईशानासः स्वामिनः किं लतादृशान तरषः
शत्रूणां तारकान् नूनं कर्मनिर्वाहकानस्मान्नि धावार यः किंमृजती यंतिकि मुपहर्वंतिमत्रभवंतीत्यर्थः ॥ ॥ चतुर्दशीमृचमाह ॥ ॥ हिरण्यकर्णं
मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यंतु देवाः ॥ अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकंतूभयेष्वस्मे ॥ ॥ हिरण्यकर्णं हिरण्यविकारकुंडलायुप

तकर्णं मणिग्रीवं स्ना धेनकंठं एतदुभयं सर्वावयवस्याप्युपलक्षणं एवं सर्वाभरणयुक्तमर्णः अर मणीयं रूपं तदुक्तं तत्पुत्रादिकमित्यर्थः ॥ इत्यलक्षणमः 7/1914
न्नरीयं रूपं वा अस्माकं विश्वे देवा वरिवस्यंतु परिवरंतु प्रयच्छंत्वित्यर्थः ॥ अर्यः अरमणीया किंच पीदेवानां सद्योस्माद्गमनादंतरमेव वाचा कृतुकामयं
मानं ॥ चांदसः शपः श्लुः ॥ पररूपमपरस्य यदा पद्ग इत्युच्चि नुम भावः ॥ आस्माचाकं तितिवाया उभयेषु यामिकामयंतामित्यर्थः ॥ कुषितिनदुच्यते अस्मे अस्मा
कं मं संधिपुभयपुत्रा नूयदृपुत्रमहा अस्माकमुभयेषु पुद्दिका मुष्मिक विषयेषु भयविधेषु फलेषु ॥ ॥ पंचदशीमृ० ॥ चत्वारो मा मशर्शास्य शिश्वः
स्त्रयो राज्ञ आयवसस्य जिष्णोः ॥ रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥ मामां कक्षीवंतं मशर्शास्य मशर्शा स्यभृत्यं शिश्व
शिश्वस्य राज्ञ आयवसस्य जिष्णोः ॥ रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥ मामां कक्षीवं...
णातिशा रयतिवामिसानिति मशर्शोरः एतन्नामकस्य राज्ञः शिश्वः शिशवः शिशुवत्प्रवृत्ताः चत्वारः पुत्रा मा बाधंत इति शेषः ॥ शिश्वुर्दुरहस्य उत्ताति
पुत्रं दसिवावचनमितिगुणाभावः ॥ तथा आयवसस्य सर्वतः प्रात्तान्नस्य एतन्नाम्नो राज्ञा जिष्णोर्जयशीलस्य पुत्रास्त्रयः तं पिबाधंत इति शेषः ॥ हि
त्रावरुणा एतं नामानौ देवावां युवयोः संबंधी रथो दीर्घाप्साः ॥ अप्स इति रूपनाम अतिविस्तृतरूपः स्यूमगभस्तिः स्यूममिति सुखनाम सुख
करदीप्तिः सनसस्य गनस्य र्यईव अद्योतद्योततां युक्तानामस्मदिराधनां पुरतः स्फुरतु भयजनको भवत्वित्यर्थः ॥ घुतेश्छंदसि लुङ् लिङ् इति लुङ् युष्मा
त्रांतानि तयरपदइति तिव्युत्पत्ति: परस्मैपदं दिवितिरश्चि: बहुलं छंदसीति इडभाव हल्ङ्याब्भ्य इति संयोगांत लोपो ॥ यद्वा युअभिगमने ॥ अ डादिकश्छांदस
लुङीतिपरस्मैपदं सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः बहुलं छंदसीति इडभाव हल्ङ्यादि संयोगांतलोपो ॥ यद्वा युअभिगमने ॥ अ डादिक छांदस
लड् इति नाडू चितुर्ड कुलाति वृद्धिः ॥ ॥ इति द्वितीयस्य प्रथमे द्वितीयो वर्गः ॥ ॥ ऋग्मिच्यास्मिन्नु द्वादशानुवाक षडृसक्तानि तत्र पृथूरथ इति तृती
यं सूक्तं तथा दशर्चं अथानुक्रमणिका ॥ पृथुः सप्तोना पथ्यं तिति ॥ दीर्घतमसः पुत्रः कक्षीवानृषिश्वान्यस्मादृष्येति परिभाषितत्वात् ॥ अना
देशपरिभाषयान्निष्टुप्छंदः ॥ उक्तान्न यागादिरदं मादिकस्य कड्भ्यादेनाक ॥ प्रातरनुवाक उपस्थ्येकृतो वस्यावासरस्य च विनियोगः ॥ प्रा
तरनुवाकस्यार्थिकत्वस्य दिवितित्वात् ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ पृथूरथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ॥ कृष्णादुदस्थाद
र्या विहाया श्चिकित्संती मानुषाय क्षयाय ॥ ॥ दक्षिणायाः समर्थायाः उषसः कृत्स्नायाः उषा देवतायाः पृथुर्विस्तीर्णो रथः ॥ अयोजि अश्वैर्युक्तः सं
धो भवत्यय यघापि देवता विग्रहाकृतः तथा कतस्य वादादुपस्तिगम्यते ॥ एनं स्यंदनं अमृतासो अमरणधर्माणो देवासो देवनशीला हविर्भोक्तारः
आ अस्थुः ॥ आस्थितवंतः दक्ष यज्ञस्य गंतु आरूढा इत्यर्थः ॥ अनंतरं तया: कृष्णात् निकृष्टवर्णात् निशात्मसः सकाशाद् दस्थाद् उत्थिता भवतु कृष्णः
तानिकृष्णो सावर्ण इति यास्कः बीदृशी सा अर्या अरमणीया पूजनीया विहायाः विविधगमनयुक्ता महती वा विहाया इति महन्नाम विहायाः यद्इतितंना
मसूपागमत ॥ मानुषाय क्षयाय मनुष्याणां निवासाय चिकित्संती अंधकारनिवारणरूपां चिकित्सां कुर्वती तमांसि वारयंतीत्यर्थः ॥ ॥ द्वितीयामृच०
पूर्वा विश्वस्माद्भुवनादबोधि जयंती वाजं बृहती सनुत्री ॥ उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥ ॥ विश्वस्मात् भुवनात् सर्वस्मात् सुमा
न भूतजातात् पूर्वा प्रथमा सती यमुषाः अबोधि बुध्यामहे ॥ उषःकालमवगत्य हि पश्चात् सर्वप्राणिनः प्रतिबुध्यंते ॥ कीदृशी वाजं गमनशीलं प्रका
शमानं देवं धकारं तद्यंतीपराभावं कुर्वती ॥ यद्वा वाजं शब्देनान्नमुपचितत्वात् ॥ अन्नाभ्यं अन्नं वै वाज इति श्रुतेश्च ॥ यजमानार्थमन्नं संपादयंती बृह
ती महती सनुत्री सर्वजगत्संभजंती दशाचा प्रकाशयति किंच सा पायुः आङ्ज्ञ: उच्चा उन्नता सती व्यख्यत् विचष्टे सर्वं जगत् पश्यतीत्यर्थः ॥ कीदृशी सा युवतिः
मिश्रणशीला नित्य यौवना वा पुनर्भूः पुनः पुनर्भवनशीला प्रतिदिनं वर्तमानत्वात् ॥ सोषाः पूर्वहूतौ सत्यां प्रथमा मुख्या प्ररकाशसती आगन् दृक्य

तमं देवं प्रत्यागच्छति॥ प्रथमा दुतिमुख्यनाम प्रतमोभवतीति यास्कः॥ उत्तरदेवेभ्यः पूर्वमा हूता सती सा प्रथमेवागच्छतीत्यर्थः॥ ॥तृतीयामृचमाह॥ यदद्य भा

भा॰ अ॰ २ गं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते। देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय॥ ॥सुजाते शोभनजनने हे देवि द्योतमाने हे उषः उषः

३ कालाभिमानि देवते मर्त्यत्रा मनुष्याणां पालयित्री त्वं अद्यास्मिन्काले नृभ्यो यष्टृभ्यो भागं भजनीयं स्वकीयं प्रकाशरूपं यद्विभजासि विभजसि विभज्य

ददासि यद्वा मर्त्येषु मध्ये नृभ्यो यजमानेभ्यो देवानां भागं विभज्य ददासि उषासि प्रवृत्तायां हविःप्रदीयमानत्वादुपचारात्तत्त्वमुपचर्यते॥

अत्रास्मिन्विषये दमूना यजमानस्याभिमतफलदानमनाः दमूना दममना वा दानमना वा दान्तमना वेति निरुक्तवचनं॥ तादृशः सविता प्रेरको देवो

नोऽस्माननागसो वोचति॥ अपापान्यागयोग्यान् ब्रूयाद्विद्यानुगृह्णात्वित्यर्थः॥ किमर्थं सूर्याय भगस्य भागदेयं प्रति सूर्यस्य गमनार्थं॥ ॥चतुर्थीमृ॰

गृहंगृहमहना यात्यच्छा दिवेदिवे अधिनामा दधाना। सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनां॥ ॥अहना इत्यहनामेतत् अहना द्योतनेतित

नाम सुपातान॥ सा देवी दिवेदिवे प्रत्यहं दिवे दिवे यष्टियाविर्भूत्वा सर्वानीमस्पाताना गृहंगृहं तत्तद्यष्टृगृहं अच्छ अभिमुख्येन याति गच्छति॥ कीदृशी अधिनाअ

धिकृनामनमनं प्रकृत्यं प्रतिहत द्योतमप्रकाशरूपं दधाना धारयन्ती यद्वा अधिदधाना अधिकं धारयन्ती किंच सिषासन्ती संभक्तुमिच्छन्ती द्योतना कृत्स्नजग

तः द्योतनशीला शश्वत्प्रतिदिनं आगात् आगच्छति पूर्वं यातीत्यक्तत्वात्पुनरागात् इति वचनमावश्यकत्वद्योतनार्थं॥ आगत्य च वसूनां धनानां हविर्लक्ष

णानां अग्रमग्रमित् तत्तदग्रं भागं भजते सेवते स्वीकरोतीत्यर्थः॥ ॥पंचमीमृचं॰॥ भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व।

पश्चा स दघ्या यो अघस्य धाता जयेम तं दक्षिणया रथेन॥ सवितुः मनुष्याणां भजनीयस्य देवस्य सवितुः स्वसा भगस्य सर्वैर्भजनीयस्यादित्यस्य स्वसासि

स्वस्थानीयासि तेन हान्त्यमानत्वादित्यर्थः॥ तथा वरुणस्य तमोवारकस्य सवितुर्देवस्य जामिरसि भगिनीस्थानीयासि एकस्मिन्नेवावस्था

नेऽवस्थानात्॥ जनयत्यसौ दुग्धं तस्या मन्येइति जामिः॥ यद्वा जमति गच्छति सोत्पन्निस्थाना दन्यत्रेति इत्युक्तनिर्वचनद्वयमभिप्रेत्य यास्क आह॥ जामि

ममन्ये भजन्ते जामिरन्यस्यां जनयंति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवतीति तादृशी त्वं॥ प्रथमा दुतरदेवेभ्यः पूर्वोक्तरीत्यावार

तीतरस्तुता भवत्वरतिस्तु इत्यर्थः॥ जरा स्तुतिर्जरतेः स्तुतिकर्मण इति यास्कः॥ पश्चा पश्चात्स्तुत्यनंतरं यो अघस्य धाता यः कश्चिद्दुःखस्य दु

रितस्य पापस्य वा धारयिता स दघ्या गच्छतु वचनव्यत्ययः॥ दघ्यतिर्गत्यर्थः॥ दघ्यति दघ्नोतीति गत्यर्थेषु पाठात्॥ अपि च सर्वा पापी बलीया

नं दक्षिणया प्रवृद्धया सहाय भूतया त्वद्रथारथेन अस्मदीयरथादिसाधनेन च जयेम॥ ॥इति द्वितीयस्य प्रथमे च तुर्थो वर्गः॥ ॥षष्ठीमृ॰

उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः। स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः॥ सूनृताः प्रियसत्यात्मिका वाचः

उदीरतां उद्गच्छंतु उत्पत्तिः उद्गच्छंत्यथा भवति तथा स्तोत्रं प्रवर्तयध्वं॥ तथा पुरंधीः पुरंधयः पुरं शरीरं या धीयते तेयाभिर्वा ताः पुरंधयः प्र

ज्ञाः प्रयोगविषयाः ता अप्युत्तिष्ठंतु प्रतीपवलक्षितानि कर्माणि प्रवर्तंतामित्यर्थः॥ यद्वा पिठाणवायुना शरीरं धार्यते तथापि याथे प्राणाः सा

प्रज्ञा या वा प्रज्ञा स प्राण इति श्रुतेः प्राणप्रज्ञयोरेकत्वात्प्रज्ञायाः शरीरधारणमविरुद्धं तथाग्नयः आहवनीयाद्याः शुशुचानासः अत्यंतं दीप्य

मानाः उदस्थुः उत्तिष्ठंतु प्रज्वलंत्वित्यर्थः किमर्थमेवमिति तदुच्यते यतो विभातीर्विविधं भासमाना उषसः उषो देवता तमसापगूळ्हाप गूळ्हा ३

नि अंधकारेण संवृतानि गोपितानि स्पार्हा स्पृहणीयानि वसूनि वासयोग्यानि यज्ञसाधनभूतगृहादीनि आविष्कृण्वंति यथावस्तु प्रकटं कुर्वंतीति तस्मा

त्स्तोत्रादिकं कुर्वित्यर्थः॥ ॥सप्तमीमृचमाह॥ ॥अपान्यदेत्यभ्यन्यदेति विषुरूपे अहनी सं चरेते। परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशु ९

चता रथेन॥ इदानीमहोरात्रयोरुत्पत्तिद्वारा उषास्तुयते। विषुरूपे वक्ष्यमाणप्रकारेण नानारूपे अहनी अहश्च रात्रिश्चोभे संचरेते समित्येकीभावे सहैवा 1914

प्यवधानं चरतः॥ अत्राह॥ साहचर्यात्तत्यतिथयोगित्वाज्ञरात्रिरप्यहरित्युच्यते॥ इतरवमंत्रांतरं अयमर्थः स्पष्टः आम्नातः॥ अहश्च कृष्णमहरर्जु

नं च वि वर्तेते रजसी वेद्याभिरिति॥ तयोर्मध्ये अन्यद्रात्रिरूपमहरपि अपगच्छति प्रतिलोमं गच्छति अपगतस्त्रमात्रिकामिति यास्कः॥ अन्यच्च

दिवसाख्यमहः अभ्येति आभिमुख्येन गच्छति अभीत्याभिमुख्यमिति यास्कः॥ रात्र्यां प्रतिनिवृत्तायां अहरभिमुख्यमागच्छतीत्यर्थः॥ विषुरूपे संच

रेते इति यदुक्तं तदेवस्पष्टीक्रियते परिक्षितोः पर्यायेण निवसतोः परिक्षपयित्रोर्वा प्राणिनां अहःस्वतीतेषु आयुषः क्षयात् परिक्षपणं प्रसि

द्धं तयोर्मध्ये अन्या रात्रिस्तमस्तमो रूपा गुहा परार्थानां गूहनं अकः करोति॥ अन्या अहरुपा वा उषाः शोशुचता भृशं दीप्यमानेन रथेन अद्यो

तयात तत्प्रकाशत प्रकाशयति वा सर्वं रात्रिस्तमो भवन्ती यं सर्वं जगदावृणोति उषास्तु सर्वान् भावान् प्रकाशयतीत्युषसः स्तुतिः॥ ॥अष्टमीमृचं॰

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम। अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः॥ अद्यास्मिन्नहनि सदृशीरितरपरस्परं सदृ

श्य एव तथा श्वः इतरस्मिन्नप्यहनि सदृशीः परस्परं सदृश्य एव इ शब्दोऽपि शब्दार्थः इदु इत्येवार्थः॥ अद्यतनत्वाऽपि श्वस्तनीभिः सदृश्य श्वस्तन्यश्चाद्यत

नीभिरेवमहरंतरेणसादृश्यं कथं सा दृश्यमिति तदुपपद्यते यद्यन्नक्षत्राणि न दृश्यंते सर्वथैनादृति उषः कालः सत्रिंशति घटिकाभिः पादुर्भवति पुर

भिर्मानितः॥ सर्वदा प्रतिदिनं एकानवस्थितिरूपेण सहस्रयोजनानि मेरु प्राद्क्षिण्येन परिभ्रमति॥ तथा सति यत्र यत्र लंकादिभ्य प्रदेशे सूर्य आगच्छति

तस्य तस्य पुरस्तात्त्रिंशद्योजनं उषा आविर्गच्छति सा यस्मिंदेशं गच्छति तत्रिंशद्योजनपुरस्तात् देशस्थितानां उदिता दृश्यते एवं सर्वप्रदेशस्थविषि॥

तथा पश्चापि यत्र गच्छति पुरस्तात्त्रिंशद्योजनभभागवर्तिनां उदिता दृश्यते एवं लंकादि सर्वप्रदेशस्थितानामपि उषस उदयावगंतव्यः॥ एवं वस

ति एकस्मिन्भभागे यावत्कालं यथोषाः प्रकाशयति तथाभूतान्भागांतरेऽपि तावंतं कालं प्रकाशयंति॥ एवमुक्तरीत्या एकस्मिन्नेवाहनि सर्वप्रदेश

वर्तिनामप्युषसः सदृशः प्रदेशवाहुल्यमपश्यति सा च दुर्वाद्वयवचनं एवमेकरूपा उषसः अनवद्याः शुभ्राः तासामुदयान्सर्वे भावा अन

वद्या भविष्यंतीति एवं कथं ता सामनवद्यत्वं दीर्घं उत्तरीत्या अत्यंतमायतं वरुणस्य तमोनिवारकस्य सूर्यस्य धाम स्थानं मेरुवलयं सचंते

प्रतिदिनं सेवंते किंच इदमिति तदुच्यते त्रिंशतं योजनानि त्रिंशद्योजनानि पुरतः सर्यो यत्र यत्र द्रुति ततस्तत्त्रिंशद्योजनं पुरस्तादुच्यंतीत्यः

र्थः॥ किंच आसां मध्ये एकैकोषाः लंकाद्येकैकभभागवर्तिनां क्रतुं गमनागमनादिरूपं कर्मं तद्विषयां प्रज्ञां वा॥ तथा च निरुक्तं क्रतुं दधिक्राः क्र

र्मवा प्रज्ञां वेति॥ सद्यस्तदानीमेव स्वोदयकाल एव परियंति परितो गच्छंति निर्वहंतीत्यर्थः॥ तत्तद्भूभागविशेषेण सूर्यस्योदयास्तयोः इत्थं

प्रदर्शितः उदयो लंकायां सोऽस्तमयः सवितुरेव सिद्धपुरे॥ मध्यान्हो यवकोट्यां रोमकविषयार्धरात्रः स्यादिति॥ ॥नवमीमृचमाह॥ ॥

जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची। ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती॥ उषाः प्रथमस्य मुख्यस्य प्रथमान

स्य वा अह्नो दिवसस्य नाम नमनं नामगमनं जानती अवगच्छंती प्राणिनां प्रज्ञापयंतीत्यर्थः॥ सोषाः शुक्रा स्वतो दीप्ताश्च अत एव श्वितीची श्वित

गच्छंती प्रकाशं प्राप्नुवंती कृष्णाज्जनिष्टात् तमसः सकाशादजनिष्ट प्रादुर्भवतिस्य सा पितमसः सकाशान्जायते तथापि तदंतरभावितात्तद्उस

भा॰ अ॰ २ यतद्रूपं वर्धयति ॥ अयं नासाकृतस्य सत्यभूतस्यादित्यस्य धाम तेजो युक्तं स्थानं योषा मिश्रयंती न मिनाति न हिनस्ति न दीयंतेन पुनरागच्छति अपि त्वहरहः स
४ र्वेदा स्वनिष्कृतमाचरंती अलंकारशोभां कुर्वती ॥ यद्वा ऋतस्य सत्यभूतस्य यज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रयंती न मिनाति न हिनस्ति
किं तु अहरहः सर्वेषु यागेषु निष्कृतं हविषां दीनां प्रकाशनरूपमलंकारमाचरंती कुर्वती तादृशी उषाः अजनिष्टेति पूर्वेणान्वयः ॥ ॥ दशमीमृचं
कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणं ॥ संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥ तन्वा शरीरेण शाशदाना शाशद्यमा
ना स्पर्धमाना प्राप्नुवंती शाशद्यमानः शाशद्यमान इति यास्कः ॥ कन्येव कमनीयावत् कन्या कमनीया भवति क्वेयं नेतव्येति यास्कः ॥ सा यथा ज्ञानाति
कृत्वा पुमांसं चरति । तथा हे उषस्त्वं कन्याकमनीया अत एव तन्वा स्वशरीरेण शाशदाना स्पर्धमाना सती हे देवि देव
नशीलं इयक्षमाणं यष्टुमिच्छंतं अनभिमतं दातुमिच्छंतं वा देवं द्योतमानं स्वभावं सूर्यरूपं प्रियं स्वपतिं गच्छसि ततः पश्चात् युवतिर्यौवनोपेता सती पु
रस्तात्पुरः सूर्यस्य पुरतः संस्मयमाना समीषद्धसंती हास्यं कुर्वती विभाति अत्यंतं भासमाना वक्षांसि वक्षःसोपलक्षितानवयवान् आविष्कृणुषे
प्रकटीकरोषि ॥ यद्वा युवतिरित्युपमा यथा लोके प्रगल्भा योषित् पुरस्तात् पूर्वस्यां दिशि प्रियतमस्य परतः संस्मयमाना दंतप्रदर्शनाय उ
पहसनं कुर्वती वक्षांसि वक्षःसोपलक्षितानि गोप्यानि बाहुमूलस्तनादीनि आविः करोति तथा त्वमपीत्यर्थः ॥ यद्वा पुरस्तात्पूर्वस्यां दिशि संस्मय
माना स्मितेन गभस्तिं प्रकाशं कुर्वती युवतिः सर्वप्राणिप्रमिश्रणशीला वक्षांसि वक्ष इति रूपनामसु पठितं स्थानीयानि नीलपीतादीनि रूपाण्यावि
ष्करोति ॥ ॥ इति द्वितीयस्य प्रथमे पंचमो वर्गः ॥ ॥ एकादशीमृचमाह ॥ सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कं ॥ भद्रा त्वमुषो वितरं व्युच्छ
न तत्ते अन्या उषसो नशंत ॥ हे उषो देवि मातृमृष्टा मातृभिर्मननीभिः शुद्धीकृता योषेव सुसंकाशा अत्यर्थं प्रकाशमाना त्वं स्वकीयां तनुं दृशे सर्वे
षां दर्शनाय आविष्कृणुषे प्रकटयसि ॥ यथा लोके मातृभिरलंकृता अत्यंतं शोभमाना सती स्वकीयं लावण्योपेतं सर्वं शरीरं दर्शनाय आविः करो
ति तद्वत्त्वमपीत्यर्थः ॥ अत्र कमिति पादपूरणः अथ विशेषस्याभावाच्छिद्रारंडी वनायकमीति वत् तथा च यास्काचार्यो मिताक्षरेष्वनर्थकाः
कमीमिद्विति ॥ यद्वा कमिति सुखवचनः सुखं यथा भवति तथा आविष्कृणुष इत्यर्थः ॥ हे उषः यतस्त्वमेवं करोषि अतो भद्रा कल्याणशीला त्वं
वितरं व्युच्छ आवरकं तमो विशेषेण व्युच्छ यथा भवति तथा विवासय अत्र यद्यपि विशेषो नोक्तः ॥ तथापि प्रकृतत्वान्निवर्त्यत्वात् ॥ परिहरणीय
त्वाच्च व्युच्छनीयं तम एवेति गम्यते किं च ते तव तत् व्युच्छनं अन्या उषसः अतीता आगामिन्यश्च न नशंत न व्याप्नुवंति तथा व्युच्छेति भावः ॥
नशिर्व्याप्तिकर्मा इन्वति नक्षतीत्यादिषु व्याप्तिकर्मसु पाठात् ॥ ॥ द्वादशीमृचमाह ॥ ॥ अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ॥ परा
च यंति पुनरा च यंति भद्रा नाम वहमाना उषासः ॥ अश्वावतीः अश्ववत्यः बहुभिरश्वैस्तद्वत्यः तथा गोमतीः बहुभिर्गोभिस्तद्वत्यः विश्ववाराः वि
श्वैर्वरणीया इत्यर्थः ॥ सूर्यस्य रश्मिभिर्यतमानाः सूर्यरश्मिभिः साकं तमोनिवारणस्य विवक्षितत्वात् ॥ तासामपि प्रयत्नमविरुद्धं कुर्वाणा रश्मि
देवता अभिप्रकाशिका इत्यर्थः ॥ किं च भद्रा भद्रं कल्याणं स्तुत्यं वा नाम नमनं सर्वजनानुकूल्यं वहमानाः धारयमाणाः उषासः उषोदेवताः परा
च यंति तथा पुनरा च यंति परस्परापेक्षया भयबाधात् याः प्रत्यागच्छंति ता एव पुनः पुनर्दिनांतरे व्यवधायागच्छंति प्रतिदिनं गता ४
गतं कुर्वंतीत्यर्थः ॥ ॥ त्रयोदशीमृचमाह ॥ ॥ ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि ॥ उषो नो अद्य सुहवा व्युच्छास्मासु रायो

मघवत्सु च स्युः ॥ ॥ हे उषः ऋतस्य सत्यभूतस्यादित्यस्य रश्मिं अनुयच्छमाना आनुकूल्येन प्रवर्तमाना त्वं भद्रंभद्रं क्रतुं तत्तत्कल्याणं स्तुत्यं वा लौकिकं वैदि 11/1914
कं कर्म द्विविधां प्रज्ञां वा धेहि स्थापय ॥ हे उषः नोस्माकं सुहवा सुखेनाह्वातुं शक्या सती अद्य व्युच्छ तमो विवासय प्रकाशं कुर्वित्यर्थः ॥ किमर्थमिति । तदुच्यते ।
मघवत्सु मघमिति धननाम हविर्लक्षणेन युक्तेषु अस्मासु यजमानेषु रायः धनस्य स्फाराः बहुविधानि धनानि संभवंतीति पूर्वोक्तेन क्रतुना सह समुच्च
यार्थश्चकारः ॥ ॥ इति द्वितीयस्य प्रथमे षष्ठो वर्गः ॥ ॥ उषा उच्छंतीति त्रयोदशर्चं चतुर्थं सूक्तं दैर्घतमसः कक्षीवत आर्षं त्रैष्टुभमुषस्यं
उषा उच्छंतीत्यनुक्रांतं विनियोगस्तु पूर्वसूक्तेनोक्तः ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ उषा उच्छंती समिधाने अग्ना उद्यन्सूर्य उर्विया ज्योतिरश्रेत् ॥
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥ उषा उषाः समिधाने अग्नौ अग्नित्वसामान्येन एकवचनं अग्निषु समिध्यमानेषु सत्सु
कामार्थं कं प्रयोगः उषःकाले ह्याहवनीयादयः प्रज्वाल्यंते उच्छंती तमो विवासयंती उर्विया बहुलं ज्योतिः प्रकाशं अश्रेत सेवत प्रकाशयति
वा सर्वं किंच उद्यन् सूर्यः उपमाप्रधानं निर्दिष्टः उदितः सूर्यश्च सर्वं यथा प्रकाशयति तथेत्यर्थः ॥ अत्र तु दुरपानंतरं तस्मिन्नेव क्षणे विवासयिता दे
वः सर्वस्य प्रेरकः सविता नोस्मदर्थं नु क्षिप्रं अर्थं अर्थशब्दोत्र विशेषणवाची न पुंसि किं लिंगः अयं स्वनर्थाभिरूपं नपासीत्याह तथा द्विपत्ता ॥ अर
णाय द्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनं प्रासावीत् अनुज्ञानानुदात् इत्यर्थः ॥ तथा चतुःपत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावी
त् किमर्थं इत्यै द्विपदां चतुष्पदां च गमनाय ॥ महान् इत्यादि इति संबंधः ॥ अस्मत्कर्मादिव्यापाराय इत्यर्थः ॥ ॥ द्वितीयामृचमाह ॥ अमिनती दैव्या
नि व्रतानि प्रमिनती मनुष्या युगानि ॥ ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ दैव्यानि व्रतानि देवसंबंधीन्यग्निहोत्रादीनि क
र्माणि व्रतमिति कर्मनाम व्रतं कर्मेति । तन्नामसु पाठात् ॥ तानि कर्माणि अमिनती अहिंसंती भानप्रदानेनानुकूलं कुर्वती तथा मनुष्याणां यु
गानि युगोपलक्षितानि निमेषादिकालावयवान् प्रमिनती हिंसंती नाशं कुर्वतीत्यर्थः ॥ निमेषादिकालस्य सर्वे यथास्वव्यापाराय गच्छंतीति प्रसिद्धं
किंच ईयुषीणां गच्छंतीनां अतीतानां संततिप्रवाहरूपेण नित्यानां उपमा तद्वदित्यर्थः ॥ तथा आयतीनां आगच्छंतीनां समयउत्पद्यमानानां प्रज्ञावाना
दीनां प्रथमा प्रथमभाविनी उषा व्यागता यावा वा बुध्यस्वप्रकृतीनां प्रसिद्धं तादृशी दीर्घव्योत प्राणिनामनुग्रहाय द्योतते ॥ ॥ तृतीयाम
चमाह ॥ ॥ एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ॥ ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ एषा उषाः दिवः द्योतमा
नात्मकस्य सूर्यस्य दुहिता दुहितृस्थानीया ततउत्पद्यमानत्वाद्दुहितृत्वमुपचर्यते ॥ पुरस्तात् पूर्वस्यां दिशि प्रतिप्रत्यक्षं अदर्शि दृश्यते ॥ सर्वेषामपि
प्राणिनामाभिमुख्येन प्रकाशत इत्यर्थः कीदृशी सा ज्योतिर्वसाना तेजोरूपं वस्त्रमाच्छादयंती तत् सा प्रकाशयंतीति समना सम्यगमनयित्री ॥ वृत्तिरित्री
अंतर्भावितण्यर्थोयं ॥ यद्वा समना युगपदेव मन्यते बुध्यते प्राणिभिरिति समना व्युत्पत्त्यनवधारणादनवग्रहः ॥ सा तादृशी ऋतस्यादित्यस्य पंथां
नमरोः प्रीतप्रदेशं अनुक्रमेण साधु सम्यगतिगच्छति स यां यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अधिगच्छतीत्यर्थः ॥ सेवावाड्याच्यते ॥ प्रजानतीव प्र
यतमस्य सूर्यस्य मार्गं सम्यग्विज्ञातवती इति व तयंतीव यथा लोके प्रियतममनुरागयुक्ता काचित्तं भर्तारं सर्वावस्थासु न विमुंचति तथेयमपीत्यर्थः ॥ किं
च दिशः प्राच्यादिका न मिनाति न हिनस्ति किं तु यायवगच्छति सा प्राच्यादिदिशां प्राशस्त्यं च प्रकाशं करोतीत्यर्थः ॥ ॥ चतुर्थीमृचमाह ॥ ॥ उपो अदर्शि शुं
ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ॥ अद्मसन्न ससतो बोधयंती शश्वत्तमागात्पुनरेयुषीणां ॥ ॥ एषा उषाः उपो इति निपातद्वयसमुदा

भा॰अ॰१२ यात्मकृत्प्रकाशितवानः सर्वैः समीपएव अदर्शि दृश्यते ॥ तत्र दृष्टांतः शुंध्युः शोधकस्य वक्षः अत्र नकार उपमार्थीयः उपरिष्टात्प्रयुज्यमानत्वात् ॥ यत्र तु नेति प्रतिषेधार्थीय अ॰१
त्तत्र पुरस्तान्नकारः प्रयुज्यते ॥ तथाच यास्कः ॥ पुरस्तादुपाचारस्तस्य यत्प्रतिषेधयतीति नस्योदाहरणं नेंद्रं देवममंसतेति उपरिष्टादुपाचारस्तस्य
नोपमिमीत इति ॥ तस्या उदाहरणं दुर्मदासो न सुरायामिति शुंध्युरादित्यः सर्वेषां शोधकत्वात् ॥ तस्य वक्षा वक्षस्थानीया रश्मिसमूहः सर्वस्य प्रकाश
मानो दृश्यते तद्वदित्यर्थः ॥ किंच नोधा इव प्रियाण्याविरकृत नोधा ऋषिः स्तोत्रं धारयतीति नोधाः ॥ एतन्नामा महर्षिः देवतास्तुतिव्याजेन नानाविधैर्मंत्रैः प्रि
याणि स्वमनोभिमतान्याविष्कृतवान् तथेयमपि स्वकीयानि सर्वकामप्रियाणि तान्याविःकरोति ॥ किंच अद्मसन्न अद्मसदा स्युपमार्थीयो नकारः अद्म
त इत्यन्नं तस्य पाकाय गृहे सीदतीत्यद्मसद्यज्ञपाचिका यथापि स सता बोधयतीति सा यथा स्वपतः पुत्रादीन् भोजनाय बोधयति तद्वत् ॥ यद्वा अद्म
ति गृहं नाम मरुत्त्वं अद्मनि तत्रामसत्पादानमसनीत्युद्यमसत् जननी सा यथा स्वपतः पुत्रादीन् उषःकाले प्रबोधयति तथा भुवनाख्यगृहस्यादिनी
तत्रस्थान् प्राणिनः प्रबोधयंती ससृयाः ॥ आदुषीणां आगमनशीलानां स्त्रीणां मध्ये उषा पुनः पुनरागच्छति प्रातर्नियतमागच्छंतीनां स्त्रीणां
पितामध्यस्य यमेका सततं नियतमागच्छतीत्यभिप्रायः ॥ अथ चतुर्थी ॥ उपो अदर्शि शुंध्युवः शुंध्युरादित्यो भवति शोधनान्न वक्षो ना सा ऋक्कमिद
मयति रदृश्यते तस्मादथाप्यृक्‌कायशकुनिरपि शुंध्युरुच्यते शोधनादुदक्‌चरो भवति पापादि शुंध्युरुच्यंते शोधनादुदकेनाधाक्रष्टिभिर्भवतिनव
नं दधाति समप्यास्युत्याकानाविष्कुरुते एवमुषारूपाण्याविष्कुरुते प्रसद्मा अद्मभवत्यन्नमादीनि इति याकामानिनीति वा ॥ ससतो बोधयंती उष्वितमा
गात्पुनरेयुषीणां स्वपतो बोधयंती शश्वत्तमाऽऽगात् पुनरागामिनी ॥ ॥ पंचमी ऋ॰ ॥ पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुं ॥ व्यु प्रथते वित
रं वरीय आ भा पृणंती पित्रोरुपस्था ॥ अप्त्यस्य व्यापनशीलस्याविततस्य रजसोऽत्र रजकस्यांतरिक्षलोकस्य रजः शब्दोंतरिक्षलोकवाची लोका रजांस्युच्यंत
इति यास्केनोक्तत्वात् पूर्वे पूर्वस्मिन् भागे जनित्री उत्पादयित्री गवां रश्मीनां वा केतुं प्रज्ञानं प्राकृत प्रकर्षेण करोति ॥ यद्वा रजसो रंजकस्या
नः रजः ज्योतिरुदकं लोका असृग् अहनी रजसी उच्येते इति यास्केनोक्तत्वात् ॥ तस्य पूर्वे अर्धे पूर्वस्मिन् भागे उषःकाले गवां वाचां जनित्री जनयित्री इत्यादि
त्री उषःकाले सर्वेषां प्राणिनां वाचः स्फुरंतीति प्रसिद्धं ॥ यद्वा अप्त्यस्य कर्मकारिणस्तस्य तेजःकृत्सुगमना गमनादिरूपं कर्म कर्तुरिति तेन नामकत्वात् ॥
नाकृत प्रकर्षेण करोति किंच पित्रोः पालकयोः द्यावापृथिव्योः उपस्था पार्श्व दूरे गच्छंतरालप्रदेशः स्थिता उभा उभयोः द्यावापृथिव्योरापृणंती व्यत
अ संपूरयंती यद्वा उभा उभयोः पित्रोरिति संबंधः ॥ वितरं विशिष्टतरं वरीयः उरुतरं अतिविस्तीर्णं यथा भवति तथा व्युप्रथते विशेषेण प्रख्याता
भवति प्रकाशित इत्यर्थः ॥ इद्वाव्यो अवधारणार्थः ॥ पादपूरणो वा मितक्षरेष्वनर्थकाः कमीमिद्विति यास्केनोक्तत्वात् ॥ ॥ इति द्वितीयस्य प्रथ
मे सप्तमो वर्गः ॥ ॥ षष्ठीमृचमाह ॥ ॥ एवेदेषा पुरुतमा दृशे कं नाजामिं न परिवृणक्ति जामिं ॥ अरेपसा तन्वा शाशदाना नार्भादीषते न महो वि
भाती ॥ ॥ एषा उषा एवेत इत्थं एवकारार्थे ॥ एवमेव इदानींभासमानप्रकारेण पुरुतमा विपुलतमा अत्यंतविस्तृता सती अजामिं विजाती
यं मनुष्यादिजातिं न परिवृणक्ति परितः सर्वतो न वर्जयति तथा जामिं सजातीयं देवजातिं न परिवृणक्ति न परिवर्जयति मनुष्यादिकं च तदुपलक्षि
तं लोकद्वयं वा कार्त्स्न्येन प्रकाशयतीत्यर्थः ॥ किमर्थमिति तदुच्यते दृशे कं सत्वेन सर्वेषां दर्शनाय सुखं यथा भवति तथा सर्वान् दर्शयितुं वा किं
च अरेपसा अपापया निर्मलया तन्वा शरीरेण शाशदाना शाशद्यमाना शाशदानः शाशद्यमान इति यास्कः स्पष्टतां गच्छन्तीत्यर्थः ॥ विभाति

विशेषेण प्रकाशयंती सा अर्भात् ह्रस्वात् पुलिंदादेः सकाशात् ईषते न गच्छति न महो अपि प्रकाशयति तथा महतो महतोऽर्वादेः सकाशात् ईषते न गच्छति B
नमपि प्रकाशयति पूर्वलोकद्वयं प्रकाशतेत्युक्तं इदानीं अल्पिल्लोकपरमाण्वादि पर्यंत पर्वत दृत्स्नं प्रकाशयतीत्यर्थः ॥ ॥ सप्तमीमृचमाह ॥ ॥ अ 1914
भ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानां ॥ जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥ ॥ अभ्रातेव अभ्रातृरहितेव पुंसः पित्रा
दीन् प्रति प्रतीची अभिमुखी यस्मात् प्रतिनिवृत्तमुखीसती एति गच्छति यथा लोके भ्रातृरहिता योषित्स्वोचितदायसालंकारादिलाभाय पितॄन्नतिसति भ्रा
तरि संस्कारयितृप्रदानादिना सम्यक् लोपयति न ददभाव्यस्वित रसमस्य प्राप्नोति ॥ यद्वा सति स्वभ्रातरि सति स एव पितुः पिंडदानादिकं संतानकृत्यं करोति तस्याः
भावात् स्वयमेव तन्तुं पुत्रादीन् गच्छति तद्वदियमुषा अपि स्वोचितप्रकाशादिलाभाय च प्रकाशदानाय वा पितृभूतं सूर्यमाभिमुख्येन गच्छति ॥ अथ
मकादृष्टांतः ॥ तथा धनानां सनये गर्तारुगिव स्वपरादृष्टांतः गर्त इति गृहनाम कदरगर्त इति तन्नामसु पाठात् अत्रोचित्येन राजपुरस्सदन्याय निर्णयभि
थाख्यितं स्थानमुच्यते ॥ तदारोहतीति गर्तारुक् यथा लोके कावचित् ह्रतभर्तृका योषित् नानां स्वकीयानि धनानां सनये लाभाय गर्तमारोहति तां तु सभ्याविचा
र्य दायं विभजंते च दृष्टः मंतास्यतदायं धनं वितरंति तथैयमपि धनानां प्राणिनां साधनानां प्रकाशानां सनये लाभाय गर्तमाकाशं सूर्यनिवासस्था
नं आरोहति दशविधोपचार सम प्रस्थेयं दृष्टांततः ॥ किंच पत्ये उशती कामयमाना सुवासा सादकृत्यादिशोभनवसना स्वलंकृता पूर्वं रजोदर्शनसमये मलिनवस्त्रा
सती स्नानानंतरं शोभनवस्त्राभरणादिना शोभना विशेषेण प्रतिभोगाय कांक्षती तन्न सद्हृसंक्रीडति तथा इयमुषाः आतिने शतांधकारणावृतत्वान्मलि
नवसनापि प्रभातत्वे तन्नसा अतनुवसना मती पतिस्थानीयेन सूर्येण साकं संक्रीडमाना हस्रेव हसंतीव अप्सः दंतस्थानीयानि रूपाणि नीलपीतादीनि
यद्वा निरूप्यमाणानि पदार्थजातानि निरिणीते निरिणीते गमयति प्रकाशयति प्रकाशयतीत्यर्थः ॥ यथा लोके काचिद्रमणी सायांपित स्मितव्याजेन दंतानाव
रणेन नयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः ॥ अयं मंत्रो निरुक्ते एवं व्याख्यातः ॥ अभ्रातृकेव पुंसः पितृन्न त्यभिमुखी संतानकर्मणे पिंडदा
नाय न पतिं गर्तारोहिणी व धनलाभाय दाक्षिणाजि गर्तः सभास्थाणुर्गृणातेः सत्यसंगरो भवति तंतत्र या पुत्रा या पतिका सारोहति तां तत्राक्ष
राघ्नंतिताति स्थं लभतइति ॥ जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दंतान् विवृणुत इति च ॥ ॥ अष्टमीमृचमाह ॥ ॥ स्वसा स्व
स्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ॥ व्युच्छंती रश्मिभिः सूर्यस्यांज्यंक्ते समनगा इव व्राः ॥ ॥ एकस्मादंतरिक्षादुत्पन्नत्वात् परस्परं स्व
स्वभावः ॥ तथाप्यन्दः प्राथम्यात् ज्येष्ठा रात्रिः ज्यायस्यै ज्यायस्यै स्वसे स्वसा रात्रिः स्वस्रे ज्यायस्यै ज्येष्ठायै योनिं उत्पत्तिस्थानं अपररा
त्रकपं प्ररेकू प्रादात् प्रेरयतीत्यर्थः ॥ तथा च पूर्वरात्रिकालं रात्र्युषसे योनिमारैगिति दत्वाच्च अस्याः इयं नाया उषसः प्रतिचक्ष्येव ज्ञापयित्वेव स्वय
मपसरत्य च गच्छति अपगच्छाम आगताया तस्य स्थानं दत्वा स्वयं तस्मान्नि धार्स्थात्तु मनुचितमितिविज्ञाय अपगच्छतीति भावः ॥ एषा मुषा अन्ये स्वसूर्यः
स्य रश्मिभिर्व्युच्छंती मायि वासयंती ॥ अंजि व्यंजकं तेजः अंक्ते अनक्ति प्रकाशयति किमिव समनगा इव सम्यगागमनहेतवः आपः समनाः नाग
छंतीति समनगाः विद्युतः विद्युत्त्वा इव यद्वा संघ इव यद्वा सम्यगमनाय गच्छंतीति समानगाः सूर्यरश्मयः ॥ न इव ज्ञाताः संघाभूताः तथा
त्रागतानि समनगाः संघीभूताः नयं जगत् प्रकाशयंति तथेत्यर्थः ॥ व्रात इत्यत्र नकारलोपश्छांदसः ॥ ॥ अथ नवमीमृचमाह ॥
आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ॥ ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छंतु सुदिना उषासः ॥ स्वसॄणां परस्परं स्वसृभा

भा॰अ॰२ वमा यं नानां स्वयं सरंतीनां वा पूर्वासां पुरातनीनां आसामुषसां मध्ये अहस्म अह्नः प्रतिदिनं अपराभ्यो अद्यतनीभ्यः पूर्वा अतीतदिवससंबंधिनी अ॰१
६ उषसं पश्यात् ॥ अनुसत्य अभ्येति अभिमुखं गच्छति ॥ अभ्यवधानेन गच्छतीत्यर्थः ॥ सर्वेषु ह इत्थं वमे वो अभ्येति नव्यसीः नवीयस्याः आगामिन्यः
ताः उषसः उषसो पितॄनं निश्चयेन प्रत्नवत् पुरातना इव सुदिनाः शोभनदिवसाः शोभनानि दिनमुखानि वा ॥ वस्वः अस्मे अस्माकं रेवत् धनविशि
ष्टं यथा भवति तथा उच्छंतु प्रकाशयंतु पूर्वतन्यो यथा उच्छन् तथा आगामिन्योपि उच्छंत्वित्यर्थः ॥ ॥अथ दशमीमृचमाह॥ ॥प्रबोधयोषः पृणतः
मघोन्यबुध्यमानाः पणयः ससंतु ॥ रेवदुच्छ मघवद्भ्यो मघोनी रेवत्स्तोत्रे सूनृते जारयंती ॥ हे मघोनि मघवति अस्मभ्यं दानाय धर्मबुद्ध्याभिधानेन स्तुति
उषः हे उषः मोदविहरणतः हविः प्रदानानस्मान्यजमानान् प्रबोधय प्रज्ञापय प्रबुद्धान् कुरु किंच पणयः व्यवहारसहिता वाणिजः पणिर्वणि
ग्भवतीति यास्कः पणयः अबुध्यमानाः यागादीन कुर्वाणा अदानशीलाः अस्मच्छत्रवः ससंतु स्वपंतु दीर्घनिद्रां भजंतु म्रियंतां
मित्यर्थः ॥ तथा च मंत्रांतरं ॥ ससंतु त्या अरातयो बोधंतु शूर रातय इति ॥ किंच हे मघोनि अस्मरेवत् हविर्भिस्तु इति हे उषः मघवद्भ्यः हविर्लक्षणया
न्नवद्भ्यो यजमानेभ्यस्तेषामर्थे रेवत् धनवत् समृद्धिमत् उच्छ विभाहि किंच हे सूनृते सू मनुष्याणां नेत्रि हवि जरयंती सर्वप्राणिनः क्षपयंती च
स्तोत्रे स्तुतिकर्त्रे यजमानाय तदर्थं रेवत् धनवत् समृद्ध्यर्थं उच्छ विभाहि ॥ ॥इति द्वितीयस्य प्रथमे अष्टमो वर्गः॥ ॥अथैकादशी॥ अवेयमश्वै
द्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकं ॥ वि नूनमुच्छादसति प्र केतुर्गृहं गृहमुपतिष्ठाते अग्निः ॥ इयमुषाः युवतिः यौवनोपेता यद्वा नित्यत
रुणा सर्वेषु भावेषु मिश्रयंती पुरस्तात् पूर्वस्यां दिशि अवाश्वैत् अत्यर्थं मागच्छति यथा तेषां ॥ अत्रावच्छब्दो विनिग्रहार्थीयः अवयतीति
निग्रहार्थः नावितिया स्वलोकात् कथमवगम्यत इति तत्राह इयं अरुणानां अरुणवर्णानां गवां प्रसिद्धानां एतन्नामकानामश्वानां वा अनीकं
समूहं युङ्क्ते रथे योजयति ॥ अरुण्यो गाव उषसां भावाः सवितुरिति यास्कोक्ताहन सेनाहं हृष्ट्वा प्रयाणमनुमीयते तथा आप्यरुणरश्मीनामश्वा
नां दर्शनात् उषा आगच्छतीत्यध्यवसीयते ॥ यद्वा अरुणानां रश्मीनां समूहं युङ्क्ते तथा नूनं निश्चितं एषा व्युच्छात् ॥ तमो विवर्जयिष्यति यतः इयं
गाः युनक्ति अतएव कारणात् यथा लोके सेनां दृष्ट्वा स्वामी अनुमीयते तथा आपीत्यर्थः ॥ ता दृशी सा असति असत्प्राय निरूपे अंतरिक्षे अति
रोधायकं विदंशा आभत ॥ तमसि वाकरः केतुरवनायात् ताप पवित्रीप्रकर्षेणावि विधं भासत इति शेषः ॥ उपसर्गवशात् योग्यक्रियाध्याहारः यद्वा अ
सति तमाः रूपेण अंधकारे प्रकेतुः प्रकर्षेण ताप विश्वासतीनूनं व्युच्छादिति पूर्वेणान्वयः ॥ तस्मिन् काले अग्निः आहवनीयादिरूपः गृहं गृहं सर्वयजमा
नगृहं अग्निहोत्राद्यर्थमुपतिष्ठति ॥ उपतिष्ठते दीप्यत इत्यर्थः ॥ ॥अथ द्वादशीमृचमाह॥ ॥उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभा
जो व्युष्टौ ॥ अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ ॥ते तव व्युष्टौ सत्यां वयश्चित् मनवंतः पक्षिणोपि वयः इति पक्षिशब्दा
र्थः ॥ निपातनाम नेकार्थत्वात् ॥ इत्थं वचेषर्थे पुनि पातं नीति यास्केनोक्तत्वात् ॥ वसतेर्निवासस्थानात् नीडादेः ऊर्ध्वं अपप्तन् पतंति पूर्वे
वीक्य गृहं गृहमुपतिष्ठति अन्विति कर्तत्वात् पक्षयापि शब्दः ॥ किं च ये नरश्च मनुष्याश्च पितुभाजः अन्नार्थिनः कृषिवाणिज्यादिकर्तारः स्व
स्वव्यापारार्थमुत उत्सुकाः अपप्तन् गच्छंति तथा मंत्रांतरं पद्वदीयत उत्पातयति पक्षिण इति एवसत्यां हे देवि देवनशीले उषो देवते अमा
गृहं गृहं यजनान्वेत स्यानिषते यजमानायतदर्थं ॥ आमेतिगृहनामअमा हमे इति तंनामसुपठितत्वात् ॥ यद्वा अमा सह हूयमानेनाग्निना ६

सहनिवसते यजमानाय अमावमनामित्यादौ सहार्थप्रयोगात् ॥ मर्त्याय मनुष्याय दाशुषे हवींषि दत्तवते यजमानाय भूरि वामं बहु शोभनं धनं वहसि प्रा
पयसि ॥ ॥अथ त्रयोदशीमृचमाह॥ ॥अस्तोढ्वं स्तोम्या ब्रह्मणा मेवीवृधध्वमुशतीरुषासः ॥ युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजं ॥
स्तोम्या हे स्तोतव्या उषसः यूयमरुणानां अस्मद्भिः स्तुता इति प्राप्य दत्ता पादाभिष्टं प्रार्थयते हे स्तोम्याः स्तोमस्तोत्रं तदर्हतीति स्तोम्याः स्तुत्यर्हा उषसः यतोयू
यं ना इत्थं अस्तोढ्वं अतो मम भवतेन ब्रह्मणा मत्कृतेन मंत्ररूपेण स्तोत्रेण अस्तोढ्वं स्तुता भवत किंच हे उषसः उशतीः कामयमानाः अस्मत्स्तुतिं कामयमा
ना यूयं वावृधध्वं अस्मान्वर्धयत किंच हे देवीः ॥ देव्यो देवनशीलाः युष्माकं अवसा युष्मत्कृतेन रक्षणेन वयं सहस्रिणं सहस्रसंख्याकं अभीष्टं धनं
शतिनं शतसंख्याकं च वाजं शतसंख्याकं अपरिमितं धनं सनेम युष्मत्कृतेन शतसहस्रपरिमितधनादिरूपरक्षणेन वयमपीत्यर्थिभ्यः ॥ सहः
स्रपरिमितस्य धनस्य सनितारो भवेमेत्यर्थः ॥ ॥इति द्वितीयस्य प्रथमे नवमो वर्गः॥ ॥प्रातारत्नमिति सप्तर्चं पंचमं सूक्तं कक्षीवतः स्वनयस्य भावय
तस्यत्वात् ॥ दानस्तवं यानेनाख्यते सा इवनीति पारभाषितत्वात् ॥ त्रिष्टुभं उपउत्यादिके द्वे जगत्यौ प्रातारत्नं सप्त स्वनयस्य दानस्तुतिरूपजगत्यावि
त्यनुक्रमणिका ॥ ॥तत्र प्रथमामृचमाह॥ ॥प्रातारत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ॥ तेन प्रजां वर्धयमान आयूरायस्पोषे
ण सचते सुवीरः ॥ ॥अत्रेतिहासमाचक्षते ॥ दीर्घतमसः कक्षीवान्नाम ऋषिः ॥ ब्रह्मचर्यं चरिष्यन् वेदाभ्यासाय गुरुकुले चिरकालमुषित्वा वेदान्
सम्यगधीत्य व्रतानि च चरित्वा तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयाण्यन् मध्यमार्गे रात्रौ विश्रांतः प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजा परिषदाप्ता
सर्वा यम नस्य मुपचर्याल्यमोदर्यमवगत्य सर्वां वक्त्वाय दानमनाः पप्रच्छ भगवन् कस्य पुत्रः किंनामासीति स चर्षिरात्मानं परिपृच्छय तं तं आचः
क्षाम च राजा तं भाव्य इत्य वगत्य मुदितमनाः स्वगृहं प्राप्य अस्मै मधुपर्कमारचय्य वस्त्रमाल्यादिभिः पूजयित्वा मरथा दश कन्याः दत्तनिष्कान् अश्वशतं
गुणवतां शतं गवां च पश्च तरः सहस्रं पुनरेकादश रथांश्च प्रादात् स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोंतिकमागत्य तस्मै प्रादर्शयत् तत्तेनुक स्थाना
माश्वं धनी राज्ञा दत्तं कक्षीवान् अस्थिवं धनं नरान् एवाचितं अतो स्वगतत्वात् प्रतिग्रहो नापपद्यते ॥ ब्राह्मणस्यैव याजनाध्यापने चेष्टिविशुद्धाच्च
प्रतिग्रहउक्तत्वात् ॥ तस्माद् ब्राह्मणस्याधिकारान् तु क्षत्रियस्येति ॥ नेष दोषः ॥ यद्यपि सौवर्णिकाव्यस्य राजः पुत्रस्तथापि तेनेयत्वयं ब्रा
त्वात् ॥ अपत्यार्थसरेणायमानं अंगसमाननतप्यात् तात्र याचितादीर्घतमा ऋषिः उशिक्नाम कां अपत्यार्थसाद्दमायप्रेषितवान् तथा राज्ञ महिः
व्या भवतित्वनमहर्विणा महर्षं तुल्ये समान योनेकन्या भवति तत्पुत्रपातिनिधित्वेन प्रेषिता मुशिक् नामिकां याचितां दासीमित्यवगत्य मंत्रपूतेन
जलेनाभिषिच्य कृपा पुत्रीकृतात्तया सह रेमे तदुत्पन्नः कक्षीवान्नाम ऋषिः एतत्सर्वं अस्माभिः पूर्वाध्याये नासत्याभ्यामित्यत्र सूक्ते सविस्तरेण प्रति
पादितं अतो स्वस्त्रियस्य वंशे जातः कक्षीवानिति नामोपपन्नं दीर्घतमसः पुत्रमर्षेः सत्त्वेन ब्राह्मणत्वात् प्रतिग्रहोप्युपपन्नः एवमिदं सूक्तं यंस्व
नयस्य राज्ञो दानप्रशंसाख्यानप्रतिपादकं ॥ तत्त्वनुक्रमण्यां स्वनयस्य दानस्तुतिरिति दानस्तुत्याभावयव्यं तु स्वावति वाभयत्र स्तोतव्यभिन्नमवानु
गम्यत इति उच्यते उत्तरत्र तस्य प्रथमा यासृचि अभिधीयते भाव्यस्यापि दानुर्भावयव्यस्य श्रूयमाणत्वात् तस्याप्यमुपलक्ष्य गुणपात्वं वस्तुतस्तु
पितुर्नाम्ना पुत्रस्यापि व्यवहर्तव्यत्वात् ॥ तथा अरद्वासहः देवावहूतः प्रयोगदर्शनात् स्वनयेनदत्ता इति तत्रैव सूक्ते नयस्यापि श्रूयमाणत्वाच्चाभ
य वापिदातृप्रतिग्रहीत्रोरेकत्वेन कमेवदानप्रशंसारूपं आख्यानमिति प्रसिद्धमतः कक्षीवानामितं सर्वं पितुर्निवेदयन् पुरस्त्रेण दानप्रकारं

भा·अ·२ नांसनिस्तन यो नाम राजा प्रातरित्वा प्रातरेवागमनः स कक्षीवानागतः मन रत्नं रमणीयं निधि धनादिकं प्रातः प्रभातकाले दधाति अस्मभ्यं निधाय स्थापयति ददा
१ तितं स्थापितं रत्नं सर्वं चिकित्वान् चेतमानः जानन् अदुष्टमित्यवगतवान् प्रतिगृह्णाति तेन धनेन प्रजां पुत्रादिकं प्रजांश्च ... अनंतरं तेन दत्तेनानि धनानि प्रजां
पुत्रभृत्यादिरूपां वर्धयमानः पोषयन् आयुर्जीवितं च वर्धयन् सुवीरः शोभनवीरैः पुत्रभृत्यादिभिरुपेतः सन् रायस्पोषेण धनानां पुनः पुनर्वर्धे
नेन सचते सेवते राजा सत्ताभिमितिते वदानुशासि ष यं प्रार्थयते ॥ ॥ अथ द्वितीयामृचमाह ॥ ॥ सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इंद्रो दधाति ॥ य
स्त्वायंतं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥ ॥ अत्र कक्षीवतः पिता आनीतेन धनेन संतुष्टं राजानं बहुप्रकारेणाशास्ते ॥ असौ स्वनयो राजा सु
गुरसत् शोभनैर्बहुभिर्गोभिः सहितो भवतु तथा सुहिरण्यः शोभनहिरण्येन धनेन सहितो भवतु तथा स्वश्वः शोभनैरश्वैः सहितो भवतु अस्मै प्रदात्रे राज्ञे
बृहत् प्रभूतं वयः अन्नं इंद्रः परमेश्वरो धर्मदेवता दधातु धारयतु यो राजा बहुसंख्याकानि दत्तवान् अतस्तेषामभिवृद्धिं प्रार्थयते चि
तेन कस्य च मार्गादिति सउच्यते यः राजा प्रातरित्वः प्रातरागामिनः त्विषिं पुत्र आयंतं गुरु कुलादागच्छंतं पथिकं यद्दृच्छया गंतारं त्वा त्वां वसुना अन्न
साधनेन गवादिधनेन सिनाति गमनतः उत्संबध्नाति गतिनिरोधं करोतीत्यर्थः ॥ प्रतिबंधदृष्टांत उच्यते मुक्षीजयेव पदिमुच्यमाना सती बंधनं प्रयती
मुक्षी तिं जामृगपक्ष्यादिबंधनार्थं रज्जुस्तथा पाशया परिगंतारं मृगपक्ष्यादिकं उत्सिनाति बध्नाति तथा मया अननुज्ञानमपि त्वां गमनं प्रति गवाद्यभीष्ट
दानेन यो राजा त्रातायति ॥ स एवंभवत्विति तं तुरिति पदं व्याचक्षाणेन यास्केन तदुदाहरणतया मंत्रो व्याख्यातः ॥ सुगुरसत्सुहिरण्यः स्वश्वो
बृहदस्मै वय इंद्रो दधाति ॥ यस्त्वायंतं मनेन प्रातरागामिनमतिथिं मुक्षीजयेव पदिमुत्सिनाति ॥ कुमारो मुक्षीजामावनाचसयनाज्वततनोत्यति ॥
॥ ॥ तृतीयामृचमाह ॥ ॥ आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ॥ अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥
॥ प्रातः पूर्वेद्युः प्रभातकाले यद्धनं लब्धवान् स्मि तस्मिन्नेव काले सुकृतं शोभनस्य कर्तारं त्वां इच्छन् प्राप्तुमिच्छन् कुलादुत्स्यामीति कामयमा
नोहं अद्यास्मिन्दिने इदानीं आयं प्राप्तोस्मि अत्राद्य शब्दः केवलं प्रातरित्यवश्रुतः न पूर्वेद्युरिति तथापि अद्यायमित्युक्तत्वादर्थात् पूर्वेद्युः प्रातरिति
गम्यते कीदृशं इष्टेः इष्टस्य इष्टसाधनस्य यागस्य वा पुत्रं पुत्रातारं पुत्रः पुरुत्रायत इति यास्कः कर्तारमित्यर्थः ॥ केन साधनेनेति तदुच्यते वसु
मता रथेन समृद्धधनवता रथेन साधनेन यद्वा तेन सहित इति सहार्थे तृतीया किंच मदत्तेन समृद्धेन धनेन अंशोः अंशुमतः वल्लीरूपस्य
मत्सरस्य मादनसाधनस्य सोमस्य मत्सरः सोमो मंदतेस्तृप्तिकर्मण इति निरुक्तं तस्य सुतं अभिषुतं रसं संपाद्य आत्मानं पायय इष्टसाधनं सोमया
गं कुर्वित्यर्थः ॥ एताच क्षयद्वीरं क्षयंतो निवसंतो वीराः पुत्रभृत्यादयो यस्य तं तादृशं त्वामिष्टसाधनप्रदातारं सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भि
र्वर्धयस्व समृद्धं कुरु ॥ पुत्रभृत्यादिभिर्यथा प्रवृद्धो भवति तथा कामयेत्यर्थः ॥ ॥ अथ चतुर्थीमृचमाह ॥ ॥ उप क्षरंति सिंधवो मयोभुव ईजा ७
नं च यक्ष्यमाणं च धेनवः ॥ पृणंतं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यंति विश्वतः ॥ ॥ पूर्वस्यामृचि आनीतेन धनेन सोमयागं कुर्वित्युक्तं तमेव
सोमयागं फलप्रदर्शनेन स्तौति सिंधवः स्यंदनशीलाः प्रस्तुतपयोधराः सिंधुः स्यंदनादिति यास्कः ॥ मयोभुवः सुखभावयित्र्यः मय इति सुखनाम
मयः सुखं कमिति तन्नाम सुपाठात् ॥ धेनवः प्रीणयित्र्यो गावः ईजानं सोमयागे मनुतिष्ठंतं तथा यक्ष्यमाणं यक्ष्यन्नपि कुर्वंतं च न केवलमीजा
नं अपि तु यक्ष्य इत्यध्यवसितवंतमपि उपक्षरंति स्रवंति प्रीणयंतीत्यर्थः ॥ न च पूर्वस्यामृचि सोमं पिबेत्युक्तत्वात्सर्वेषां सोमयागानां अग्निष्टो

मात्मकत्वादग्निष्टोमस्य प्रकृतत्वाज्ज्योतिष्टोमेन स्वर्गकामो यजेतेति स्वर्गफलत्वेन श्रुतः न गवादिकमिति वाच्यं स्वर्गवत् गवादिकामनयापि सोमयागकर्तृत्व 17
श्रवणात् ॥ न केवलं सोमयागमनुतिष्ठतामेव महत्फलं ॥ अपि तु सुकृतसाधनानि कर्माणि तानि अधितिष्ठतामपि महत्फलमस्त्येव तिदर्शयति ॥ पृणंतं पि 1914
तृन् प्रीणयंतं पपुरिं प्रीणानशीलं दृष्टदानात् प्राणिनः सर्वदा प्रीणयंतं च पुरुषं श्रवस्यवः अन्नमिच्छंत्यः अत्र समृद्धिहेतवो घृतस्य धाराः घृतघृतकुल्या
विश्वतः सर्वतः उपउपेत्य यंति प्राप्नुवंति प्रीणयंतीत्यर्थः ॥ ॥ अथ पंचमीमृचमाह ॥ ॥ नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ॥
तस्मा आपो घृतमर्षंति सिंधवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥ सोमयागप्रशंसाप्रसंगेन सामान्यतो दानमेतदादिभिः प्रस्तौति यद्वा सोमस्य च प्रस्तुत
त्वाद्दक्षिणाया दत्तस्य यागस्य प्रसिद्धत्वाच्च सर्वत्रापि समासः सोमयागएवैतत्प्रस्तूयते ॥ यः यो मर्त्यः पृणाति हविरादिदानेन देवादीन् प्रीणाति स
नाकस्य कमिति सुखनाम तद्विरुद्धमकं न विद्यते अकं दुःखं यस्मिन् स नाकः स्वर्गः तथा श्रूयते ॥ अनवा अमुं लोकं जग्मुषे किंचनाकमिति ॥ तस्य
पृष्ठे उन्नते उपरिदेशे श्रितः सन् अधि अधिकं अकल्याणं तिष्ठति यद्वा ॥ अधितिष्ठति अधिष्ठाय प्रमुखो भूत्वा तिष्ठति ॥ न केवलं स्वर्गाश्रयणं किंतु देवेषु
मध्ये गच्छति वर्तते स्वयमपि देवो भवतीत्यर्थः ॥ किंच यं भूमिरपि दक्षिणा सस्यादिफलसंपादनदक्षा सती सा सर्वकालं पिन्वते सेचयति तर्पयतीत्यर्थः
॥ दानुः जीवनसाधनानि क्षेत्राणि रचिताणि सेचयति ॥ ॥ षष्ठीमृचमाह ॥ ॥ दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ॥ दक्षिणावंतो अमृ
तं भजंते दक्षिणावंतः प्र तिरंत आयुः ॥ दक्षिणावतां बहुविधगोहिरण्यादिरूपदक्षिणाप्रदातॄणां इदुत्वदेव कोशेवरार्थः ॥ तेषामेवार्थे इमानि भूमौ दृश्य
मानानि चित्राणि चायमानानि पूजनीयानि वस्त्रकंबलमणिमुक्तादिरूपाणि द्रव्याणि समस्थानि भवंतीति शेषः ॥ किंच दक्षिणावतामेव दिवि द्युलोके सूर्यासः सूर्य
संबंधिनो लोकास्तदनुप्रदातारो कांतासमस्या भवंति ॥ किंच दक्षिणावंत एव अमृतं जरामरणरहितं स्थानं भजंते सेवंते यद्वा दानेनापहतपाप्मा
न आत्मानं विदित्वा अमृतमविनाशनं मोक्षं भजंते प्राप्नुवंति यतो दानेनेति श्रुतेः ॥ किंच दक्षिणावंत एव आयुः प्रतिरंते अतिदीर्घमेवमायुर्वं
वर्धयंते फलं तत्र प्रवृत्तिरत्नवर्धनार्थः ॥ इष्टिरिति सर्वत्र संबध्यते ॥ ॥ अथ सप्तमीमृचमाह ॥ ॥ मा पृणंतो दुरितमेन आरन्मा जारिषुः सूर
यः सुव्रतासः ॥ अन्यस्तेषां परिधिरस्तु कश्चिदपृणंतमभि सं यंतु शोकाः ॥ ॥ अन्वयव्यतिरेकाभ्यां दानं प्रशंसितुमाह ॥ पृणंतो हव्यादीनि हविरादिना
प्रीणयंतः ॥ संतः दुरितं दुष्टं यथा भवति तथा प्राप्तं दुःखं तत्साधनं पापं च मा आरन् मा प्राप्नुवन् न केवलं दातार एव ॥ अपि तु सूरयः देवानां स्तोता
रोपि विद्वांसो मा जारिषुः जरया जीर्णा भवंतु ॥ तथा सुव्रतासः शोभनकर्मणोऽग्रायणादिनियमवंतोपि मा जारिषुः तदेवोक्तं भजनः क इति स उ
च्यते ॥ तेषां दातॄणां चान्यस्त्वन्योन्याय कोपि पुरुषः परिधिः पापस्य परितो धारकोस्तु यद्वा अन्योयः कश्चन पापदृष्टस्तेषां परिधिस्थानीयोस्य
व्यवधायकोस्तु यथाग्नेः परिधिः स्वयं रक्षः प्रभृतिभिर्बाध्यमानः स्वांतर्हितमग्निं रक्षितवान् तद्वत् ॥ अथवा अन्याधर्मो विद्राप ॥ तेषां परिधिः
परिधानमस्तु कवचस्थानीयोस्तु ॥ तर्हि किं त्रास्यमित्युच्यते ॥ अपृणंतं हव्यादीनामप्रीणयंतं अदातारं शोकाश्चित्तपीडास्तत्साधनाः पाप्मा
नो अभि अभिमुखं सं यंतु सम्यक् प्राप्नुवंतु यं सुखिनो भवेमेत्यर्थः ॥ ॥ इति द्वितीयस्य प्रथमे दशमो वर्गः ॥ ॥ अमंदानिति पंचर्चं सूक्तं
समेत्य नु वर्तमानात्मव देवता यातेनोच्यत इति न्यायात् ॥ अंत्ययोः षष्ठीसप्तम्योस्तु भावयव्यरोमशायाः संवादः भावयव्यः सप्तम्यारो
मशाय घापिस्वनयेन दत्ताद्दृतिश्च यमाणत्वात् तस्यैव स्तुत्या भाव्यं तथापि पितृपुत्रयोरभेदात् आरदासद इति च तपितृनाम्नाव्यव हर्तुं भाव्य

भा० अ०२ न प्रथमा याम्यृचि भावयव्यस्योक्तत्वात् भावयव्यं प्रति स्वस्या दातृत्वं दर्शितम् । पूर्वं सन रेवत् ॥ आदितः पंचर्क्षु त्रिष्टुभः अंत्ये अनुष्टुभौ तथा चानुक्रांतं अ अ०२
मंदानिति कक्षीवान् दानस्तुतिः पंचभिर्भावयव्यं तुष्टावांत्ये अनुष्टुभौ भावयव्यं ॥ रोमशायोः संवाद इति ॥ उक्तो विनियोगः ॥ ॥ तत्र प्रथमा
८ मृचमाह ॥ ॥ अमंदान् स्तोमान् प्र भरे मनीषा सिंधावधि क्षियतो भाव्यस्य यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥ ॥ सिंधुदेशे यद्वा
तक्षणयासिंधुतीरसमुद्रतीरे अधिक्षियतः अधिनिवसतो भाव्यस्य भावयव्यस्य स्वनयस्य राज्ञो यस्येत्यर्थः ॥ तस्य अमंदान् अनल्पान् स्तोमान् स्तोत्रा
णि तन्निमित्तं हविर्धदानार्थं कीर्तनानि मनीषया मनीषया प्रियया बुद्ध्या प्र भरे प्रकर्षेण संपादयामि कृत्स्नस्या विद्धय इति वा आह ॥ अतर्तः
कृतार्थ्यहिंसितो योराजा मम दर्थं सहस्रं तत्संख्याकान् सवान् सवनं सोमाभिषवं सवाः सोमयागाः तान् अमिमीत संपूर्णधनप्रदानेन निर्मितवान् कु
मित्युत श्रवः श्रवणीयं श्रूयमाणं कीर्तिमात्मन इच्छमानः कामयमानः यतो यं स्वार्त्विज्यादुपाधिना विनाकीर्त्यमेव धृधनं प्रादात् ॥ अतस्तं स्तौमीत्यर्थः
॥ ॥ द्वितीयामृचमाह ॥ ॥ शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान् प्रयतान् सद्य आदं ॥ शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥ ॥
नाधमानस्य स्वीकर्तव्यमित्यभियाचमानस्य असुरस्य धनानां निरसितुः दानशीलस्य राज्ञः स्वनयस्य भाव्यस्य स्वनयस्य निष्कान् आभरणवि
शेषान् इयतां विशिष्टवर्णविशिष्टानि वा सुवर्णानि शतसंख्याकानि शतं सहस्रमित्यपरिमितवचनं अपरिमितान् सद्यः प्रार्थनानंतरमेव कक्षीवान्
ऋषिः आदं आदत्तवान् स्वीकृतवानस्मीत्यर्थः ॥ तथा प्रयतान् शुद्धान् लक्षणोपेतान् अश्वान् अश्वगमनसमर्थान् शतं हयान् आदं आदत्तवान् तथा गोनां
पुंगवानां बलीवर्दानामित्यर्थः ॥ इतरमंत्र स्त्रीगवीनामभिधानात् ॥ तेषां शतं आदं एवं प्रदातारो असुरस्य दिवि द्युलोके श्रवः कीर्तिं अजरं जराहीनं स्वनयेन दत्ताः
अनत्यानविस्तारितवान् गवादि प्रतिग्रहेणाजरं स्वर्गकीर्तिं सकरवमित्यर्थः ॥ ॥ तृतीयामृचमाह ॥ ॥ उप मा श्यावाः स्वनयेन दत्ता वधूमंतो दश रः
थासो अस्थुः ॥ षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ॥ ॥ स्वनयेन दत्ताः श्यावाः श्यामवर्णाश्वैर्युक्ता वा नश्यावाः वधूमंतः
आरूढाभिर्वधूभिस्सहिताः दश दशसंख्याकाः रथासो रथाः उप मा अस्थुः उपस्थिताः ॥ गव्यः संघः षष्टिः सहस्रं षष्टिसहस्रसंख्याकं अनु आगात् अनुक्रमेणागमत् ॥ कक्षीवान् अह्नां दिवसानां
ध्ये अभिपित्वे संनिहिते दिनसमाप्तौ अभिपिते सनत् सर्वं प्रतिगृह्य प्रतिगृहीतं एतदर्थं पितृसमीपं प्रत्यर्पयति स्वयं स्वीकरोति अभिपित्वे अभिपितशब्द आसन्नकालवाची प्रपित्वः
शब्द इति वत् स च प्रपित्वशब्दः दूरवाचीति शब्दस्वभावात् आसन्नवचनः अभ्युपसर्गभेदस्यार्थभेदः ॥ ॥ अथ चतुर्थीमृचमाह ॥ ॥ चत्वारि
ंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयंति ॥ मदच्युतः कृशनावतो अत्यान्कक्षीवंत उदमृक्षंत पज्राः ॥ ॥ दशरथस्य दशसंख्याकरथस्य वनः सहस्र
स्य सहस्रसंख्याकानुचराणां प्रेताः अस्य कक्षीवतो मार्गे पृथक् सहस्रस्याग्रे श्रेणिं पुरस्तात् शोणाः शोणवर्णोपेताः अश्वाः चत्वारिंशत् एकैकस्य चतुरः
श्वा इति दशरथानां मिलित्वा चत्वारिंशदश्वा भवंतीति विश्रेणिं पंक्तिं आश्रित्य नयंति रथान् अभिमतदेशं प्रापयंति युक्ताः स्वनियुक्तान् श्रेणिश्रेणीः
भावं नयंति प्रापयंति एकैकं रथं चत्वारश्चत्वारः पंक्त्याकारेण वहंतीत्यर्थः ॥ अथ तान् कक्षीवंतः कक्ष्याश्वसंबंधिनी रज्जुः कक्ष्या रज्जुरश्वस्य
ति यास्केनोक्तत्वात् ॥ ताभिस्सहिताः यद्वा अंगिरसः पुत्राः सर्वे पिककक्षीवंतः अथवा कक्षीवदनुचराः सर्वोपि उक्तिन्यायेन कक्षीवंतः पज्राः वासाव
नयंतः संतो मदच्युतो मदस्राविणः उद्धतान् मा क्रमणं मदस्य व्याच्यवितृन् कृशनावतः सुवर्णमयनानाभरणयुक्तान् कृशनमिति हिरण्यनाम कृश
नं कोऽहमिति तन्नाम सुपाठात् ॥ सुवर्णाभरणोपेतान् अत्यान् सततगमनशीलान् अश्वान् उदमृक्षंत अध्वश्रमजनितश्वेदापनयनाय उल्ल
ंघ्य मार्जयंति ॥ ॥ अथ पंचमीमृचमाह ॥ ॥ पूर्वामनु प्रयतिमा ददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ॥ सुबंधवो ये विश्या इव व्रा अनस्व ८

तश्रवः ऐषंत पज्राः ॥ इदानीं आनीतं धनं बंधुभ्यो निवेदयन्नाह ॥ ॥ हे सुहृदः सर्वं धनं पूर्वां प्रयतिं पूर्वं प्रदानं अनुलक्ष्य अनुसृत्य वक्ष्यमाणान् रथादीन् युष्म 19
भ्यं ददे स्वीकृतवानस्मि बहुधा पूर्वाप्रयति प्रदेयं रथादिकं ॥ अनुदानक्रमेण वा आददे प्रतिगृहीतवानस्मि कानि तानीति त्रीन् रथान् युक्तान् चतुर्भिश्चतुर्भिः 1914
रश्वैर्धर्मनेतां युक्तान् रथानिति शेषः ॥ अत्र संख्याश्रुत्याभिर्दशानां वक्तव्यत्वेन ॥ तथा अरिधायसः अरिभिरश्वैर्धरणीयाः बहुसंख्या असंख्याताः
गा अष्टादश अत्र वक्ष्यमाणानि पूर्वं प्रतिगृहीतादधिकानीति युक्तं पूर्वं मयापि त्वत्र निवहितानां पुनर्बंधुभ्यो निवेदनासंभवात् वधूमंतो दश रथा सो अस्थुरिति
दशानां रथानां मुक्तत्वात् इत्यत्र न वाच्यम् विकाद्दशानां वक्ष्यमाणत्वात् वधूविशिष्टानामन्येभ्यो दानमनुचितत्वात् अन्यानीति युक्तं ॥ युक्तानामयानुवदन
पश्चाद्दशवधूयुक्तरथाः ॥ एकाधनपूर्ण इति विवक्षा ॥ युक्तानामेवरथादीनां पुनरभिधानं प्रकृतत्वज्ञापनार्थं सर्वे आल्हणा आगताः वसिष्ठश्चागत
इतिवत् ॥ इदानीं पज्राः सुबंधवः शोभनाविधायानि संबंधिनो येषां ते तथोक्ताः ॥ यद्वा शोभनबांधवोपेताः परस्परमनुरागयुक्ता इत्यर्थः
विश्याः प्रजाः तत्र भवा विश्याः विशं इतीत्राः ॥ व्रा नाम कार्योपश्लेषः ॥ विशां व्रातायथा परस्परमनुरागवंत स्थितैरपीत्यर्थः ॥ पज्राः अंगि
रसः संतानप्रभवा ये संति सर्वे पुत्राः श्रवः अनस्वंतः शकटवंतः हविर्धानशकटोपलक्षितसोमयागवंतः संतः श्रवः सर्वत्र श्रूयमाणां कीर्ति
ं एन इच्छतु वा दर्थमादर इति शेषः ॥ ॥ अथ षष्ठीमृचमाह ॥ ॥ आगधिता परिगधिता या कशीकेव जंगहे ॥ ददाति मह्यं यादुरी याशूनां भोज्या
शता ॥ ॥ संभोगाय प्रार्थिता भावयव्यः सभार्यां रोमशामप्रौढेति बुध्या परिहसन्नाह ॥ आ समंतात् गध्या गध्या अगधिता आसमंतात् गृहीता स्वी
कृता तथा परिगधिता परितो गृहीता आ दृढालिंगनाय पुनर्यत्नेन गध्यं गृह्णातेरिति यास्कः ॥ यद्वा आगधिता असमं तामिश्रयंती आंतरं प्रज्ञानेन
ज्ञेन वा संभुज्यादिभिरित्यर्थः ॥ गध्यतिर्मिश्रीभावकर्मेति यास्कः ॥ पूर्वस्मिन्पक्षे पुरुषस्य प्राधान्यं ॥ उत्तरस्मिंस्तु योषित इति भेदः ॥ कीदृशी सा जंघ
ह अत्यर्थं गच्छति ॥ कदाचिदपि न मुंचति ॥ अत्या गृहणातः कशीकेव कशीका नाम नकुलवसान पुंसां यथा पत्या सह रमते कालं का उत्तिन कदाचिद
पि न मुंचति ॥ नर्थं या अपि ना काव भोज्यायायादुर्याया दुरिस्युच्यते नामरेतोलक्षणमुदकं प्रभृत ददातीति यादुरी बहुरेतोयुक्तेत्यर्थः ॥ तादृशी स
ती याश्वानां संभोगानां शता इति प्रजननामतत्वानि वर्धानिकर्माणि याश्वानि भोगा तं एतानि शतसंख्यातानि मह्यं ददाति ॥ रोमशा नाम बृहस्पतेः
पुत्री ब्रह्मवादिनी परिहसंतं स्वपतिं प्रत्याह ॥ ॥ अथ सप्तमीमृचमाह ॥ ॥ उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ॥ सर्वाहमस्मि रोमशा गंधा
रीणामिवाविका ॥ ॥ भावयव्यं प्रति पत्नी रोमशा आह ॥ उपोप द्वितीय उपशब्दः पादपूरणः उपेत्य परामृश अस्य कृत्स्नशः भागयोग्या भवत्येत्य
र्थः ॥ यद्वा मम भगमर्माणि गंगं उपोप परामृश अत्यंतमातरं स्पृश परामर्शाभावे बालकांतिनिवारयति मम दंगानि रोमाणि दभ्राणि मा मन्यथाः अल्
पानि मा बुध्यस्व ॥ दभ्रमर्भकमित्यल्पाभास्यानि निघंटुः दभ्रं दभ्नातेरिति यास्कः ॥ अदभ्रत्वमेव विशदयति ॥ अहं रोमशा बहुरोमयुक्तास्मि
युवतामदृशी अतः सर्वासं पूर्णावयवास्मि रोमशत्वदृष्टांतः ॥ गंधारिणामविका गंधारा देशाः तेषां संबंधिन्यविजातीरिव तद्देशस्था अव
योमया यथा रोमशः तथाहमस्मि ॥ यद्वा गंधारीणां गर्भधारिणीनां स्त्रीणां अविका अत्यर्थं द्रपति यां रवि तासां अत्यव रोमशेति कृत्स्न
स्य रोमस्य निष्पिद्गत्वा सानिः रोमशा भवति ॥ यतो हमीदृशी अतः अत्रोढां मा बुध्यस्वेत्यर्थः ॥ ॥ इति द्वितीयस्य प्रथमे एकादशो वर्गः ॥ ॥
विंशेनुवाके सप्त सूक्तानि तत्र अग्निर्होता रमितिप्रथमं सूक्तं एकादशर्चं दिवोदासपुत्रस्य परुच्छेपस्यार्षं आग्नेयं अत्यष्टं सलिखार्धं इत्य

भा॰ अ॰ २ स्या म इत्यस्य अत्यष्टिर्धृतिरुक्त्या इति विरुक्त्या इति प्रकृतिरुक्त्या इति धृत्यष्टिषु चतुरक्षराधिक्यात् अष्टिमारभ्य चतुर्णां परित्यागे नैकैकं क्रमेण छंदो ज्ञायते तेन अ॰ १
अत्यष्टि तिधृती इत्यस्मात्यावर्तमानानां प्रत्यर्चं छंदो ग्रंथेन चतुःशतमुक्तं तिरित्यादिसूक्ते प्रतिपादितं तथा चानुक्रांतं अग्निं मन्ये एकादश परुच्छेपो दैवोदा
१ सिर्नवर्चं तु चारुक्छेपं सर्वमात्यष्टं॥ तत्राति धृतिः षष्ठीतिभिः सूक्तस्य विनियोगो लैंगिकः॥ दशरात्रस्य पंचमेऽहनि प्रातःसवने प्रउगशस्त्रे याज्यानां
पुरस्तात् अभ्यवरूढाः प्रातःसवनस्य इत्यस्य॥ तत्राग्नी ध्रस्य याज्या प्रथमा॥ वचस्य प्रातःसवन इति खंडे सूत्रितं॥ अग्निं होतारं मन्ये दास्वंतं दध्यङ् इ
मं जनुषं पूर्वो अंगिरा इति॥ ॥सैषा प्रथमा॥ ॥अग्निं होतारं मन्ये दास्वंतं वसुं सूनुं सहसो जातवेदसं॥ विप्रं न जातवेदसं॥ य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा॥ घृत
स्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः॥ ॥अग्निं सर्वासां देवसेनानां अग्रणीयं यजेष्वग्रे नीयमानं होतारं अस्मद्यागं प्रति देवानामाह्वा
तारं यद्वा होमनिष्पादकं होतारं जुहोतेर्होता निर्वचनं भवति इति यास्कः॥ आग्निमग्ने होतारमवृणीत इति श्रुतेः॥ अग्निमग्न आवह इति च अग्ने रहोः
तत्वं प्रसिद्धं अग्निं होतारं मन्ये एवं प्रतिविशेषणं मन्य इति संबंधः यद्वा यागनिष्पत्त्यर्थं दातारं दास्वंतं प्रशस्तं प्रदानवंतं... हविः दधाति वसुं स्थाण
विशेषणानि स्तुतिपराणि दास्वंतं अतिशयेन दानवंतं वसुं सर्वेषां निवासहेतुं सहसः सूनुं बलस्य पुत्रं आग्निं मथ्यमानं बलेन मथ्यमानः उत्पद्यत इ
ति पुत्रत्वमुपचर्यते॥ जातवेदसं जातानां वेदितारं जातप्रज्ञं जातवित्तं वा जातवेदाः जातमस्मिन्नेव बहुधानिरक्ताः॥ अग्ने जातवेदः इत्युक्तं॥ विप्रं न जात
वेदसं जातविद्यमेधाविनं ब्राह्मणमिव तं यथा बहुमन्यते तथा तमपि मन्ये स्तोमीत्यर्थः॥ इत्थं गुणविशिष्टो योऽग्निः स्वध्वरः शोभनयज्ञवानसन् सत्यक्
निर्वहन् ऊर्ध्वया उन्नतया ऊर्ध्वया देवाच्या देवान् प्रति यया देवान् प्रत्यक् अंचति तया कृपया सामर्थ्यलक्षणया देवो देवान् प्रत्यक् भावं उपैति यास्कः॥
तेभ्यो हविर्वहन् बुद्ध्यायुक्तः सन् आजुह्वानस्य आसमंताद्धूयमानस्य सर्पिषः सरणशीलस्य घृतस्य विभ्राष्टिं विलापनेन दीप्यमानस्य दीप्तिं शोचिषा
णाजायमानं अनुस्वयमपि तद्राज्यं शोचिषा ज्वालया प्रसिद्धकामयते स्वीकरोतीत्यर्थः॥ ॥अथ द्वितीयामाह॥ ॥यजिष्ठं त्वा यजमाना हुवेम ज्ये
ष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः॥ परिज्मानमिव द्यां होतारं चर्षणीनां॥ शोचिष्केशं वृषणं यमिमा विशः प्रावंतु जूतये विशः॥
॥हे विप्र मेधाविन् शुक्र दीप्तालाग्ने यजिष्ठं अतिशयेन यष्टृतमं त्वां त्वां यजमानाः वयं यष्टारः हुवेम आह्वयामः यतो वयं यजमानाः यतः
श्रितं यजिष्ठः अतो हवेमेत्यभिप्रायः कीदृशं त्वां अंगिरसां अंगारात्मानां मध्ये ज्येष्ठं वा मा आयुक्तान्दंगिरा अंगारा इति यास्कः॥ अंगिरसो भव
न्निति श्रुतेः॥ केन साधनेनेति तदुच्यते॥ मन्मभिः मननसाधनैर्विप्रेभिर्विशेषेण प्रीणयितृभिर्मन्मभिर्मंत्रैः द्वाविप्रेभिर्मेधाविभिः शुक्लिगाभिर्म
न्मभिर्मंत्रैः सहितावयमिति संबंधः त्वद्वारा होतारं परि ज्मानं परितो गच्छंतं द्यामिव सूर्यमिव होतारं देवानामाह्वातारं कं यो कोपा सर्वे च चर्षणीनां
मनुष्यनामैतत् मनुष्याणां यजमानानां मर्त्याय ह्यर्थं षर्णीनां पूर्वं मनुष्याणामेव सतां पश्चाद्यागादिसाधनेन देवत्वमापन्नानां देवानामाह्वातारं
तथा शोचिष्केशं शोचींषि केशा यस्य तं ज्वालोपेतं वृषणं वर्षितारं एवं रूपं यं त्वा विशस्त्वामेव निविश्यमानाः यजमानरूपाः प्रजाजूतये स्वगोष्टः
मिमतफलप्राप्तये प्रावंतु प्रकर्षेण प्रीणयंतु तं त्वां हुवेमेति संबंधः॥ ॥अथ तृतीयामाह॥ ॥स हि पुरू चिदोजसा विरुक्मता दीद्या
नो भवति द्रुहंतरः परशुर्न द्रुहंतरः॥ वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं॥ सहि स एवपूर्वं स्तुत एवाग्निर्विरुक्मता विशेषेण रोचन वता ओ २
जसा ज्वालारूपेण बलेन पुरु चित् आधिकमेव दीप्यमानः दीप्यमानः द्रुहंतरः॥ द्रोग्धॄणां हिंसनाय प्रयुक्तः द्रुहंतरः परशुर्न परशुरिव स यथा

1914
अमोघं छिनत्ति तथा मयि॥ किंच यस्याग्नेः समृतौ संगतौ संयोगे वीळु चित् दृढमपि पाषाणादिकं श्रुवत् गच्छेत् शीर्यते तथा यथा यच्छिरं यच्च पर्वता
दि स्थिरमन्यत् स्थितं तदपि शीर्यत इति वीळितिदृढनाम वीळु च्यावितेति नामसु पाठात्॥ तत्र दृष्टांतो वनेव उदकमिव उदकं यथाग्निसंयोगे शुष्यति तथे
त्यर्थः॥ अत्यंत दृढं स्थिरमपि छिनत्ति अस्मादग्नेर्धारया यूयमपि दृढं छिनत्तीति विमुच्य कथ्यं इत्यभिप्रायः॥ किंचायमग्निः निःपृक्षमाणाः शत्रूनिः श्रेणा
नि भवनेयमनेरुपरमते शत्रुषु मध्ये न्द्रा इति नेयशायति॥ तथा कुर्वन् नायते न गच्छति शत्रोः सकाशात् पलायते॥ तत्र दृष्टांतः॥ धन्वस
हा धनुषा शत्रुनभिभवतीति धन्वसहा धानुष्कः स इवेतरत्न शूर सांपराय स यथा शत्रोरभिमुखो विध्यति न पलायनं तद्वदित्यर्थः॥ यद्वा
दृढधनुर्वहनकुशलो धन्वसहः॥ ॥अथ चतुर्थीमाह॥ ॥दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्य
वसे॥ प्रयः पुरूणि गाहते तक्षद्वनेव शोचिषा स्थिरा चिदन्ना निरिणात्योजसा नि स्थिराणि चिदोजसा॥ अस्मा अग्नये दृळ्हा चित् दृढान्यपि सा
रवंति द्रव्याणि अनुक्रमेण प्रतिमंत्रं दुः ददाति दुरिति ददातिकर्मा इति यास्कः॥ आतदति दुर्जुस॥ यजमानाः ददाति॥ तत्र दृष्टांतः यथा विदे विदुषे
परमार्थदर्शिने उत्कृष्टानि धनानि वितरंति तद्वदित्यर्थः॥ यद्वा अयमग्निर्यथा विदे विंदते स्वातिरिक्तं हविर्ददेभ्यो दातुलभताम्मकरोति॥ तथाः
पुरिति विंदते ऽग्ने इस ... यद्वा एवं आत्मनः परोक्षोपिततस्यावः किंच सोऽग्निः तेजिष्ठाभिररणिभिः अत्यंततेजोयुक्ते मार्गैः यजमानादिः पूर्वोक्तैः
पूजितः सन् स्वर्गादि ददाति त्राणदानेन पालनं कृत्वेत्यर्थः अवसे तद्रक्षणाय यद्वा तेजिष्ठाभिः अतिशयेन तेजोवद्भिः अरणिभिर्गमनैः उतरद्र
वानुदृश्य यजमानेन दत्तं हविः अवसे तर्पणं स्वीकृत्य दाष्टि अयमग्निर्ददाति न यति॥ किंच अग्नये उत्तरं देवताप्रदानं समर्पयति यजमानः अ
वसे अग्निप्रीतये दाष्टि प्रथमं ददाति किमर्थं अवसे रक्षणार्थं यद्यमतः सः स्यात् इतरेभ्यो दृढमपि स्वयं स्वीकुर्यात् तस्माद्ग्नये प्रजादिरूपेण द
दातीत्यर्थः॥ किंच योऽग्निः पुरूणि बहूनि सामर्थ्यानि यजमानधनादीनि प्रगाहते प्रविशति यजमानधनादिनि प्रगाहते प्रविशति प्रविश्य च
श्यावादिरूपयाज्वालया तक्षन् मूकरोति नाशयतीत्यर्थः॥ तत्र दृष्टांतः॥ वनेव वनादिसमूहानि वनानि यथा प्रविश्य तक्षति दहति तद्वदित्यर्थः॥ किंचा
यमग्निः स्थिराणि दृढानि अन्नानि भक्ष्याणि अन्यदीनि तु जसात्जारूपायाज्वालया निनिनंति रिरिणाति गच्छति पचतीत्यर्थः॥ रिगतिरेषणयोः कृ
यादिकाधादीनां स्तुतिरत्र॥ तथा नुजसा स्वकीयेन तेजसा स्थिराणि अनपद्रवणीयानि पापानि अति यानि यानि रिणाति निःशेषेण गमयति नाश
यतीत्यर्थः॥ ॥अथ पंचमीमाह॥ ॥तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात्॥ आदस्यायुर्ग्रभणव
द्वीळु शर्म न सूनवे॥ भक्तमभक्तमवो व्यंतो अजरा अग्नयो व्यंतो अजराः॥ ॥अस्य तमेतं पृक्षं हविर्लक्षणमन्नं उपरासु उपरमंतास्मिन् द
वीर्ष्यामि उपराः वेदिसमीपभूमयः तासु धीमहि धारयाम॥ अस्येत्युक्तं कस्येत्याह॥ योऽग्निः नक्तं रात्रौ दिवातरात् अन्हाऽपि सुदर्शतरः अत्यः
र्थं सर्वैर्दर्शनीयो भवति॥ यतो रात्रौ सर्वे पुभावेषु तमसावृतत्वात् दृश्यमानेष्वपि स्वयं प्रकाशते अतो तं स्मधीमहि पुनः कीदृशाय दिवातरात
अन्हः स्वकाशात् दिवा प्रगत आयुर्यस्मात् सो प्रायुः न प्रायुः अप्रायुः तस्मै असौ यास्मन्मतिसर्वे सर्वेषां भूतानां प्राणादानायास्मत्येतीति श्रुतेः॥ गं
त्रौ सर्वे भावा विनिद्रया इतत्वात् प्रायुपरतं भवंति अयमग्निस्तु सर्वत्र प्राणिप्राणापहर्तुः सर्यस्य रात्रौस्वस्मिन्नेव प्रवेशात् प्रकृत्या युर्भवति अ
तोऽपि धीमहि किंच आत् अनंतरमेव कारणात् यतो यं सुदर्शतरः यतः सूनवे पुत्राय पित्रा वीळुशर्म दृढं सुखसाधनं गृहं यथा स्थाय मप्रायुः अ

भा॰अ॰२ तत्प्रकारणात् अस्य अस्मिन्नर्थे आयुर्हविर्लक्षणमन्नं ग्रहणवन्नग्रहणयुक्तमभृतग्रहणे दृष्टांतः सूनवे पुत्राय पित्रे विभुशर्मेव सुखसाधनं गृहं अ॰१
यथा ग्रहणवद्भवति तद्वदित्यर्थः॥ शर्मेति गृहनाम शर्म वर्मेति तन्नामसु पाठात्॥ इदानीं आहवनीयादिरूपेणाग्नेर्बहुत्वमपेक्ष्याह एते अग्नयः भक्षं
१० सयमानं अमर्तं अस्यमानं ष्यंततः एते प्राणिनः अनुयाथ्या उतिबुध्यमानाः अवक्षरंतिय घपि अविशेषेण प्राणिनः पाकादिद्वारा रक्षंति तथाप्य
ति यजमानं पक्षपातिशयेन उत्साहयंत॥ ततः अजरं हविर्भृतः अजरा भवंति स्वयं हविषा अजराः संतो यजमानानप्यजरान्कुर्वंतीत्यर्थः॥ ॥इति द्वितीय
स्य प्रथमे द्वादशो वर्गः॥ ॥ अथ षष्ठीमृचमाह॥ ॥ स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः॥ आददिर्हव्यान्याददिर्यज्ञ
स्य केतुरर्हणा॥ अध स्मास्य हर्षतो हृषीवतो विश्वे जुषंत पंथां नरः शुभे न पंथां॥ ॥ स हि स एव खलु प्रसिद्धोऽयमग्निः तुविष्वणिः तुविरिति बहुनाम उरु
तुविरिति तन्नामसु पाठात्॥ बहुस्वनिः प्रभूतध्वनियुक्तो वर्तते॥ अत्यंतज्वालनेनैवा वायुसंपर्कात् भुगि भुगि ध्वनिरस्य प्रवर्तते इत्यर्थः॥ ध्वनने दृ
ष्टांतः॥ मारुतं शर्धो न मरुत्संबंधि बलमिव मरुतां समूहो यथा ध्वनयति तद्वदित्यर्थः॥ बलं इति तन्नाम॥ अप्नस्वती पुरवनम् प्राक्षणादि कर्मोपे
तासु ऊर्वरासु उरवरणानि आर्तयंति आर्तयंतीत्यार्तनाः पृतनाः तासु अप्नासु अंथायुच्च॥ यथाशिष्टादाघुदात्तत्वं॥ तासां जयाय इष्टनिः एषव्यः एषव्या
नि वा एवं स्वनयन्नग्निः हव्यान्याज्यपुरोडाशादीनि आददिः अतिभक्षयति छांदसो लुट्॥ यद्वा आङ् पूर्वाद्ददातेराङ्यम हनइति व्यत्ययेनात्मनेपदाः
भावः॥ गातिस्थेति सिचो लुक् छांदसो मोऽडभावः॥ केवलाद्वनाच्छांदसः पिन्नवनत्यनताद्रयडागमः॥ एतदपाने यजनहस एवकिष्यते॥ आददिः॥ सर्व
हविरादानशीलस्तथा यज्ञस्य केतुः प्रज्ञापकः केतुरर्हणीयो वा अर्हणा पूजनीयः सर्वोस्तत्तु गितिसोराकारः॥ प्रत्ययस्वरः चुदात्तत्वं छांदसं किंच हर्ष
तः हविर्भक्षणात् अत्यंतहर्षयुक्तस्य यद्वा अभिमतफलदानेन यजमानान् हर्षयतः हृषीवतः आघर्षीकारेण हर्षयुक्तस्याग्नेः॥ पंथानं मार्गविशे
षं सर्वे मनुष्याः नृपत अतिबंधनाद्विमर्थं शुभे शोभनाय सुखप्राप्तये पंथानमिव गंतव्यं निर्मितं मार्गमिव॥ ॥ अथ सप्तमीमृचमाह॥ ॥ द्विताय
दीं कीस्तासो अभिद्यवो नमस्यंत उपवोचंत भृगवो मथ्नंतो दाशा भृगवः॥ अग्निरीशे वसूनां शुचिर्यो धर्णिरेषां॥ प्रियां अपिधींर्वनिषीष्ट मेधिर आ व
निषीष्ट मेधिरः॥ ॥ यत् यदीं द्विता द्विप्रकारं श्रोतस्मार्तभेदेन द्वित्वमापन्नं॥ यद्वा उपलक्षणमेतत्॥ आहवनीयादिरूपेणानाविधं॥ यद्वा द्विताग्नि
धाय एहिकामुष्मिकफलाय उभयाय विभक्त॥ गाग्रादेश॥ ईं इममग्निं कीस्तासः स्तोतारं कुर्वंतः स्तोतारः प्रवचाश्चैव छांदसंततं॥ अभिद्यवः॥
अभितो द्योतमानाः नमस्यंतः नमस्कारोपलक्षितमुपस्थानं कुर्वंतो भृगवः भृगुगोत्रोत्पन्ना महर्षयः उपवोचंत उपत्य ब्रुवंति किंकुर्वंतः दाशा दा
नेन निमित्तभूतेन हविर्दानार्थं मथ्नंतः॥ अरण्यामग्निं मंथनं कुर्वंतः तथा भृगवः भृगोरा हविर्षापापाशंवाग्निश्चुचिर्दीप्तः धर्णिः धार
णात्कुशलोयमग्निः एषां दीयमानानां मणिमुक्तादीनां वसूनां ईशे ईश्वरः समर्थो भवति प्रदातुमिति शेषः॥ किंचायमग्निः मेधिरः मेधायज्ञस्त
द्वान्स्तुत्यः एष प्रधानभूतः सन प्रियान् प्रीतिदेतून् आत्याः प्राप्त्यादीन् अपिधीन् पर्याप्तिपर्यंतं दत्तान् यनिषीष्ट संभक्तवान् संभजतां वा॥
तथा मेधिरः मेधावान् असौ आवनिषीष्ट अन्यदेवताके यद्यपि यज्ञे पुरस्य मा इत्य भागप्रयोजनादिरूपं हविः संभजते॥ अथाष्टमीमृचमाह॥
॥ ॥ विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दंपतिं भुजे सत्यगिर्वाहसं भुजे॥ अतिथिं मानुषाणां पितुर्न यस्यासया॥ अमी च वि १०
श्वे अमृतास आ वयो हव्या देवेष्वा वयः॥ ॥ विश्वासां सर्वासां विशां प्रजानां यजमानानां पतिं अभिमतफलदानेन पालकं हवामहे आह्व

यामः नेके वलं यजमानानां किंतु सर्वासां प्रजानां समानं एकरूपं दंहनपचनाद्युपकारस्य सर्वेषां मतत्वात्॥ तथा दंपतिं गार्हपत्यादिरूपेण गृहस्य 23
पालकं दमइति गृहनाम दमे वेषाद्विति तन्नामसु पाठात्॥ अकारश्छांदसः॥ किमर्थं भुजे भोगाय हवामहे आह्वयामः॥ पुनः सत्यविशेष्यते स 1914
त्यगिर्वाहसं यथार्थभूतानां अविसंवादिफलानां स्तुतिरूपाणां गिरां वोढारं यद्वाभिरामंत्रपाव इतीति गिर्वाहसः सत्याः समा अविसंवादिगिर्वाहसोय
स्य तं तादृशं हवामहे महे इति शेषः॥ वहिः हाधातुभ्यश्छंदसीत्यसुनणि दित्यनुवृत्तेरूपधावृद्धिः पुनः कीदृशं मनुष्याणां मनुष्याणां अतिथिं अतिथिवत्
पूज्यं सर्वाहिति तिथिमतत्तं सर्मापथर्मातिथिं भमृतासः हविर्भोगान्वेन प्रसिद्धाः सर्वे देवा आगच्छंति उपसर्गेषु शाखा योग्यक्रियाध्याहारः॥ किमर्थं वयः
हविर्भक्षणाय मुद्दिश्य अग्निमुखादेव नरभ्यादीयमानत्वात्तत्र दृष्टांतः॥ पितुर्नपितरंति कुपुत्रा इत्याय यथा नाधार्य सेवंते तद्वत् किंच वयः नेता
रः कर्तारो यावद्वे वा युक्त रक्षित्यमानेषु मध्यहविः पिआदद्द्यन् यवनोरोणादिकाउविविताः गुणाः॥ ॥ अथ नवमीमृचमाह॥ ॥ त्वमग्ने सहसा स
हंतमः शुष्मिंतमो जायसे देवतातये रयिर्न देवतातये॥ शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः॥ अध स्मा ते परि चरंत्यजर श्रुष्टीवानो नाजर॥
॥ ॥ हे अग्ने त्वं सहसा बलेन सहंतमः अतिशयेन शत्रूणामभिभविता तथा शुष्मिंतमः अतिशयेन तेजस्वी जायसे॥ सहसोणादिकः कनिन्राध
स्याति नुट्॥ किमर्थं देवतातये देवानां विस्तारयुक्ताय यागाय तदर्थं यज्ञनामैतत्॥ यद्वा गुणयुक्तविद्धि सोजायसे अरण्योरस्य पसेयज्ञार्थं च त्वं दृष्टां
तः रयिर्न देवतातये॥ धनं यथा यज्ञार्थमुत्पद्यते तथा चार्थं यज्ञार्थं द्रव्यमुत्पन्नमिति किंच ते तव मदः आत्मस्वीकारजनितो हर्षः शुष्मिंतमः॥
अतिशयेन बलवान् तद्विशाषः प्रसिद्धो भाष्यनाग्ने मदो भवतीति प्रसिद्धं अपि च ते क्रतुः कर्म विज्ञापि द्युम्निंतमः॥ यशोयुक्तः अन्नयुक्तो वा खलु
द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः॥ अथ अतः कारणात् अजर हे जरारहिताग्ने त्वां परिचरंति यजमानास्तत्र दृष्टांतः पुष्टीवानोनानुष्टा उपनय
थावातोविज्ञाय प्रदानवशाः नर्सवंतन्नद्भुतच्छंदसी वनिपाविति वनिप छांदसं प्रत्ययाद्युदात्तत्वं॥ अजरभक्तानामजरयितुः अंतर्भावितण्यर्था
त्पचाद्यच॥ यद्वा अजरभक्तानः धरा स्तुतिः अस्मात्कस्यापि स्तोता भवतीति किंतु सर्वैः स्वयं स्त्यते तादृशं त्वां परिचरंतीत्यर्थः॥ ॥ अथ दशमीं
प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये॥ प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे॥ अग्रे रेभो न जरत ऋषूणां जूर्णिर्हो
त ऋषूणां॥ ॥ हे उद्गात्रादयः स्तोतारः वायुष्माकं संबंधि स्तोमः स्तोत्रं अग्नये प्रबभूतु प्रीणयितुं समर्थं भवतु श्छांदसः शपः श्लुः॥ अत्र
चाभ्यासस्य भूसुवोस्तिङीति गुणाभावः॥ कीदृशायाग्नये महे महते प्रख्यात सहसा परभिभवसामर्थ्येन सहस्वते तद्वते उषर्बुध उषः
कालं प्रबुध्यमानाय॥ अहरादीनामह्यादिषु च संख्यानमिति रुत्वं पशुषे पश्वे पशुफलप्रदायनशुद्धे वापि ब्रूहत्यर्थः॥ यद्वा पशुप्रदात्रे प्रभा
वे यथा श्रुतिः क्रियते तद्वत्॥ किमर्थमिति तदुच्यते॥ ईं एनमग्निं प्रतिलक्ष्यीकृत्य हविष्मान् भवताद्दिन युद्धं हविर्युक्तो यजमानः विश्वासु क्षासु सर्वा
सु निवासभूतासु वेदिभूमिषु जोगुवे अत्यर्थं गच्छते स्तुतवतर्याङ्गतच्छांदसो लिङ् व्यत्ययेनात्मनेपदं॥ आमंत्र इति पर्युदासादाम भावः॥ इ
ति भूताय छांदसतितं नामसु पाठात्॥ ऋषूणां आगंतॄणां देवानां मध्ये अश्वमग्निः जूर्णिः स्तोतिकुशलो होता अग्ने उच्चे देवेभ्यः प्रवर्जरते स्तौति॥
तत्र दृष्टांतः॥ ऋषीणां महतां धनवतां अस्माकं रेभो न यद्वा क्षर्यागतो भाणादिकः अन्तस्थः नाम स्यत रस्यामितिनाम उदात्तत्वं॥ यद्वा ऋषूणां
मित्यस्त्यावाल विशेषणं ऋषूणां ज्ञानवतां मध्ये अयंत्त्वाय्यं होतेत्यर्थः॥ ॥ अथैकादशीमृचमाह॥ ॥ स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सच

भा॰ अ॰ २ नाम वेतुनामहोरायः मृळयेतुना ॥ महिशब्देन मह्या संबद्धे भुञ्जे अस्य ॥ महिम्ना जाताभ्यो मघवंतमवीर्यमर्थार्यमोजनशवसा ॥ ॥ इमं मे सत्वं ॥ नेदिष्ठं अस्य अ॰ १
न समर्या पदद्दशानः वर्धाद्दृशानानां मितेन दृश्यमानः देवभिः सचना ॥ इतरदेवैः समानानां अग्निमुखेन पदं तरणां हविः स्वीकारात समानानां
११ त्वं मघवतुनागां भजेन वेतनेभावापुनरुक्ता देवविशेष्यते ॥ मघवतुनागामन वेतावनामयाओणादिकः नुः बहुश्रीहीन मत्वर्थीयस्करणदाधु
दानत्वं ॥ युक्तेन स्वदायतमनुष्यम्प्रदयुक्तेनेत्यर्थः ॥ नादृशस्त्वं महतः पृतनीयान्निरायः धनानिनः आभारं अस्माकमारदं अन्नादीनि बलवं
त्नानेन अस्मभ्यं महिमहत अन्नं महती कीर्तिर्यारधिकृतं संपादयद्धाविवृतिसंबोधितत्वात देवप्रार्थनं इति गम्यते किमर्थं संवत्सरसम्यग्दशनी
यत्वाय अस्य अस्याः पृथिव्याः संबंधिने भुतभागाय यद्वा संवत्सभुक्त इति सामानाधिकरण्यं सम्यग्दर्शनीयाय भागायेत्यर्थः ॥ न कंवलं यज्ञमा
नेभ्यो अस्मभ्यमेव आपितु स्तोतृभ्यः स्तुतिकर्तृभ्यापि हे मघवन्न्न मवीर्यशोभनपुत्रभृत्याद्युपेतं धनं शोभनसामर्थ्यं वाराधिकृ रक्ति च शवसाब
लेन युक्तः सन्नर्यः अस्मादिस्तोधिनानाशयलुटि हन्यंत स्थणोतेरधिप्रतिपधः कारपक्षे ओणादिकः ईकारः आयुदात्तः छांदसः ॥ यद्वा समर्थांसं
थन वास्त्वं अस्मदर्थं शवसा बलेन युक्तो भवतिशेषः ॥ तत्र दृष्टांतः ॥ इषानशवसाय थाकश्चित् शूरः शवसाबलेन समर्थो भवति तद्वत ॥ ॥ इति
द्वितीयस्य प्रथमे त्रयोदशो वर्गः ॥ ॥ अयं जायतत्यष्टर्चं द्वितीयं सूक्तं अयं जायतनाष्टाविति ॥ अत्रानुक्रमणिका ॥ पारुच्छेपऋषिः सर्वेमा
त्यष्टिमित्युक्तत्वादत्यष्टिछंदः आग्नेयमितितुशब्दस्यानुवृत्तादिदमादिदमादिमं वाग्नेयं ॥ प्रातरनुवाकस्य प्रथमे हनि एतत्सूक्तं माध्यंशसत्वे नविनियुक्तं
सूत्रितं वाथध्यस्येति खंडे अयं जायत मनुषो धरीमणीत्यष्टाविति ॥ ॥ तत्र प्रथमामृचमाह ॥ ॥ अयं जायत मनुषो धरीमणि होता यजि
ष्ठ उशिजामनुव्रतमग्निः स्वमनुव्रतं ॥ विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते ॥ अदब्धो होता निषदन्निळस्पदे परिवीत इळस्पदे ॥ ॥ अय
मग्निर्मनुषो मनुष्यस्य अध्वर्योः सकाशात जायत अरणिमंथनेनोत्पन्नः कीदृशोयं होता देवानामाव्हाता यजिष्ठः अतिशयेन यष्टृतमः किं
मर्थमुत्पन्न इति ॥ उशिजां कल्पस्य कामयितृणां यजमानानां व्रतं सोमयागादिरूपं कर्म अनुलक्ष्यीकृत्य न केवलं परार्थमेव अपितु अयमर्थः
स्वव्रतमनुस्वकीयं हविः स्वीकारादिरूपं कर्मानुलक्ष्य पुनः स एवाग्निर्विशेष्यते विश्वश्रुष्टिः विश्वविषयकर्मवान् कर्मस्य सर्वास्मै यतनेत्यसलिलमात्मन इच्छ
तेत थाश्रवस्यते अन्नं भतिप्रतिधर्मत्वं वा आत्मन इच्छते यजमानाय रयिरिव धनमिवानीयो भवतिधनं यथा अन्नं सत्यं अन्नमप्यधिकं च साधयति तद्व
दयमग्निरपि तस्मै इष्टं साधयतीत्यर्थः ॥ किं चायमग्निरिळस्पदे इळायाः भूम्याः पादे अंत्यलोपश्छांदसः धरीमणिसारभूते स्थाने वेदिरूपे वेदिमा
हुः परमंतं पृथिव्याः इति श्रुतेः एतावती वै पृथिवी यावती वेदिरिति चापुनस्तामेवविशेष्यते इळस्पदे इळा देवतायां मनोः पुत्र्या गोरूपायाः उत्प
न्नस्थानं व प्रति पादिताया पादस्यास्मरदेशे इदं वैमानवीयमिडायाः पदमिति इडायाः पदं घृतवतीस्वाहेति चश्रुतेः ॥ निषत्ते रनिषीदति
कीदृशोयमग्निः अदब्धः कुनाप्यहिंसितः होता होमनिष्पादकः परिवीतः ऋत्विग्भिः परिधिभिर्वा परितो वेष्टितः एवंभूतः सन्निषीद
ति ॥ ॥ अथ द्वितीयामृचमाह ॥ ॥ तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता ॥ स न ऊर्जामुपाभृत्याकृपा न
जूर्यति ॥ यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥ यज्ञसाधं यज्ञस्य साधकं साधो तेः क्विप् ऋदुत्तरपदप्रकृतिस्वरत्वं ॥ तमग्निं वयं ऽस्था ११
पितं अपिवातयामसि अपि वातयामसि अपिः संभवनार्थः ॥ आपरितापं संसामहे ॥ वातगतिसुखसेचन यान्ध्योरादिकः इदंतो मसिः कुनो पाययेनेतिन इच्यते ॥

यद्वाकृतस्य पतस्य पथा मार्गेण तीर्थेभ्यः पूर्वेणोत्तरेण पश्चिमेन प्रणीता इत्यादि मार्गतः तेन मार्गेण गत्वा पुनः केन हविष्मता ॥ आज्यादिप्रदेयद्रव्ययुक्तेना २५
नमसा नमस्कारेण पन्नतः एनेन स्तोत्रेणा परिस्तवनेन वातदेभ यन्नेत्यर्थः ॥ कृ वतिन इच्यते हविष्मतः हविष्मति आज्यपुरोडाशादिबहु भियुक्ते देवतादे 1914
वानां विस्तारयिता यज्ञे किंच साग्निः नास्माकं संबंधिनां कृतांहविर्लक्षणानां उपाभृति उपाहरणेन तत्स्वीकारविषये ॥ उपादुपसर्गाद्धरतेः क्विन्
प्रहाणे इति भवं सत्कुर्यात् सुजुपितिसमम्यालुकुत्वादौ चेत्यनंतरगतेः प्रकृतिस्वरत्वं अथवा कृपा अनयासामर्थ्यलक्षणया कल्पनया हविःस्वी
करणरूपयानजूर्यति यज्ञसमाप्तिपर्यंतं न नश्यति अजरवर्तन इत्यर्थः ॥ इत्युक्तं कृइत्या हयमग्निर्देवं द्योतनशीलं मातरिश्वा अंतरिक्षे संचा
रिणा वायुः पूर्वं मनवे मनोरर्थाय परावतः अतिदूरगतवतः आदित्यात् भाः अभासीत ॥ औचित्येन भ्रमोत्पादितवानित्यर्थः ॥ तद्दूरात् परावतः
दूराद्देवं अग्निं अस्मत् देवयज्ञनं प्रतिष्ठापयत्वित्यर्थः ॥ ॥ अथ तृतीयामृचमाह ॥ ॥ एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः क
निक्रदद्दधद्रेतः कनिक्रदत् ॥ शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ॥ सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥ ॥ अयमग्निः एवे
न गमनेन साधनेन सद्यः अस्मदाव्हानानंतरं पार्थिवं पृथिवी संबंधिस्थानं वेदिलक्षणमेव परि परितः ॥ यद्वा आभिमुख्यार्थो वा पर्येति गच्छ
ति ॥ कीदृशोग्निः मुहुर्गीः सर्वदा गीयमानः रेतः उदकेन तत्कार्यं हविरूपमन्नमुच्यते ॥ तद्वान् सर्वथा यो लुप्यते वृषभः कामानां वर्षिता क
निक्रदत् शब्दयन् पर्येति पुनः स एव विशेष्यते ॥ रेतो दधत् आज्यादि हविःकारणं अत्यधिकं सामर्थ्यं दधानः कनिक्रदत् शब्दयन् पर्येतीति क्रियाः
पुनः स एव विशेष्यते ॥ अयमग्निर्देवः वनेषु संभजनेषु लोकेषु निमित्तभूतेषु अक्षभिः अक्षस्थानीयाभिर्धाराभिः शतं चक्षाणाः सर्वतः
प्रकाशमानः यद्वा ज्वालाकृत्या यजमानेनकृतं शतगुणितं प्रख्यापयन् तथा तुर्वणिः शीघ्रगंता शत्रूणां हिंसको वा ॥ तुर्वणिस्तूर्णवनिरिति यास्कः ॥
विन्न सानुषु समुपस्थितेषु मानुषं समुच्छ्रितं भवतीति यास्कः ॥ उपरेषु परमंत पन्नय इति उपराधिक्यस्य यायजमानगृहावा ॥ तेषु सदः स्थानं
स्थानं धारयमाणोग्निः सद्यः पर्येतीति पूर्वमानयः ॥ किमर्थं परेषूत्कृष्टेषु सानुषु समुच्छ्रितेषु कर्मसु हविःषु वा निमित्तभूतेषु ॥ ॥ अथ चतुर्थीमृचमाह ॥
स सुक्रतुः पुरोहितो दमेदमेग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ॥ क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ॥ यतो घृतश्रीरतिथिरजायत वह्निर्वे
धा अजायत ॥ सोग्निः सुक्रतुः शोभनकर्मा पुरोहितः पुरो धार्यमाणः यद्वा पुरोदितः वा गार्हपत्योदाहकः मनदमे तत्तद्यजमानगृहे सर्वेषु देवयजनेषु
वा अध्वरस्य नाशरहितस्य फलप्रदस्य यज्ञस्य तदर्थं चेतति जानाति प्रतिबुध्यत इत्यर्थः ॥ किंचायं यजमानोपि क्रत्वा शोभनेन कर्मणा यज्ञस्य चेतति
कर्तव्यतां अवजानाति किंचायमग्निरपि क्रत्वा प्रज्ञया स्वेन कर्मणा न याः विविधफलानां कर्ता सन् इषूयते इष्यते इतो पुरस्तात् आगमनं वा तदिच्छतां यजमा
नार्थं विश्वा जातानि सर्वाणि संपादितानि हवींषि दानि यस्पशे अत्यर्थं स्पृशति स्वीकरोति यतोयं घृतश्रीः घृतं वसानः अतिथिः अतिथिवत् पूज्य
श्च अजायत इत्थं यतः कारणात घृतमत्यर्थं सिंचमानः प्रवृद्धो भवत अतः पस्पश इत्यर्थः ॥ एवमग्नौ प्रवृद्धे सति यजमानापि वह्निर्हवियो वोढा
वेधाः विविधस्य फलस्य कर्ता इत्यादृशिता अजायत समर्थो भवत ॥ ॥ अथ पंचमीमृचमाह ॥ ॥ क्रत्वा यदस्य तविषीषु पृंचतेग्नेरवेण मरुतां न भो
ज्येषिराय न भोज्या ॥ स हि ष्मा दानमिन्वति वसूनां च मज्मना ॥ स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥ ॥ यद्यस्मात्कारणात् सर्वे यज
मानाः क्रत्वा प्रकृष्टेन कर्मणा हविःप्रदानादिरूपेण अस्याग्नेस्तविषीषु प्रबलज्वालासु अवनेत मिनिर्मितेन भोज्या भक्ष्याणि पुरोडाशादीनि संच

भा॰ अ॰ ७ तेभिश्च यंति ॥ तानि पांति च रक्षन्ति अमतिं दीप्तां अश्विनीं तमित्यनामनुपाजात ॥ ॥ तत्र दृष्टांतः ॥ मर्तानां भोज्यानां धनानि श्रियो भोगानां पायुपुत्रे यानि अभिधियन्ते ॥ अ॰ ३
जन यस्य सन्ति सम्यादि द्वारा यो भ्राजादि भोज्यानि यथा येन तेन पथ्यर्थः ॥ इति यन भोज्या एषणा युक्ता यथा च मानाया थिनं भोज्या भोग्यानि भोज्यादीनि यथा
१२ दीयंतेन तद्धि विदिरा श्राय्यो यात्ने विनिरतउपयणेन विषयणेन वति ॥ अतः कारणात् सर्वत्र यजमानः दानमिच्छति हविः प्रदानं तस्या प्रीतिय इत्ययमभि
मतं दानमिच्छति ॥ इत्यतिर्थ्याभिव मा इत्यानं नश्यति इति तत्र मर्म सर्वात ॥ येन सामर्थ्येन तिबसनां च मज्जन्मनानि वासयोग्यानां धनानां अग्नि नाल
श्यानां बलेन च ॥ यद्वा सो ग्निर्वसूनां हविर्निवासयोग्यानां ज्वालारूपाणां जन्मतावलेन दानमिच्छतीति शेषः ॥ किंच सोग्निः अभिद्रुतः आभिमुख्येन
न वाधितस्य माणात् दुरितात् पापात् त्रासते त्रायते तथा ज्ञासात ॥ अति प्रभूतत्वेन अंहसः अर्यात् यद्वा हिंसकात् अभिद्रुतः अभितो द्रियमाणात् अ
घात् दुःखात् तत्कारणात् पापाद्वा आसते त्रायते ॥ ॥ इति द्वितीयस्य प्रथमे चतुर्थो वर्गः ॥ ॥ अथ पंचमी मन्त्रः ॥ ॥ विश्वासि हाय्या अरतिर्वसु
र्दधे हस्ते दक्षिणे तरणिर्न शिश्रथत् श्रवस्यया न शिश्रथत् ॥ विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ॥ विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥
अयमग्निर्दक्षिणे अभिमतं प्रदानुमुत्साहयुक्ते हस्ते वामेन यजमानाय दातव्यं धनं दधे धारयति किं दृशो यं विश्वाः सर्वे गंतव्यः यद्वा विश्वात्मकः
विहायाः महान् विहायाः इति महन्नामसु विहायाः अय इति नाम समाजात ॥ अरतिः ईश्वरः अरममाणो वा अप्रीतिः अन्यपदि व स्यति व्यथि दि
त्यति प्रत्यय स्थित्वा वायुं तादानं धृत्वा चाशिश्रथत् ॥ धनं हस्ते यजमानार्थं श्रिथयति ददाति ॥ श्रथयते दुर्वाचि रूपं ॥ तत्र दृष्टांतः तरणिर्न तरणि
रिव तारकः सूर्य इव स यथा स्वोपासकाय अभिमतं हस्ते धृत्वा वितरति तद्वत् ॥ यद्वा तरणिः सूर्यस्य तारकः न शिश्रथत् यजमानेन विमुंचति किंच
श्रवस्यया न शिश्रथत ॥ हविर्दानेच्छया न विमुंचति हविः स्वीकाररूप देशमात्रेणेति भावः ॥ इदानीं प्रत्यक्षकृतः हे अग्ने देवत्रा देवेषु मध्ये अतिश
येन संविश्वस्मै सर्वस्मै इषुध्यते हविरन्नमिच्छते इंद्राय यं इषुध्यति वृद्ध्या क्षिर्ह व्यं तत्र देवतामुद्दिश्य प्रतं प्रोक्षा शाद्रिकं आहि सर्वतात इतिव हेलेटि
यता दिव्या संप्रसारणं किंवा यमग्निर्विश्वस्मै सरते भोभनयते कर्त्रे यजमानाय वारं सर्वैर्वरणीयं धनं द्वारि निवारकं अंनादिकं ऋण्वति प्राप्नोति क्र गच्छ
ति करोतीत्यर्थः ॥ किंवा यमग्निर्द्वारा स्वर्गाद्यभिमत द्वाराणि व्यृण्वति विवृणोति । प्रतिबंधकापनयन द्वारा अभिमतानि साधयतीत्यर्थः ॥ ऋ
ण्वतिर्गतिकर्मा यद्वा शिवर्गत्यर्थः ॥ इदित्वान्नुमभावः संरूपस्य संप्रसारणं ॥ ॥ अथ सप्तमी मन्त्रः ॥ ॥ स मानुषे वृजने शंतमो हितो अग्निर्यज्ञेषु जे
न्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः ॥ स हव्या मानुषाणामिळा कृतानि पत्यते ॥ स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥ सोग्निर्मानुषे म
नुष्यस्य यजमानस्य संबंधिनि वृजने वर्जनीये पापे निमित्तभूते सति यज्ञे निमित्ते सुखतमः आत्मनं सुखनमः अरिष्टस्य निवारकत्वात् ॥ अत
एवाहितः स्वर्गाद्यभिमत साधकत्वात ॥ किंचायं यज्ञेषु विश्पतिः कलि प्रजाणां प्रजानां अतिशयेन पालकः पत्या विश्वर्यति पूर्वपदप्रकृति
स्वरेणा सपराद्विश्वं इति विहलमित्कनरपदान्तं ॥ युद्धे ॥ अत एव प्रियश्च भवति तत्र दृष्टांतः ॥ जेन्यो न विश्पतिर्जेयशीलो राजेव स यथा
परसेना सुपद्रव परिहारेण सम्यक् परिपालनेन च प्रजानां प्रियो भवति ॥ किंचायमग्निर्मानुषाणां यजमानानां संबंधीनि हव्या हवींषि इळाकृतानि
इळया देवपालकतानि संपादितानि इत्थं पत्यते पतति आगच्छति किंच सोग्निर्नोस्मान् यजमानान् वरुणस्य वारकस्य धूर्तेर्हिंसकस्य भयात् त्रासते यद्वा १२
धूर्तेरिति पंचमी वरुणस्य पापदेवस्य धूर्तेर्हिंसकात् किंच महो देवस्य धूर्तेर्हिंसकात् त्रासते पालयते अयस्यार मग्निर्हिं नस्तीति प्रसिद्धं ॥ यद्वायं केमेव

वाक्यं धूर्तेर्हिंसकस्य महो महतो वरुणस्य देवस्य वरणाख्याया वा पाप देवताया धूर्तेर्हिंस्यातो नास्मान् सोग्निस्त्रासते त्रायते ॥ ॥ अष्टमी मन्त्रमाह ॥ ॥ 27
अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ॥ विश्वायुं विश्ववेदसं होतारं यजतं कविं ॥ देवासो रण्वमवसे वसूयवो गीर्भी रण्वं 1914
वसूयवः ॥ ॥ अमुमग्निं होतारमीळते स्तोतारं होमनिष्पादकं वा ईळते कर्त्विजः स्तुवंति तथा वसुधितिं धनस्य धारयितारं वा अत एव प्रियं सर्वेषां प्रियतमं
चेतिष्ठं अतिशयेन यजमानानां चेतयितारं यद्वा प्रकृष्ट चेतनवंतं चेतत शब्दात तुष्छंदसीति इष्ठन् तुरिष्ठेमेय स्स्विति तिलोपः अरतिमीश्वरं तादृशं देवं
नि परिरंति तत्प्राप्ताः प्राप्निरे वक्रित्विज्य ते हव्यवाहं न्येरिरे तद्रूपेणा प्राप्ताः इतर देवेभ्यो हव्यं वोढुं यथा भवति तथा नितरां प्राप्ता इत्यर्थः रण्वं रमणतो
इत्यस्य तमन्य तिदिशत्व वां किं च देवा सो देवता स्तोत्राः कल्पितकर्णं अतिप्रभ्याउ स्तवं तं अवस्यस्य रक्षणाय वसूयवः वसुकामाः संतः नितरां प्राप्ताः
पुनः कीदृशः विश्वायुं सर्वं प्राणिनां चेतनं विश्ववेदसं सर्वप्रज्ञं होतारं देवानामाह्वातारं यजतं यजनीयं कविं सर्वज्ञं गीर्भिः स्तुतिभिः सर्वत्र वरणयंतं र
मणीयं वा वसूयवः वसुदवा रूपमंतं अन्ये प्रदानुमा अन इच्छतिः न्येरिरे प्राप्ता यथा चेनं प्रयच्छति तथा हविरादिना प्राप्ता इत्यर्थः ॥ ॥ द्वितीय
स्य प्रथमे पंचदशो वर्गः ॥ ॥ यं त्वं रथमित्येकादशर्चं तृतीयं सूक्तं पारुच्छेपं सर्वमाद्या पञ्चमीत्यत्र ता दत्याग्नि इंद्रस्क अनुवृत्तान्येव इंद्रनामा अस्मयद
त्या विंदूभतिश परिच्छपशरोनवाद्यादिन इत्यनार्षी च तुः पञ्चाक्षरोपेतत्वात् प्रतद्वचेयमिति ॥ पञ्चादुदृचत्वात तथानुक्रमणिका ॥ यं त्वमेकादश
पञ्च देवीप्रगायानिरुक्त पञ्च अंतेति ॥ दश रात्रस्य पञ्चमेहनि मरुत्वतीयशस्त्रे पन्तत्त्वं पञ्चस्याति सर्वं इति सूत्रितं ॥ यं त्वं रथमिंद्र सप्तारपेति ॥ ॥ प्रथमा
मृचमाह ॥ ॥ यं त्वं रथमिंद्र मेधसातये पाका संतमिषिर प्रणयसि प्रानवद्य नयसि ॥ सद्यश्चित्तमभिष्टये करो वशश्च वाजिनं ॥ सास्माकमनवद्य तू
तुजान वेधसामिमां वाचं न वेधसां ॥ ॥ हे इंद्र इषिरस्य गमनशील त्वं मेधसातये यज्ञस्य दानाय लाभाय वा यं यजमानं प्रतिरथं प्रणयसि प्रापयसि
त्विकं मंकायं वा इतियजमानं अपाका अपक्वं अनन्य प्रज्ञयाधिकारंतं पाकः पक्तव्यो भवतीति यास्कः ॥ अतएव मंतं पंडितं सन्तं किंच हे अनवद्य आनिंद्
तयं यजमानं विघातिना प्राणयसि प्रकृष्टं नयसि तं यजमानं सद्यश्चित्त इदानीमेव तदनुग्रहकाल एव अभिष्टये आभिमुख्येन यागाय अभिमतप्रा
प्तये अभिपूर्वाद्दिशः क्तिन् शकंध्वादित्वात् पररूपत्वं गतिरनंतर इति गतः प्रकृतिस्वरत्वं ॥ करः समर्थं करोषि लेट्यडित्ययमन्त्रा पगर्वं कृत्यात्वं वाजिनं ह
विर्लक्षणमन्नं तद्वन्तं वा वशः कामयसे च च वचनं पदगमर्गति वः परत्वादिति पातः यजमानेन आहुतः स न इमां प्रमेयगत्य हविः स्वीकृत्य यागनिर्वर्त्यं तं
चाभिमतफलं नः संपादयतु पुनर्हविः स्वीकरणवानित्यर्थः हे इंद्र अनवद्य अनिंदित सर्वैः स्तूयमान तूतुजान अस्माननुग्रहीतुं त्वरमाण तुजः प्रेरणार्थात् लिट् का
नचतुरादीनां दीर्घ अभ्यासस्य अभ्यासस्य दीर्घत्वं सांहितिकं पदादिति संहितायां सालोपः वचमां विविध फलकर्तॄणां मध्ये श्रवतया वेधसां मेधाविनामस्मा
कं संबंधि हविः स्वीकुर्वित्यर्थः ॥ तत्र दृष्टांतः ॥ इमां वाचं न अस्मदीयां स्तुतिरूपां वाचमिव स्तुतिं यथा स्वीकरोषि तथा हविरपीत्यर्थः ॥ ॥ द्वितीयामृ
॥ ॥ स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इंद्र भरहूतये नृभिरसि प्रतूर्तये नृभिः ॥ यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ॥ तमीशानास इर
धंत वाजिनं पृक्षमत्यं न वाजिनं ॥ ॥ हे इंद्र वक्ष्यमाणगुणविशिष्टस्त्वं श्रुधि अस्मदाह्वानं श्रोत्रेण शृणु रूर्ध्वभावः यः स्म यः खलु त्वं नृभिर्मनुष्यै
र्यजमानैः पृश्न्या इव त्वमापन्नमरुद्भिः पुनस्त्वत्प्रहिण्यते ॥ नृभिः संग्रामनयनशीलैरिति इत्यमरतासहाय्यमिंद्रमरुद्भिरन्नादेनं तादृशं युद्धेषु
प्रसिद्धेतः मरुद्भिः सह कासु चित्पृतनासु सर्वासु प्रादुर्भावसंग्रामे भुभर हूतये भरणविशिष्टाह्वानाय युत्सु आयप्रतूर्तये च शत्रूणां प्रहरणहिंसनाय

भा॰ अ॰ २ दक्षाय्यः असि समर्थोसि किं च यस्त्वं शूर वीर्याणि ... मरुद्भिः संग्रामे दधिषे स हितः सन् त्वं स्वयमेव सनिता संग्रामस्य अन्यस्य वा मनीषिनस्य सनिता संभ अ॰ १
क्ता असि समर्पयिता असि स्ताहिते अन्येन स्पृश्येणाव तरुतासीत्यर्थः ॥ तरतेस्तृन्निर्मिच्छिते भितेत्यादीनि यात्यते यश्च तं विप्रे भिर्धा विभिःकृतिगाभिः स्तुतः
३३ समयवान्तरताले ध्यान स्वदाला सिविप्रैर्मरुद्भिः सहितइति संबंधः ॥ तं तादृशं वाजिनं गमनवंतं पृक्षं हविर्लक्षणान्नं वृतमिंद्रं ईशानासः समर्थाः स्तर्थः
सितुं समर्थं ऋत्विजः उरुधं तं सपर्यंति सेवंते तत्र दृष्टांत ॥ वाजिनं वेगवंतं दृशं घासाधनं वंतं अत्यंत अश्वमिव तं यथा समर्थाः स्याद् घासप्रदानादिभिः
प्रीणयंति तद्वत् अत्य इत्यश्वनाम ॥ अत्यो हय इति तंनामसु पठितत्वात् ॥ ॥ अथ तृतीयामृचमाह ॥ ॥ दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीर
ररुं शूर मर्त्यं परिवृणक्षि मर्त्यं ॥ इंद्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे ॥ मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥ हे इंद्र त्वं दस्मो हि शत्रूणा
मुपक्षयकर्तासि खलु अनन्य कारणात् रूपणं त्वचं वर्षणशीलं च संवरणवमं मेघं धनवंत उदयं स्नवंतं कंचित्जलधारिणं मेघं पिन्वसि निर्विघ
स्नवयसि किं च मर्त्यं मर्त्यं वत अररं अरणशीलं गमनस्वभावं कं चिन्मेघं शूर कश्चिद्दृढं तं गच्छतं वैरिणं निरस्वीकरोतीत्यर्थः ॥ तथाम
र्त्यं मरणशीलं द्वार्यमाण स्वभावं निरद्वं कं चिन्मेघं परिरणक्षि सर्वतो वर्जयसि आरासीत्येक इत्यर्थः ॥ हे इंद्र तादृशं कर्मवर्षणरूपं सप्रथः सर्वतः
पृथु यथा भवति तथा तुभ्यं वाचं ब्रवीमि इंद्र एवाभिप्राय्यते ॥ स्वयशसे स्वकीय यशायुक्ता यतथा दिवे द्युतनवशाश्रय भूताय द्युलोक देवतायाः अपितत्वाद
द्रं कर्मवाचं ब्रवीमि इत्यादिशब्दाः दर्शः ॥ वर्षणकर्मणा देवतायाः अनुकूल्यात् ॥ तस्याः अपि वचनं युक्तं ॥ तथा रुद्राय जगतो दुःखद्रावयित्रे रोदन
शीलाय वाग्नयेत द्वाचं रुद्रो वा एष यदग्निरिति श्रुते रुद्रत्वं ॥ सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति श्रुतेः ॥ रोदनस्वभावत्वं प्रसिद्धं तस्य वाहुतिद्वारा
स्यानुकूलत्वात् स्यापि कथनं युक्तं स्वयशसे स्यापि द्वयोरेनेन वा संबंधः संनिहितत्वाद्योग्यत्वाच्च स्वकीय यशायुक्ताया ग्नय इत्यर्थः ॥ तथा मित्राय
अहरभिमानी देवताये न द्वाचं वरुणाय रात्र्यभिमानि देवताये तद्वाचं अहोरात्रे वै मित्रावरुणावहोरात्रे वै खलु विपर्जन्यायर्षतीति तयामित्रं वा अहः
वारुणी रात्रिरित्यादि श्रुतिभ्यः मित्रावरुणयोरहोरात्र्यभिमानि देवत्वं अतएव पर्जन्यं प्रदातत्वात् ताभ्यामपि प्रथमसत्कं ॥ सुमृळीकाय शोभ
नसुखमित्रं प्रज्ञानं तत्सर्वं संबध्यते उक्ताभ्यो देवताभ्यः सर्वेभ्यः सर्वतः पृथु अतिविस्तीर्णं यथा भवति तथा तद्वर्षणकर्म ब्रवीमि ॥ ॥ अथ
चतुर्थीमृचमाह ॥ ॥ अस्माकं व इंद्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजं ॥ अस्माकं ब्रह्मोतयेवा पृत्सु कासुचित् ॥ न
हि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यं ॥ ॥ हे ऋत्विजः ॥ अस्माकमर्थं वो युष्मदर्थं वा इष्टये यागाय अभिमतप्रणयवा इंद्रमुश्म
सि अभिमतं कामयामहे उश कांतौ आदादिकः इदंतो मसिर्विह्दिस्येत्यादि संप्रसारणं ॥ यद्वा अस्माकं सखायमिति संबंधः ॥ कीदृशमिंद्रं सखायं स
खिवद्दत्यंतहितकारिणं समानं वा विश्वायुं विश्वेषां यागानां गंतारं प्रासहं प्रकर्षेण शत्रूणामभिभवितारं सहः क्विप् नहिवृतीत्यादिनोपसर्गस्य दीर्घः
युजं सर्वदा युक्तं सहायभूतमित्यर्थः ॥ पुनः सएवविशिष्यते ॥ वाजेषु ह्वीरान्नेषु प्रासहं यज्ञविघातिनः सहमानं युजं अभिमतफले युंजकं किं च हे
इंद्र अस्माकं ऊतये रक्षणाय ब्रह्मस्तुतं कर्म भरस्व ॥ कासु चित् रक्ष संग्रामेषु रक्ष समत्स्विति संग्राम नामसु पाठात् ॥ त्वां शत्रुः न हि स्तरते न हि ३३
नस्तिन विरोधमाचरति यं स्तृणोषि यं विश्वं शत्रुं स्तृणोषि वारमति स कश्चिदपि शत्रुर्न स्तृणाति तमस्तत्वेन सर्वभीतानिर्विधया भवंति शत्रुभावेन कोपा
चरति अज्ञातशत्रुत्वादित्यर्थः ॥ ॥ पंचमीमृचमाह ॥ ॥ नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ॥ नेषिणो

यथा पुरानेनाः शूर मन्यसे ॥ विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥ ॥ हे इंद्र कयस्य चित् चकुक्रस्य यजमानस्य अतिमतिं अतिक्रांत मननं वि 29
रुद्धमननं शत्रुं निषून मनितरां सु नाम य अस्मत्प्रणतं कुरु ॥ अंतर्भावितण्यर्थो यं हे उग्र उद्गूर्णबल इंद्र तिग्मिः रक्षणेः प्रीतिभिर्युक्तः सन् तेजिष्ठाभि 1914
ररणिभिर्न अतिशयेन तेजस्विभि युद्धाहृ पृथ्वीमार्गैर्पितेजस्वि शब्दादातिशायनिक इष्ठन् विन्मतोर्लुगिति टिलोपः ॥ अमतिं च आदि यथाना
मित्यादित्यास्मादृगाधिनमपीत्यर्थः ॥ यद्वा उत रक्षान्वयत्वेति ऋष्टाभिररणिभिर्नेजज्ञो युक्तः गमनसाधनं ने यज्ञादिमार्गैर्यथास्मान् प्रापितवानसि
तथा उग्राभिः प्रकाश काभिः ऊतिभिरक्षणीयाः फलभूतेर्नोस्मांत पिनयसि अभिमतस्वर्गादि फलं प्राप्यसीत्यर्थः ॥ न यतेश्चाहसः ज्ञापोलुक्
तत्र दृष्टांतः पुरा पूर्वं स्मिन्काले अस्मभित्रा दीन्यथातिभिर्नीतवानसि तथा न पालयेत्यर्थः ॥ हे शूर विक्रांत त्वं अनेनास्त्वं ॥ अस्मानप्यानेन सामन्यसे
किं च हे इंद्र वह्निर्वोढा स्वाभिप्रदानेन जगतां निर्वाहकः सन् पुरोर्मनुष्यस्य यजमानस्य पूरवोति मनुष्यनाम पूरवः जगत इति तंनामसु पाठात् ॥ तस्य
तस्य विश्वानि सर्वाण्येनांसि अप पर्षि अपनुत्य पालयसि पृणातेश्छांदसः शपो लुक् ॥ अतो नः अस्माकमपि आसा अंतिकं दयस्व जनदेशे अच्छ अ
भिमुख्येन आगत्य वह्निरभिमतं वोढा सन् अप अनभिमतमपनुत्य पर्षि अभिमतफलं पूरयसि ॥ ॥ इति द्वितीयस्य प्रथमे षोडशो वर्गः ॥ ॥ अथ
षष्ठीमृचमाह ॥ ॥ प्र तद्वोचेयं भव्यायेंदवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ॥ स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिं ॥ अव स्रवे
दघशंसोवतरमव क्षुद्रमिव स्रवेत् ॥ ॥ भव्याय भवनशीलाय प्रतिदिनं कर्माभिवृद्ध्या वर्धनशीलाय इंदवे अमृतेन सर्वस्य क्लेदयित्रे तदर्थं तद्दृश्य
माणं कर्म तां वा प्रवोचेयं प्रकर्षेण वक्तुं शक्तो भूयासं स्तोतरतिमहत्वादिति भावः ॥ वचो लिङि लिङ्याशिष्यङ् ॥ वच उम् इत्यस्य तद्धिति ॥ य इंदुः इषवान् एषणवान्
स्तन्मननीयं स्तोत्रं कर्मवा उदिश्य परेजति गच्छति रेजतिर्गत्यर्थः ॥ रेजति ध्वजतीति तंनामसु पाठात् ॥ आगामिने दृष्टांतः ॥ हव्यान होतव्य आहुतिर्यथा द
यं इंद्र अयणे आगच्छत्यादि वा इंद्र वा हूत्वा लपति नाभ्यायतीत्यर्थः ॥ स एवो दुःस्वयं निदः निंदकु लायां क्विप् सावकाश इति विभक्तेर्हासत्वा अस्म
निंदितुर्वै वैरिणां वधैर्हनन साधनैर्वधयस्व हननोपायः हनश्च वध इति भावे अप तत्सन्नियोगेन वधादेश आत इत्यतो दात ॥ दुर्मतिं दुर्बुद्धिं अ
स्मत् अस्मत् अंतेन आशिपत् न यतो किं च अघशंसः अघानां पापानां हिंसादीनां शंसिता स्तेनः अघशंसः वृक इति तंनामसु पाठात् ॥ अवस्र
वेत ॥ अवतरं अत्यंतं निकृष्टं अव अवस्थानात् ॥ अव अधामुखो भूत्वा स्रवत अघः पततु अवस्रवत्त्व प्रार्थते क्षुद्रमिवाल्प सुद्रव्यमुदकादि
र्पसंतं क्रवीयं ॥ दुर्नामेन मंत्रं स्तुभिरभिपादर्श्च माहि ॥ असत्याभिर्हि इंद्र स्तुतिभिर्यज्ञवेद्युप्त इतिभिः ॥ ॥ हे इंद्र वयं यजमानास्त्वं नादृशं
तपाश्रुति रूपं भूत याचा वाचनेम संभजेम यद्धा गम्य मश्रुतिं कुरु वामेत्यर्थः ॥ होत्रे तिवाङ्नाम होत्रा गीरिति तंनामसु पाठात् ॥ किं च एवं स्ता
मर्ये दावर्तमानं यज्ञादिहाद्वारा हुत्वा दीपमानमपि प्रयधमानं पुनस्त्व इव शिष्यंते सुवीर्ये शोभन सामर्थ्यापते रण्वं रमणीयं गंतव्यं पार्थिवैः मंत
यितुं शक्यत्वात् ॥ वरिवोयाचे स्तुतरपरा युदात्तत्वं ॥ किं च हे इंद्र दुर्मन्मानं दुःखेन मंतुं शक्यं त्वाम महिम्नाति मंतुं त्वात् सुमंतुभिःशो

भा॰ अ॰ २ मंत्रे मंत्रे स्तुत्या यत्नेः स्तोत्रैर्वा इयाहाविरूपेणान्नेन च आवृत्तां महिं सर्वतः संरक्षां भूयासं ॥ यद्वा इयाऽन्नेन निमित्तेन पूर्वं धनस्य प्रार्थितत्वाद्धिरण्यादी अ॰ २
२४ मंत्रं प्राथ्यंत एवं चा संपर्कः स्तुतिः छांदसो विकरणस्य लुक् ॥ किं च यत्र यागाय निष्पादकाभिः इंद्रस्य आभिः अविसंवादिनीभिः यथावत् मिलिताभिः अपां वृष्टिमिः कृता
भिः वृष्टिभिः हविष्मागच्छत धातिथं महिन्यार्कान्तरित्यर्थः ॥ पुनस्ता एव विशिष्यंते ॥ वृष्ण इति भिर्हविर्लक्षणानामन्नानां निर्मित्तेरा यास्त्राणैतादृर्ग्वेतम
दीति शेषः ॥ वृष्णं धातनयेगवानं वेति यास्कः ॥ ॥ अथाष्टमी ॥ ॥ प्रप्रावो अस्मे स्वयशोभिरूती परिवर्ग इंद्रो दुर्मतीनां दरीमन्दुर्मतीनां ॥ स्वयं
मारिषयत्स्वयानउपयंने ॥ इतमसंनविश्वतिक्षिप्रा तूर्णान्नवृषाति ॥ ॥ हे इंद्र कल्पितः वायुमद्रर्थं अस्मा अस्मादर्थं च अयमिंद्रः स्वयशोभिः स्व
कीयसंयुक्तः कृती ऊतीन्नी रक्षणेन दुर्मतीनां दुर्मननयुक्तानां विराधिनां परिवर्ग परिवर्जने निमित्तभूतेसति प्रकृष्टो भवति समर्थो भवतीत्यर्थः ॥
द्विर्भावः पादपूरणः ॥ यद्वा हे कल्पितः वायुमद्रर्थे अस्मे अस्माकं संबंधिभिः स्वयशोभिः स्वयमेवान्यैर्नरपेक्षेण स्तोत्रैः स्तुत्याः सन् ऊतीऊती
द्विर्भावः पादपूरणः ॥ यद्वा ... रक्षणप्रदः प्रभवति उपसर्गश्च नयोग्यक्रियाध्याहारः कुरुतितत् उच्यते दुर्मतीनां दुष्टानां परिवर्गे परिवर्जने भवति संग्रामे यागे वा ॥ पुनः स
एव विशिष्यते दुर्मतीनां दुरन्तकुमानवतां हननवृष्टीनां दरीमन् दरीमणि अतिशयेन दारयितरि एवमिंद्रस्य कृपालयतिसति अत्र भर्त्सकेरस्माद्
गाधिभिर्या तूर्णा तूर्णं वनी स्वनामा तूर्णा तूर्णं यनेवा वृत्ते नाते वेति यास्कः ॥ नास्मान्यतिरिपुयश्चाहिंसितुं रिवर्ष्यतां अनुमर्थेऽत्रध्येमूल्यायः ॥ उपेषेऽवगंतुं
अस्मान यान्तुं इंद्र गतोऽनुमर्थं कृसप्रत्ययः ॥ क्षिप्रात्ररितासेनास्वयं हत मम ताद्वृशित्वा सीत नेवक्षति अस्मान्वहेतुन प्राप्नोति ॥ तथास्मधिसका
इणनशत्रुना पिपुनर्नयक्षतिन यहतिव हतेऽत्यस्या मः ॥ क्षिप्र हुतीमितिप इंद्र सामर्थ्येनतत्रैव नशो भृदित्यर्थः ॥ ॥ अथ नवमी ऋचमाह
॥ ॥ त्वं न इंद्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ॥ सचस्व नः पराक आ सचस्वास्तमीक आ ॥ पाहि नो दूरादारादभिष्टिभिः सदा
पाह्यभिष्टिभिः ॥ हे इंद्र त्वं नः पथा समंत संबंधिना मार्गेण पुरो याहि आगच्छ ॥ अस्य तेऽपि लोपः ॥ उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वं ॥ कीदृशे
न मार्गेण अरक्षसा रक्षोवर्जितेन अनेहसा अवाध्येन यत्र मार्गस्य बाधिता हंत हत्वं ॥ यद्वा नोस्मानुद्दिश्य याहि ॥ किं विशिष्टः उति परिणसा परि
तोनद्धेन राया अस्मदत्तेन बहुविधधनेन युक्तः ॥ सन् इंद्र हे इंद्र नो स्मान्पराके अत्यंत देशात स्वर्गात आसचस्व समवेतो भव तथा अस्त
मीके अत्यंतांतिके इव यज्ञन देशसचस्व अस्मदत्त हविः सेवस्व संगच्छस्व किंच हुनासवंकाले यागकाले दूर अंतिके च अभिष्टिभिः अभितए
षणैः पाहि सम्यक् परिपालय ॥ ॥ अथ दशमीमृचमाह ॥ ॥ त्वं न इंद्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे ॥ ओजि
ष्ठ त्रातरविता रथं कं चिदमर्त्य ॥ अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥ ॥ हे इंद्र त्वं नः अस्मान् तरूषसा तरणकुशलेन अस्मा
नापद्भ्यः उत्तारयितुं शक्तेन राया धनेन उद्धर्ता भवेति शेषः ॥ हे इंद्र त्वां उग्रं चित उद्गूर्णबलं तमेव महिमा महत्वं अस्मत स्तोत्रजनितः कश्चिद्
दतिशयः सक्षत सचतेः संभजताम् उत्कर्षयतीत्यर्थः ॥ किमर्थं अवसे रक्षणार्थं ॥ तत्र दृष्टांतः ॥ महे महते अवसे रक्षणाय प्रकाशायोग्यादिरू
पाय मित्रं न सर्वजनानां मित्रं सूर्यमिव तं यथा महत्त्वेन संपोजयति तद्वदित्यर्थः ॥ यद्वा मित्रं न प्रियहितरूपं सखायम् मित्र तं यथा महते प्रीतये संभ
जते तद्वत् ॥ किं च हे ओजिष्ठ ओजस्वितम अतिशयेन बलवन् त्रातः रक्षितः अस्मान् पालयितः अमर्त्य मरणधर्मरहित इंद्र अविता अस्मान् धने ९४
न तर्पयिता त्वं ॥ कं चिद्रथं वेगवन्तं मारय अस्मद्व्यतिरिक्तं प्रमागच्छेति शेषः ॥ तथा हे अद्रिवः शत्रूणामतिशयेन भक्षकेंद्र अस्मद्व्यतिरि

क्तं कं चित् अन्यं महांतं वा शत्रुं मितिरीषः ॥ रिरिषे । बाधस्व तथा अद्रिवः रातं चित् अत्यंतं उत्कर्षं हिंसंतमपि शत्रुं हे अद्रेश रत्तेः भक्षकशात्रूणां अद्रि 31
अद्रिरादानात् अपि वा अत्तेः स्यात् तनित रत्तं ॥ रिरिषेः बाधस्व ॥ रिष हिंसायां छांदसः शपः श्लुः ॥ पुनर्थस्य नश्च ॥ रिरिक्षंतं अस्मान् हंतुं गंतुं 1914
मनः किलादुणा भावश्छांदस एव कुत्सितः ॥ कुत्सायां चिरात्सरत्वं कुत्सित इति यास्कः नात्रत्वात ॥ यद्वा समुच्चयार्थः किंचिदिव्य नेन सह समुच्चीयते ॥
॥ ॥ अथैकादशीमृचमाह ॥ ॥ पाहि न इंद्र सुष्टुत स्रिधो अवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनां ॥ हंता पापस्य रक्षसस्त्राता विप्रस्य मावतः ॥
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥ हे इंद्र सुष्टुत शोभनस्तुत त्वं स्रिधः स्रेधनात् दुःखात् दुष्याद्वा पापाद्वा नोस्मान्पाहि रक्ष
यतस्त्वं दुर्मतीनां दुर्मनस्कानां रक्षः प्रभृतीनां अवमन्यनस्यामिति नामउदात्तत्वं सदमित् सर्वदैव अवयाता अधो यातयिता प्रापयिता अतः
पाहि अतएव हे इंद्र देवो मत्कल्यात् हुतः सन् दुर्मतीनां दुष्टमननवतां यागविघातकानां अवयाता सि तथा रक्षसो रक्षणस्य निमित्तभूतस्य रक्षोर
क्षितव्यमस्मादिति यास्कः ॥ तादृशस्य पापस्य फलप्रतिबंधरूपस्य हंता घातकोसि ॥ यद्वा पापस्य पापिनो रक्षसो राक्षसादेः हंतासि तथा माव
तो मत्सदृशस्य विप्रस्य मेधाविनो यजमानस्य त्राता रक्षितासि ॥ अतो हेतोः हे इंद्र वसो सर्वेषां निवासभूत त्वां जनिता सर्वस्य जनयिता आ
दिव्यतां परमेष्ठी जीजनत् ॥ आजनत् उत्पादितवान् तथा हे वसो वासयितः । त्वां रक्षोहणं जीजनत् रक्षोहणनाय त्वां उत्पादितवान् जनयतेर्लु
ङि चङ्रूपं ॥ यज्ञादि विघातिनां रक्षः प्रभृतीनां विघाताय हींद्रस्यावतार ॥ तमिंद्राद्देवतान्त्वेऽत्यंतेत्याद्युपनिषद् घातनार्थो हि शब्दः ॥ ॥
इति द्वितीयस्य प्रथमे सप्तदशो वर्गः ॥ ॥ एंद्र याह्युपन इति दशर्चं चतुर्थं सूक्तं परुच्छेपस्यार्षमैन्द्रं अंत्या त्रिष्टुप् शिष्टा अत्यष्ट
यः अत्र त्रिष्टुबंतप्रभावानार्थीयत सर्वमात्यष्टमिति विश्वायणप्रतिज्ञातत्वात् ॥ एंद्र याहि दशांत्या त्रिष्टुबित्यनुक्रमणिका ॥ ऐन्द्रस्य पष्ठ इति
नि ऐकस्य पततः अपष्टस्यति तिवः सूत्रितं ॥ एंद्रयाह्युपनः परावत प्राधान्यस्याति महाव्रते माध्यंदिनसवने ब्राह्मणाच्छंसिनो नुरूपतृचे प्रथमा
एंद्र याहीत्येषा महाव्रतस्य पंचविंशतिमिति खंडे शौनकेनसूत्रितं एंद्र याह्युपनः परावत इंद्राय हि द्यौरसुरो अनम्नतेति ॥ ॥ सैषा सूक्तप्रथ
मा ॥ ॥ एंद्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः ॥ हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ॥ पुत्रासो न पितरं वाजसातये मं
हिष्ठं वाजसातये ॥ ॥ हे इंद्र परावतः दूरदेशात स्वर्गलक्षणात नोस्मानुप आयाहि अस्मत्समीपं प्रत्यागच्छ ॥ तत्र दृष्टांतः ॥ अयं न पुरोवर्ती अग्निरभिषुतः
सोमो वा प्रस्तुतत्वान्निर्दिश्यते ॥ स इव यद्यपि पुरस्ताद् प्रहाराग्निर्विधार्थः यानकारः सर्वत्र ॥ तथाप्यत्रौचित्येनाप्यमाथ इयोगपात ॥ यद्वा परावतान
दूरदेशादिव यद्यपि वत्स सर्वदा सन्निहितस्तथापि स्वर्गाद्यत्स्याद् दूरदेशादिव आगम्यते अयमिति विभक्तिव्यत्ययः ॥ अमुं देवयजनदेशं अच्छ अभिप्रा
प्तुं आयाहीति शेषः ॥ तत्र दृष्टांतः ॥ सत्पतिः सतां सर्वदा वर्तमानानां पतिः पालकः यजमान इव ॥ पत्यावैश्वर्य इति पूर्वपद प्रकृतिस्वरत्वं ॥ स यथा विद
थानि यज्ञानि अनुष्ठेयतानानि यद्वा सत्तां विद्यमानानां फलानां पालकोग्निः स यथा विदथानि यज्ञगृहाण्यागच्छति तद्वत् त्वमपि यज्ञगृहाण्यागच्छ
यद्वा राजानां नक्षत्राणां पतिः राजा चंद्रमाः अस्तमिव स यथा स्वधाम स्थानमागच्छति तद्वत् ॥ किंच प्रयस्वंतः हविर्लक्षणान्नवंतो यजमानाः वयं त्वां
हवामहे आह्वयामः ॥ किमर्थं सुते ॥ अभिषुते सोमे निमित्तभूते सुते सोमे निमित्तभूते सति कीदृशा वयं सचा अस्त्विग्भिः सहिताः सचा सह इत्य
र्थ इति यास्कः ॥ आह्वाने दृष्टांतः पुत्रासः पुत्राः पितरं पालकं जनकमिव तं यथा वाजसातये अन्नस्य संभजनाय आह्वयंति तथा वयमपि तावाह्वया
म ॥

भा॰अ॰२ किंच मंदिष्टं मंदनीयं त्वां वाजसातये संग्राम प्राप्तये नज्ञायाय हविःस्वीकाराय वा आ नयाम ॥ पत्न्वेद्धनि माध्यंदिन सवने प्रस्थितयाज्यानां पुरस्तादन्या अ॰१
कृचः प्रक्षेपणीयाः ॥ तत्र हेतुः पुरस्तात्पिबा सोममिंद्र इति हि एवस्य प्रातःसवन इति खंडः स्त्रितं ॥ पिबासोममिंद्र सुवान मद्रिभिरिंद्रायाहि घोरसुरोभ
३५ नमस्तेति ॥ ॥ सैषा सूक्ते द्वितीया ॥ ॥पिबासोममिंद्र सुवान मद्रिभिः कोशेन सिक्तमवतं नवंस गस्तात पाणो नवंसगः ॥ मदाय हर्यताय ते तुविष्टमा
य धायसे ॥ आत्वायच्छंतु हरितो न सूर्यमहा विश्वेव सूर्यं ॥ ॥ हे इंद्र वंसगः वननीय गमनस्त्वं सोमं पिब ॥ अन्वीत स्विद् इति दीर्घः ॥ कीदृशं तं अद्रि
भिरभिषवसाधनैर्ग्रावभिः सुवानं सूयमानं ॥ कर्मणि कर्तृ प्रत्ययः कोशेन सिक्तं कोशस्थानी येन दशापवित्रेणाधितं ॥ यद्वा अननमित्यनेन स
हसंबंधः कोशेन इति लक्षणेन मिश्रं स्नावितात्तलक्ष्य शिवं अवतं न आहाव लक्षणवदभिवर्तं यथा वंसगो वननीयगमनः शीघ्रगामी वृषभः पिबति
तद्वत् ॥ तात पाणो नवंसगः यथा मर्त्येन तत्पितो वंसगो वननीयगमनः शीघ्रगामी पुरुषः इव आहावादिकमागत्य पिबति तिद्वत् ॥ किमर्थं पानमिति
तत्राह तेनव मदाय तस्मये हर्यताय विक्रांति हेतवे कांत्यर्थं वा ॥ हर्यगतिकांत्योः महृशी त्यादिनांतच तु विष्टमाय महत्वाय प्रवृद्धत्वाय धायसे तद्
थं मदइपज्ञायते तदर्थाय धाञो वहिहाधात्र इत्यसुनिणिदित्यनुवृत्तिरित्तासुगिति युगः ॥ यद्वा तेन च तु विष्टमाय धायसे अति प्रभूताय पानाय
त्वां आगच्छंतु अभिमुख्येन गमयंतु अश्वा इति शेषः ॥ तत्र दृष्टांतः ॥ हरितो न सूर्यं हरिवर्णा विदिशाः एतं नामका अश्वाः सूर्यमिवतं यथा अ
भिमतदेशं अभिप्रेरिता वहंति तद्वत् किंच अहा विश्वा सर्वाण्यहानि सूर्यमिवतं यथा तमेव प्रतिदिनं वहंति तथा अस्म द्यागादिवसेषु प्रातिदिनमा
वहंतु ॥ ॥ अथ तृतीयामृचमाह ॥ ॥ अविंदद्दिवो निहितं गुहानिधिं वेर्नगर्भं परिवीतमश्मन्यनंते अंतरश्मनि ॥ व्रजं वज्री गवामिव सिषासन्नंगिरस्तः
मः ॥ अपावृणोदिष इंद्रः परीवृता द्वार इषः परीवृताः ॥ ॥अयमिंद्रः दिवो द्युलोकात अनीतं सोमं अविंदत ॥ अत्र भगवत्ता श्येन द्युलोकाद्धृत्याहृत्या
पक्षिरूपयायत्तनं भमानानीतं स्वीकृतवानित्यर्थः ॥ द्युलोका द्वान यनं त निरी यत तीयस्यामितोदिवि सोम आसीत ॥ तं गायत्र्याहरदित्यादि श्रुत्या प्र
सिद्धं सएवविशिष्यते ॥ गुहानिहितं अतिगोप्यप्रदेशे पर्वतादिरोपितं अत एवनिधिस्थानीयं अविनाशामित्यर्थः ॥ आयन दृष्टांत ॥ वेः पक्षि
णो गर्भं न शिशुमिव यथाकपोतादि स्त्री पक्षिणी शिशुं व्याधादिभयात् स्थिरे दुर्गमे स्थापयित्वा तत् स्थानुमपश्यंती परिभ्रम्य विंदति तद्वदित्यर्थः
॥ पुनः कीदृशं अश्मनि पाषाणे विस्तृते अनंत अश्मनि अपरिमित पाषाणे पर्वतादौ परिवीतं लतादिकंटकादिना परितो वेष्टितं सत्वपीतरे वेदे च
युकाश्यातिक्षायत्रुतिर्वाह ॥ अयमिंद्रो वज्री वज्रवान् गवां व्रजमिव पणिनासुरेणापहृतं भूमौ स्थापितं पाषाणेन पिहितं द्वारं गवां व्रजं यथात म
सुरं जित्वाद्वारमुद्घाटयन्तद्वत्सोमं सिषासन् ॥ संभोक्तुमिच्छन् सनोतेर्वंतर्थे तिति विकल्पादिड्भावे तन सनेत्वात् ॥ अविंदत अयमर्थः पणि
ने व गावइत्यादिश्रुतिषु प्रसिद्धः ॥ तथा यमिंद्रः परीवृताः परितो मेघेनावृताः इषः अंन हेतुभूतस्योदकस्य द्वारः द्वाराणि अपावृणोत अ
पावृतान्यकरोत उद्घाटितवानित्यर्थः ॥ तथावृत्वा इषः उच्यमाणा निर्ग्रीष्मादिप्रत्नानि परिवृताः भूमेः परितोव्याप्तानकरोत वज्रेण मेघं भित्वा
जलवर्षणेन सस्यादिसमृद्धिं कृत्वा व्रीह्यादिकं भूमौ व्याप्तमकरोदित्यर्थः ॥ यतो यमेवं कृतवान अतः सोमः स्वीकार्य इत्युक्तः ॥ ॥चतुर्थीमृचं॰ ३५
दादृहाणो वज्रमिंद्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत ॥ संविव्यान ओजसा शवोभिरिंद्र मज्मना ॥ तष्टेव वृक्षं वनिनो
नि वृश्चसि परश्वेव निवृश्चसि ॥ ॥अयमिंद्रः गभस्त्योर्बाह्वोर्वज्रं दादृहाणः दृढं गृह्णान इह दादृह धारि हः कानच् ॥ गभस्तीति बाहुनाम गभ

त्सौबाहू इति तं नामसु पाठात् किमर्थं अशनाय शोरवरिक्षेपणाय तिग्मं अत्यंत तीक्ष्णं वज्रं सं श्यत सम्यक् तीक्ष्णं करोति शो तनूकरणे ओतः श्या 33
नीत्योकारलोपश्छांदसः ॥ भावः ॥ यद्वा केशांतश्च लोपइति कारलोपः ॥ तत्र दृष्टांतः ॥ त्याश्रेव उदकमिव उदकं यथाश्रवणानि रशनाय अभिमं 1914
नीत्यो कारलोपश्छांदसो भावः ॥ यद्वा लेथांतश्चलोपइति कारलोपः ॥ तत्र दृष्टांतः ॥ त्याश्र व उदकमिव उदकं यथाश्चवृणानि रशनाय अभिमं
त्रणादिसंस्कारेण तीक्ष्णीक्रियते तद्वत् ॥ क्षद्मस्तु उदकनामसु क्षद्मन्भ इति तं नामसु पाठात् ॥ पुनरपि तदेव विशिष्यते ॥ अहिहत्याय अहेर्वृत्रस्य
मेघस्य वा हननाय हंतेर्हननस्तच्चेति क्यप् नकारांतादेशश्चास्य संश्यत पूर्वं मेव तीक्ष्णं हंसत पुनरपि वधाय तीक्ष्णयति हे इंद्र ओजसा बलेन परा
भिभववसामर्थ्येन शवोभिः सेनालक्षणैर्बलैः मज्मना शरीरेण च बलेन संविव्यानः सम्यक् युक्तः सन् लिटः कानच् ग्रहिज्यावयीति संप्रसारणं
॥ तष्टा वृक्षामिव यथा कश्चित्तष्टा तक्षाणां तक्षणस्य साधुकर्ता वनिनोवनसंबंधिनो वृक्षान् निवृश्चति यागार्थं निरतं छिनत्ति तक्षणेन तनूकरो
तितद्वत् ॥ तद्वदास्मिन्यथा कश्चित परशुना वृक्षं छिनत्ति तथा त्वं परशुनेव वृक्षं निवृश्चसि ॥ यथा परशुना कश्चिच्छिनत्ति तद्वत् यथा त्वमप्युक्तैर्विविधैर्बलैर्नितरा
तिरस्याल्पमप्यस्माकं चक्रमाचरं तं शत्रुं निवृश्चसि किंच परश्वेव निवृश्चसि ॥ यथा परशुना कश्चिच्छिनत्ति तद्वद्यथात्व मप्युक्तैर्विविधैर्बलैर्नितरा
मस्मद्द्विषं निवृश्चसि ॥ ॥ अथ पंचमीमृचमाह ॥ ॥ त्वं वृथा नद्य इंद्र सर्तवे च्छा समुद्रमसृजो रथां इव वाजयतो रथां इव ॥ इत ऊतीरयुंजत समानमर्थम
क्षितं ॥ धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥ ॥ हे इंद्र त्वं वृथा अप्रयत्नेनैव नद्यः नदीः समुद्रमच्छ अभिमुख्येन सर्तवे प्राप्तुं असृजः अवि
सृजत्यवसृजः ॥ तत्र दृष्टांतः ॥ रथानिव यथा वरथान संग्रामं प्रति अस्त सर्तवे अभिमुख्येन प्राप्तुं प्रस्थानं सितद्वत् ॥ वाजयतो रथानिव संग्राम
मिच्छत्याज्ञितवानसि ॥ तत्र दृष्टांतः ॥ रथानिव यथा वरथान संग्रामं प्रति भक्त सर्तवे अभिमुख्येन प्राप्तुं सृजसि तद्वत् ॥ वाजयतो रथानिव युद्धार्थं ॥ किंच इतः ॥ अस्मात्संनिधि देशादूतीः
मन्नं वा उक्तं तास्त्वाह यायथासंग्राममन्नं रथानसृजसि तद्वत् ॥ युद्धं तात इतऊतुरनु मदिति विभक्तेधुद्धं ॥ किंच इतः ॥ अस्मात्संनिधि देशादूती
यार्थं तसिल् अस्मान्प्रति दिनं ऊतयः गमनरक्षणवत्यो रक्षणवत्यो वा नद्यः समानमर्थं समानप्रयोजनवद्रक्षितमुदकं अयुंजत योजितवत्यः स्वप्रसादादि
नि भावः ॥ अर्थं शब्द उदकविशेषणः सन्नपुंसकलिंगः अक्षितमित्युदकनाम अक्षितं बर्हिरिति तं नामसु पाठात् ॥ तत्र दृष्टांतः ॥ मनवे मनोरर्थाय
ति भावः ॥ अर्थं शब्द उदकविशेषणः सन्नपुंसकलिंगः अक्षितमित्युदकनाम अक्षितं बर्हिरिति तं नामसु पाठात् ॥ तत्र दृष्टांतः ॥ मनवे मनोरर्थाय
धेनूरिव धेनवो यथा विश्वदोहसः सर्वार्थं दोग्ध्र्यः यथा जनाय समर्थाय तदर्थं विश्वदोहसो भवंति सर्वक्षीरप्रदा भवंति यद्वा जनाय सर्वजना
र्थं सस्यादीनि उदकस्यन द्यः विश्वदोहसः संपूर्णदोग्ध्र्यो भवंति ॥ सर्वत्र प्रवहंति अत्र न द्यः प्रीणनात् दोहसदृशत्वं पच्यते ॥ ईदृक् जगदुपकारि
ष्टिप्रद इंद्र एव स्तुतिः ॥ ॥ इति द्वितीयस्य प्रथमे अष्टादशो वर्गः ॥ ॥ अथ षष्ठीमृचमाह ॥ ॥ इमां त आयवः समनुयंत आयवोर येन धीरः स्व
पा अतक्षिषुः सुम्नाय त्वामतक्षिषुः ॥ शुभं तासो न्यं यथा वाजेषु विप्र वाजिनं ॥ अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥ हे इंद्र तव इत्थं वचस्यं
तो धनमात्मान इच्छतः अध्वर्य्वादयः हविषां धनवंतः ऋत्विजः आयव इति मनुष्यनाम आयवः अनव इति तं नाम सुपाठात् ॥ ते इमां क्रियमाणां स्तुति
मुपयाचं अतक्षिषुः संपादितवंतः स्वपाः शोभनकर्मवान् कुशलो वा दुर्मीढो सामनसीढुरिव तरपदादयुदात्तत्वं ॥ धीरः धीमान् रथं नरथमिवतं यथा
संपालनसाधुकार्यात तद्वत् ॥ एवं कृतां स्तुतिं सुम्नाय सुखाय अतक्षिषुः अनुकूलमुख्या ईयंति सुम्नमिति सुखनामसु सुम्नं सग्म्यमिति तन्नामसु पाठात् ॥ किं
बहुविप्रमेधाविन इवाजेषु संग्रामेषु वाजिनं बलवंतं त्वां शुंभतः गुणैर्दीपयंतः ॥ अतक्षिषुः स्तुत्या प्रीणयंति तत्र दृष्टांतः ॥ अत्यं यथा शयणी
नं अश्वं यथा भद्राः स्तुवंति तद्वत् ॥ यद्वा अन्यं अन्य शीलं वाजिनं वेगवंतमश्वं वाजेषु संग्रामेषु यथा त्सा हयंति तद्वत् किंच शवसे बलाय धनाधनानां
सातये लाभाय वस्तुमइति शेषः ॥ इति अनित्य प्रतिसाता निर्त्यादिना किन उदात्तत्वं ॥ न केवलं धनमात्रं किंतु विश्वा धनानि सातये सत्यानि प्रीण
न धनानि गवादिधनानि पश्वर्थं इत्याततं लाभाय ॥ तत्र दृष्टांतः ॥ धनाधने संग्रामश्रवसे वीर जयसाधनबलाय सातये तेषामेव धना

भा॰अ॰२ नां ग्रामे ये च अन्यस्मिन्वसमनन गामिनमश्वमिव तं यथास्तुवंति तद्वत्॥ ॥अथ सप्तमी॥ ॥भिनत्पुरो नवतिमिंद्र पूरवे दिवोदासाय महि दाशुषे अ॰२
नृतो वज्रेण दाशुषे नृतो॥ अतिथिग्वाय शंबरं गिरेरुग्रो अवाभरत्॥ महो धनानि दयमान ओजसा विश्वा धनान्योजसा॥ ॥ हे इंद्र नृतो रणे नर्तनशी
१६ ल त्वं दाशुषे हवींषि दत्तवते पूरवे अभिमतपूरकाय मनुष्यनामैतत्॥ महि महते दिवोदासाय एतन्नामकाय राजर्षये दिवोदासे पश्चादनुगिन्यलुक् दिवो
दासाद्धीनां छंदसीति पूर्वपदस्य प्रकृतिस्वरत्वं॥ नवतिं एतत्संख्यानि पुरः शत्रूणां पुराणि भिनत् अभिनत् भिन्नवानसि तथा हे नृतो गात्रविक्षेपकुशल हस्तपादा
दिप्रक्षेपणकुशल शत्रूणां हिंसक वज्रेण क्षेपणसामर्थ्येनायुधेन दाशुषे हवींषि दत्तवते दिवोदासायान्यस्मैवाभिनत् तमपि शंबरं भिन्नवानसि इदानीं परोक्ष
णाह अतिथिग्वाय पूजार्थमतिथीन्गच्छते दिवोदासाय तदर्थं गमेरौणादिको ग्वप्रत्ययः॥ उग्रः उद्गूर्णबल इंद्रः पूर्वं पुरभेदनसमये विक्षिप्तमपि अभियमा
णं गिरिमारुह्य दंशंबरं तं ग्रामानमसं गिरेः दुर्गमात्पर्वतादेः सकाशात् ओजसा स्वकीयेन बलेन अवाभरत् अवाङ्मुखमवकृष्यमाणं हतवान्
किं कुर्वन् महः महांति धनानि तदीयगवाश्वादीनि दयमानः दिवोदासाय राज्ञे साधयन्। दयतिर्दानगतिहिंसादानेषु अपः पित्वादनुदात्तत्वेन धा
तुस्वरः सार्वधातुकस्वरेण धातुस्वरः न केवलमल्पं धनं किंतु विश्वा धनानि सर्वाण्यपि तेषां मणिमुक्तादीनि ओजसा स्वकीयेन बलेन दयमानः सा
धयन् अवाभरत्॥ ॥अथाष्टमी॥ ॥इंद्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु॥ मनवे शासदव्रतान्त्वचं कृष्णामरं
धयत्॥ दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति॥ ॥अयमिंद्रः समत्सु रणेषु समदः समरण इति तन्नामसु पाठात्॥ यजमानं आर्यं
सर्वैर्गंतव्यमार्यं प्रावत् अरक्षत्। किं कुर्वन् शतमूतिः स्वभक्तेष्वपरिमितरक्षण इंद्रः विश्वेषु लिंगव्यत्ययः आजिषु सर्वेषु संग्रामेषु स्वर्यजमा
नं प्रावत् तथा स्वर्मीळ्हेषु स्वर्गदेशेषु सुखस्य सेचयितृषु वा आजिषु महासंग्रामेषु प्रावत् स्वर्गप्रदानेन रक्षति रणे अभिमुख्येन हतानां वीरा
णां स्वर्गः पराशरेण स्मर्यते द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति॥ अत्रेतिहासमाचक्षते॥
अंशुमतीनाम नदी तस्यास्तीरे कृष्णनामासुरः वर्णतश्च कृष्णो दशसहस्रैरनुचरैरुपेतस्तद्देशवर्तिनः पीड्यमानास्तत्र बृहस्पतिना प्रेरितः
स न मरुद्भिः सहितः कृष्णं तदीयत्वचमुत्कृत्य सानुचरमवधीत् अयमर्थः॥ अव द्रप्सो अंशुमतीमतिष्ठदित्यादिना परिष्पष्टं भविष्यते॥ तच्चोच्य
ते॥ अयमिंद्रो मनवे मनुष्याय विभक्तिव्यत्ययः मनुष्याणामर्थाय अव्रतान् व्रतमिति कर्मनाम तद्रहितान् यागविद्वेषिणः शासन् शिक्षित
वान् हिंसितवान् शासेर्लेट्यडागमः तथा कृष्णां त्वचं कृष्णनाम्नो असुरस्य कृष्णवर्णां त्वचं उत्कृत्य अरंधयत् अहिंसितवान्॥ रधिर्हिंसायां रधिजभोर
चीति नुमागमः उक्तेन प्रकारेणाग्निः तद्वद्दहति धक्षन् भस्मीकरोति॥ लेट्यडागमः सिब्बहुलमिति सिप् तथा विश्वं ततृषाणं ओषति सर्वमपि हिंसकं तदनु
चरसंघं दहति यत्किंचिद्रवद्धिंसामितिनत्वाह॥ अर्शसानं हिंसार्चिह्नतावादितं सर्वमपि न्योषति निःशेषेण दहति॥ ॥अथ नवमी॥ ॥सू
रश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति॥ उशना यत्परावतोऽजगन्नूतये कवे॥ विश्वानि विश्वा मनुषेव तुर्वणिरहा विश्वे
व तुर्वणिः॥ तत्रापीतिहासमाचक्षते॥ कुत्सनामा राजर्षिः पूर्वमिंद्रवज्रेण वधो माभूदिति ब्रह्मणो वरं लब्ध्वा इंद्रमगणयित्वा हुत्वा आसन तान् हंतुमिंद्रः
सूर्यं रथस्य चक्रमादाय अवधीदिति तदिदमुच्यते॥ अयमिंद्रः सूरः सर्वस्य प्रेरकः प्रथमा। चक्रं रथस्य चक्रमादाय ओजसा शरीरेण बलेन जा १६
तः समृद्धः सन् प्रवृहत् प्रक्षिप्तवान् बहूदुष्यमनंतौ दारिकः किं च अरुणः अरुणवर्णः अत्यंततेजोयुक्तः सन् प्रपित्वे तेषां समीपे समीपमा

गत्य वाचं वागुपलक्षितं प्राणं मुषायति मुष्णाति मुषायति मुष्णाति वा॥ प्रपित्व इत्यासन्ननाम यद्वा वाचं तेषां प्रलापध्वनिं मुषायति तेषु हतेषु ध्वनिः स्वयमेव
विश्रांतो भवति अभवीरित्यर्थः॥ अथ इंद्रस्तद्द्युम्नवान् सन् ओजसा स्वकीयेन तेजसा युक्तश्चक्रं प्रवृहन् मानिवारणार्थं असुरजयाय वाचं कोपकलिल
तं यं वक्रघर्षणार्थे तत कृतातिपूर्वं अरुणस्त्वित्यर्थं ताप्रपित्वमंदहा घ्नसुराणां प्रपित्वे वाचं तेषां प्रलापिभिं ध्वन्यादिध्वनिं मुषायति मुष्णाति मुष
कृतस्यश्चः अहायपि छंदसि शायच् वर्तिश यज्ञादेशः तदनंतरं सूर्यः ईशानः सर्वाणि तमांस्यसुरान्वा निराकर्तुं समर्थः सन् आमुषायति
समंतान्मुष्णाति॥ अपि च हे कवे क्रांतदर्शिन् यत् यस्त्वं उशना उशनसः एतन्नाम्नो महर्षेः रक्षणाय परावतो दूरात् स्वर्गस्थानात्
अजगन् आगतवानसि गमेः लिपि छांदसः शपः श्लुः॥ मंत्रोच्चारितोपमानाधात्वा सिंतिनन्तं॥ यद्वा उशनसा युक्तः सन् अजगन् आगच्छ आगत्य च
विश्वा विश्वानि अस्मानि मत्स्यधनान्याहाय अस्माकं तुर्वणिस्तूर्णवनिः क्षिप्रं संभक्ता भवति शेषः॥ तुर्वणिस्तूर्णवनिरिति निरुक्तं॥ तत्र दृष्टांतः॥ मनु
षेव मनुष्येणेव यथा वा मणिपाणिः दायादान् अभिमतं धनं मानयति तद्वत्॥ यद्वा मनुषे मनुष्याणामिव इतरेषां सर्वाणि विश्वा अस्मानि
सर्वाणि धनान्याहाय तुर्वणिर्भवसि इदमस्माकमपि न केवलमेकस्मिन्नेव यागादिने किंतु अहा विश्वेव विश्वान्यहानि सर्वेष्वप्यहस्सु तुर्वणिर्भव॥ यद्वा
तुर्वणिस्त्वं अहा विश्वेव विश्वान्यहान्यतिदीर्घमायुर्यथा दत्तवानसि तथा अस्मान्यपि। उभयमपि देहीत्यर्थः॥ ॥अथ दशमी॥ ॥स नो नव्येभि
र्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः॥ दिवोदासेभिरिंद्र स्तवानो वावृधीथा अहोभिरिव द्यौः॥ हे इंद्र वृषकर्मन् अभिमतवर्षणव्याप
रवन् पुरांदर्तः असुरपुराणां दारयितः सः बलं त्रिनइतिपक्ष्याः परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्य पादादावाद्युदात्तत्वं॥ सता
दृशमहानुभावस्त्वं नोऽस्मान् नव्येभिर्नव्यैः तन्नरस्य इदानीं प्रतिपादितप्रकारैः स्तोत्रैः सत्पायुभिः पालनप्रकारैः शग्मैः सुखैश्च हितैरुक्थैः
कृतैः पाहि पालय॥ किंच हे इंद्र दिवोदासेभिः दिवोदासगोत्रोत्पन्नैः अर्च आदित्यादय॥ अस्मभिः पारुच्छेपैर्ऋषिपुत्रार्थे बहुवचनं स्तवानः स्तूय
मानः कर्मणि कर्तृप्रत्ययः॥ वावृधीथाः प्रवृद्धो भव॥ भवतेर्लिङि छांदसः शपः श्लुः॥ किमिव अहोभिरिव द्यौः॥ द्योतनशील आदित्यः अहोभिः
प्रतिदिवसं यथा प्रवृद्धो भवति॥ तथा अस्मत्स्तुत्या अत्यंतं प्रवृद्धो भवेत्यर्थः॥ ॥इति द्वितीयस्य प्रथमे एकोनविंशो वर्गः॥ ॥इंद्राय हीति सप्त
र्चं पंचमं सूक्तं इंद्राय समस्य अनुक्रमणिका॥ परुच्छेप ऋषिः॥ अत्यष्टिश्छंदः॥ इंद्रो देवता॥ अस्य पंचमेऽहनि माध्यंदिनसवने होत्रकाः स्वस्वशस्त्र
एतत्सूक्तं त्वेवं वक्ष्यमाणा या इंद्रं मावधयुः। अत्रायं विभागः॥ आद्यास्तिस्रो मैत्रावरुणस्य तृतीयाद्यास्तिस्रो ब्राह्मणाच्छंसिनः पं
चम्याद्यास्तिस्रोऽच्छावाकस्य एवं चतुर्थेऽहनीति खंडे सूत्रितं यत्र द्रुतं इंद्राय हि द्यौरसुरो अनम्नतेत्येवमेव तिस्रो वा इनितास्मिन्वै सवने प्रशास्त्रा
दीनां प्रस्थितयाज्याः पुरस्तादाहिताः पञ्चचः एकैकशः प्रक्षेपणीयाः पञ्चस्यातिष्वं इंद्र सूत्रितं॥ इंद्राय हि द्यौरसुरो अनम्नतेति खल्वितिमहा
व्रतनिष्केवल्ये इंद्राय हीति तृचोऽवकल्पिकानुरूपा द्वितीयः। महाव्रतस्येति खंडे सूत्रितं॥ ऐंद्र्या आवपनः परावत इंद्राय हि द्यौरसुरो अनम्नत
ति॥ ॥तत्र प्रथमा॥ ॥इंद्राय हि द्यौरसुरो अनम्नतेंद्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः॥ इंद्रं विश्वे सजोषसो देवासो दधि
रे पुरः॥ इंद्राय विश्वा सवनानि मानुषा रातानि संतु मानुषा॥ ॥द्यौः द्योतनशीला द्युलोकस्तन्निवासिदेवस वा द्यावासुरनिरसन
शीलः अपुण्यकृतामपतन्निवासात् इंद्राय हि इंद्रायैव अनम्नत स्वयमेव नम्रो भवति। नमेः छांदसो लङि कर्मकर्तर्यात्मनेपदं दुर

35
1914

भा॰ अ॰ २ स्तनमामितियागभावः॥ छांदसः शपः श्लुः॥ दैत्याद्विंशंयाभावश्च अनुनासिकलोपः हिरावः प्रसिध्यर्थावातथाइंद्रायइंद्रार्थं॥ महीम इतीपृथिवीम अ॰ २
मित्यत्र यः सर्वत्रैवअनमताउभयत्राश्रियवाचिशब्देनाश्रयलक्ष्यतेयाम आगच्छतहविवर्तकेनसाधनेनतिवरीमभिर्वरणीयैः स्तोत्रैर्हविर्भिर्वा॥ किंच
२० युष्मासांतोभंनस्ययशसोवाक्याभनिमित्तसतिवरीमभिर्वरणीयैर्हविर्भिर्युक्ताः यजमानाः प्रश्रभवंतिकिंच इंद्रमेवविश्वेसर्वेदेवासः देवाः सजोषसः समा
नप्रीतियुक्ताः रवृ.मस्यभवाः पूर्वं अमत्रजयार्थंपुरःदधिरेपुरतः स्थापितवंतः इंद्रमुखेनैवासुरान्जितवंतइत्यर्थः॥ तथामानुष्यसवनानिमनुष्याणांसंबं
धीन्यभिषवयुक्तानिप्रातरादिसवनानि इंद्रायहि इंद्रायैवभवंतु तथा॥ मानुषामनुष्याणांकृतानितानिसंबंधीनिरातव्यानिपुरोडाशादीनि इंद्रायहि इंद्रायैवसंतु
इंद्रप्रीणयितुंसमर्थानिभवंत्वित्यर्थः॥ ॥अथद्वितीयामृचमाह॥ ॥विश्वेषुहित्वासवनेषुतुंजतेसमानमेकंवृषमण्यवः पृथक्स्वः सनिष्यवः पृथक्॥ तंत्वा
नावनपर्षणिंशवस्यधुरिधीमहि॥ इंद्रंनयज्ञैश्चितयंतआयवःस्तोमेभिरिंद्रमायवः॥ ॥हेइंद्रत्वात्वांएकं एकमेवसंतंविश्वेषु सर्वेषुसवनेषुतइत्यादिका
हीनसत्ररूपेषुसर्वेषुसोमयागेषुयजमानाः तुंजतेतत्परयंतिहविर्भिर्दीप्तिरनेकेईशंत्वांसमानसर्वेषामेकरूपंइंद्रशायजमानावृषमण्यवः अभि
मतवर्षणायवामेवमन्यमानाः पृथक्पृथक्विविक्ष्यस्वस्वयागोक्तिमिच्छंतः स्वःस्वर्गमकारविशिष्टंवासनिष्यवः संभक्तुकामाः पृथक्तुंजतेपृथगेवचलरयंतितुं
जतिर्दानार्थः॥ छांदसःतिनुजतेइतिनेनामरूपावान॥ तंत्वा इत्यादिः त्वांशर्धस्यबलस्यसेनारूपस्यधुरिवहनेनजयायधीमहिमतिष्ठापयामः॥ यद्वाशर्ध
पस्य अस्मदीयशरीरबलस्यधुरिधीमहि॥ शर्ध इतिबलनामस्वपसमहइतिसन्नामसुपाठात॥ तत्र दृष्टांतः॥ चर्षणिनावंनपारस्यसंभक्तापुरुषस्तित्रि
यापतस्यभावमिवतांयथाभारवहनंस्थापयति॥ पारतीरकर्मसमासोच्छंदसियानतोरिनप्रत्ययः॥ एपोदृशादिःप्रियतेशेणादिकः सनिप्रत्ययो
वा॥ किंदृशायवं आयवोमनुष्याः यजमानाः यज्ञैः इंद्रंचितयंतः परमेश्वरमिवत्वांचितयंतः परमेश्वरबुध्याभावयंतइत्यर्थः॥ यद्वानइत्यनुवृत्तकारा
र्थः॥ इंद्रमेवत्वांज्ञानंतस्तथा स्तोमभिः स्तोत्रैः इंद्रमेवअयवागच्छंतोवयंधीमहिदधतेर्लिडिछांदसः॥ डापालुक्॥ ॥अथतृतीयामृचमाह॥ ॥
वित्वाततस्रेमिथुनाअवस्यवोव्रजस्यसातागव्यस्यनिःसृजः सक्षंतइंद्रनिःसृजः॥ यद्गव्यंताद्वाजनास्वर्यंतासमूहसि॥ आविष्करिक्रद्वृषणंसचा
भुवंवज्रमिंद्रसचाभुवं॥ हेइंद्रत्वामुद्दिश्यमिथुनाः पत्नीसहितायजमानाः विततस्रे यज्ञंवितन्वते॥ यद्वायालेपयोग्रताद्विनत्मानसंबंक्षयंति॥
तस्तुपस्तयेइतिदेहलिदइयोरिंद्रतिरभावः॥ किमर्थंगव्यस्यव्रजस्यसातायवीसंबंधिनः प्रगवस्यला मनिमित्तभूतेसतिनचसर्वत्राग्निहोत्रादि
नित्यवाक्येषुकार्त्स्न्यनिवृत्त्यादिकाम्यवाक्येषुपत्न्याद्यंपस्यस्त्रनित्यनैमित्तिककाम्यवाक्येषुपुरुषस्यैवार्थित्वादेः सङ्गावात्तस्यैवाधिकारः स्त्रि
यास्तुसत्यप्यर्थित्वेध्यायनाभावेनाविहितायाअभभवात अतएवसामर्थ्याभावाच्चनास्त्यधिकारइतिवाच्यं यद्यपिस्त्रियानास्तिपृथगधिकार
स्तथापिषष्ठेमीमांसायांषष्ठे अधिकाराध्यायेतृतीयचतुर्थाभ्यांअधिकरणाभ्यांअस्त्येवस्त्रियाअधिकारः सचपत्न्यासहैतिप्रत्यक्षितत्वात॥ तथाप
त्नीअग्निमादधीयातामित्यादिविधानात स्मृतिषुचनास्तिस्त्रीणांपृथग्यज्ञानव्रतमितिपृथगधिकारस्यैवनिवारितत्वात् स्त्रियैवस्त्रियः पत्न्यासहा
धिकारः अध्ययनाभावेपिवेदंपश्येत्प्रदायवाचायेदितिसूत्रकारवचनातपश्यत्वात्तुत्यादिविधिषु॥ किंदृशास्ते अवस्यवः इंद्रायात्मन २०
तन्निमित्ततः निःसृजः॥ निःशेषेणदृविस्यजंतः सक्षंतः सक्षतिर्गत्यर्थः॥ सप्रजस्त्वोवयमित्यादिमंत्रविधानाद्यत्रवचनमस्तितत्रास्ति
इवमंत्राधिकारः॥ किंतर्हिवचनेनकुर्यान्नास्तिवचनंस्यादितिभारइतिन्यायात्स्मात मिथुनायजंतेतनस्तुइत्येतत्युक्तं॥ किंदृशास्ते अ

वस्यवः इंद्रायात्मनः तन्निमित्ततः निःसृजः॥ निःशेषेणदृविस्यजंतः सक्षंतः सक्षतिर्गत्यर्थः॥ त्वांसंभजमानाः पुनस्तएवविशिष्यंतेनिःसृजः 37
फलप्रतिबंधकंपापनिर्गमयंतः कृतत्वविशेषइतिदृश्यते॥ यत्यस्मात्कारणात्मयंतागामात्मनइच्छंतागोशब्दारूपआत्मनः घ्रववंतोपि 1914
नपयइत्यादेशः स्वर्यंतास्वर्गयंतोगंतुमुपुरुकामाः यजनायोजायायापतिकयोजनोसमूहसिसंमुक्तायोरथाभिमतंस्वर्गादिकंप्रापयसियद्वासा
मयगनुष्ठितत्वंताभिस्त्वांसंधिनोपिअतः फलसाहितमनुतिष्ठनीत्यर्थः॥ किंचहेइंद्रत्वं वृषणंवर्षकंकामानांसचाभुवंसहदेवोयमंत्रंत्वयाविनाभू
तंनयासचाभुवंशत्रुवधादिव्यापारसामर्थ्येनसहैवोयमंत्रंवज्रं आविष्करिक्रत् अविष्कुर्वन् प्रकटयन्वर्ततइतिशेषः॥ ॥चतुर्थीमृचमाह॥ ॥
विदुष्टेअस्यवीर्यस्यपूरवः पुरोयदिंद्रशारदीरवातिरः॥ सासहानोअवातिरः॥ शासस्तमिंद्रमर्त्यमयज्युंशवसस्पते॥ महीममुष्णात्पृथिवीमिमाअपोमं
दसानइमाअपः॥ ॥हेइंद्रतेवीर्यस्यतवसंबंधिनः अस्यवीर्यस्यकर्मणिषष्ठीवक्ष्यमाणमेतद्वीर्यंविदुर्यपूरवोमनुष्याः यजमानास्तवमहत्त्व
ज्ञानानात्वमेवयज्ञातिनविदुः यद्वा अस्यवीर्यस्यमाहात्म्यमितिशेषः॥ विदुः स्तुत्यत्रयुष्मनमतरूढाविति विसर्जनीयस्यसत्वं वीर्यमेवविदुः शिष्यं
ते॥ हेइंद्रयद्यस्मात्कारणात्शारदीः संवत्सरसंबंधिनीः संवत्सरपर्यंतंप्रकारपरिवाराशिभिर्दृढीकृताः पुरः शत्रूणांपुरः अवातिरनाशयः
अवस्तंचस्तिरतिर्नाशनार्थः॥ किंकुर्वन्ससहानस्तत्रत्यान्अभिभवन्धनाद्यपहारेणापीडयन्॥ सहतेर्यङ्लुगंतान्ताच्छीलिकश्चानशः॥ अ
वातिरः किंचहेइंद्रत्वंमर्त्यंमरणधर्माणं आयज्युंअयज्युंअयष्टारयज्ञविघातिनंराक्षसादीशानः निगृहीतवानसिहेशवसस्पतेबलस्यपा
लकइंद्रत्वंमहीमहतींपृथिवींइमाअपश्चसमुद्रजघात्मकान्युदकानिचअमुष्णाः बलोद्वपहृतवानसिअसुरैरन्यैर्वायज्ञविद्वेषिभिराक्रांतां
भूमितत्संबंधिनीरपश्चतेषांपुराणिभित्त्वाअपहृतवानसीत्यर्थः॥ किंदुःखेननत्याह॥ मंदसानः तृप्यन्नेवइमाअपः इमानिअपः कार्याणि
वा॥ यद्वाधनान्यमुष्णाः लब्धवानसि॥ ॥पंचमीमृचमाह॥ ॥आदित्तेअस्यवीर्यस्यचर्किरन्मदेषुवृषन्नुशिजोयदाविथसखीयतोयदाविथ॥
चकर्थकारमेभ्यः पृतनासुप्रवंतवे॥ तेअन्यामन्यांनद्यंसनिष्णतश्रवस्यंतःसनिष्णत॥ ॥हेइंद्र आत् अतएवहेतोः तेवीर्यस्यतवसंबंधिनोवीर्य
तदीभवइदयचर्किरन्पुनःपुनःसोमाभिकारतिकिरतेर्यङ्लुगंतात्लङ्यन्यत्रः सर्वेषुसवनेषुवितरंतियजमानाः अतइत्कर्कुनइत्याह॥ मदेषुपृ
थक्सोमजनितमदेषुसत्कृहकामानांवर्षिनः उशिजस्त्वांकामयमानानात्यतः कारणात्आविथरक्षसिकिंचसखीयतस्तवसखित्वमात्मनइच्छता
मानात्यद्यस्मात्आविथतर्पयसि॥ अभिमतेनप्रीणयसिअतश्चर्किरन्निंचहेइंद्रएभ्योयजमानेभ्यः कारंशब्दंसिंहनादलक्षणंचकर्थः॥
करोतिकरोतेः कर्मणिघञ्कर्पालितइत्यर्थः॥ कृत्रातितदुच्यते॥ पृतनासुसंग्रामेषुकिमर्थंप्रवर्तवेप्रकर्षेणवनितुंसंभक्तुंयद्वायोधी
राःसंभजंते॥ वनतेस्तुमर्थेतवेत्प्रत्ययः तादिश्चातिगतेः प्रकृतिस्वरत्वं॥ किंचतेतवसंग्रामेवासिनः॥ त्वयि अन्यामन्यांअन्यांश्चान्यां
श्चअन्यमन्यंप्रतिकर्मव्यतिहारेसर्वनाम्नोद्विर्वचनंनद्यंनदीसंतापंसमस्थादनादिसमृद्धौ पूर्वरूपत्वंबाधित्वाछांदसोयणादेशः सनि
ष्णतसंभजंते॥ सनतेर्लोटिसिबहुलमितिसिपइट्प्रत्ययेन पुनःश्वा प्रत्ययः॥ आत्मनेपदेष्वततइत्यादेशः आम्यस्त्वयोरातइत्याकारलोपा
पश्चादेसः तरत्वाभावस्तत्रथाश्रवस्यंतोअन्नमिच्छंतस्तथाक्ष्यामन्नंकांक्षंतः सनिष्णतसंभजंते॥ ॥अथषष्ठीमृचमाह॥ ॥उतो
नोअस्याउषसोजुषेतह्यर्कस्यबोधिहविषोहवीमभिःस्वर्षाताहवीमभिः॥ यदिंद्रहंतवेमृधोवृषावज्रिन्चिकेतसि॥ आमेअस्यवेध

भा·अ·२ सोनवीयसो मन्मश्रुधिनवीयसः॥ ॥अयमिंद्रोनोस्माकं संबंधिनी अस्या उषसः कर्मणि प्रबोधितामुषसं स्तुत्याद् संबंधिनमुषः काले इतो नुयेन अपि अ·१
१८ नामसंवत उपस्यवास्माकं अयमिंद्रायत्तं गच्छत्वित्यर्थः॥हिः पूरणार्थः गत्वा च अर्चत्य हविषः पूर्वं तत्कर्मणि प्रद्यो अर्चनसाधनं हविः हवीभिर्इंसन्न
कारविशेषणं तं हविः इतोधि अभिप्रामज्ञानाद्धिविलक्षणतामस्वर्ग्यस्य तत्क्रियायस्य वा साभक्तनुस्थानं यज्ञहवीभिः आह्वानेराहूताभवतिशेषः॥अस्म
भिराहूतः सन उपस्यवागत्य हविः स्वीकरोत्वित्यर्थः॥अस्मादिदमुच्यते यस्मात्कारणात् हे वज्रिन वज्रयुक्त इमधः हिंसकानि शत्रून हंतुं शुषार्थि
तामनकामानांचिकेतसि अवबुध्यासक्तितानेत्रो हात्यादिकः छेत्पदागमः॥नाभ्यस्तस्याचिपितीत्यत्र छंदसिवृद्दुलमितिवचनात् लघूपधगुणाभावः
॥अभ्यस्तानामादिरिमयुदात्तत्वं॥तस्मादुमः इंद्र इमं मम मन्म मननीयं स्तोत्रं आश्रुधि सर्वतः शृणु कीदृशस्य मे वधसः मेधाविनः नवीयसो मव
तरस्य दीप्तितसंस्कारैः संस्कृतत्वात् नवीयस्त्वं पुनर्विशेष्यते नवीयसः अतिशयेन नवतः असाधारणस्तुतिमतः अत्र यजमानविशेषणे स्तुत्व
तैः कृतस्तोत्रमेवविशिष्टं भवति॥ ॥अथसप्तमीमृ॰॥ ॥त्वंतमिंद्रवावृधानो अस्मयुरमित्रयंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं॥ जहि यो नो अघायति
शृणुष्वसुश्रवस्तमः॥रिष्टं नयामन्नपभूतु दुर्मतिर्विश्वापभूतु दुर्मतिः॥ ॥हे इंद्र तुविजात असमत्वाद् बहुभावमापन्नश्वर विक्रांत त्वं वावृधानः
अत्यर्थं वर्धमानः अस्मयुः अस्मान् त्वत्कामान कामयमानस्त्वं अमित्रयंतं अस्मासु शत्रुत्वमाचरंतं मर्त्यं मरणस्वभावं वज्रेण जहि इंतर्ज इति जादे
शः तस्य असिद्धवदत्राभादित्यसिद्धत्वाद्धेर्लुक् तमियुक्तं कमित्याह यो मर्त्यो नोस्माकं अघायति अघं पापं दुःखं वा इच्छति तं जहि॥ अघाघ स्यादि
त्यादि॥किंच हे सुश्रवस्तम अतिशयेन शोभनं श्रवणं यस्य त्वं शृणु यथावयास्माकं स्तुतिं। दृशंताशितित दुच्यते॥ हे इंद्र त्वत्प्रसादात् दुर्मतिः अस्मद्वि
षांसा निषया दुष्टा बुद्धिः अपभूतु अपगताभवतु छांदसः शपोलुक् भुवः सेर्विट्ठि अतिगुणप्रतिषेधः नकयलोहि सारूपा अपितु विश्वा सर्वापि
शत्रुविषया दुष्टबुद्धिरपभूतु॥ तत्र दृष्टांतः॥ यामन् यामनि प्रध्वनि रिष्टं अध्वन् श्रमेण हिंसितं परिश्रांतं यथा दुर्मतिः श्रोत्रादिविषयावा
धते तद्वदस्मान बाधमाना दुर्मतिः अपगच्छतु॥ यद्वा यामनि मार्गयितादिरूपे रिष्टं अकरत्नं हिंसादिरूपं विघ्नं परिहरतु इत्॥ ॥इति द्वितीय
स्य प्रथमो वर्गः॥ ॥इति इंद्रापर्वतौ धर्च इत्यनुक्रमणिका निगदे गोलैंगिकः॥ तत्र त्वया वयमित्यंता॥ ॥प्रथमामृचमाह॥ ॥त्वया
वयं मघवन्पूर्व्ये धन इंद्र त्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः॥ नेदिष्ठे अस्मिन्नहन्यधिवोचा नु सुन्वते॥ अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयं
तो भरे कृतं॥ ॥हे मघवन धनवन्निंद्र त्वया साधनेन युक्ता वयं अतएवं इंद्रोता अतिप्रबलेन इंद्रेण त्वया रक्षिताः संतः प्रत्ययोश्चेति लादेशः॥ छांदस
मात्वं पृतन्यतः पृतनां आत्मन इच्छतः प्रबलसेनायुक्तान शत्रून सासह्याम अभिभवेम तथा वनुष्यतः अस्मत्प्रहारायागच्छतः शत्रून्वनुयाम तेषामागम
नात्पूर्वमेवयंसंभाजमाहिंच॥ पूर्व्ये धने स्मिन्यज्ञे नेदिष्ठे अत्यंतसंनिहिते अस्मिन्नहनि अभिषवयुक्ते अद्यतनेहनि सुन्वते यजमानाय तदर्थं अ
धिवोचेत्॥ हविःप्रदं यजमानं यज्ञं वानुशिष्टं अधिकं ब्रूहि लोहि इत्यत्र येनाद्रवबनेर्किंच हे इंद्र वयं यजमाना भरे संग्रामे कृतं जयस्य कर्तारं त्वामुद्दिश्य त
दर्थं वाजयंतः हविर्लक्षणान्नमुपाचरंतः विचयेम स्तोत्रादिकं हविरादिकं वा विचितुयाम चिनोतेर्व्यत्ययेन शप्॥ पुनः कीदृशं त्वां भरदेवानां १८
संग्रामे अकरत्नयदेवानां सम्यक् भरणे वा कृतं जयस्य कर्तारं भर इति संग्रामनाम भरते वीति यास्कः॥ ॥द्वितीयामृचमाह॥ ॥स्वर्जेषे भर आप्रस्य

वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य स्वस्मिन्नंजसि॥ अहन्निंद्रो यथाविदे शीर्ष्णाशीर्ष्णोपवाच्यः॥ अस्मत्राते सध्र्यक्संतु रातयो भद्रा भद्रस्य रातयः॥ ॥ 39
अयमिंद्रः स्वर्जेषे स्वर्गस्य गमनसाधने संग्रामे युधि अभिमुख्येन हतस्य स्वर्गः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनावित्यादिस्मृतिपुराणसिद्धः॥ आप्रस्य 1914
आपनशीलस्य शत्रुवधाय दृतस्तताव्याप्तस्य वक्मनि मार्गभूते स्वस्मिन स्वभूते अंजसि अभिव्यक्ति मतिकृपादादिरहित पुनः स पुरुषविशेष्यते
स्वस्मिन्नंजसि स्वकीये अंजसि मुख्ये इति संग्रामे॥ यद्वा स्वस्मिन्नंजसि शत्रुस्वयमेव अप्रच्छन्नत्वेन आगते सति॥ शत्रून अहन हिंसितिकस्य संग्राम
इति तदुच्यते॥ आप्रस्य आपनशीलस्य आसमंतादिंद्रस्य प्रीणयितुर्वा उषर्बुधः उषःकाले अनुष्ठानाय प्रबुद्धमानस्य क्राणस्य यागं कुर्वाणस्य कर्तेः
शत्रुस्थाने संगृह्यतामिति शत्रुनिवारणोद्यतत्वं अतः कारणात् अयमिंद्रः शीर्ष्णाशीर्ष्णोपवाच्यः सर्वेषां शिरसा प्रणम्यनियतो वाच्यो वा इति द्विर्भावः॥ तत्र दृ
ष्टांतः॥ यथापि इं सर्वता यशिरसा प्रणतिः क्रियते प्रणम्यते च येन मित्यर्थः॥ यद्वा यथाविदे येन प्रकारेण हंतव्यं शत्रुं जानासि तंतं प्रहसि वा तेर्षोल्ययेना
त्मनेपदं पुरुषव्यत्ययः लोपस्त आत्मनेपदेष्विति लोपः॥ अथ वा यथाविदे यं यं विदे सलभसशत्रुं तं तं मारयसि अतः कारणात् इत्यर्थः॥ अस्मिन्प
क्षे छांदसाविकरणस्य लुक् पूर्ववत्त लोपः॥ किंच हे इंद्र ते तव रातयः तवसंबंधीनि धनादिदानानि अस्मत्रा अस्मास्वेव सध्र्यक् सह इत्येकाग्रागेन संतु भवंतु
सह पूर्वाच्चनेर्क्विन्नित्यादिना क्विन सहस्य सध्रिरिति सध्र्यादेशः॥ अद्रिसध्र्योरंतोदात्तनिपातनं कृत्वा विकृत्यर्थमिति सध्र्यंतोदात्तः॥ इदानीमस्मि
तः॥ किंच भद्रस्य कल्याणस्य रातयः अस्माकं दत्तानि दानानि भद्राणि अतिश्रेष्ठानि संतु॥ ॥अथ तृतीया॥ ॥तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वार
मकृण्वत क्षयमृतस्य वारसि क्षयं॥ वि तद्वोचेरध द्वितांतः पश्यंति रश्मिभिः॥ स घा विदे अन्विंद्रो गवेषणो बंधुक्षिद्भ्यो गवेषणः॥ ॥हे इंद्र ते तव तत्तु प्रसि
द्धं प्रयः हविर्लक्षणमन्नं शुशुक्वनं भास्वादिसंयोगेन भक्ष्यं दीप्यं च दीप्तिकर्मणः पृथ्वं तत् तवस्ववृत्ति प्रत्नथा तत तवस्वं भवति॥ तथा घत्तन संपि सर्वदा
त्वामेव तर्पयत इति भावः प्रत्नपूर्वविश्वेत्यादिना इवार्थे थाल्प्रत्ययः कीदृशं तदिति उच्यते॥ यज्ञे यागे यस्मिन हविषि ऋत्विजः वारं वरणीयं श
यस्थानं वसिष्ठा अकृण्वत कुर्वंति कल्पितवंतः कृत्वादिषु इति च तदुच्यते॥ ऋतस्य सत्यफलस्य वा वरणीयं क्षयं निवासस्थानं संभक्तासि यद्वा
ऋतमित्युदकनाम तस्यदायं स्थानं प्रापयितासि प्रदासीत्यर्थः॥ अथ वा ऋतस्यादित्यस्य क्षयं स्थानं द्युलोकाख्यं वारसि यजमानं गमयतिसितता
दृशं वक्ष्यमाणं कर्म विवोचेः ब्रूहि अध अनंतरं कारणात् इतां तः द्विता पतया द्यावापृथिव्योर्मध्ये अंतरिक्षे रश्मिभिः आदित्यकिरणैः पश्यंति सयोनिर्मि
घरश्मिद्वारा प्रवर्षणरूपं कर्म सर्वे जनाः प्रत्यक्षतः पश्यंति अस्म इत्यत्र विनोदिवं प्रापयितात् रश्मिद्वारा वृष्टिं जनयसीत्यतत्सर्वे दृश्यत इत्यर्थः इ
दानीं परोक्षतया स्तौति स घा स खलु इंद्र गवेषणः उदकस्यान्वेषणः शीलः तथा बंधुक्षिद्भ्यः हविः प्रदानादि बंधुभावं प्राप्तवद्भ्यो यजमानेभ्यः गवेष
णः गवां प्रति प्रदानोपषणकर्ता इयवावादुक्तः कृतेर्द्वियुद्वय द्वा गवेषण मार्गपूर्वं तस्फूर्त यजमानफलस्य प्रदायित्वेत्यर्थः अनुक्रमेण यकृतासम
विदविंदत इदं प्राप्ति प्रकाशं जानाति॥ ॥अथ चतुर्थी॥ ॥नूइत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्योवृणोरप व्रजमिंद्र शिक्षन्नप व्रजं॥ ऐभ्यः समा
न्यादिशास्मभ्यं जेषि योत्सि च॥ सुन्वद्भ्यो रंधया कं चिदव्रतं हृणायंतं चिदव्रतं॥ ॥हे इंद्र ते तव संबंधि कर्म इत्था इत्थं इदानीं क्रियमाणरूपं नापूर्वथा
पूर्वमिव पूर्वं यथा नुभिः प्रवाच्यं संवः स्तोतव्यं त हृद्युक्ताननस मपि क्रस्यन्न इत्थापात्र पाभक्षदित्यान प्रकृति भावः॥ कीदृशं तदिति दुच्यते य
दंगिरोभ्यः एतन्नामसंज्ञाभ्यां महर्षिभ्यः तेषामर्थाय व्रजं अंतर्निगतं गमपं अपावृणोः अपवृतं द्वारमित्रं मघमुसाय रश्मिमुत्पादितवा

भा॰ अ॰ २ नसि॥ वज्रइति मघनाम वज्रः वरं इ इतितंनाम सपावात। किंच हे इंद्र अंगवातम इं अपअभयं न्यो पहत्यनेभ्य पृथांगिभ्यः शिक्षन वितरन् शक्षितया अ॰ २
नसि॥ यद्वापाणिभिरपहृतं विलक्षितं गवां व्रतमपहर्तुम पारुणाः अपवृतद्वारण्यकृतेः किंच हे इंद्र लभ्य इंतेभ्यः कुतिगभ्य समान्यादिशा सामानयांतया
१० तेभ्यो यथा ददासि॥ तदुत अस्मभ्यमपि तिपि धनसंग्रामं वा तपनद्वतया तियुध्य स्वच्छंद सो वि कृ रणस्य लुः व्यत्ययेन परस्मैपदं किं च लं सुलभ्यः
लं हमभिपवं कुर्वस्माम संयं कंचिदव्रतं सर्वमपि भयतानं यो गावि तोधितरं धयं वा धमदेमे धीनं रंधय वाधम मदधीनं कुर्वित्यर्थः॥ नकेवलं मयत्ना
नेव किंतु हणायांतीकृ द ब्रतांश्चिद्दिनिय वकुर्वितं अस्माकं तेषां कुर्वेतं तमव यशारं स्वयं रोपणं तं वाय द्वाद्रुणायं तोचित रोपवंतमपि अव्रतं अकर्मीणं पुः
नर्हनं नाम समर्थं उर्वन्धं धयाद्रुणिद्रु सापकं ण्वादित्वात्यलयनोका रा॥ ॥अथ पंचमी॥ ॥संयज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषंत श्रवस्यव प्रयं
क्षंत श्रवस्यवः॥ तस्मा आयुः प्रजावदिद्बाधे अर्चंत्योजसा॥ इंद्र ओक्यं दिधिषंत धीतयो देवाँ अच्छा न धीतयः॥ ॥यत् यदा इंद्रः शूरः विक्रांतः सन जना
नात् समवान प्राणिनः क्रतुभिः प्रज्ञाभिः समीक्षयत सम्यगीक्षयति॥ न तदुक्षवान अंतर्यामि रूपः सर्वेषां संधि पुष्टित्वात्तान् विपयानुलक्षयतीत्यर्थः॥
यद्वा श्रुतिभिः कर्मभिः सत्कृतद्रुः कृतरूपानिमित्तभूते स्वयत्रे ल्यालयति॥ एवं प्रेरयतिसति श्रवस्यवो न मिलतो यजमानाः धनेन वा हितरूपे हिते अ
भिमते सति यद्वा हिते धने अभिमते सति रूपं ताहिंसंतं शत्रुन तरस्यतिर्व धव कर्मा छादित्वोलुङि व्यत्ययेनश्लुकः तरतेर्वालङि उकारोपधापलयो
विकरणात्तनीयत्यर्थः॥ अत एव कारणात् श्रवस्यवोन्नं हविर्लक्षणं इंद्रात्मनेवा इच्छंतः संतः प्रयक्षंत प्रकर्षेण यजंते छांदसलुङि व्यत्ययेनकृ
सः॥ किंच तस्मादृतं तस्मिन्नु धिबाध्ये च आयुर्हविर्लक्षणमन्नं प्रजावत् पुत्रादिसहितं भवतिनिः सहितं दद्यत इत्यर्थः॥ किंच यजमानाः
ओजसा स्वबलेन बलेन युक्ताः बाधे शत्रूणां बाधतनि मित्तभूते सति बाधितुं वा कृत्यार्थे तवे केन्यत्वन इति केनप्रत्ययः॥ अर्चंति पूजयं
ति तद्वा तस्मा इति यजमानायेन बाधे बलनिमित्तभूते सति बाध इति बलनाम बाधः तवि पीतितंनामसु पाठात्॥ प्रजावत् पुत्राद्युपेतमा
युः अन्नं लक्षं भोजसा बलेन युक्तः अर्चंति इंद्रं पूजयंतीति क्विप यजमान इति शेषः॥ किंच धीतयः कर्मवंतो यजमानाः इंद्रे इंद्रसमीपगंगा
यांचोपा इति चतत्समा मिथ्यं लक्ष्यते इं क्लीब इत्यर्थः॥ तत्र ओक्यं ओकः निवासस्थानं स्वार्थ यत् दिधिषंत धारयंति धीष शब्दे अत्र सा
धारणार्थः॥ जो होत्यादिकः व्यत्ययेन नाद्रेशः॥ तत्र पुनर्विशेष्यंते धीतयः स्वर्गसाधनकर्मवंतः संतो देवां अच्छ न देवानाभिमुख्येन
प्राप्नुमिव ओक्यं दिधिषंतेत्यन्वयः॥ अविवाक्य दशमिन सत्यलक्षणानंतरं न क्षत्रेषु दृश्यमानेषु अध्वर्युप्रमुखाः सर्वे युवंतमित्यंतान्जप
युः॥ गार्हपत्यं कुर्वतीति संवउसरसंज्ञितं॥ युवं तमिंद्रापर्वता पुरोयुधा इति जपंत इति॥ ॥अथ षष्ठी॥ ॥युवं तमिंद्रापर्वता पुरोयुधा यो नः पृत
न्यादप तंतमिद्धतं वज्रेण तंतमिद्धतं॥ दूरे चत्ताय छंत्सद्गहनं यदिनक्षत्॥ अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः॥ ॥हे इंद्रापर्वता इंद्रा
पर्वतौ इंद्रः प्रसिद्धः पर्वतः पर्वतनाम्ना घंत्य इ अभिमानी देवः तौ युवं युवां पुरोयुधा संग्रामे पुरतो योद्धारौ नोस्माकं यः शत्रुः पृतन्यात् अस्मान् हंतुं
पृतनामात्मान इच्छति तंतमित्तं सर्वमपि शत्रुं अपहतं नाशयतं छांदसानुदात्तोपदेश अनुनासिकलोपः॥ केन साधनेन तिन दुच्यते॥ तंतमित् १०
सर्वमपि शत्रुं हंतुं वज्रेण साधनेन प्राप्नुतं॥ इंद्रस्य सामर्थ्यमस्तीति दर्शयति यत यो वज्रास्तिग व्यत्ययः दूरे चत्ताय अत्यंतदूरदेशगताय चात

यर्थानाशकर्मणः नष्टायादर्शनं प्राप्ताय इत्यर्थः॥ ष्मसित कामित त्यादिनिपातनादिड्भावः॥ तादृशं शत्रुं छंत्सत् छंदयसि कामयते तं हंतुं इच्छंते क्रांति 41 / 1914
कर्मण उदकरूपं॥ किंच गहनं दुःखयाहस्थानं अतिकृ विनहृदयं दान्तु समीपं वा इनक्षत् व्याप्नोति तिनभगतादृशं दरकारापतनः इनक्षतिर्व्याप्तिकर्मा एतन्त्रं इद्रा
नीतमिद्रं वृक्षयत॥ हे शूर अरां पते इंद्र अस्माकं विरोधिनः शत्रून् विश्वतः विश्वतः सर्वतो विभक्तिः कुल सिद्ध परिपरितः विश्वता विश्व रूपायि दर्षीष्ट दा
रयसि॥ किंच दर्मा शत्रूणां दारकः दारयतेर्न्यत्र व्यापि दृश्यत इति मनिन् विच्छिलोपः इदन्त निरुनिस्वरेण मनिन् उदात्ततंद्र स्वर्णाद्रसः॥ यद्वा दृभय
घदा हित्वानुमितां रूप इतिन् स्थानं॥ तत्र पूर्वे कोप अत्रः विश्वतः सर्वान् शत्रून् सर्वतः पापांवार दर्षीष्ट दारयति॥ यद्वा दर्मा शत्रूणां दारकः इंद्रो
दर्षीष्ट कान्सयन दारयति शत्रून्॥ ॥इति द्वितीयस्य प्रथमे एकविंशो वर्गः॥ ॥उभे पुनामीति सप्तर्चं सप्तमं सूक्तं परुच्छेपस्यार्षं आद्यात्रिष्टुप्
अभिवल्यस्या चाद्रिर्अनुष्टुभः पिशंगभृष्टिमित्य चाम्यसप्तम्यात्वष्टिनियोगमाह॥ गीनन्तु उभे पुनामीति पु राष्टिष्टभ्यः सप्तकाति ताः॥ तान्जप
न प्रयता निलं इष्टा कानका मानमश्नुते॥ तांजपन दंतिरक्षांसि सप्तशांश्च नियच्छति॥ ॥तत्र प्रथमा॥ ॥उभे पुनामि रोदसी ऋतेन द्रु
हो दहामि सं महीरनिंद्राः॥ अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन्॥ ॥हे इंद्र ऋतेन ऋत इद्रश्यनवत्संबलेना भेरा रोदसी द्या
वापृथिव्यौ पुनामि शोधय द्रु वर्णि सकामानां वा यद्रव्यां वा पगमनेन पाययामि॥ किं संभंग्यंमं इदृयं हामि॥ पुनः क्ष्मा एवाक्षिष्यते॥ यत्र यासु अभिमुख्य
मित्राः शत्रवः अभिव्लग्य हताः सर्वतः प्राप्ताः अस्माभिर्घातिता वा वृक्षंतिर्गतिकर्मा व्लादेर्धातुर्लसर्वेपरि तृळ्हाः हिंसिताः तृहि हिंसार्थः उदि
त्वा घस्यविभाषेत्यादि प्रतिषेधः हिंसिताः संतः अशेरन शयनं प्राप्ताः शीङो व्यत्ययेन परस्मैपदं॥ शीङो रुट्॥ शीङः सार्वधातुके गुणः वैलस्थानं वि
कल्लोबिलश्मशान्सम नामार्थं सबगर्तं श्मशानवचनः अनाथमपि श्मशान वाची अथवा बिलसंबंधिस्थानं नागलोकस्तत्र वा अहारनय
द्वा बिलक्षेप इति धातुः पंचार्थकः स्वार्थिकाण्तत्र शवाः शिष्यंत इति वैलस्थानं श्मशानं तत्र वा यात्रहताः भूमिं श्मशानवक्तव्यसर्वत्र नेन
दहामीत्यर्थः॥ ॥अथ द्वितीया॥ ॥अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनां॥ छिंधि वटूरिणा पदा महावटूरिणा पदा॥ अद्रिवः वज्रिन् भक्ष
कयद्वा अद्रिर्मेघस्यादर्तिगरि इर्वज्रं यातुमतीनां हिंसावतीनां सेनानां यद्वा यातुनिया तनसाधनान्यायुधानि तद्वतीनां अथ वा यातव्य रक्षांसि तद्वतीनां
यातुमतीनां कर्मणि षष्ठी शत्रूणां सेनाः शीर्षाणि शिरांसि अभिव्लग्या चित् अभितः प्राप्य छिंधि चूर्णय यद्वा यातानि नियातनसाधनान्यायुधानि त
द्वतीनां अथवा यातव्यो सां संबंधीनि पदार्थां छिंधि केन साधनेन नितदुच्यते वटूरिणा पदा वृद्धेन शीलेन सर्वत्रामिनलदीयपादेन अति
विस्तीर्णेनेत्यर्थः॥ यद्वा वटूरिणा पदा विस्तीर्णेन किं तन्मिनः संबंधिपादेनत्रगवतवादेनेत्यर्थः॥ नकेवल केनपादेनेत्याह महावटूरिणा पदा म
हावंत वता सायने गवते संबंधिना पादेन छिंधि चूर्णय वटूरवृत्ते सर्वाङ्गपि त्यादिभ्यज्ञरज्ञ्वा वितपरस्यप्रत्ययः अत इति उनाविति॥ ॥
अथ तृतीया॥ ॥अवासां मघवञ्जहि शर्धो यातुमतीनां॥ वैलस्थानके अर्मके महीवैलस्थे अर्मके॥ हे इंद्र मघवन् धनवन् आसां यातुमतीः
नां यातनासाधनान्यायुधानि यातनमिति दुर्तानां यातुधानवतीनां वासेनानां शर्धो बलं अव जहि चूर्णयत थावृत्तोच अर्भक कुत्सितं वैरमणीय वै
लस्थानके कुत्सितपूर्वोक्तलक्षणे श्मशानस्पायतिशयः॥ यद्वा वैलस्थानके बिलसंबंधिकुत्सितस्थाने अंधकारयुत अधोलोके लायतिशयः
॥न नुयत्र क्वचित् शद्रेन त्यात ॥ महा वैलस्थे सर्वे गतिस्थ्य महा श्मशानेनागलोक वा यनः कीदृशे अर्भके॥ कुत्सितगता सुस्थिर मणीये॥ ॥

अथ चतुर्थी॥ ॥यासां तिस्रः पंचाशतोभिव्लंगैरपावपः॥ तत्सु ते मनायति तकत्सु ते मनायति॥ हे इंद्र यासां पूर्वमंत्रोक्तक्षणानां सेनानां तिस्रः पंचाशतः अ·१
भा·अ·२ त्रिगुणितपंचाशत्संख्याः सार्धशतं अभिव्लंगैः॥ अभिगमनैर्व्लंगतिर्गतिकर्मेत्युक्तं॥ अभिगम्य अपावपः नाशितवानसि॥ हे इंद्र तत्तादृशं सेनावधा
२० दिरूपं कर्म मनायति सुसंभावयतीत्यर्थः॥ किंच हे इंद्र तत्तव अध्यर्धशतसेनाजयरूपं कर्म महद्दपितकादिति मनायति अल्पस्यमिदमिति सुष्ठुम
न्यते॥ ॥अथ पंचमी॥ ॥पिशंगभृष्टिमंभृणं पिशाचिमिंद्र सं मृण॥ सर्वं रक्षो नि बर्हय॥ ॥हे इंद्र पिशंगभृष्टिं पिशंगं बभ्रुवर्णं अंभृणं अतिभयंकरं
द्राक्षायमाणं॥ भ्रमणशब्दः यताल्यंवा यानि छांदसी भक्षोपश्चातियद्वा महांतं अतिप्रवृद्धमित्यर्थः॥ अंभृण इति महन्नाम अंभृणः महानिति
तितन्नपावात॥ उक्तविधं पिशाचिं पिशाचविशेषं वा सामित्येकसंमृण सम्यक् हिंसय न केवलं तमेव किंतु सर्वं रक्षः रक्षणनिमित्तभूतं रासांकिं
नि बर्हय निषूदय॥ हासौ हिंस्यां चारादिकः पशवधकर्मेतत् निताशयति निबर्हयतीति तत्रोक्तत्वात्॥ दृशरात्रस्य पक्षपत्नि पुरुगशस्त्यर्णे इत्यत्र
स्यावर्मह इंद्र इत्याद्यिकं प्रथमातृतीयपदस्य तिसृकं साक्षित्रितं॥ अवर्मह इंद्र दादृहीति॥ ॥अथ षष्ठी॥ ॥अवर्मह इंद्र दादृहि श्रुधी नः शुशो
चाहि द्यौः क्षां न भीषां अद्रिवो घृणान्न भीषां अद्रिवः॥ शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे॥ अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर स
त्वभिः॥ ॥हे इंद्र महः महतां मपस्यकर्मणि यद्यामहांतं व्रजं वा अवः अवस्तात् अवाङ्मुखं पूर्वाधरत्यादिना अस्मिप्रत्ययो वा दृशश्च अंतरस्य ख
रित्वभयथा छांदसीतिरपः दृंहि विदारय किंच नः अस्माकं स्तोत्रं अधिश्रणुहि अद्रिवः अद्रिर्मेघस्तद्वन्निंद्र हि यस्मात् कारणात् द्यौः द्युलोकः आ
श्रयभूतः शुशोच भावति त्वस्वभावनहविरापभावादिति भावः॥ तत्र दृष्टांतः॥ क्षा न क्षितिर्भूनाम॥ क्षायंति निवसंत्यस्यामिति क्षा॥ क्षस्य च॥
अधिकरणविवक्षायां सर्वनिवासाश्रयभूमिरिव भयथा भीषा त्वस्वभावात् सस्यादिशोषेभीत्या शोचति तद्वत् लोकद्वयमपि त्वस्वभावेन शोचति इ
त्यर्थः॥ असारपदश्लोकद्वयमात्मप्रवर्धमानं धर्तुमसदमानं द्यावापृथिव्यौ शोचत इत्यर्थः॥ तस्मात् क्षाधीति पूर्वत्रान्वयः॥ भीतो दृष्टांतः॥ हे
अद्रिवः शत्रूणां भक्षक यद्वा अद्रिर्वज्रः॥ तेन तद्वन् हे इंद्र घृणात् भीषान् दीप्तात् अग्नेर्मर्तेनरात लघुभीत्या पूर्वं यथा द्यावापृथिव्यौ विभीते
स्त इत॥ अत्र तिहासमाहुः पूर्वं तगति महांधकारेणावृते सति देवा इत्यग्निं प्रार्थितवंतः॥ स च बलप्रवृत्तेन द्यावापृथिवीभ्यां सकाशान्मोचितस्तु
नुपपद्यत तं दृष्ट्वा पृथिव्यौ विभ्यतुरिति॥ स चाग्नि त्वद्विभ्यतुः इयात् शंकितावगंतव्यः यद्वा घृणः केवलोग्निः तस्मात् यथा विभीतस्तद्वत्सचा
भीतिरस्तां तां रोदसी इत्यादि श्रुतितोवगंतव्या॥ तादृशभीतिरस्थिरदानेन परिहरेत्यर्थः॥ हे इंद्र त्वं शुष्मिभिर्बलैः शुष्मिंतमो हि अतिशयेन बल
वान्खलु अतः कारणात्॥ उग्रेभिः उद्गूर्णैः अतिक्रूरैः वधैः हननसाधनैः आयुधैः सहितस्त्वं ईयसे अत्राणागच्छसि इंगतौ दिवादिकश्यन यद्वाशु
फिभिर्वधैरिति संबंधः॥ हे शूर विक्रांत सत्वभिः सत्वरैः रक्षःप्रभृतिभिरप्रतिगत युद्धशत्रुभिरनाक्रांत यद्वा सत्वभिः प्राणिभिरस्तुतमनस्कोरनधि
गत अपूरुषघ्नः वीरयापेतानां यज्ञनसमर्थानां हननरस्त्वं॥ त्रिसप्तैः सत्वभिः सप्तभिर्वा सप्तभिरनुचरैर्मरुद्भिः ससमयः समनईयसे इत्यन्वयः॥ प्रातः स
वने प्रास्त्राणां छमिनः प्रस्थितयाज्याः पुरस्तादुक्तोतिहित्येषा प्रस्थपणिप्यात त्रये खंडे सूत्रितं॥ वनोति सुन्वन् क्षयं पर्णसामपुत्रो अस्मदभि २०
तानिवोम्यति॥ ॥तासां तां सप्तमी॥ ॥वनोति हि सुन्वन् क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः॥ सुन्वान इत्सिषासति
सहस्रा वाज्यवृतः॥ सुन्वानायेंद्रो ददात्याभुवं रयिं ददात्याभुवं॥ हे इंद्र सुन्वन् सोमसुद्भिश्याभिषवं कुर्वन् यजमानः क्षयं सर्वैर्वस्तव्यं गंतव्यं

वाम इंद्र वनोति हि सत्यसत्तां तं भजते हि प्रसिद्धः॥ किंच सुन्वानो हि सोमयागं कुर्वाण एव परीणसः परितो नद्धान् द्विषो द्वेष्टॄन् अवयजति न केवलं यागद्वेषि 43
णः देवानां द्विषोप्यवयजति॥ किंच सुन्वान इत् अभिषवाय कल्पितयागं कुर्वाणः हे इंद्र त्वत्प्रसादात् वाजी अन्नवान् अवृतः परिरिताक्रांतः सन् सहस्रा अ 1914
परिमितानि गवादिधनानि सिषासति साधयितुं संभक्तुं इच्छति॥ सनतेः सिषासतीतिव निर्दिष्टिकत्यनादिरुभावत्तनसनस्य नेत्वात्वम्॥ कुत इत्युक्त
त आह॥ तस्मात् सुन्वानाय इंद्र इति मुद्दिश्य सोमयागं कुर्वाणाय यजमानाय वा अयमिंद्रः अभुवं समंतात् भवनशीलं अतिप्रवृद्धं रयिं वा दिवपथनं ददाति
प्रयच्छति॥ तस्मात् सुन्वानः सिषासतीत्यर्थः॥ ॥इति प्रथमस्य प्रथमे द्वाविंशो वर्गः॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टके प्रथमे मंडले एकोनविंशोनुवाकः॥ ॥विंशेनुवाके षट् सूक्तानि तत्रात्वा जुव इति सप्तर्चं प्रथमं सूक्तं परुच्छेपमार्षं
ऐं॥ एवं नाचायविल्यंत्याद्रिः॥ चतुःपदस्य क्षरा वायव्यात्तिरुच्यमानत्वादिशुन्नं वायुदेवत्यं अत्रानुक्रमणिका॥ आत्वा षड्वायव्यं सप्त्यात्यष्टिरिति
विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥आ त्वा जुवो रारहाणा अभि प्रयो वायो वहंत्विह पूर्वपीतये सोमस्य पूर्वपीतये॥ ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठ
तु जानती॥ नियुत्वता रथेना याहि दावने वायो मखस्य दावने॥ हे वायो त्वा त्वां जुवः गमनशीलाः रारहाणाः शीघ्रगामिनः बलवंता वा सामर्थ्यान्नियुतः का
अश्वाः रहिर्गत्यर्थः॥ आनच्छांदसो नुनासिकलोपः॥ इह अस्मिन् यते प्रयः अन्नं पुरोडाशादिहविर्लक्षणमन्नं अभिप्राप्य वहंतु किमर्थं सोमस्य पूर्वपीत
ये पूर्वं पानाय पुनः किमर्थं पूर्वपीतये इतरेभ्यः पुरा पानाय मरुद्भिः तत्पूर्वपदं नामदनत्वं॥ किंच हे वायो ते तव संबंधिनः अनुसूनृता प्रिय
सत्यात्मिका स्तुतिरूपा अस्मदीया वाक् ऊर्ध्वा तिष्ठतु अभिमुख्य सर्वदा वर्ततां ऊर्ध्वं पदमित्यर्थः॥ मनः तातिवाक् नाम मनः तात्र त्वित्यर्थः नामसत्त्वात् ऊर्ध्वा उन्नता
तथा जानती तव गुणान् विशेषेण अवगच्छंती मा मनानार्थस्तुत्यर्थं च हे वायो मखस्य यज्ञस्य दावने दानाय प्रत्यक्षितिवतस्त्वीकरणाय आयाहि पुनः किम
र्थं दावने अस्मभ्यं अभिमतदानाय॥ उभयत्र दृष्टांतः कर्मणि भावे च कर्मणोणादिकाव निः छांदसो नुनासिकलोपः नियुत्वता रथेन नियुद्भिर्युक्तेन रथेना
याहि आगच्छ॥ ॥अथ द्वितीया॥ ॥मंदंतु त्वा मंदिनो वायविंदवोस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः॥ यद्ध क्राणा इरध्यै
दक्षं सचंत ऊतयः॥ सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः॥ हे वायो त्वां अस्मत् अस्माकं संबंधिनः इंदवः क्रूद्रयितारः सोमाः मंदंतु मा
दयंतु अस्य च न यस्य मदकाः दृशाः सोमाः मंदिनो मादयितारः क्राणासः कुर्वाणाः स्वकार्यं हर्षादिकं सुकृताः अभिद्यवः दृशा पवित्रशोधनग्रहणादिभिः
सुकृताः अभिद्यवः अभिगतदीप्तयः गोभिः गोविकारैर्गोभिर्नक्तरूपाभिः क्राणाः क्रियमाणाः क्रूयमानाः यद्ध गोभिर्गोभिः आहवनीयं प्रत्यानत
भिः क्राणाः क्रूयमानाः कृतात्तः शानच्छांदसः शपोलुक् तथा अभिद्यवः अभिगंतारः हे वायो यत् यस्मात् कारणात् ह शब्दः॥ दक्षं अस्मद्याग
इंशं प्रति गंतुं उत्साहवंतं समर्थं यतारं मां त्वां वि युतः एतं संत काम तवश्वाः दावने दानाय हविः स्वीकारनिमित्तं धियः कर्मण्युद्दिश्य सचंत त्वां संग
च्छंते यागदृश्यं वा॥ किमर्थं इरध्यै प्रापयितुं इरतो तु मर्थं अध्यप्रत्ययः स्वः छांदसः॥ इरध्यतिः परिचरणकर्मा इरध्यतीति विधमतिर्त्तना
ममतत्वात् वा दृश्यता क्राणाः स्वव्यापारं यद्वा हविरादिकं कुर्वाणाः क्राणाः कुर्वाणा इति यास्कः॥ ऊतयः रक्षणवंतः प्रीतियुक्ता या तथा सध्री
चीना स्वया सहांचंत्यः सहस्य सध्रिभावि भावांचतिति स्वार्थे रच अव्ययनां तात्प्रातः॥ किं च धियः कर्मवंतः बुद्धिमंतो वा अस्मत् नियुतः मानाया अश्रुव
त उपब्रुवंति स्वाभिमतं वित्तापयंति वा॥ ॥अथ तृतीया॥ ॥वायुर्युंक्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे॥

भा·अ·२ प्रबोधया पुरंधिं जार आ ससतीमिव ॥ प्रचक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ अयं वायुः रोहितारोहितवर्णावश्वौ धुरि धारणप्रदेशे रथस्या
ग्रभागे यद्वा भारवहने युंक्ते। क्वचित् वा अयतितथा क्वचित् अरुणा अरुणवर्णौ धुरि युंक्ते तथा अजिरा अजिरौ गमनशीलौ वर्णविशेषयुक्तौ क्वचित् युंक्ते यद्वेत
२१ दुभयमपि संबध्यते ॥ किमर्थं युंक्ते इत्यत आह। वोळ्हवे धुरं वोढुं भारवाहनार्थं। किंच वह्निष्ठा वहिष्ठा अतिशयेन वोढा रथस्य वोढा दशस्य स्थितिः तुविष्ठे मघवन्नि
तिन लोपाईत्वादिकं मलि स्वर्गानिवर्तनादिवचनव्याकारः ॥ धुरि वोळ्हवे महद्भारं वोढुं महति भारे वोढव्ये सति पुनः पुनर्वायुग्रहणं अह्नो यात्रे तत्त्वं
च अतिशीघ्रं आगच्छतीति ज्ञापनार्थं इदानीं प्रत्यक्षेणाह। हे वायो पुरंधिं बहुस्तुतं सामर्थ्यात् यजमानमिति गम्यते ॥ पुरंधिर्बहुधीरिति यास्कः तं प्रबो
धय रथेन इडीं प्रमाणात्यप्रतापन्य हविः स्वीकारयेति भावः ॥ तत्र दृष्टांतः ॥ जारः पारदारिकः असमसतीं पत्यागमनध्यानेन ईषत्स्वपंतीं पुरंधीमिवप्र
कृतशरीरधारिणीं योषितमिव तां स्वसंकेतेन यथा संप्रबोधयति तद्वत् तमपि यजमानं प्रबोधय। किंच तदर्थं रोदसी द्यावापृथिव्यौ प्रचक्षय प्रक
र्षेण प्रख्यापय प्रकाशयेत्यर्थः ॥ तत्प्रकाशार्थं उषसो वासय उषः कालं निर्वर्तयेत्यर्थः तदापि प्रभातं कुर्वित्यर्थः ॥ पुनस्तदेव प्रार्थना श्र
वसे अन्नवदुत्पन्ननाम नः इवीरूपान्नस्वीकाराय उषसो वासय ॥ ॥ अथ चतुर्थी ॥ ॥ तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु
रश्मिषु चित्रा नव्येषु रश्मिषु ॥ तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ॥ अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥ ॥ हे वायो तुभ्यं
तदर्थं उषासः उषसः पूर्वोक्ता इत्यालयाप्रकाशिताः शुचयः शुद्धा दीप्ता वा परावति दूरदेशे अत्यंतदूरदेशे अंतरिक्षे दंसु दंससु गृहेषु सर्वतः यद्वा
ग्रहनामैतत् ॥ अत्यंतलोपश्छांदसः ॥ गृहवदाच्छादकेषु रश्मिषु स्वकीयेषु भद्रा भंदनीयानि कल्याणानि वस्त्रा आच्छादनयोग्यानि
वस्त्राणि तन्वते विस्तारयंति यद्वा उषसः इत्यागमहपुरं यजनेषु रश्मिषु होमा प्रदीप्तानि ज्वालावत्क आगताय तुभ्यं भद्रा वस्त्रा
तन्वते अग्निं ज्वालाएव वस्त्राणि विस्तारयंतीत्यर्थः ॥ उषः काले अग्नीनां प्रज्वाल्यमानत्वात् ताएव वस्त्राणि चित्राणि नानावर्णयुक्तानि
नूपचयंते नवं केवलं साधारणानि वस्त्राणि न त्याद नव्येषु नूतनेषु स्तूयमानेषु गुणकृतोऽचो यत् वतो पि प्रत्यय इत्यवादेशः ॥ यतोनां
वद्रुत्वाद्युदात्तत्वम् ॥ रश्मिषु चित्राणि चित्राणि नानावर्णयुक्तानि तन्वते उषः काले रश्मीनां नानावर्णत्वादिति भावः ॥ अग्निरेवेति पक्षे
ज्वालानां कालीकरालीआदिरूपेण नानावर्णत्वाच्चित्रत्वं ॥ किंच हे वायो तुभ्यं त्वदर्थं त्वद्यागार्थं सबर्दुघा सर्वदा दोग्ध्री गोजाता
वेकवचनं सबर्दुघा सबरित्यमृतनामतस्य दोग्धी दुहः कुरुश्चेति कप्रत्ययः। विश्वा वसूनि सर्वाणि धनान्यन्यादिरूपाणि दोहते स्वयमेव
दुग्ध्वा प्रीणयतीत्यर्थः ॥ कर्मकर्तरि न दुहस्नुनमामिति यगभावः श्रद्धांदसः। द्रुपालुगभावः कस्तव विशेष इति चेत उच्यते हे वायो दिवः
दीप्तादंतरिक्षात् मरुतः एतन्नामकान् मेघं विशीर्यं दृश्य स्वाहकान् त्वं दंशभूतान् देवान् जनयः जनयसि किमर्थमिति तदुच्यते व
क्षणाभ्यः प्रवहणशीलाभ्यो द्युः दृष्टिलक्षणाभ्यस्तथा वक्ष्यणाभ्यः नदीनामैतत् वक्षणा इति तं नामसु पाठात् ॥ तासामार्थाय
य ॥ ॥ अथ पंचमी ॥ ॥ तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणंत भुर्वण्यपामिषंत भुर्वणि ॥ त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ॥
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥ ॥ हे वायो तुभ्यं त्वदर्थं शुक्रा सोदीप्ताः शुचयः शुद्धाः सोमस्य पातारो त्वं तं शुद्धा भवंति ॥ २१
किमुत न त्वं तथा शुद्धत्वेन तुरण्यवस्त्वरणयुक्तास्तांत्रामुं उग्राः उद्गूर्णतेजसः सोमाः मदेषु तव मदेषु निमित्तभूतेषु भुर्वणि भरणवति यागे इषणं

त आहवनीयं प्रतिगच्छंतित्यत्यनेनाने पर्यग्निप्रश्नं मांडुर्वितर्णो यंत्वं भुर्वणिमिषं तयंत उदकं इषं त्वत्सादयितुं अभ्याहृयमानस्या हुते यद्दिवि द्वारा इत्युत्वा 45
दकत्वाद्यद्वा यज्ञमानस्यादते यद्दिवि द्वारा इत्युस्यादत्वा यद्वा यजमानात्त्वात् दृश्यात् ज्ञाताः अपां वर्षणमिच्छंति किंच हे वायो भगं भजनीयं त्वां त्सारी 1914
रणवान् अत्यंतभीताः दसमानः उपक्षीयमाणः तनिपातकः पयोपनादिनियमेवायजमानस्तब्धीयस्त्वरारणां यतविघाति अन्यत्रगमनाय इट्टे स्तौ
ति भयात् ईट्टेत्याह वा तुकृथ तक्ववीये अस्माद्भुवनात् सर्वस्मात् लोकान भूतजातात् लोकत्रयसंबंधिनो भयात् धर्मणा अस्मदीय हविषां धारणेन पालि
पालय सिंकिं च अर्थात् असुर संबंधिनो भयात् विशेषेण त्वामेव धर्मणा अस्मद्वारणेन पोषणेन त्वायुक्ताः सनय तत् एवं करोषि अतः स्तौतीत्यर्थः ॥ ॥
अथ षष्ठी ॥ ॥ त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ॥ उतो विहुत्मतीनां विशां ववर्जुषीणां ॥ विश्वा इत्ते धेनवो
दुह्र आशिरं घृतं दुह्रत आशिरं ॥ ॥ हे वायो त्वं अपूर्व्यः न विद्यते पूर्वं यस्मात् तत्वानमपूर्वं तत्र दर्शात्यपूर्व्यः ताद्दृशः अत एव प्रथमः इतरदेवेभ्यः
पूर्वभूतः सन् एषां सोमानां पीतिं पानं अर्हसि प्राप्नोषि सुतानां अभिषवकृतानां सोमानां पीतिं पानमर्हसि यत्र यत्राभिषवोऽस्ति तत्र सर्वत्र नियमेन पिबसीत्यर्थः ॥ पूर्वं प्राथम्याभिप्रायेण इदानीं तु सर्वत्र सोमवत्तियागे अस्य पानमस्तीति ज्ञापयितुं पृथगभिधानं ॥ न केवलं सामपानमात्रं उ
तो अपि तु विहुत्मतीनां विशेषेण होमवतीनां आह्वानवतीनां वा तु हातेः संपदादिलक्षणो भावाक्विप तत्ता मनुपदीवाव वर्जुषीणां अनभिमतत्यापं वर्ज
यंतीनां वर्जयतेर्लिटः क्वसुः संप्रसारणं त्वाभिविशां अलिप्यन्नमानरूपाणां प्रजानां नोस्माकं संबंधि हविः स्वीकरोषीति शेषः ॥ यद्वा तेपाथद्रूपणावि
श्वा इत् ते धेनवः सर्वा अपि गावस्त्वदर्थं आशिरं आश्रापणद्रव्यं क्षीरं दुह्रे दुहंति स्वयमेव कर्तरि दन दुहस्नुनमामिति यागभावः ॥ लोपस्त आत्मनेप
दस्विति तलोपः बहुलं छंदसीति रुट् ॥ तथा आशिरं घृतं उपस्तरणाभिघारणादि पात्रयणायोग्यं करणद्रव्यं दुह्रते ॥ ॥ इति द्वितीयस्य प्रथमे त्रया
विंशो वर्गः ॥ ॥ स्तीर्णं बर्हिरिति नवर्चं द्वितीयं सूक्तं पारुच्छेपं अत्यष्टिर्विनियोगो लैंगिकः ॥ दशरात्रस्य षष्ठेहनि प्रउगं तृच्याद्वायुदेवत्यं आवां र
थ इत्यादि तृचं च कर्म मंद्र अष्टमी न च मा पक्षी। अत्रानुक्रमणिका ॥ स्तीर्णं नव चतुर्थ्याद्याः पंच द्व्याश्विपांत्य अष्टीरिति ॥ सूक्तस्यास्य विशेषविनि
योगो लैंगिकः ॥ दशरात्रस्य षष्ठेहनि प्रउगशस्त्रे आ यातं वा प्रावृतं या वायव्यं इन्द्रवायव्ययोः स्थाने विनियुक्तोपषष्ठस्य प्रातःसवन इति खंडे सूत्रितम् ।
स्तीर्णं बर्हिरिति लवाविति ॥ ॥ तत्र प्रथमा ॥ ॥ स्तीर्णं बर्हिरुपनो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ॥ तुभ्यं हि पूर्वपीतये
देवा देवाय येमिरे ॥ प्र ते सुतासो मधुमंतो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥ देवायानास्माद्यज्ञार्थं स्तीर्णं आस्तृतं बर्हिरभिलक्ष्य उपयाहि आगच्छ किं
मर्थं वीतये हविषां भक्षणाय यज्ञसाधनेन गतित्त इत्यत सहस्रेण सहस्रसंख्याकेन नियुता नियुद्धिः आगच्छेति शेषः ॥ यद्वा जाताय कवचनं नियुत
इति वायोरश्वानां नामधेयं ॥ नियुतो वायोरिति निरुक्तत्वात् ॥ तथा शतिनीभिः शतसंख्यापन्नाभिर्नियुद्धिः अश्वैः आगच्छेति शेषः ॥ यद्वास
हस्राणि नियुतां शतिनीभिश्च नियुद्भिर्नियुत्वते तद्वते वायो तुभ्यं हविर्दीयत इति शेषः ॥ यद्वा तुभ्यमित्यनेन संबंधः इत्यसंख्याकाभिर्नियुद्भिस्तद्वते देवा
य ध्यानमानाय तुभ्यं इच्छात्याचुदात्तत्वं ॥ पूर्वपीतये इतरदेवेभ्यः पूर्वपानाय देवाः प्रयामिरे यमितवंतः यद्वा स्तोतारः ऋत्विजः देवाय तुभ्यं
यमिरे आहवनीयं प्रति सामनियमितवंतः ॥ अयं पिबा मधूनां सुतं वायो दिविष्टिष्वादि मंत्रांतरप्रसिद्धिद्योतनार्थो हिशब्दः ॥ किंच तव त्वदर्थं सुतासः अभि
सुताः मधुमंतो माधुर्योपेताः सोमाः मदाय मादयितारं त्वां तृप्त्यर्थं किंच कर्तवे कर्मणे तत्सिध्यर्थं अस्थिरन् ऋत्विग्भिर्धृतानि तिष्ठंति अतस्त्वं पिबेति

गोपः निष्यते यो दस्युविध्यन्तयेनन स्यान स्वार्थे सिवतिसिचः कृतं। धातोरिवं बहुत्वादंगादिति सिचो लोपः॥ ॥अथद्वितीया॥ ॥तुभ्यायं सोमः परिपू अ॰३
भा॰अ॰३ तो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रावसानो अर्षति॥ तवायं भाग आयुषु सोमो देवेषु हूयते॥ वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्य
३३ स्मयुः॥ हे वायो तुभ्यं त्वदर्थं अयं सोमः तुभ्यमिति चतुर्थ्यां रूपं। अयं सोमः हूयमानः कोशं काष्ठमयं पात्रं अर्षति गच्छति प्राप्नोति। कीदृशः सोमः अ
द्रिभिः परिपूतः अभिषवसाधनैः अयं गतः क्लृप्तः पवनेन शोधितः। यद्वा अद्रिभिः अभिषुतः दशापवित्रेण पवनेन ग्रहणेन वा शोधितः। तथा स्पार्हा
स्पृहणीयानि तेजांसि वसानः परिधानः किं च शुक्राणि निर्मलानि दीप्तानि वा तेजांसि वसानः सोमः अर्षति ग्रहं प्राप्नोति। कपीग तो व्यत्ययेन शप हे वा
यो आयुषु मनुष्येषु यज्ञेषु तव भागो भजनीयः सोमस्त्वदर्थं देवेषु मध्ये हूयते। तस्मात्त्वमपि तत्र युद्धेन युयतः सोमस्तव भागः अतः प्रथमं तु
भ्यं हूयत इत्यर्थः॥ किं च हे वायो त्वं तं सोमं अस्मयुः अस्माभिस्त्वं ह्वानमिच्छन् यो युक्त्वा नियुतो वहसि युक्तं तेन नियुत्संज्ञकानश्वान् वहनाय प्रापयन्
परं यादिति ह्विमं प्रतिगच्छ। तथा कुर्वन् अस्मयुः अस्माभिर्युक्तः सन् अनुग्रहेन अस्मान् कामयमानो वा क्यच्छिंदसि सत्यलोपश्च वा छंदसीत्युत्तुषाणः
प्रीयमाणो याहि गच्छ॥ ॥अथतृतीया॥ ॥आनो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये॥ तवायं भा
गं ऋत्वियः सरश्मिः सूर्ये सचा॥ अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत॥ ॥हे वायो त्वं नो अध्वरं अस्माकं मंगलमध्वरं यज्ञं शतिनीभिर्नि
युद्भिः सहस्रिणीभिश्च मानिस्त्वदीयैरश्वैर्नोस्मद्यज्ञमुपयाहि। उपागच्छ। किमर्थं वीतये इति मनकामायैनत्स्तृतये आगत्य च हव्यानि वीत
ये सोमादि हविर्भक्षणाय शतसहस्रैरतिशीघ्रमागच्छेत्यर्थः। किं वा यं तव भागं भजनीयं सोमः ऋत्वियः प्राप्तकालः प्रदानावसरं प्राप्तः अतु
नात्व न प्रदानकालं स्थने खं स्मिंश्च स्मितिवृति पदसंज्ञा या वा धातुगुणाभावे यण। किं च सोमः सूर्ये इति सरश्मिभिः सह सरश्मिर्भवति। स
मानरश्मिर्भवतीत्युक्तेः सहिता भवति रश्मिर्भवति। अतः प्राप्तकाल इत्यर्थः। किं च सोमाः अध्वर्युभिः चमसाध्वर्युभिस्तैर्धाराः तृशताहृतह
वचने तेभ्यरमाणाः ह्रियमाणाः अयंसत नियता अभवन्। किं च हे वायो ते सोमाः शुक्राः अयंसत इत्यत्र दीप्ता उद्यताः अतस्तेषां भक्षणाय
याहीत्यर्थः॥ ॥अथचतुर्थी॥ ॥आ वां रथो नियुत्वान्वक्षदवसे अभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये। पिबतं मध्वो अंधसः पूर्वपेयं हि
वां हितं। वायवा चंद्रेण राधसा गतमिंद्रश्च राधसा गतं॥ ॥केवलं वायुं स्तुत्वा व्यासेन इंद्रवायू स्तौति। हे वायो त्वं इंद्रश्च वायुश्च वां रथः
युवयोः संबंधी रथः नियुत्वान् नियुद्भिरश्वैस्तद्वान् सन् आ वक्षत देवयजनं प्रति युष्मानावहतु वह हर्षे घातागमः॥ सिब हुलमिति सिपू।
यद्यपि नियुतो वायोरेव रथस्यापिता॥ तथापि व्यासत्तो देवतात्वात् स इह वागमनादिद्वार्थमपि वदंतीति किमर्थं अवसे गमनाय रक्षणाय
वा पुनश्च किमर्थं प्रयांसि अन्नानि सोमलक्षणानि सुधितानि सम्यग्गृहीतानि वीतये तेषां भक्षणाय तथा हव्यानि वीतये उत्तरे पांसवनीयपु
रोडाशादीनां स्वादनाय चेतः नित्यमंत्ररचनेत्यादिना तस्योदात्तत्वं किं च मध्वः मधुरस्य अंधसः अन्नस्य सोमरूपस्य कर्मणि षष्ठी म
धुरं सोमं पिबतं यतः पूर्वपेयं उत्तरदेवेभ्यः पूर्वपानं वायुवयोर्हितं पात्रेनो वायविति यतई घतीति कारः अभिमतं अतः प्रथमं पिबतमि
त्यर्थः॥ मन्त्र पीइंद्राद पिबायो पूर्वपानं वांहि पूर्वपा अभिहि दहधिषे पूर्वपेयमित्यादिषु सर्वत्र प्रसिद्धं तथापीद्रस्येतरदेवेभ्यः पूर्वं वायुना सह २२
पानं चंद्र इतुरीयार्थ नादन आह्लादनकरेण देवानां सोमस्य राजो ग्रपेयेन समपाद्यन्नित्यत्र प्रतिपाद्यितं किं चागमन समये हे वायो इंद्रश्च चंद्रेण अस्म

दादेरावाह्लादनयेन राधसा गवादिरूपेण धनेन सह आगतम् आगच्छतं राधसा लेन धनेन सहागतं गमेर्लोडि छंदसः शपो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः। 47
पः। नुडिमवादम॥ मेति लुडक् ॥ ॥अथपंचमी॥ ॥आ वां धियो ववृत्युरध्वरा उपेममिंदुं मर्मृजंत वाजिनं माशुमत्यं न वाजिनं। तेषां पिबतमस्मयू आ नो 1914
गंतमिहोत्या॥ इंद्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवं॥ ॥हे इंद्रवायू ना युवां धियः कर्माणि स्तोत्रादिलक्षणानि अध्वरान् उप अस्मदीयान् य
ज्ञान् कर्षीरावृत्यावर्तयंतु। अतिशयेन वर्तयंति किं च युष्मदर्थं वाजिनं आमिक्षावंतं इमं इंदुं सोमं उपममृजंत अध्वर्यवो दशापवित्रेण मर्जयंति यहणा
यद्रोण कलशादीन् प्रतिगमनं तं आशु अतिशीघ्रगामिनं अत्यं न सततगं तारं वाजिनं वेजनवंतं अश्वमिव यथा वंश्चे दापनयः न समानयंति न इत
थिं च हे इंद्रवायू तेषां मध्यर्णां संबंधिनः शोधितान् सोमान् पिबतं पानं कुरुतं तदर्थं नास्माकं यज्ञं प्रति इह इदानीं उत्यास्मद्रक्षणेन सह आगतं आगच्छ
तं किं च हे इंद्रवायू अस्मयू अस्मद्यज्ञमिच्छंतो युवां अद्रिभिर्ग्रावभिः सुतानामभिषुतानां पूर्ववत्कर्मणि षष्ठी॥ तान् पिबतमिति शेषः। किमर्थं मदायत
प्रययोर्मोदाय वायुवां वा जदाः दातारस्तस्मात् पिबतमित्यन्वयः॥ ॥द्वितीयस्य प्रथमे चतुर्विंशो वर्गः॥ ॥अथषष्ठी॥ इमे वां सोमा अप्स्वा
सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत॥ एते वामभ्यसृक्षत तिरः पवित्रमाशवः॥ युवायवोति रोमाण्यव्यया सोमासो अत्यव्या॥ ॥
हे वायो वां युवयोः स्त्वनर्थं इमे सोमाः अप्सु अस्मदीयकर्मसु उदकेषु इत्यादिनाविभक्तेर्दादेशं। इह अभिषवस्थाने सुताः अध्वर्युभि
र्भरमाणाः भियमाणाः गृहीताः हस्तात्पृथक् त्वं आत्मा कर्मणि कृदंतं प्रत्ययः॥ संतः शुक्रा अयंसत आगच्छंति युवयोर्नियता भवंति॥ किं च तस्य सोमाः शुक्राः
शुभ्राः दीप्ता अयंसत नियता भवंतीति। किं च ते आशवः व्यापकाः सोमाः वां युवयोः प्रीणयितुमिति शेषः॥ तिरः पवित्रात् तिर्यग्भूतं सोमानधायकं इमानि यं
पवित्रं अभ्यसृक्षत अभिसृज्यते॥ ध्यं तस्यवाः भवंति सृजः कर्मणि लुङि लिङ् सिच्चायानन्यदश्वीतिसिच्॥ किं च तागुणाभावो आमागमाभावश्च किं च
युवायवः युवां कामयमानाः सोमासः सोमा अव्ययान्यवि अजानि रोमाणि पवित्रसंबंधीन्यपि रोमाणि यद्वा अथ यो आविभ्यामिमका प्रत्ययः लुप्यते॥
तीष्वगानि रोमाणि अति अतिक्रम्य पात्राद्भूमिर्नातिशयः पुनरत्यव्यिष्यंत अति अतिशयेन अव्ययाव्ययर्हिताः सोमासः सोमाः सृतसृज्जतेति
शेषः॥ ॥अथसप्तमी॥ ॥अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिंद्रश्च गच्छतं। वि सूनृता ददृशे रीयते घृतमा पूर्णया
नियुता याथो अध्वरमिंद्रश्च याथो अध्वरं॥ ॥हे वायो त्वं ससतः आलस्यादि सिताप्नि द्रांकुर्वतः शश्वतः बहून् यजमानान् शश्वदिति बहुनामसु श
तविश्वामिति तं नामस्याता। अतिक्रम्य उपयाहि गच्छ इंद्रश्च तथा कुरुतं किं च शमिति तमाह यत्र ग्रावा वदति यस्मिन् देशे अभि
षवार्थः पाषाणध्वनिः श्रूयते तत्र गच्छतं तं देशं प्रत्यागच्छतं गृहं यज्ञगृहं गच्छतं पुनः स्थानामतः विशिष्यते॥ सूनृता प्रियसत्यात्मिका स्तुतिः सू
नृता कृत्स्ना वि ददृशे विशेषेण दृश्यते त्यर्थः॥ न वगच्छतं यत्र च घृतं अत्यंतदीप्तमाज्यं हविर्मार्गं गृहीत्वा रीयते गच्छति आहवनीयं प्रति नीयते
रीङ् श्रवणाद्दिवाद्धि त्वयन। तत्र गच्छतं गमनप्रकार एव विशिष्यते। पूर्णया संपूर्णया तु पूर्णया नियुता ततानेन नियुक्ताश्व समृद्ध्याध्वरं अस्मदीयं यज्ञं आमा
यः आभिमुख्येन प्रयातः॥ किं च हे वायो त्वं इंद्रश्च युवां अध्वरं अस्मदीयं याथो याथ यथास्तु वगच्छतं यथास्माभिरपि सर्वं वगच्छत मित्यर्थः॥ ॥
अथाष्टमी॥ ॥अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठंत जायवोऽस्मे ते संतु जायवः॥ साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यंति धे
नवो नाप दस्यंति धेनवः॥ ॥हे इंद्रवायू अत्राह अस्मिन्नेव यज्ञे अहेतिविनियंत्रार्थे यः मध्वा मधुरस्य मधुसदृशस्य वा तस्य आहुतिप्रदेयद्रव्यं

भा॰अ॰२ इत्थं धारयंतं यं सोमं अश्वत्थं पर्वतादिष्वतिप्रदेशोच्छ्रितं तायवो जेतारो यजमानाः उपतिष्ठंति उपेत्य तिष्ठंति निषीदंतीत्यर्थः ॥ किंच अस्मे अस्माकं संबंधिनो अ॰१
जायवः कर्मनिर्वर्तयितारः ऋत्विजः संतु समर्था भवंतु यत्तं निर्वर्तयंतीत्यर्थः ॥ यद्वा तत्र प्रसिद्धाः प्रयोगकुशला जायवः जेतारः ऋत्विजः अस्मे संतु नास्य अत्र व
२३ हूर्थे इत्यस्य कालविशेषं दर्शयति जाह ॥ इदं द्वयायु असिष्यतेगावः धेनवः साकं सह देव सुव्रते युष्मदर्थं यवशीरमुत्पादयंति शेषा भवंतीत्यर्थः ॥ यद्वा गावः
साकं सह देव सुव्रत अपत्यमुत्पादयंति [illegible] ह्यानार्थं अदाशिक [illegible] तस्यानुदात्ते धातुस्वरः किंच यवः यवादिभिः पुरोडाशादिकं पच्यते हे वायो इंद्र च यतो
ह॥ यतो दाश्वान् अभिमतं दद् विर्दत्तवानस्मि अतो वाचा इतरसाधारण्येन ब्रुवनः कथं दातव्यमितिन मंतव्यं॥ यतो हं हे अग्ने तव स्वित् तवैव आ
आभिमुख्येन अरिः अनार्हविरादि प्रापणेन सेवको हं॥ तत्र दृष्टांतः॥ महस्य महतः तोदस्य वशीकस्य स्वामिनः शरणे स्थ गृहे यथा गर्भदासा
दिरात्मनत्यवर्तते तद्वद् हमपि यस्मा देवं तस्मादभिमतं वक्तुवा वलमपि तस्मै देहीत्यर्थः॥ अत्र निरुक्तं॥ बहु दाश्वांस्त्वामेवाभिह्वया
म्यरिरमित्रस्तुतिश्च गन्तारं तस्माद्वयद्रन्यद बल्या अग्नाव इतयोद्भयंतइत्यत ईद्धवमवस्तताहस्यवाद्धरण आ महस्य। तुदस्येव शर
णाधि महत इति॥ ॥अथ द्वितीया॥ ॥व्यनिनस्य धनिनः प्रहोषे चिदररुषः॥ कदा चन प्रजिगतो अदेवयोः॥ ॥पूर्वमंत्रे स्वामी हविर्दाप
यामीत्युक्तं अत्र तुष्टांविलक्षणेभ्यो दानादिरहितेभ्यो दानं न दातव्यमिति प्रार्थयते॥ हे अग्ने त्वां वि इति पृथग्भावामि उपसर्गश्च तद्योग्य क्रिया
ध्याहारः॥ अथवा अस्मदर्थं यच्छासिलयं तद्दिरसं वाचं वक्ष्यमाण स्वरूपस्य न दातव्यमिति ब्रवीमीत्यर्थः॥ तेषां स्वरूपमाह॥ अनिनस्य
अस्वामिनः त्वां अस्वामिनं कुर्वाणस्य तथा धनिनः समृद्धधनवतः पूर्वमेव धनवता दानस्य निरर्थकत्वात्तन्निवार्यते॥ यद्वा यागाद्यनुपेया
गधनवत इत्यर्थः॥ किंच प्रहोषे प्रकर्षेण होतुं अररुषः अदत्ता दक्षिणारूपेण यद्वा प्रहोषे भनिनस्येति संबंधः॥ प्रकर्षेण होतुं समर्थस्ये
त्यर्थः॥ अत्र इन शब्देन तत्र सामर्थ्यलक्ष्यते विश्वः समुच्चयार्थः॥ किंच कदाचन प्रजिगतः कदाचिदपि प्रकर्षेण देवान् स्तुवतः॥ अत्र चन
तिनिपात इयसमुच्चयस्तत्र च शब्दः समुच्चयेन अन्यानि पर्धानि च अदेवयोः देवानात्मन इच्छतः एतेषां न दातव्यमिति विवाचइत्यर्थः॥ निंदि
तानां स्वरूपनिरूपणेन स्वस्या तादृशत्वाद्धुहुप्राच इत्यतत युक्तमेव फलं भवति। यद्वा चन तिचिदेवपर्यायः॥ उक्तप्रकारेण दुःस्थापि क

THE ASIATIC SOCIETY OF BENGAL

भा० अ० २ दाप्रतिगतः यस्तु हविषा वा मासवतः विरोचेनाऽऽदृतः स एतादृशमभितो विशेषेण गवीषि किमुप नम्य मसमर्थमिति भावः ॥ ॥ अथ तृतीया ॥ ॥ सत्वं ग्रो वि अ० २
३० प्र मर्त्यो महो अर्धंत मादिवि ॥ प्रप्रेते अग्ने वनुषः स्याम ॥ ॥ हे अग्ने विप्र मेधाविन् यो मर्त्यः त्वां यजते से मर्त्यो यजमानः दिवि द्युलोके चंद्रः सर्वेषामाह्ला
दकः ॥ चंद्रसदृशो भवति ॥ यद्वा चंद्र इव भवति यजमानानां चंद्रत्वप्राप्तिः तेषां यस्यामनेतिवित् लोकमाकाशकाशा अंद्रमसमेपसो मोराजयति सो
मस्या केवि भक्तिमन् भूयेतिच ॥ तथा सुकृतिपि पल्लोके नाम्नि मान्यते ॥ एघ्दीतिमतमाहृतयः सत्वर्चसः स्सूर्यरश्मिभिर्यजमानं वहंति तन्नयंयेता
सूर्यरश्मयो यत्र देवानां पतिरेकोऽधिवास इति ॥ एवं वः पुण्यः सुकृतो ब्रह्मलोकं इति च ॥ पुनः स एव द्विष्यते ॥ महो महतो पिऋा धंतमः प्रवृद्धतमः इतरेषा
नामपि श्रेष्ठ इत्यर्थः ॥ अतः अग्ने ते तव प्रप्रेत प्रकर्षेण वनुषः संभक्तारः स्याम ॥ यद्वा प्रीणयिता प्रप्रेत स्याम प्रकृष्टा एव भवेम ॥ ॥ इति द्वितीयस्य
द्वितीये एकोनविंशो वर्गः ॥ ॥ मित्रं न यमिति नवर्चं एकादशं सूक्तं दीर्घतमस आर्षं जागतं मित्रावरुणदेवताकं प्रथमाग्नेयी ॥ अत्रानुक्रमणिका ॥ मित्रं न वमैत्रावरु
णं हि तावदाग्नेय्याद्येति ॥ विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ॥ अरेजेतां रोदसी पाजसा
गिरा प्रति प्रियं यजतं जनुषामवः ॥ मित्रं न यमिति ॥ यमग्निं शिम्या कर्मणा मनसा तद्वर्मी उशीरितित नामसु पाठात् ॥ प्रकाश रूपत्वात् दहनादिकर्मणामि
ति न मित्रमिव स्थितं ॥ यद्वा शिम्यातिक्रियया सद्वर्तं वध्यते ॥ गोषु वर्षा सुनिमित्तभूतासु गव्यवः गा आत्मन इच्छंतः अत्र यद्यपि गव्यव इत्ये वालं गोः
स्थिति ॥ तथापि गव्यव इत्यत्र गोत्वामित्वं प्रतिपाद्यते तन्नैकयाद्विज्ञा दृभिस्यात अतस्तु दुर्णाया वद्रप्त इत्यवगमयितुं गोष्विति पदं ॥ यथा गवामसि
गोपतिर्गणानां त्वा गणपतिस्तथा स्वाध्यः सुष्ठु आध्यातारः फलस्योत्पादयितारः शोभनध्याना वा विदथे यागे अप्सु अंतरिक्षे वृष्टरूपेण वर्त
मानं आप इत्यंतरिक्षनाम अपः पृथिवीतितं नामसु पठितत्वात् ॥ अग्नेरंतरिक्षोत्पत्तिर्यद्ग्नेर्दिवि जा अस्य मज्जा वा स्वग्नये सधि ष्टव इत्यादिमंत्रांतरेषु प्रसि
द्धाग्नि यं सर्वं यात्रियनमां प्रीणयितारं वा यजतं यष्टव्यं अग्निं जनुषां जनवतां प्राणिनां अवः प्रातरक्षणं निमित्तोत्पन्नशिम्यामथनादिकर्मणा जीज
नत जनयंति यजमानाः ॥ यद्वा अप्सु निमित्तभूतासु जीजनत सर्वप्राणिनामुपकाराय वृष्ट्यर्थं वेत्यर्थः ॥ एव मुत्पन्नस्याग्नेः पाजसा बलेन गिरा भयंकरश
ब्देन च रोदसी द्यावापृथिव्यौ अरेजेतां अकंपेतां अग्नेः सकाशात् कंपनमरेजेतां रोदसी ह्वानतूर्यं इत्यादि श्रुतिषु प्रसिद्धं ॥ न च सर्वं रक्षणार्थमुत्पा
दितोग्निर्लोकद्वयस्य भीतिमजनयत् ॥ किमेतादिति वाच्यं ॥ निंदा स्तुति बाधा थालोको विभीतः यथा प्रयस्योभयदिति तात्पर्यवसानात् ॥ यद्यः
प्यत्राग्निरेव प्रतिपाद्यते मित्रवत् परं इष्टांततित एव तथापि द्युस्थानस्याग्नेरेव मित्रत्वान्मंत्रस्य मंत्रत्वमविरुद्धं यद्वा मित्रं न स्वायमिव स्थितं मित्रं
नामकं देवं यजंतं रक्षित्व कुर्वंत जनः प्रादुर्भावयंति द्विम्न मेन द्वैषेपणत थैव योजनीयं ॥ ॥ अथ द्वितीया ॥ ॥ यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र
मित्रासो न दधिरे स्वाभुवः ॥ अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥ हे मित्रावरुणौ यद्ध यस्मात्कारणात् वां युवां पुरुमीळ्हस्य व
हुलाभीष्टसेचनस्य सोमिनः स्वाभुवः सोमवतः स्वभावन शीलस्य कर्मणि प्रवर्ती ॥ त्यत उक्तलक्षणं कर्म प्रमित्रा सोमामित्राणी वमित्रभूता ऋत्विजः
प्रदधिरे प्रकर्षेण धारयति ॥ हतिप्तरणः ॥ अध अतः कारणात् गातुयुष्मदमनं अर्चत पक्ष्यर्थे चतुर्थी अर्चतः पूजयतो यजमानस्य क्रतुं कर्मः ३०
विदतं जानीतं ॥ विदे लोंडिश्यस्य येनद्गुः ॥ उत अपि च हे वृषणा कामानां वर्षितारौ युवां पस्त्यावतः पस्त्यातिगृहनाम पस्त्या दुरोण इति तं नामसु
पठितत्वात् ॥ सदः प्राचीनवंशादिस्तदवतो यजमानस्य आकानं स्तोत्रं वा श्रुतं शृणुतं छांदसो विकरणस्य लुक् ॥ यद्ध यद्यस्मात् सोमिनः सोमवतः

पुरुमीळ्हस्य एतन्नामकस्य राज्ञो मित्रासो न मित्राणीव स्थिताः स्वाभुवः स्वाभवनशीलाः स्वस्वव्यापारसमर्थाः दधिरे ॥ अथ अतः कारणात् तस्यार्चत 81
अर्चतः क्रतुं विदतमित्यादि पूर्ववत् ॥ ॥ अथ तृतीया ॥ ॥ आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ॥ यदीमृताय भरथो यदर्वते प्र 1914
होत्रया शिम्या वीथो अध्वरं ॥ ॥ हे वृषणा कामानां वर्षितारौ हे मित्रावरुणौ वां युवयोः संबंधि जन्म जननं उत्पत्तिः रोदस्योः द्यावापृथिव्योः सकाशात् द्या
वापृथिव्यामेव सर्वे यांमुक्ततः यद्वा मित्र इति सर्वोपकार्योग्निरुच्यते वरुण इति लमानिवारक आदित्यः उभयोः पृथिवी द्युस्थानत्वात् ॥ ततः पूर्वमं
त्र मित्रादृष्टांतत्वेनाग्निश्रुतः अन इदमधिगम्यते अग्निरयमित्र इति ॥ तथान्यत्रापि ॥ अग्निं मित्रं न क्षितिषु तं प्रशंसमित्रं न यं सुधितं भृगवो दधु
रिति च प्रवाच्यं स्तुत्यं तादृश्यच योजन्म महे महते दक्षसे सर्वविषयबलाय क्षितयो मनुष्या यजमानाः अभूषन् सर्वतोऽलंकुर्वंति श्लाघ्यं इत्यर्थः ॥
जन्मतः प्रवाच्यं तामाह ॥ यदीं यस्माद्वेवकारणात् ॥ अथवा इमित्यनर्थकमिति भरथः नर्थः क्वः कर्मा मिद्वितीया युक्तत्वात् ऋताय यज्ञाय भरथः सम
र्थं यद्यस्मात्कारणात् ॥ अर्वते युष्मान् आत्ययते यजमानाय च भरथाभिमतंफलं ॥ अथवा उभयत्र कर्मणः संप्रदानत्वाच्चतुर्थी ॥ यज्ञं यजमा
नं च भारथ इत्यर्थः ॥ यथा च होत्रया स्तुतिरूपया वाचा शिम्या हविः प्रदानकर्मणा च प्रपाथः प्रकर्षप्राप्नुथः तस्मात्प्रवाच्यं जन्म भूषयंतीत्यर्थः ॥ हो
त्रेति वाङ्नाम होत्रा गीरिति तं नामसु पाठात् ॥ ॥ अथ चतुर्थी ॥ ॥ प्रसा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ॥ युवं दिवो बृहतो
दक्षमाभुवं गां न धुर्युप युंजाथे अपः ॥ ॥ हे असुरा असुरौ बलवंतौ मित्रावरुणौ युवयोः या क्षितिर्देवयजनरूपा महि महत् ॥ अत्याधिकं प्रिया प्रि
यतरा प्रीणयित्री वा मा क्षितिः प्रकर्षेण संपादयता ॥ उपसर्गश्रुतयोग्यक्रियाध्याहारः त्वमासीदितमिति शेषः ॥ यागभूमिर्देवानां प्रियेति प्रसिद्धं
यं अमा घते हृष्टवानो ऋतवंतौ युवां ऋतमन्नं वचं ऋतमस्मदीयं यज्ञमाघोषथः आविकृत्येन संपादितइति श्रूतमित्यर्थः ॥ यता युवं युवां बृहतो मह
तो दिवः लोकात् धुरि रक्षनपंणवहन समर्थं अथवा रथादिना महता फलप्रदानवांक्षनप्रीणयितुमिति शेषः ॥ यद्वा कर्मणि पर्यवसिता धीतना
मेवं बृहतः प्रभूतं दक्षं अभिमत मक्षनसमर्थं आभुवं सर्वतो भुवतीति अपः कर्मसामयागरूपं उपयुंजाथे सवथतत्रत्यं ॥ हविर्स्वीकुरुथ इत्यर्थः
॥ उपयागदृष्टांतः ॥ धुरि शकटा रवत स्यनिर्वोढत त्यर्थं गां नधनुमिर्वेतां यथा उपत्यं जनमहत ॥ यज्ञविकारप्रकृतिद्वादशीरादिकमिवात स्मा तद्
मघापयः ॥ ॥ अथ पंचमी ॥ ॥ मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ॥ स्वरंति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरि
व ॥ हे मित्रावरुणौ युवां मही ॥ महत्याः सप्तम्येकवचने पूर्वसवर्णदीर्घः ईदूतौ च सप्तम्यर्थे इति प्रगृह्यता ॥ अत्रास्यां पृथिव्यां महिना महत्वेन याधे
नूः वारं वारणीयं प्रदेशमृण्वथः अंतर्भावितण्यर्थो यं गामनादिव्यापारस्यतयोरधीनत्वात् द्यावापृथिव्योरभिमानि देवत्वाच्च मित्रावरुणयोः
ता एता धेनवो गावः सायंकाले युष्मन्महत्येन अरेणवः अतवद्याः तस्करायन प्रहारणानदातृत्वात् तुजः क्षीरादीनां प्रदात्र्यः तुजतिर्दानकर्मा सद्म
नि गोष्ठे आश्रिताः आगच्छंति वा उपसर्गश्रुतयोग्यक्रियाध्याहारः ॥ तां एवं कारितावनवः उपरताति उपरतातौ सप्तम्या लुक् मघानं विस्तारवंत्यं
तरिक्षमध्यच्छन्न सति सूर्यं सर्वस्य प्रेरयितारं सुवीर्यं शोभनसामर्थ्यं वा ॥ स्रपीयां मर्यांयथा गोपायत इति तत्स ऐसास स्यैन मितिस्क यत रो
न ॥ आ दित्यमभिलक्ष्य स्वरंति स्वपंति मुखं संचारायस्तन्वोप्रतापयोः भौवादिकः कस्मिन्काल इति तदुच्यते निम्रुच उषसः सर्वेषां पिसायं
काले उषः काले पुनस्तत्र दृष्टांतः ॥ तक्ववीरिव तक्ता स्तेनस्तस्या वेतागंतामनुष्यः स यथा गोशांतितद्गुर्वेनिरस्वानं गावां सुखचारां युष्मदायत

भा॰ अ॰ २ इतिनयोः स्तुतिः॥ ॥इति द्वितीयस्य द्वितीये विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥आ वामुपायकतिनीरनुष्ठामित्रावरुणा गातुमर्चथः॥ अवस्मना अ॰ २
४० नतनंपिन्वतं धियायुवं विप्रस्य मन्मनामिरज्यथः॥ हे मित्रावरुणौ कतिनीः कशब्दोग्निज्वालः धीयुवां कृतायज्ञार्थं अनुष्ठानं हविः समर्पना
भिप्रजयंनीत्यर्थः॥ कृतानि दुग्धानि हे मित्र हे वरुण युवाभ्यां मायज्ञयागगातुगमनं हेयजमान दर्शयागातुरितिभूनामगातुर्यत्पत्कत्वात
॥अर्चथः पूजयथः स्वीकुरुतइत्यर्थः॥ आगत्य चत्मना आत्मनेव अवसृजतं दृष्टिमवासुरवविसृजतं तथा कृतार्धियामर्ददायानि कर्माणि
पिन्वतं वर्धयतमित्यर्थः॥ एवं कृत्वा विप्रस्य मेधाविनः यजमानस्य मन्मनां मननवतीनांस्तुतीनां युवां॥ ॥अथ सप्तमी॥ ॥यां वां यज्ञैः शशमा
नाहदाशतिकविर्होतायजतिमन्मसाधनः॥ उपाहतं गच्छथो वीथो अध्वरमच्छागिरः सुमतिं गन्तमस्मयू॥ ॥योहयः खलुयजमानो वांयुवामु
द्दिश्य युवाभ्यां वा यज्ञैर्यागैर्निमित्तभूतैः शशमानः शंसमानो दाशति दिशादि कृस्वस्त्यानि वर्ष्ययुष्मत्स्वनापादनं करोति यएवकविः अनूचा
नः यद्वानूचानो स्तकवयइति श्रुतेः॥ अथवा कविर्मेधावी होमनिष्पादको यजमानो मन्मसाधनः मननीयद्रव्यदक्षिणादिसाधनो यजुः सन्
यजतिसमां यागादिकं करोति तं यजमानं समतिं शोभनयत्नं उपउपलभ्य गच्छथः प्राप्नुथः खलु अध्वरं तदीयं यज्ञं वीथः कामयेथा किं
च अस्मयू अस्मान्कामयमानौ युवां गिरः स्तुतीः अच्छ अभिलक्ष्य गन्तं गच्छतं तादृशं मां प्राथस्तुताः स्वीकुरुतमित्यर्थः॥ अत्र यद्यपितमितिसा
मान्याननिर्देशः प्रतिभाति तथापि अस्मयू इत्येकत्वादीर्घतमाः स्वात्मानमेव परोक्षतया कर्त्वानिति गम्यते यद्वा यो दाशति यश्च यजति तमुप
गच्छथः स्वीयं यज्ञकामयेथे अतोस्मयू युवां कुमतिं मां मदीयागिरः स्तुतीः अच्छ अभिलक्ष्य गच्छतं॥ ॥अथाष्टमी॥ ॥युवां यज्ञैः प्रथमा गोभि
भिरंजत ऋतावाना मनसो न प्रयुक्तिषु॥ भरंति वां मन्मना संयता गिरो दृप्यता मनसा रेवदाशाथे॥ ॥हेऋतावानायज्ञवन्तौ ऋतयुक्तौ मित्रा
वरुणयुवां प्रथमा प्रथमौ यज्ञार्थं मनसा धनेः गोभिः गोविकारैः पयआदिभिः अंजते अंजयंति यजमानाः इव भागं यागयुक्तो राहिभिर्यजन्त इ
त्यर्थः॥ यद्वा गोभिरंजनं तु वंति तत्र दृष्टांतः प्रयुक्तिषु प्रयोगेषु मनसा न सोनकर्मणिपर्षीमनइवन यथा प्रथमं ध्यंजयंति मुखं कुर्वंतितद्वदि
त्यर्थः॥ यद्वा गोभिरंजनं तु वंति तत्र दृष्टांतः कृत्वा तम् इत्याव हारयावि कं चंवां युवां मन्मनामननवता सयता युवामेवसम्यग्गच्छता चिन्तनेन गिरः स्तुतीर्भरंति संपादयंति यस्मादेवं तस्मा
त अदृप्यता अनभिभवता मनसा प्रकृष्टेन चेतसा युक्तौ संतौ रेवत धनवत कर्मस्मदीय मा गाथे अश्नुवाते व्याप्नुथः इत्यर्थः॥ अ
श्रोश्नातेर्लोट् अनित्यमागमशासनमितिवचनादिडभावः॥ ॥अथ नवमी॥ ॥रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊतिमाहि
नं॥ नवां द्यावो हभिर्नोत सिंधवो न देवत्वं पणयो नानशुर्मघं॥ हे मित्रावरुणौ युवां रेवत धनवान वयानदधाथे उभयं च धारयथः यस्मादेवं
तस्मात सहदयत्वात यद्वा तिगम्यते धनविशिष्टमन्नं हे नरौ नेतारौ युवां आशाथे अवाथे अस्मभ्यं ददातइत्यर्थः॥ कीदृशं मायाभिः प्रायुव
योः प्रज्ञाभिः इतउत्तरइति अस्मदभिमुखगमनवत्तरं तार तणबन्धामाहिनम् हनांमतत अतिमहत्तरं दृशायुवयो रतादृशं सामर्थ्यं कुतइ
त्य दवांयुवा युवयो र्दैवत्यं अहभिरहाभिरात्रिभिः अन्नानं कृत्स्नरात्रिभिरभिधीयते धातृव्यलोदृः पृथगभिधानात ताभिः सहिताद्या
वाद्रिवसानानशुः नव्याप्नुवंति अहश्च रात्रिश्चाभिभूननरत इत्यर्थः॥ इतअश्विसिंधवः स्यंदनशीला न घानतवानसन्तथा युवयोर्दैवं
तं पणयोसुरा अपिनानशुः मघंधनं नानाभिरक्षितयुवयोः पराभवितारोन केपिसंतीत्यर्थः॥ ॥इति द्वितीयस्य द्वितीये एकविंशो
वर्गः॥ ॥

॥ ॥युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंतवो ह सर्गाः॥ अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे॥ इति ... मित्रावरुणं पूर्वं मित्रावरुणं देल्यकतानरा ... यागिकः॥ 83
मित्रावरुणपशाबाधावयायाल्याप्रदानानामिति... दृमत्रितं॥ युवं वस्त्राणि पीवसा वसाथेप्रथा हवामित्रज्ञान सनइतिसंवसमावृतेनतेन वस्त्राभार 1914
णादिनियुक्ताः॥ सन्नितं नयुवं वस्त्राणि पीवसा वसाथे इत्यतनया समो आच्छादयति॥ ॥सैषा प्रथमा॥ ॥युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंत
वो ह सर्गाः॥ अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे॥ हे मित्रावरुणौ पीवसा पीवानि युवं युवां यद्वा पीनसा पीनान्यच्छिद्राणि वस्त्राण्या
च्छादनानि यानि वसानि वसाथे आच्छादयथः॥ यद्वा पीवसा स्थूलेन प्रभूतेन तेजसा वस्त्राणि दधाथ अविच्छिन्नानि वस्त्रस्थानीयानि तेजांसि धा
रयथ इत्यर्थः॥ किंच युवयोः सर्गाः सृष्टयः अच्छिद्राः अच्छिन्नाः मंतवो ह मननीयाश्च इत्यर्थः॥ युवां विश्वा विश्वानि सर्वाणि अनृतानि असत्या
नि अपि यानि पापान्यवातिरतं नाशयतं विश्वस्य संहितायां कस्यकृति प्रकृतिभावाऽसत्यं च ऋतेन यज्ञेन तत्साधनेन यज्ञेन वा सचेथे सं
गच्छेते॥ अस्मभ्यं योजयथइत्यर्थः॥ ॥अथ द्वितीया॥ ॥एतच्चन त्वो वि चिकेतदेषां सत्यो मंत्रः कविशस्त ऋघावान्॥ त्रिरश्रिं हंति चतुरश्रि
रुग्रो देवनिदो ह प्रथमा अजूर्यन्॥ एषां एतयोर्मध्येव हुवचनं पूजार्थं॥ यद्वा न दनुचराणां शयाव हुवचनं एतयोर्मध्यत्वश्चन एकएव एतत्
श्यमाणं सामर्थ्यरूपं कर्म विचिकेत विजानाति अनुतिष्ठतीत्यर्थः॥ सविजिज्ञास्यते सत्यः सत्यः अबाध्यः सम मननवान
कविशस्तः कविभिर्मेधाविभिः शंसनीयः ऋघावान् हिंसावान् अनेनवक्ष्यमाणस्य सामर्थ्यस्य संभाविताप्रतिपादिता भवति एतदेव तत्कृतादि
त्याशंक्याह त्रिरश्रिं अश्रिश्रया पत्तमायुधं त्रिरश्रिंत दुर्तमवर्थोत्युत्पत्ते उपलक्षणमेतत सर्वायुधसंपन्नमित्यर्थः॥ एतं नामानं चतुरश्रिः
तत्राप्यधिकायुधवाननेकवल मायुधसमर्थो किंतु उग्रः स्वयमुद्गूर्णवलः॥ हंति हिनस्ति अतिबलंडजं॥ किंच युवयोरकस्यचसमर्थ्यनद
वनिदो देवनिंदकाः सत्र प्रथमाः समर्थाः सत्यपि अजूर्यन स्वयं॥ मवजीर्णा भवंतीर्जीर्यतेः जीर्यतेः ज्वलंछंदसीलञ्॥ युवयोर्मध्ये एकोपि
महान्कुलः मिलितयोरतिसामर्थ्यं किमुवक्तव्यमितिभावः॥ अथवा एषां युवयोरेतेषां तुरक्तवक्ष्यमाणं सामर्थ्यं एकः सत्यादिलक्षणा
विशिष्टः नत विशेषेण जानाति शेषंपूर्ववत॥ ॥अथ तृतीया॥ ॥अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत॥ गर्भो भारं भरत्या
चिदस्य ऋतं पिपर्त्यनृतं नि तारीत्॥ ॥हे मित्रावरुणौ पद्वतीनां पादवतीनां मनुष्यादीनां प्रजानां प्रथमा प्रथमभाविनी अपात पादरहिता
षाः प्रतिदिनं सर्वं प्राक्तनस्यास्याः परिभ्रमणाभावात सूर्यगमनेनैव स्वगमनादपादितिचेत्तेति चापच यत्ततन तादृशं वां युवयोः प्रसि
धं कर्म आचिकेत आभिमुख्येन जानाति विकृतज्ञानं अभिलक्ष्यमित्यर्थः॥ मित्रावरुणयोरहोरात्रदेवतात्वाभ्यां अहोरात्रयोरन्तरालस्यां वा
पस्यादेतत्कर्मं किं वास्यकाकस्य भारं निर्वाहगर्भयुवयोः स्थानीयः गुणोसत्यः अहोरात्रयोर्मध्यकालइत्यतस्ताभ्यामेव मित्रावरुण
योनअहोरात्रे यमित्रावरुणा विति श्रुतेः॥ सआदृशोतिवित्तमंतानिर्वहेत्यव सर्वतिगास्य भारं तस्यानिरित्यव धारणं तत् कथमिति इत्युच्यते॥ ऋतं स
त्यं जगतः प्रकाशगमनादिरूपं पिपर्ति पूरयति अनृतं तद्विलक्षणान्धकारं गमनादिनिरोधं चानितारीत् निरतिनिभृतं यतिनाशयतीत्यर्थः॥ द्वि
गार्गादनुवत्तपंजीवभूपु भूत्वामर्थ्याष्टिति॥ ॥अथ चतुर्थी॥ ॥प्रयंतमित्परिजारं कनीनां पश्याम नोपनिपद्यमानं॥ अनवपृग्णा वितता
वसानं प्रियं मित्रस्य वरुणस्य धाम॥ ॥कनीनां कमनीयानां दीप्तानां कन्यकास्थानीयानां उषसां। कृतेतः कांतिकर्मणइन॥ कृकिकारा इनानिन इतीय॥

भा॰ अ॰ २ आमिक्षयाज्यादयस्तेषां संप्रसारणं तासां आरमादित्यं प्रयंतमित्र॥ गच्छंतं च। परिपश्यामसि च यं परिपश्याम उपनिषद्यमानं क्षणमात्रमप्यविनिर्यादं अ॰ २
४९ तं न पश्यामः॥ एतदुक्तं भवति यतोः सामर्थ्यं पुनः कालं वा विज्ञायते॥ अनवपृग्णा अनवपृग्णानि अनवच्छिन्नानि तानि सानि आच्छादयंतं प्रियं सर्वे
षां प्रियभूतं मित्रस्य वरुणस्य च धाम तेजःस्थानभूतं। यद्वा प्रियं धामेति सर्वं धत्त इति तयोः प्रेमस्थानं यदिदमादित्यं च्छादनं तया संचरंतं न पश्याम
सि॥ ॥अथ पंचमी॥ ॥अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः॥ अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणंतः॥ ॥
सप्तवाहित्यः अनश्वः अश्वरहितोप्यगमनः तथापि अनभीशुः आलंबनाधीनाभिसहस्ररश्मिरहितः तथाप्यर्वा जातः शीघ्रगमन
वान्संपन्नः॥ तथाविधाय मादित्यः॥ कनिक्रदत्। अत्यर्थं क्रंदयन् क्रंदयंन् उद्गतां छलितां धर्त्यां ज्ञानियात्यतेरूर्ध्वसानुः उपर्युपरि समुच्छ्रयणः
सन्नपतयत्गच्छति। अचित्तं चित्ताविषयं॥ ब्रह्म परिवृढं युष्मत्कर्म मित्रावरुणयोरुभयोः धाम तेजःस्थानं युवानः मिश्रयंतः तयोर्धाम्नि अर्ग
पयंतः॥ तथा प्रगृणंतः स्तुवयांतः प्रभवमिति प्रकर्षेण स्तुवंतः जुजुषुः सेवंते मनुष्याः सूर्यस्य निगलं यांति रश्मिसंचारात्मकं कर्म वरुणमित्रयो
रधीनमिति॥ ॥स्तुवंतीत्यर्थः॥ अथ षष्ठी॥ ॥आ धेनवो मामतेयमवंतीर्ब्रह्मप्रियं पीपयन्सस्मिन्नूधन्॥ पित्वो भिक्षेत वयुनानि विद्वानासाविवास
न्नदितिमुरुष्येत्॥ मामतेयं ममतायाः पुत्रं दीर्घतमसं ब्रह्मप्रियं परिवृढस्य कर्मणः प्रियतमं परिवृढस्य अग्नेः प्रीणयितारं अवंतीः अवंत्यः प्रीणयं
त्यः धेनवः गावः सस्मिन्सर्वकार्ये ऊधन् ऊधसि आपीपयन् सर्वतः आप्याययंतु प्याययतेर्णिचि छांदसो पीभावः॥ ऊधोगतेन क्षीरेण युवाभ्यां प्रदेयं
नो मामानं रक्षत्वित्यर्थः॥ मित्रावरुणाभ्यां मा गोभिरभ्यापयन्त्वति श्रुतेः॥ एवं प्रदत्तदृष्टिर्वयुनानि अनुष्ठानविषयज्ञानानि विद्वान् जानन् हुतशे
षान्नं भक्षणीयं इत्येवं गमनं दीर्घतमाः पित्वः पितौ हुतविशिष्टस्यान्नस्य तादर्थ्यं आसा आस्येन भक्षयितुं भिक्षेत याचेत युष्मानं किंच विवासन् युः
वां परिचरन् अदितिं अखंडितं अन्यूनमेतत्कर्म उरुष्येत् यथाविधिं परिरक्षित यथा सकर्म समापनं च शेतं तथापालयं नित्यर्थः॥ मैत्रावरुणपशो
र्वपायाः प्यानुवाक्या मंत्रितं च आ वां मित्रावरुणा हव्यजुष्टिमायातं मित्रावरुणेति॥ ॥अथ सप्तमी॥ ॥आ वां मित्रावरुणा हव्यजुष्टिं नमसा दे
वा ववसा ववृत्यां॥ अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा॥ ॥हे देवौ देवनशीलौ मित्रावरुणौ वां युवां हव्यजुष्टिं हविः सेवानम
स्कारोपलक्षितेन स्तोत्रेण अवसा रक्षणेन निमित्तभूतेन आववृत्यां आवर्तययं यद्वा नमस्कारेण अवसा अन्नेन च आववृत्यां॥ किंच हे मित्रावरुणौ
अस्मासंबंधि ब्रह्म इदानीं क्रियमाणं परिवृढं कर्म एतन्नासु संग्रामेषु सह्यात् शत्रूनभिभूयात् अनेन कर्मणा शत्रूनभिभवेयमित्यर्थः॥ किंच
दिव्या अस्माकं वृष्टिः नभोवारविः सुपारा सुपारमिवा भवतीति शेषः॥ दृष्टिस्त्वांत्री। स्यादिद्धा कर्मसमाप्तेरिति भावः॥ ॥इति द्वितीयस्य द्वितीये द्वावि
ंशो वर्गः॥ ॥यजामहे वामिति चतुर्ऋचं चतुर्दशं सूक्तं॥ दीर्घतमसं त्रैष्टुभं मित्रावरुणं यजामहे चतुष्कमित्यनुक्रमणिका॥ विनियोगो लैंगिकः॥
तत्र प्रथमा॥ ॥यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः॥ घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरंति॥ हे घृतस्नू घृ
तस्य स्नावयितारौ मित्रावरुणौ महः महांतौ वां युवां यजामहे पूजयामः यजमानाः कुत्विजश्च॥ कीदृशाः सजोषाः समानप्रीतियुक्ताः केन साधनेने
ति तदुच्यते॥ हव्येभिः पुरोडाशादिभिः नमोभिर्नमस्कारैः घृतैः अध अपि च यद्यस्मात् कारणात् वां युवां अध्वर्यवः अस्मदीया अध्व ४९
र्यवोपि भजनशीलाः अध्वर्यवः तद्विधातिभिः स्वकीयैः कर्मभिः भरंति पोषयंति तस्माद्यजामहे॥ ॥अथ द्वितीया॥ ॥प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रा

वरुणा सुवृक्तिः॥ अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणाविवक्षन्॥ ॥हे मित्रावरुणौ वां युवयोः संबंधिनी यागस्य प्रस्तुतिः प्रस्तावना क 85
ामितिसंकल्पः एवं प्रयुक्तिः कृत्स्नयागानसंपन्नः ताव तव युवयोः धामतेजःस्थानं अयामि प्राप्नोमि सुवृक्तिः युवयोः शोभनवर्जकः स्तुत्यपाप्मा परि 1914
पाहा द्योमिपयन् यदानुविदथेषु यज्ञेषु यां युवां होता होमनिष्पादकः अयमध्वर्युः अनक्ति हविषा गमयति सामं करोतीत्यर्थः यद्वा होता देवानां
मत्रे तादृशनामकर्त्विक् शंस्यादिना वा अनक्ति यजत्येति तदा सूरिः युष्मन्महात्म्यविज्ञ उपलक्ष्यागं कर्तुमिच्छन् हे वृषणौ कामानां वर्षितारौ
वां युवयोः सुम्नं युष्मत्संबंधिकं सुखं इच्छन्नक्षणं अयामीति द्वयोरपि॥ ॥अथ तृतीया॥ ॥पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हवि
र्दे॥ हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता॥ ॥हे मित्रावरुणौ मित्रावरुणौ ऋताय यज्ञसंबंधिजनाय हविर्दे हविषां दात्रे अ
नामन्त्रितिविचंभर्ते अधनाधातारि याकारलोपः जनाय यजमानाय च धेनुः प्रीणयित्री गौः अदितिः अदीना बहुक्षीरा सती पीपाय क्षी
रेण पुनः पुनः आप्यायती प्यायतेश्छांदसः प्रार्थनायां लिट् शब्दश्छांदसो दीर्घाभावः यस्मादिदं हविर्युक्तं पयोप्रयात्राद्यैः यजमानश्चेत्यर्थः॥ क
स्मिन्काल इति चेत् तत्राह यत् यस्मिन् प्रसिद्धे रातहव्यः एतैर्नामसत्रायाससर्पयन्सः रात्यापृष्ठायन मानुषो होता न मनुष्यस्य यजमानस्य संबंधी
तं नाम कर्त्विक् निरूपिता तदिव यज्ञेषु अग्निहोत्रादिहविर्दानिना प्रीणयितितदापीप्याय॥ ॥अथ चतुर्थी॥ ॥उत वां विक्षु मद्यास्वंधो गाव आपश्च पी
पयंत देवीः॥ उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः॥ उत अपि च हे मित्रावरुणौ वां युवां अंधः अदनीयं चान्नं पयोरूपं
पुरोडाशादिरूपं वा यो नन्दगो गावः आपश्च देव्यः स्यादिप्रवर्धकान्युदकानि च मघाम युष्माभिर्मदनीयासु विक्षु प्रजासु यजमानलक्षणा
सु तासामभिवृत्त्यर्थं पीपयंत आप्याययंतु उतो अपि च नोस्माकं संबंधिनोस्य यजनस्य पूर्व्यः पूर्वकालीनः पतिः पालकोग्निः दन् दाता भवति
तिशेषः अग्नौ हूयमानत्वात् सर्वेषामपि हविषां यस्मादेवं तस्मात्॥ हे मित्रावरुणौ भक्षयतं पुरोडाशादिकं तथा उस्रियायाः शृतिदुग्धाविष
ष्यागोः पयसः पयः य इयं नाभिजनपयस्या वीतं भक्षयतं पातं॥ ॥इति द्वितीयस्य द्वितीये त्रयोविंशो वर्गः॥ ॥विष्णोर्नु कमिति षळृचं पंच
दशं सूक्तं दीर्घतमसं त्रैष्टुभं वैष्णवं॥ अत्रानुक्रमणिका॥ विष्णोः षड् द्वृम्यं दीति अभिप्लवषडहे पृष्ठ्ये पञ्चतृतीयसवने सामसधान छावाक
स्य स्तोमातिशंसनार्थं उक्तमादित्यमतः इयं विनियुक्तं स्तोमं च ध्यमान इति सूत्रितं॥ विष्णोर्नु कमिति सूक्तं परमात्रस्यास्य च्छावाक इति
था तृतीयसवने सोमातिरेके उत्तरसंस्थापगं लक्ष्यः अतिरात्रात् तता व्याताः तत इत्यर्थं मेधशस्त्रमुपतः न यत्स्वयं तत्रेत एवसत्कं सा माति
रेक इति इत्यं दर्शितं॥ महाः इद्राव दृष्टोर्विष्णोर्नु कमिति अग्निमारुतशस्त्रे अप्याविनियुक्ता अयमये तमिति खंडे सूत्रितं विष्णोर्नु कं वीर्या
णि प्र वोचं तं तन्वन्त्र जसो भानुमन्विहीति॥ ॥तत्र प्रथमा॥ ॥विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि॥ यो अस्कभायदुत्त
रं सधस्थं विचक्रमाणस्त्रेधोरुगायः॥ विष्णोर्नु कमिति पदद्वयं तत्राप्याया लं तन वा तरणि पञ्चान्युक्तानाश्चान्तरे उक्ततेन पाताञ्च नु उ
क्तमिति वार्यं नु कमिति पदद्वयं। कानि तानीति तत्राह यो विष्णुः पार्थिवानि रजांसि विममे विशेषेण निर्ममे॥ अत्र च यास्कोपि पृथि
वीजाकवाच्यः तथा च मंत्रांतरे। यदिद् मग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थ इति। तां तरीयपियास्यां पृथिव्यां अस्या उ
पेन्क्षपर्यस्या द्युत्या परस्यां पृथिव्या मितिा तस्मा एको कत्र यस्य पृथिवीजास्त्वा वाच्यते। किंच यश्चां विष्णुरुत्तरं उत्तरं अतिवृक्षोर्ण सधस्थं स

श्री·अ·२ इत्थानंतरं कृत्रयाथ यथभूतं अंतरिक्षं अस्कभायत तेषामाधारत्वेन स्तंभितवान् निर्मितवान् इत्यर्थः॥ अनेनांतरिक्षाश्रितं लोकत्रयमपि सूचित अ·२
४२ मिति युक्तं। भवति यद्वा यो विष्णुः पार्थिवानि पृथिवी संबंधीनि रजांसि पृथिव्या अधस्तन सप्तलोकान् अतलवितलादीन् विममे विविधं निर्मितवान् रजः शब्दो लोकवा
ची लोकाद्रजांस्युच्यंत इति यास्कोक्तेः। तान् किंच यश्च उत्तरं उद्धृतरं इतरं भाविनं सधस्थं सह तिष्ठंत्यस्मिन्निति सधस्थं स्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकस
मष्टिं अस्कभायत स्तंभितवान् स एवमानित्यर्थः॥ कथंभूतः त्रेधा विचक्रमाणः त्रिविक्रमावतारे त्रेधा विशायत्रपातित्वस्य येन शायनादेशः॥ अथवा पा
र्थिवानि निश्चितानि निमित्तकानि रजांसि लोकान् विममे भूरादिलोकत्रयमित्यर्थः॥ भूम्यामुपाजितं कर्म भोगार्थत्वादितर लोकानां तत्कारण
त्वं। किंच यश्चांतरं उत्तरं सर्वेषां लोकानामुपरिभूतं अपुनरावृत्तेस्त स्थानं सधस्थं उपासकानां सहस्थानं सप्तलोकं अस्कभायत स्तं
भितवान् ध्रुवं स्थापितवानित्यर्थः॥ किं कुर्वन् त्रेधा विचक्रमाणः त्रिप्रकारं स्वरस्थान लोकान् विविधं क्रममाणः विक्रमोर्थ ख्यानि स्वधात्क्रमेण
इदं विष्णुर्विचक्रमे इत्यादिश्रुतिषु प्रसिद्धं अतएवोरुगायः उरुभिर्महात्मभिर्गीयमानः अतिप्रभूतं गीयमानो वा य एवं कृतवान् तादृशः
स्य विष्णोर्वीरकर्माणि कथयन् वक्ता वीर्याणि प्रवोचं। तस्यैव सवने सोमातिरेक एकं उक्थ्यमुपनन्नक्षिप्यंत तत्र नतद्विष्ण्य मनुरतस्तव
मामाति रेक इति वैष्णव्या त्रिचं प्रतद्विष्णुस्तवते वीर्येणेति लाप्रियानुरूपाविति विज्ञापये य नाधिपत्यकाम इति स्वंड सूचितं॥ प्रतत्तेअद्यशि
पिविष्ट नाम प्रतद्विष्णुरिति॥ ॥अथद्वितीया॥ ॥प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षि
यंति भुवनानि विश्वा॥ यस्येति वक्ष्यमाणत्वात्स इति अवगम्यते॥ समहानुभावो वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तुवते स्तू
यते सर्वैः कर्माणि व्यत्ययेन तत्पर्ववीर्येण स्तूयमानत्वे दृष्टांतः॥ मृगो न सिंहादिरिव यथा स्वविरोधिनो मृगयिता सिंहो भीमो भीतिजनकः कु
चरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगंता गिरिष्ठाः॥ पर्वताग्रेषु नन्प्रस्थायी सर्वैः स्तूयते अस्मिन्नर्थे निरुक्तं मृगो न भीमः कुचरो गि
रिष्ठाः मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्मादपि भीष्मोप्येतस्मादेव कुचर इति चरति कर्म कुत्सितमथ चेद्देवता
भिधानं क्वायं न चरतीति गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान्पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा तिनि इदमप
मपि मृगः अन्वेष्टा शत्रूणां भीमः भयानकः सर्वेषां भीत्यापादनभूतः परमेश्वराद्भीति भीषास्माद्वातः पवत इत्यादिश्रुतिषु प्रसिद्धो विष्णु
च कुचरः शत्रुवधादिकुत्सित कर्मकर्ता त्रिषु सर्वासु भूमिषु लोकत्रयेषु संचारी वा तथा गिरिष्ठाः गिरिवदुच्छ्रितलोकस्थायीय इत्यादिश्रु
त्यादिरूपायां वाचि सर्वदा वर्तमानाः ईदृशो यं स्वमहिम्ना स्तूयते किंच यस्य विष्णोरुरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमेषु पादप्रक्षेपेषु
विश्वानि सर्वाणि भुवनानि भूतजातानि अधिक्षियंति आश्रित्य निवसंति स विष्णुः स्तूयते॥ ॥अथतृतीया॥ ॥प्रविष्णवे शूषमेतु
मन्म गिरिक्षित उरुगायाय वृष्णे॥ य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः॥ विष्णवे सर्वव्यापकाय शूषं अस्मत्कृत्यादि ४२.
त्यं बलम् स्तोत्रं मननं स्तोत्रं मननीयं शूषं बलं वा विष्णवे तु प्राप्नोतु। कर्मणः संप्रदानत्वाच्चतुर्थी। कीदृशाय गिरिक्षित वाचि
गिरिवदुच्छ्रितप्रदेशे वा तिष्ठते॥ उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे वा मानां एवं महानुभावं शूषं प्राप्नोतु॥ कोस्य विशे
षः इत्युच्यते यो विष्णुरिदं प्रसिद्धं दृश्यमानं दीर्घं अतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयं एक एव अद्वितीयः

मनन्निभिः पदेभिः पादैर्विममे सविक्रमेण निर्मितवान्॥ ॥अथचतुर्थी॥ ॥यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदंति॥ य उ त्रिधातु 87
पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा॥ यस्य विष्णोः मधुना मधुरेणामृतेन नामतेन पूर्णा पूर्णानि त्रीणि त्रिसंख्याकानि पदानि अक्षीयमाणा 1914
ण्यक्षीयमाणानि स्वधया अन्नेन मदंति मादयंति तर्पयंति जनानेव॥ य उ एव पृथिवीं ब्रह्मांडांतर्भूमिं द्यामुत द्युलोकमपि अंतरिक्षं च विश्वा भु
वनानि सर्वाणि चतुर्दश लोकान् दाधार धृतवानिति। अतलवितलादि सप्त भुवनानि भूरादीनि सप्त एवं चतुर्दश भुवनानि
दिसप्त भुवनानि एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि त्रिधातु त्रयाणां धातूनां समाहारस्त्रिधातु पृथिव्यप्तेजो
रूप धातुत्रयविशिष्टं यथा भवति तथा दाधार धृतवान् तत्सर्वं नामैव स्थापयतीत्यर्थः। इत्यादिश्रुतिस्वादिक्षिप्तं तेनैतत्सर्वं
तदेव मस्तु ततं आपः शांति भवतु परमहिमाति दिव्यलोकस्थानां प्रियं निरुक्तं ...
दिना। य इति धातुमतिशयं कर्माणि गुणत्रयं वा धारयत्यन्वयः। आतिथ्यायां तद्दस्य यथा प्रधानस्य यात्रा अथाति थ्यति लेद्र सूचितं। इदं
विष्णुर्विचक्रमे त्रेधाप्यमभिपाथो अश्यामिति॥ ॥सप्तपंचमी॥ ॥तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदंति॥ उरुक्रमस्य
स हि बंधुरित्था विष्णोः पदे परमे मध्व उत्सः॥ अस्य महतो विष्णोः प्रियं प्रियभूतं तं सर्वैः सेव्यत्वेन प्रसिद्धं पाथः अंतरिक्षं नाम तत्। पाथोंतरि
क्षं पथा व्याख्यातं इति यास्कोक्तेः। अभिनश्यं ब्रह्मलोकं इत्यर्थः। अश्यां व्याप्नुयां। तदेव विशिष्यते। यत्र स्थाने देवयवः देवं द्योतनस्वभा
वं विष्णुमात्मन इच्छंतः यत्र नरा नारिभिः प्राप्नुमिच्छंतो नरः मदंति मदंति तृप्तिमनुभवंति स्थानं तदश्यामित्यन्वयः। पुनरपि तदेव विशिष्यते।
उरुक्रमस्य अत्यधिकं सर्वं जगत् क्रममाणस्य तत्तादृशस्य तत्र विष्णोः व्यापकस्य परमेश्वरस्य सा यार्था जाति गति सत्यपि परमपदं
पृथिवीतिरायवं वदंत स्वात्मकं पदं स्थानं अमृतस्य इत्यादिः वर्ते तत्स्थानं मध्वः मधुरस्य उत्सः निष्यंदो वर्तते॥ तदेश्या यत्र श्रुत मृत्यु जरा
मरण पुनरावृत्यादि भयं नास्ति सकृत्या तासूतनुत्यादि भोगाः प्राप्यते तादृशमित्यर्थः। तत्राधिकं नास्तीत्याह। इत्थाइत्थं इत्थं कर्मकारण
तद्धि बंधुः स खलु सर्वेषां कर्मणां। पद्धतिं नादधतं भूतं दितकारी वा तस्य पदं प्राप्य तत्र पुनरावृत्तिं च पुनरावर्तंते इतिश्रुतेः स्पष्टं
धुर्वादिशब्दः तत्र तत्र श्रुतिस्मृतिपुराणादि प्रसिद्धि स्थानं नार्थः॥ ॥अथषष्ठी॥ ॥ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः॥
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि॥ हे पत्नी यजमानौ वां युष्मदर्थं तरणत्वेन प्रसिद्धानि वास्तूनि सकलनिवासयोग्या
नि स्थानानि गमध्यै वां युवयोर्गमनाय उश्मसि काम यामहे तन्नर्थं। विष्णुं प्रार्थयाम इत्यर्थः स्थानानीत्यत्र कानीत्याह। यत्र यस्मिन्स्थाने
गावो रश्मयो भूरिशृंगाः अत्यंतोन्नत्यः पताः बहुभिराश्रयणीयाः आ अयासः अनायासेन गंतारः अतिविस्तृताः एतादृशाः
तप्रकाशयुक्ता इत्यर्थः॥ अत्राह अत्र खलु तत्स्थाने भूलोक इत्यादि यस्य बहुभिर्महात्मभिर्गीतव्यस्य स्तुत्यस्य वृष्णः कामानां वर्ष
तुः विष्णोः तादृशं सर्वत्र पुराणादिषु जातव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अति प्रभूतं अवभाति स्वमहिम्ना स्फुरति
। अयं मंत्रो यास्केन गाडार्भाद्रसिवा वनुदितयो वहत ... नव्याख्यातः। तानि वां वास्तूनि कामयामहे। गमनाय यत्र गावो भूरिशृंगा बहु
शृंगा भूरिति बहुनो नामधेयं शृंगं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा यासाय

भा० अ०२ नास्ववंतदुत्तायस्यविष्णोर्महागतेः परमं पदं परार्ध्यरूपमवभातिभूरिपादः प्रपतेरिति॥ ॥इतिद्वितीयस्यद्वितीयेचतुर्विंशोवर्गः॥ ॥प्रवःपांतमिति अ०२
षडृचंपंचदशंसूक्तं। दैर्घतमसंजागतंवैष्णवंचसप्तम्यादीन्यवत्वाद्वैष्णवं आद्यस्तृचः ऐंद्रविष्णवःअ। प्रवोजागतं। तं त्वं इत्यादयस्तृचः इत्यनुक्रमणिकाअः
४३ भिप्लविके षष्ठेह्नि पृष्ठ्याभावात्तुरीयस्य प्रतिपद्विनियोगः॥ ॥तत्रप्रथमा॥ ॥प्रवःपांतमंधसोधियायतेमहेशूरायविष्णवेचार्चत॥ यासानुनिपर्वता
नामदाभ्यामहस्तस्थतुरर्वतेवसाधुना॥ ॥हेअध्वर्यवः वायुष्माकंसंबंधिनां पांतं पालनस्वभावं पातव्यं वाअंधसः सोमलक्षणस्यान्नस्यभागंचर्चत
व। पर्वणसंपादयत कं। महेधियायते स्तोत्रमिच्छतेमहेमहते शूरायविक्रांतायेंद्रायविष्णवेव्यापकायएतन्नामकायदेवाय॥ कुतस्तयोरतिशयइत्यु
च्यते। यायोइंद्राविष्णूपर्वतानां प्रीणनवतां पूरणीयानां वा॥ पर्वतइति मेघनाम। तेनान्निरुक्तः पर्वतान पर्वतः पर्वपुनःपृणातेः प्रीणातेर्वेतिउक्तेरेष
णानांकामानांसानुनिसमुच्छ्रितप्रदेशमसंबंधसाधक इत्यर्थः॥अथवामेघानांसमुच्छ्रितप्रदेशपर्वतइत्यागमेघनामसमत्वात॥ तत्रतःस्तुतःनिश्च
तः कदाचिदप्यदाभ्याभ्यां भयंअभिनियोपरैरनभिभाव्यौ॥ अतएवमहःमहांतौ। यद्वामहोमहत्सिस्वतेजसा सानुनीत्यनेन संबंधस्तत्रदृष्टांतः॥
साधुनाअभिमतदेशप्रापणसमर्थेन अर्वताचेगवता अश्वमिवतेनयथा अश्वकुप्तप्रदेशमारोहतितद्वदुच्चंप्रदेशमारुरोहतस्मात्ताभ्यामर्चत॥
सोमतिरवतस्तीयशवनएषांचकल्पिका याज्यानथास्यसप्तितं॥ विपाश्विधासमरणंधिमीवतोरितिवाज्यास्याति॥ ॥अथद्वितीया॥ ॥त्वेष
मित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावामुरुष्यति॥ यामर्त्यायप्रतिधीयमानमित्कृशा
नोरस्तुरसनामुरुष्यथः॥ ॥हेइंद्राविष्णूशिमीवतोः इत्थं इत्थं इत्थं कर्मवतोः युवयोः इत्थंत्वेषं प्रदीप्तं समरणं सम्यक्सामागमनं
सुतपाः इतिप्रसिद्धोयजमानः उरुष्यति रक्षति॥ यदुक्षितिमर्वतोः प्रहरणादिकर्मवतोःयुवयोःत्वंदीप्तंशीघ्रपतंस
मरणंसम्यकप्रसरणंतोत्रपूर्वं प्रदानायमेधाविरारणरूपंयतमानः उरुष्यतिरक्षतिस्तौतीत्यर्थः॥ कुतस्तयोरतिशयइतिउच्यतेयायोइं
द्राविष्णूमर्त्यायमनुष्याय हविर्दातेयजमानाप्रतिधीयमानमितिप्रतिधानसंघकरूपं असनां असनंचलनशीलंप्रज्ञानशीलमंगादीकंअ
स्तःअभिमतश्चासुःनिरमितुर्यानिशत्रूणां। तौरुशानोरग्नेः सकाशात् उरुष्यथः अविच्छेदेनप्रवर्तयथः। वन्हौहुतहविःसीकृत्यतन्मुखात्स्वप
कमपी इत्यथ इत्यर्थः॥ ॥अथतृतीया॥ ॥ताईंवर्धंतिमह्यस्यपौंस्यंनिमातरानयतिरेतसेभुजे।दधातिपुत्रोवरंपरंपितुर्नामतृतीयमधि
रोचनेदिवः॥ ताःसोमरूपाःप्रसिद्धाआहुतयोयजमानैर्हुताः ईंएतमग्निंअस्यइंद्रस्य महिमहत्पौंस्यंपुंसःकर्मवद्वीर्यमाण्डरूपंबलंवर्धयंति
वर्धयंतिउभित्यनर्थकोवासंबंधः सोमपानेनजनितंसामर्थ्यंमातरा द्यावापृथिव्यावानिनयतिमिलनंप्रापयतिकिमर्थंरेतसेप्राणिनांपुत्रायुत्पा
दनसामर्थ्याय भुजेतेषांभोगाय रक्षणाय वा॥ कुत्रेतितदुच्यते दिवोद्योतमानस्यादित्यस्य अधिअधिकं रोचनेरोचमानेमंडलेनामनमन
यावापृथिव्योःसंरक्षापितृतिंगसामर्थ्यं पुत्रःपुरुत्राता सर्वेजनाः पितुःपालकाद्विष्णोरनुग्रहात्यद्दापितुःस्वोत्पादकस्यवयमुत्पन्नंसत अव
रंनिकृष्टंनामपौत्रसंततंपरंतत उत्कृष्टंपुत्रइतिनामतदुभयापेक्षयातृतीयंपित्रेतिपौत्रसंज्ञंपुत्रसंज्ञंपितारसंज्ञंनामानिवदेवेवदधाति। लोकेपु ४३
त्रस्यनामानामपितानाइतिसमाख्यंदाहरंकुर्वंतिसोस्यादेनामदधातिधारयंतितनामत्रीणिवावेरतोतिपितापुत्रः पौत्र इतिश्रुतेः अस्या
म
यमर्थः॥

अग्नौहुताः सोमाहुतयः आदित्यमंडलंप्राप्यद्वादशात्मनः सवितुर्मर्त्यंतरविंद्राविष्णू। ताः पोषयंतितृप्तानामेघद्वाराववर्षतस्तयावृष्ट्यासस्यादिद्वा 89
रा प्रजाः पुत्रपौत्रादिरूपेणवर्धयतइत्ययंमहानुभावोविष्णोरिति॥ ॥अथचतुर्थी॥ ॥तत्तदिदस्यपौंस्यंगृणीमसीनस्यत्रातुरवृकस्यमीळ्हुषः 1914
॥ यःपार्थिवानित्रिभिरिद्विगामभिरुरुक्रमिष्टोरुगायायजीवसे॥ अस्यमहानुभावस्यतत्तत्पौंस्यंपुंस्त्वंपराक्रमातिशयंगृणीमसिगृणीमः॥
स्तुमः कीदृशस्यास्यइनस्यसर्वस्यस्वामिनः त्रातुःपालकस्य अवृकस्यवृकाहिंसकः इत्याहिंसइतिस्यमीळ्हुषः सेक्तुःनियतरणस्यरक्षस्य
पुषराह्नमपुमध्यमेकमुरुक्रमइति यो विष्णुः पार्थिवानि पृथिव्याः हानिप्रथनयंति वासमर्थ्यातरजांसीतिगम्यतेलोकत्रयस्यापिपार्थिवोश
ब्दवाच्यत्वं पूर्वमुदाहृतं॥ तानित्रिभिरिद्विगामभिःत्रिभिरवविविधगमनैःउरुविस्तीर्णं यथाभवतितथा। क्रमिष्टक्रांतवानक्रमइत्यर्थः। उरुगा
यायउरुगातव्यायजीवसेलोकत्रयरक्षणाय च॥ उरुगायायषष्ठ्यर्थेचतुर्थीउरुगायस्यविस्तीर्णं दृशंपराक्रमंगृणीमसि। किमर्थं जीवसेजी
वनाय रक्षणाय॥ ॥अथपंचमी॥ ॥ द्वेइदस्यक्रमणेस्वर्दृशोभिख्यायमर्त्योभुरण्यति॥ तृतीयमस्यनकिराद धर्षतिवयश्चनपतयंतःप
तत्रिणः॥ अस्यस्वर्दृशःस्वर्गस्यसर्वस्यवाद्रष्टुर्विष्णोः द्वेइतक्रमणेइत्येवपदेमर्त्योमनुष्यः अभिख्यायसर्वेभत्याद्दिनाप्रख्यायभुरण्य
तिगच्छतिभरतेर्भुरण्यतिः कंडूदिर्गतिकर्मा भुरण्यतिगच्छतिकर्मणापाकानि। प्रसिद्धत्वाद्भूलोकंगत्वा गमनादंतरिक्षंचलोकमेकंक्रमण
ज्ञानाति अस्यविष्णोस्तृतीयंक्रमणं द्युलोकाख्यंकोपिमर्त्यो नकिरादधर्षतिबुध्यानाभिभवति ज्ञातुंनशक्नोतीत्यर्थः॥ नकेवलंमनुष्याएव॥
अपितुवयश्चनवेनागमरतापिवाद्युशालपतयंतःसर्वत्रगमनंसामर्थ्याः तथापतत्रिणःपतनशीलाःगरुडादयोवायवोवानविज्ञास्य
षतिनरक्षानुवंतिध्रुवलंस्यप्रागमः विष्णुलोकस्य सत्यलोकस्यात्यंतविप्रकृष्टत्वेनसर्वेषामविषयत्वादितिभावः॥ ॥अथषष्ठी॥ ॥
चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनवृत्तंव्यतींरवीविपत्॥ बृहच्छरीरोविमिमानऋक्वभिर्युवाकुमारःप्रत्येत्याहवं॥ ॥अयमादित्यात्माविष्णु
श्चतुर्भिःसाकंसहितांनवतिंचचतुर्नवतिमित्यर्थः॥ एतत्संख्याकान्कालावयवान्नामभिःसंवत्सरायनमत्स्वरैःप्ररणविशेषैःतंयथाभव
तितथाव्यतीन्विविधानतनत्वभावानवृत्तंवर्तनवत्परिपतंचक्रमिवतंयथाधारपरिक्षेपणायत्रामयतितद्वत्संख्याकान्कालाव
यवान्। अवीविपतकंपयतिभ्रामयतिद्वेयवृत्तंवृत्तं॥ व्यंतरःप्रभृतिचाद्वितयंकपुनःस्तद्व्यंतरसंवत्सरएकः अयनेद्वेपंचर्तवःद्वाद
शमासाश्चतुर्विंशत्यर्धमासाः॥ त्रिंशदहान्यष्टौयामाः एकस्मिन्दिनेपर्यायमानानांमेषादीनिद्वादशलग्नानीतिमिलित्वाच
तुरधिकनवतिसंख्यानअवीविपत् ननुआदित्यः स्वयमपिइतरवत्परिभ्रमतिकथमन्यान्भ्रामयंतीत्युच्यते।नैषदोषः एतेषांभ्राम
कत्वस्यभ्रमवत्यपिस्मार्यंतरत्वात्॥ अथवास्यभ्रमणत्वादितरेषांपरिभ्रमणस्य॥ अतःस्वयंभ्रामयतीत्युच्यते॥ एवंकालात्मका
पिविष्णुर्बृहच्छरीरःविराडात्मनासर्वेद्वयमनुष्यादिशरीराणांस्वशरीरत्वात॥ बृहच्छरीरत्वमेवोपपादयतिविमिमानःविविधमात्मानं
मिमानःदेवतिर्यगात्मनाविभज्यरक्षापयत॥ यद्वाथऋक्वभिःस्तुतिमद्भिर्मैववद्भिर्वाविमिमानःयद्यपिविभुस्तथापिभक्त्याधीन
त्वात्तत्परिमितयुवासर्वत्रमिश्रणशीलःनित्यतरुणोवा॥ अतएवाकुमारः अनल्पःएवंभूतोमहाविष्णुराहवमाह्वानंप्रतिएति
गच्छतिप्रदेशं॥ ॥इतिद्वितीयस्यद्वितीयेपंचविंशोवर्गः॥ ॥भवामित्रइतिपंचर्चंसप्तदशंसूक्तं। दैर्घतमसंजागतंविष्णुकत्वादिद

भा॰अ॰२ यविज्ञातं। येन्मवं द्दीन्वनृताद्दृहं समवं भवपं चेत्यनुक्रांतं। इकृथेतृतीयसवनेअछावाकशस्त्रे एतत्सूक्तंविनियुक्तं। उक्थ्येतु होत्रकाणामितिः अ॰२
५५ खंडे सूत्रितं भवामित्रः संस्तांकृमंणीति। साम्यचरोरनयवाज्या दूतेनयज्ञ्यंनत्वा पारितनघृतयागेइरविष्णाविंतिः मस्येतिप्राकृतीघृतया
ज्यानृशमहनितुतस्यस्थाने भवामित्रइत्येषा प्रयाज्या। इशम भूर्तीतिसंस्थाक्तं। इरविष्णाविक्रमस्वेति घृतयोः स्याद्द्वाननवामित्र
इति॥ ॥सैषाप्रथमा॥ ॥भवामित्रोनशेव्योघृतासुतिर्विभूतद्युम्नएवयाउसप्रथाः॥ अधातेविष्णोविदुषाचिदर्ध्यः स्तोमोयज्ञश्चराध्योहवि
ष्मता॥ हेविष्णोमित्रोनमितंइवत्वाहातासराआदित्योयामित्रः प्रमीतेस्त्रायतइतितिरुक्तंतद्वत्सत्यःसाधुः मस्वकर्ताघृतमुत्तुरंमासयतं॥ आ
भिमुख्यनंनीयतेयनयसताइराःयद्वाघृतयाल्यमाभिमुख्येननीयतेयस्मैसताइराः विभूतकाम्नः प्रभूतयशाः प्रभूततावाएवयाः रक्षण
दीदृशा भवसि अथास्मात्केतवस्तोमःस्तोत्रविशेषःविदुषात्वमाहात्म्यवदिता यज्ञमाननभर्ध्यः पुनःपुनः प्रवर्धमानाहैः एवकार करणे
ना नसंपूर्यतइत्यर्थः। तथातयज्ञश्चहविष्मतेनयज्ञमाननराध्यःसमाराधनीयः यद्वाविदुषाहोत्रास्तोमाराध्यः हविष्मतायज्ञश्वराध्यः॥ ॥
अथद्वितीया॥ ॥यःपूर्व्यायवेधसेनवीयसेसुमज्जानयेविष्णवेददाशति। योजातमस्यमहतोमहिब्रवत्सेदुश्रवोभिर्युज्यंचिदभ्यसत्॥
॥ यो मर्त्यः पूर्व्यायपूर्वकालायनित्यायेत्यर्थः। वेधसेविविधजगन्निर्माणवीयसेनित्यनूतनाय अत्यंतरमणीयायेत्यर्थः। स्तुत्यायवा
सुमज्जानयेस्वयमेवात्मनायज्जनेरणादिरू उणसुमत्नयामित्यर्थःइतियास्कः। यद्वासुतरांमादयतीतिसुमत्ताद्वाजायायस्यसतथा
ज्ञाः। तस्मैसर्वजगन्मादनश्रीलक्ष्मीपतयइत्यर्थः। वद्दर्थोलिंगात्याव्यत्ययः दिशः समासांतःकवित्याद्यः इनगुणकायविष्णवेयाप
हायवदाशतिहविरादिकंददातिकिंचअस्यविष्णोमहतोमहानुभावस्यमहिमहत्पूज्यंजातंजन्मउत्पत्तिर्हिरण्यगर्भादिरूपंजन्मब्रवत्
प्रयात॥ ब्रवीतेर्लेट्यडागमः॥ संवीर्यतेतेत्नोतिसदुइन्श्रवोविशब्दार्थः सोपिदाता स्तोताचश्रवोभिरन्नैः कीर्तिभिर्वायुक्तःसन्। युज्यं
चितसर्वैर्गंतव्यमेवतत्पदं आभिमुख्येनआसमंतगच्छति॥ ॥अथतृतीया॥ ॥तमुस्तोतारःपूर्व्यंयथाविदऋतस्यगर्भंजनुषापिपर्तन
॥ आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहे॥ ॥हेस्तोतारः तमुतमेवविष्णुंपूर्व्यंपूर्वाहैंअनादिसिद्धंऋतस्यगर्भंयज्ञ
स्यगर्भभूतंयज्ञात्मनाउत्पन्नमित्यर्थः। यज्ञोवैविष्णुरितिश्रुतेः। यद्वाऋतस्योदकस्यगर्भंगर्भकारणंउदकोत्पादकमित्यर्थः। अतएवस
मस्तावितिश्रुतेः। एवंभूतंविष्णुंविदजानीयतथाजनुषाजन्मनास्वतएवनकेनचिद्रक्षिताभाहिनापिपर्तनस्तोत्रादिनाप्रीणयत। यावद
स्यमाहात्म्यंजानीयत। तावदित्यर्थः। विद्दर्हिमध्यमबहुवचनंविदक्षतस्यस्यसंहितायाम्। अन्यकइतिप्रकृतिभावः॥ किंच अस्यमहानुभा
वस्यविष्णोर्नामचित्सर्वैर्नमनीयमर्वैः श्रव्यंभूतः सन्नामिधानंसर्वात्म्यप्रतिपादकंविष्णुरित्येतंनामजानंतःपुरस्तार्थप्रश्ममित्यधिगछं
तोताअवबोधनसर्वदा। उपसर्गाणांअनेकार्थत्वात्। अयमंगातविवक्तनविब्रूतएवंप्रकाशनसंकीर्तयतएवंनामयज्ञात्मनानमनंविष्णुरेवः ५५
सर्वेषांस्वर्गापवर्गसाधनायइत्याख्यातनाद्रव्यर्द्रवताअनामावरिणाममहाजानंतायसंविवक्तनब्रूतसतावचर्तेर्हिछांदसःशपःश्लुः॥

बहुलंछंदसीत्यभ्यासेत्वं। पूर्ववत्तनादेशः॥ इदानींसाध्वसात्स्यादहंहविष्मासर्वात्मकइंद्रयमहोमहुतस्तोतव्यस्पतिंसतृततिंशोभनात्मिकांज्ञानंस 91
पादयामहै अनुभवितंजाताबुद्धिंवाभजामहेसेवामहेवयंयजमानाः॥ अग्नीषोमप्रणयनेतमस्यराजेत्येषाप्रयोज्या। अग्नीषोमौप्रण 1914
यन्त्वितिखंडेसूत्रितं। तमस्यराजावरुणस्तमश्विनेत्यर्धर्चंआरमेदिति॥ ॥सेषाचतुर्थी॥ ॥तमस्यराजावरुणस्तमश्विनाक्रतुंसचंतमारु
तस्यवेधसः॥ दाधारदक्षमुत्तममहर्विदंव्रजंचविष्णुःसखिवाँअपोर्णुते॥ ॥मारुतस्यमरुतांत्रविकांसंघातोमारुतंतेनहुतःमत्वर्थोलुप्य
ते। मरुतांदेवानांसंबंधिनावावेधसःमेधाविनोस्ययजमानस्यतंप्रसिद्धंक्रतुंयागंअश्विनाअश्विनौसचंतसेवंतेअन्येपिदेवाःसचंतसेवंतेकिं
चविष्णुःसवनत्रयात्मनाव्याप्नोत्॥ विष्णुःसखिवान्यजमानादिसखिभिर्युक्तःसन्उत्तमंउत्कृष्टतमंअहर्विदंअहर्वेत्तारंस्वर्गोपासहमि
त्यर्थः। दक्षंबलंफलंप्रदानसामर्थ्यरूपंदाधारधृतवान्। आहुतिद्वारायज्ञस्यबहुस्तुत्यादकृत्वात्। यद्वामारुतस्यमरुत्संघातस्यदेवग
णस्यवेधसःविधातुःगतुर्विष्णोःक्रतुंकर्मपालनादिरूपंवरुणादयःसचंतसेवंतेतदधीनत्वात्पालनस्यसचसखिवानइंद्रमरु
द्भिःसहायोपेतःसन्उत्तमंदक्षंबलंउत्तमस्त्राहादिसामर्थ्यरूपंफलंदाधरततथाव्रजंचापोर्णुतेआच्छादयति॥ ॥अथपंचमी॥ ॥
आयोविवायसचथायदैव्यइंद्रायविष्णुःसुकृतेसुकृत्तरः॥ वेधाअजिन्वत्त्रिषधस्थआर्यमृतस्यभागेयजमानमाभजत्॥ ॥योविष्णुःदैव्यःदिविभ
वःसुकृत्तरःशोभनकृत्तरःअत्यंतशोभनकर्माआविवायआगच्छतिवेत्तेर्लिटिरूपंकिमर्थंसचथायसचनायथागसहायकरणायकस्मैइंद्रायइंद्रवि
रेश्रणांनंदापयतीतीइंद्रियमानः इंइदंइरणतीतिवाइदंकरणादित्यौपमन्यवइत्यनयाभ्यमिर्विवचनमस्यनापिसद्भावात्तस्मादैकरूपायज्ञ
मानायसुकृतेशोभनस्तुतिकर्त्रेआगच्छतेवेधाअभिमतफलविधातात्रिषधस्थःत्रिषुस्थानेषुव्याप्तंआर्ययजमानंअजिन्वत्प्रीणयतिजिवि
प्रीणनार्थः। इदित्वान्नुम्॥ तदर्थंकृतस्ययज्ञस्यभागहुतशेषफलंयजमानंअभजत्भजतिसमीपयतीत्यर्थः। यद्वाकृतस्ययज्ञस्यभा
गफलंयजमानंआभजत्स्वामित्वनस्थापयति॥ ॥इतिद्वितीयस्यद्वितीयेषड्विंशोवर्गः॥ ॥ इतिश्रीमत्सायणाचार्यविरचितेमाधवीयेवेदा
र्थप्रकाशेदशतय्याःप्रथममंडलेएकविंशोनुवाकः॥ ॥द्वाविंशेनुवाकेषोडशसूक्तानितत्राबोध्यग्निरितिप्रथमंसूक्तंषडृचंदीर्घतमसः
आश्विनंपूर्वंत्रजागतंलितुज्यात्रिष्टुभपिजागतंअंत्येद्वेत्रिष्टुभौत्वंइत्यनुक्रांतं॥ अबोध्यग्निर्ज्मइत्यस्यआश्विनिति॥ ॥तत्रप्रथमा॥ ॥
अबोध्यग्निर्ज्मउदेतिसूर्योव्युषाश्चंद्रामह्यावोअर्चिषा॥ आयुक्षातामश्विनायातवेरथंप्रासावीद्देवःसविताजगत्पृथक्॥ अयमग्निर्वेदि
तःसन्ज्मःक्ष्मायाःपृथिव्याःवेदिलक्षणायाःसंबंधीसन्अबोधिप्रतिबोधितःक्ष्मेतिपृथिवीनामसुज्मात्मेतितंनामसुकृत्वातकिंचसूर्यउदे
तिमहीमहतीउषाःअर्चिषाप्रकाशेनतमांसिविदह्मानानामाह्लादयित्रीसतीप्राचःतमांसिविवासयति॥ वसेर्लुङिछांदसश्चुर्दुकुछंदस्यपिदृ
श्यतइत्यडागमः॥ यतइयमुषाःउदेतियतश्चसूर्यःप्रतश्चायमग्निःप्रबोधंभवतिअतःकारणात्हेअश्विनौयुवांसंबंधिनंरथंयातवे
देवयज्ञनंगमनाय॥ रासभायांआयुक्षातांआभिमुख्येनयुंजाथांतथासवितासर्वकर्माणांनुज्ञाताद्देवोजगत्जंगमंप्राणिजातंपृथक्
स्वस्वकर्मानुगत्वंप्रासावीत्प्रसौतुअनुजानातु॥ ॥अथद्वितीया॥ ॥यद्युंजाथेवृषणमश्विनारथंघृतेननोमधुनाक्षत्रमुक्षतं॥ अस्माकंब्र
ह्मपृतनासुजिन्वतंवयंधनाशूरसाताभजेमहि॥ ॥हेअश्विनाअश्विनौयद्यदावृषणवर्षितारंदेवपर्णरथंयुंजाथेयोजयथःतदानःक्षत्रंअ

भा॰ अ॰ २ स्मदीयं बलं क्षत्रियजातं वा घृतेनोदकेन मधुना मधुरेण उक्षतं प्रवर्धयतमित्यर्थः॥ यद्वा घृतेन क्षरणेरकेण मधुना मधुरेण अमृतेन उक्षतं। युष्मद् अ॰ २
यस्तेन मधुना अस्मदीयं बलं प्रवर्धयतमित्यर्थः॥ आश्विनो रथस्य मधुवर्णत्वं मधुवाहनो रथ इत्यादिषु प्रसिद्धं किंच अस्माकं पृतनासु अस्मदी
४०. यासु पुत्रभृत्यादिमनुष्यरूपासु प्रजासु ब्रह्म ब्राह्मणजातिं जिन्वतं पृतना इति मनुष्यनाम विवक्षितं। पृतना इति तन्नाम सत्कृतत्वात्॥ यद्वा पृतनासु परकी
यासु अस्मत्तासां परिग्रहमसु अस्माकं जिन्वतं प्रीणयतं ब्रह्मत्वं नाम ब्रह्म वचश्च इति तन्नाम सत्कृतत्वात्॥ वयं च शूरसातौ शूराः सन्तो शूराणां प्रहरा
दिना युक्ते संग्रामे धनानदीयानि वा हविधानानि भजामहि लभेमहि॥ ॥अथ तृतीया॥ ॥अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोः
यातु सुष्टुतः। त्रिवंधुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे॥ ॥अश्विनो रथः अर्वाङ् अस्मदभिमुखो यातु गच्छतु कीदृशः त्रि
चक्रः चक्रत्रययुक्तः मधुवाहनः॥ मधुवाहो जीराश्वः शीघ्रप्राप्यश्वोपेतः सुष्टुतः अत एव अस्माभिः स्तूयमानः त्रिवंधुरः निम्नोन्नतकाष्ठ
त्रयोपेतः सारथ्याश्रयस्थानं वंधुरं मघवा धनवान् अत एव विश्वसौभगः सर्वसौभाग्योपेतः ईदृशः अश्विनो रथः नोऽस्माकं द्विपदे पुत्रादिप्र
जायै च तुष्पदे पशवे च शं सुखं आवक्षत् आवहतु॥ वहतेर्लेट्यडागमः सिप्॥ ॥अथ चतुर्थी॥ ॥आ न ऊर्जं वहतमश्विना युवं मधुम
त्या नः कशया मिमिक्षतं। प्रायुस्तारिष्टं नीरपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा॥ ॥हे अश्विना अश्विनौ युवं युवां नोऽस्माकं ऊर्जं बलं
बलं प्राणेन समर्थं अन्नमावहतं प्रापयतं। किंच नोऽस्मान् मधुमत्या माधुर्योपेतया कशया वाचा उदकप्रदानरूपया मिमिक्षतं सिंचतं प्रीणयतं
कशेति वाङ्नाम कशा धिषणेति तन्नाम सत्कृतत्वात्॥ यद्वा मधुमत्या मधु यस्यास्ति मत्या माधुर्योपेतया कशया अश्वताडिन्या नोऽस्मान् मिमिक्षतं
मक्षिका इव नाम मधु पूर्णीयमिति तन्नाम सत्कृतत्वात्॥ कशया अश्वता इनं नाम … फलं दास्यत इति कशया मधुमत्या किंच आ
युरायुष्यं प्रतारिष्टं प्रवर्धयतं प्रवृद्धं स्थिरतिवर्धनार्थः॥ तथा रपांसि मक्षतं पापानि निःशेषेण शोधयतं रपो रिप्रमिति पापनामनी भव
तः॥ इति यास्कः॥ किंच द्वेषः द्वेष्यं अभिवाञ्छितं सेधतं नाशयतं॥ इदं च भाव्यं सचाभुवा सह भुवौ अस्मत्कार्येषु सह भवनवंतौ भवतं भवतं
एकमत्यं भजतमित्यर्थः॥ वाचय भे सादति घातः॥ ॥अथ पंचमी॥ ॥युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः॥ युवमग्निं च वृ
षणावपश्च वनस्पतीरश्विनावैरयेथां॥ ॥हे अश्विना अश्विनौ युवं युवां खलु जगतीषु तः॥ गमनशीलासु गोषु गर्भं धत्थः धारय
थः॥ न केवलं गोष्वेव अपितु युवं युवां विश्वेषु सर्वेषु भुवनेषु भूतजातेषु अंतः मध्ये गर्भं धत्थः वृष्टिद्वारा … गर्भं … रसः
पोषकत्वात् किंच हे वृषणौ कामानां वर्षितारौ युवं युवां अग्निं च अपश्च वनस्पतीश्च ऐरयेथां आहुतिभोग्याय … त्वचश्च स्वकार्य…
नि इह करोषधिवनस्पत्यादिकं … अन्यस्मदर्थं प्रेरयेथां॥ ॥अथ षष्ठी॥ ॥युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः॥
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश॥ ॥हे अश्विनौ युवं युवां ह खलु भेषजेभिर्भेषजैरौषधैर्भेषजौषधैर्भेष
ज्यान्यगदौ ता यूयं गद रोगः अगदं तत्र मौषधमिति तत्वाभिधानात्। तैर्भिषजा भिषजौ स्थः॥ अनयोरर्थेन … बंधः॥ युवां ४५
ह्यिवं सविनोषसारथमतायचित्रं … मिष्यतीत्यादि मंत्रांतरे प्रसिद्धा॥ अथो अपि च युवयोः क्षत्रं बलं अधिधत्थ अधिकं खलु ह
न्यूष्टः प्रसिधौ यस्मादेवं तस्मात् हे उग्रा उद्गूर्णसामर्थ्यावश्विनौ यो युवाभ्यां यो हविष्मान् आज्यपुरोडाशादिहविर्युक्तो यजमानः मनसा

युष्मदायत्तेन चेतसा ददाश ददाति हविरादिकं धत्थः धारयथः अत्यधिकमनुगृह्णीथ इत्यर्थः॥ प्रभूतबलौ युवां रथमारुह्य अस्मद्देवयज 93 / 1914
मानमागत्य हविः प्रदत्तां धत्या अस्मद्यज्ञं अस्मान् … मिति तात्पर्यार्थः॥ ॥इति द्वितीयस्य द्वितीये सप्तविंशो वर्गः॥ ॥इति श्री
मद्राजाधिराज परमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋ
क्संहिताभाष्ये द्वितीयाष्टके द्वितीयाध्यायः॥ ॥० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ०॥ श्रीगणेशायनमः॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥अथ द्वितीयाष्टके तृतीयाध्याय आरभ्यते॥ वसू रुद्रे
त्येतदनुवाकापेक्षया द्वितीयं सप्तर्चं दीर्घतमसः सूक्तं आश्विनं त्रिष्टुप्कत्वात् इदमप्याश्विनं॥ अनादेशपरिभाषया त्रिष्टुभं दीर्घतमा माम
तेय इति अंत्यानुष्टुप्॥ तथा चानुक्रांतं॥ वसू सप्तांत्यानुष्टुबिति॥ अस्य विनियोगो लैंगिकः॥ तत्र प्रथमा॥ ॥वसू रुद्रा पुरुमंतू वृधं
ता दशस्यतं नो वृषणावभिष्टौ॥ दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती॥ हे वृषणौ कामानां वर्षितारौ दस्रौ अस्मद्विरोधु
पक्षयितारौ हे अश्विना युवां नोऽस्मभ्यं दशस्यतं दत्तं … कीदृशौ युवां वसू वासयितारौ प्रजानां वसना धनेन … रुद्रा
रुद्रौ रुतद्दुःखं तद् द्रावयितारौ संग्रामे भयंकरं … तौ वा रुद्रौ … इति यास्कः॥ पुरुमंतू बहूनां ज्ञातारौ मनेरौणादिः
कः … ॥ वृधंता वर्धमानौ … अभिष्टौ आभिमुख्येन पूजितौ अभीष्टसाधको वा … गुणप्रसिद्धिद्योतनार्थः॥ किम
र्थं दीयत इति चेत्॥ यद्यस्मात् औचथ्य उचथ्यस्य पुत्रो दीर्घतमाः वां युवयोः रेक्णः धनं … प्रार्थनाय … यद्वा … रेक्णो हविर्ल
क्षणमन्नं वां युवाभ्यां दास्यति … यस्मात् च अकवाभिः अकुत्सिताभिः ऊतीभिः रक्षणैः … तृतीयायाः पूर्वसवर्णदीर्घः प्र स
स्राथे प्रसारयथः प्रकर्षेण पथः तस्मात् दशस्यतं यस्मादभिमतं प्रदेयं स्माभ्यां प्रार्थयते॥ ददाति वा हविः॥ तस्माद्दशस्यतमित्यर्थः॥ ॥अथ
द्वितीया॥ ॥को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः॥ जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरंता॥ हे वसू वासयितारा
वश्विनौ वां युवयोः संबंधिन्यै अस्मै वक्ष्यमाणरूपायै सुमतये चित् शोभनबुद्ध्याचितपूजायामप्यर्थे वा स्वल्पेनैव हविषा महत्फलप्रदानरू
पायै ईदृश्या अपि बुद्धेः प्रीणनाय को दाशत् कोदद्यात् दातुं न शक्नुयात् युवयोः प्रभावस्यातिमहत्वादिति भावः॥ दाशतेर्लेट्यडागमः॥ कथं
महत्वं सा एव मितित दुच्यते॥ यद्यस्मात् कारणात् गोः पदे भूम्याः सर्वगंतव्यायाः स्तव्याया वा … स्थाने यतावता … पृथिव्यावति
रितिश्रुतेः॥ गौरिति भूमिनाम तथा च निरुक्तं गौरिति पृथिव्या नामधेयं यद्दूरंगता भवति यच्चास्यां भूतानि गच्छंति गातेर्वौकारो नामकरण इति॥ ता
दृशे स्थाने अस्माभिः प्रार्थितास्तेन नमसा हविर्लक्षणेन अन्नेन धत्थ धारयथः॥ वसुप्रदानविषयां बुद्धिं … लेङि … कसीति विकरण
स्य लुक् धातोरिस्वत्वं अतादिरिति इत्यादेशः॥ यस्मादेवं तस्मात् अस्मे अस्मभ्यं रेवतीः क्षीरादिधनवतीः पुरंधीः शरीरधारिका नारीरभिव
धिद्वतुर्गाः जिगृतं … गच्छतमित्यर्थः॥ … अभ्यासस्य … च पुनस्तावत् … कामप्रेणेव इव शब्द
एकारार्थः॥ कामप्रकरणेन मनसा सह चरंता चरंतौ यजमानस्य कामाः पूरणीया इति कृतसंकल्पाविवित्यर्थः॥ प्रापूरणे कामं प्रीणातीति काम
प्रः॥ अतो मुपसर्गे कः॥ ॥अथ तृतीया॥ ॥युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः॥ उप वामवः शरणं गमेयं शूरो ना

भा०अ०२ ज्ञापनयद्भिर्देवैः॥ अत्रेतिहासमाहुः। तौग्र्यनामकं राजानं युधि शत्रवः पराभाव्य पाशैर्बद्ध्वा समुद्रमध्ये प्रचिक्षिपुः॥ स चोभरीमुमत्रांतः सन अ०२
अश्विनौ तुष्टाव तौ च तुष्टौ शीघ्रगमे रथमश्वं योजयित्वा समुद्रमागत्य तमुक्तवा अपालयतामिति॥ अयमर्थः॥ अत्रा हे अश्विनौ तौग्र्य इत्या
५६ दिमं तौग्र्याय प्रसिद्धिद्योतनार्थः। स चोदाहृतः। कृ स्मैतौग्र्यायतनाप्त्रेरितं तद्बंधमोचनार्थं कृत्रिमं तदुच्यते॥ अर्णसः अभसो मध्ये सन्वपज्रः
पाजसा बलेन जीर्णः सन धायि धारितः स्थापितः। यस्मादेवं तस्मात्तौ युवयोः अव रक्षणं शरणं उपगमेयं संप्राप्नुयां। इह कुर्वा॥ हिमुक्ता
युष्मत्स्थानं संभजेयं॥ पतितो वीनः पतयद्भिर्वेरश्वैः अरोनभरदु यथा अस्मज्जीवानि भयत्राणात् प्राप्नोतित दुत्॥ ॥ अथ चतुर्थी॥ ॥
उप स्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धां। मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति क्षां॥ अत्राख्यानमाहुः
उतथ्यरितगात्रं तात्यं धं दीर्घतमसं मामतेयं वार्द्धक्ये सितु दासाः नानाः स्वगर्भ दासाः अग्नौ प्रक्षाप्य प्राचिक्षिपुः तत्र क्षिप्तः अश्विनाव स्तावीत
तौ चैनमरक्षतां ततोप्य त्रियमाणमुरः कृत्वस्तुप अपातयन तत्र निमग्नः पुनरश्विनौ तुष्टाव तुष्टौ सं तौ जलोद्धृतस्ट एवमवध्यं तंत्रितनो नामकः क
श्चिद्दासोऽस्य शिरोवक्षश्चाविनक्षत॥ ततोप्यपालतामिति तदिदं कृद्धयाभ्यामुच्यते। हे अश्विनौ उप स्तुतिः युवां बुध्या उपेत्य क्रियमाणास्तु
तिः। औचथ्यं उचथस्य पुत्रं दीर्घतमसं मां उरुष्येत् रक्षेत तद्राज्ञकपड़वान॥ उरुष्यतीरक्षाकर्मेति यास्कः॥ एवं सम्मान्यं तौ विशेषेण प्रस्तु
प उपरिहारं प्रार्थयते॥ इमे प्रसिद्धे पतत्रिणी पतनशीले पुनरावर्तनशीले अहोरात्रे मामां वि दुग्धां विशेषेण दोहन तसारं मा कार्ष्टां प्राणानि
र्गमनानुकूलयं मा कुरुतामित्यर्थः॥ किंच मा दशतयः दशगतारश्चितः संचितः सम्यक्संपादितः एधः प्रक्षालितं धनसंघो मा धक् मा धाक्षीत्
दहतु किंच हलं तलक्षणाद्धश्विः बद्धः दुःखमाप्य दहतुः ... दुःखप्राप्तिं दर्शयति॥ यतु यस्मा द्वां
युवयोः संबंधी अयं तनो वत्सः पाशैर्गाढं वेष्टितः सन त्मनि आत्मनि आत्मनाक्षां भूमिं खादति भक्षयति गं तु मनाक्त सन भूमौ परिलुठती
त्यर्थः॥ तस्मादुपस्तुतिरौचथ्यमुरुष्येदिति अस्याः पंचम्या विनियोगमाह शौनकः। अततायिनमायांतं दृष्ट्वा ग्रमथौरकं न मा गरंनिति
तं संस्तभ्य एव प्रमुच्यते॥ त्रिरात्रोपोषिता गवेतं दासुर्यदर्शनात॥ अभ्युत्य प्रयतः सूर्यमुपतिष्ठेद्दिवाकरं॥ पश्यंति॥ तस्करा नैनं तथान्ये
पापबुद्धयः एकः शतानि त्रायेत तस्करेभ्यश्च रक्ष्यतीति॥ ॥अथ पंचमी॥ ॥न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः॥ शिरो
यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध॥ ॥ नद्यो नदनशीलाः मातृतमाः मातृवज्जगतां हितकारिण्यः आपः मां दीर्घतमसं गर
न्नमिरयुः निमग्नं मा कुर्युः॥ अणिमाणलेहियत्यवयेन शपता प्राप्तिं दर्शयति॥ यद्यस्मात् ई मा अस्म दुपक्षता रौमदीय गर्भ दासाः॥ ई
न्दं दीर्घतमसं मां समुब्धं संकुचितसर्वांगं स्वतीवृक्षा यामिति प्राद्विसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वं। अवाधुः अवाङ्मुखम
पातयन॥ किंच अस्य मम शिरः त्रैतनः एतं नाम कोदासः अत्यंत निर्घृणः सन यद्यस्माद्वितक्षत विविधं तक्षवान् तस्मात् दासः स्वयंस्व
कीयमेव शिरः तक्षनुनकेवलं शिर एव अपितु मदीयमुरः वक्षःस्थलं अंसौ च हतवान हते छिंदस्समेतद्रूपं। ततः स्वकीयमुरः असाव ५६
पिच्छत्स्वेनैव हतवान्। तस्य युवयोर्माहात्म्यमिति भावः॥ ॥अथ षष्ठी॥ ॥ दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे॥ अपामर्थं यतीनां ब्र
ह्मा भवति सारथिः॥ ॥ दीर्घतमा एतन्नामा महर्षिः स च मामतेयः ममतायाः पुत्रः दशमे युगे दशयुगपर्यंते महानुभावयोरश्विनोः

प्रभावात् पूर्वोक्तात् दुःखाद्विमुक्तः अत्यंतं तपस्वी स्वपुत्रभार्यादिभिः सहितो जीवितवान् दशमे युगे तस्मिन् सति जुजुर्वान् जीर्णो वलीपलितगात्रो बभू 95
व॥ एवंभूतः सन् अर्थं पुरुषैः रथ्यमानं कर्मफलस्वर्गादिकं यतीनां प्राप्नुवतीनां अपां अपकार्याणां प्रजानां यष्टा अपां अवसीककर्मणां अर्थं प्रयोज 1914
नं यतीनां तासां प्रजानां ब्रह्मा ब्रह्म सहस्राः परिवृढो भवतीति सारथिः तद्विनिर्वाहको भवति॥ देवो भवतीत्यर्थः॥ एतमस्य प्रतानं मं वानुवदति॥
स्वयं बोत्त्वात्मानं परोक्षेण अश्विनोर्महानुभावत्वं प्रकटयितुं अवदीति॥ ॥ इति द्वितीयस्य तृतीये प्रथमो वर्गः॥ ॥ प्र द्यावेति षडृचं तृतीयं सूक्तं दी
र्घतमस आर्षं जागतं द्यावापृथिव्यं अनुक्रांतं च॥ प्र द्यावा षट् द्यावापृथिव्यं तु जागतं त्विति॥ अग्निष्टोमे उक्थ्यस्य पक्षे इदं च द्यावापृथिव्या निवि
द्धानमनसूक्तं॥ तथा च सूत्रं प्र द्यावेति दीर्घतमसामिति। आ द्यौ द्यावापृथिव्यपशौ हविषो याज्या॥ तथा च सूत्रितं। प्र द्यावा यज्ञैः पृथिवी कृतावृ
धा मश्चानार दान नाम यस्तु धीति द्वे इति॥ ॥ सेयास्तेत्र प्रथमा॥ ॥ प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा॥ देवेभिर्ये देव
पुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः॥ ॥ द्यावापृथिवी द्यावापृथिव्यौ देवौ द्यौरिति द्यावादेशः आ धुदात्तः पृथिवीशब्दोऽन्तोदात्तः॥
देवताद्वन्द्वे च उभयपदप्रकृतिस्वरत्वं॥ समासमध्यपदस्य तु रपालः तां तः॥ अहं यजमानः यज्ञैर्यागैः स्तुतिशस्त्रै निमित्तभूते हविः प्रदाना
र्थं प्र स्तुषे॥ प्रकर्षेण स्तौमि पुरुषव्यत्ययः॥ कीदृश्यौ ऋतावृधा यज्ञस्य वा वर्धयित्र्यौ मही महत्यौ विदथेषु यागेषु प्रचेतसा प्रकर्षेण स्तान चेत
यित्र्यौ अस्माभिर्दत्तं हविः तत्त्वं कार्ये दर्शयाल ये अनयोः कातिशय उच्यते॥ ये द्यावापृथिव्यौ देवेभिर्यजमानैः देवपुत्रे देवाय यजमानाः पुत्रस्थानी
याः ... सुदंससा शोभनकर्माणौ ... इत्था सत्यनामसत्राइत्यादि नामसु
पाठात्॥ सत्यधिया अस्मदनुग्रहबुद्ध्या वार्याणि वरणीयानि धनानि अस्मभ्यं प्रभूषतः अलंकुरुत इत्यर्थः॥ यद्वा वार्याणि हवींषि धिया कर्मणा
निमित्तेन कर्मसमाप्त्यर्थं प्रभूषतः प्रकर्षेण स्वीकुरुतः॥ ॥अथ द्वितीया॥ ॥ उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः॥ सुरेतसा
पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः॥ ॥ उत अपि च पितुः पितृस्थानीयायाः पात्या अद्रुहः अद्रोग्धुः नहि कदाचित्पिता स्वपुत्राय
द्रुह्यति तादृश्याः पृथिव्याः स्वतवः स्वायत्तबलं स्वयमेवास्मदनुग्रहायत्करमाणं अत एव महि महत्तो तेनादृशं अनुग्रहयुक्तं मनश्चित्तं हवीमभिर्ह
वनैः आह्वानैः मन्ये जानामि प्रमादयामीत्यर्थः॥ यद्वा तत्तादृशमुक्तलक्षणं मनः हवीमभिर्हवनैः॥ महि मन्ये अतिमहत्प्रकृष्टं मन्ये तथा मातुः
सर्वस्यापि पितृवर्तमानस्य धुलोकस्य मातां तारक्षति मीयते मिन भूतानि इति निरुक्तं॥ यद्वा पितुः धुलोकस्य मातुर्भूम्याः द्यौर्वः पिता पृथिवी मा
ता तिश्रुतेः॥ तत्तादृशमुक्तलक्षणं मनो मन्ये द्यावापृथिव्योर्मनो मदाहानैः प्रीणयामीत्यर्थः॥ किंच पितरा माता च पिता च पितरौ द्यावापृथिव्या
सुरेतसा उत्कृष्टेन मनसा मर्थं न प्रजायाः वरमातरः पायाः वरीमभिर्वरिष्ठैः रक्षणादिकर्मभिः सह भूम उरु विस्तीर्णं अमृतं अमरणमृतं अ
भिलसितं चक्रतुः कुरुतः॥ ॥अथ तृतीया॥ ॥ ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये॥ स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पा
थः पदमद्वयाविनः॥ ते प्रसिद्धाः सूनवः पुत्राः स्वपसः शोभनकर्माणः सुदंससः शोभनदर्शनाः युवां मही
महत्यौ मातरौ ... पूर्वचित्तये प्रथमबुध्यै अनुग्रहरूपाय॥ किंच ते द्यावापृथिव्यौ
स्थातुः स्थावरस्य जगतो जंगमस्य पुत्रस्थानीयस्योभयविधस्य जगतः अद्वयाविनः नाविद्यते द्वयं यस्य ... अतिरिक्तं अश्ना

भा० अ० २ ज्ञानत इत्यर्थः ॥ ईदृशस्य धर्मणि धारणे रक्षणे निमित्तभूते सति प स्थानसत्यं अबाध्यपाथः रक्षथः दत्त इत्यर्थः ॥ यद्वा ते वसिष्ठाः सूनवः इत्या अ० ३
४२ यमानाः स्वपसः शोभनप्रकाशादिकर्माणः सुदंससः शोभनदर्शनाः ॥ ऋत्विक्पक्षे यतो वा आत्मानं व्यापारयद् ईदृगरभयः मही महत्यौ द्यावापृथिव्यौ
पूर्वचित्तये प्राणिनां पूर्वज्ञानाय जज्ञुः जनितवंतः द्यावापृथिव्योः तत्त्वज्ञा आसुरित्यर्थः ॥ किंच स्थातुः जगतश्च धर्मणि धारणे तदर्थं अद्वयाविनः मा
र्गद्वय रहितस्य बहुलं फलं ददाति इत्य गत्वा मलर्थं यावितः अन्येषामविहृश्यत इत्यादीर्घः ॥ पुत्रस्य युष्मत् पुत्रस्थानीयस्यादित्यस्य पदं मार्गे सत्यं पाथः
अवश्यं रक्षथः ॥ ॥ अथ चतुर्थी ॥ ॥ ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ॥ नव्यंनव्यं तंतुमा तन्वते दिवि समुद्रे अंतः
कवयः सुदीतयः ॥ ॥ ते प्रसिद्धे द्यावापृथिव्यौ मायिनः मायाप्रज्ञा तद्विषयुक्ता वंतः प्रज्ञावंत इति नकर्मवंतो वा सुप्रचेतसः सुष्ठु प्रकर्षेण चेतितु
ज्ञातारः रश्मयः ममिरे मिमते प्रमाणेन परिछिंदंति । कीदृश्यौ जामी परस्परं भगिनी एतत् कृत इति चेत् ॥ उच्यते सयोनी समानोत्पत्तिस्थाने मिथुना
प्राप्युत्पन्नत्वेन मिथुनभूते परस्परमवियुक्ते इत्यर्थः ॥ समोकसा समाने पृथिव्योरंतरिक्षे नेवाचकाशरूपे अवकाशात् स्थानात् समीचीन स्थाने वा ॥
किंच कवयः मेधाविनः स्वव्यापारविषयज्ञानवंतः सुदीतयः सुष्ठु दीप्तयः रश्मयो दिवि द्योतमाने समुद्रे तस्मिन् मध्ये समुद्रशब्दो तरिक्षनामसु
पठितः ॥ तद्वचनः सर्वे यास्केन निरुक्तः समुद्रः कस्मात् समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः समोदंते अस्मिन् भूतानि समुदको भवति समुंन
त्तीति वा ॥ नव्यंनव्यं तंतुं तननीयं विस्तारणीयं ज्ञातेयकर्य्यर्वेन रश्मीन ॥ आतन्वत समंतात् विस्तारयति ॥ ॥ अथ पंचमी ॥ ॥ तद्राधो अद्य सवितुर्वरे
ण्यं वयं देवस्य प्रसवे मनामहे ॥ अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमंतं शतग्विनं ॥ ॥ वयं यजमानाः सवितुः सर्वस्य प्रसवितुर्देवस्या
दित्यस्यां तर्यामिरूपिणः प्रसवे अनुज्ञायां सत्यां इदं वरेण्यं वरणीयं राधः पुरुषार्थसाधनसमर्थं गवादि धनं मनामहे ॥ याचामहे मन्यतिर्याच्ञा
कर्मा छांदसः शपः लुक् पुनः पुनरभ्यस्या मल्ककीभर्वतीति यावत् ॥ ग्राअभ्यासेऽप्यत्यथेनात्मने पदं ॥ शपि पाघ्राद्दिना मनादेशः ॥ किंचास्मभ्यं द्या
वापृथिवी द्यावापृथिव्यौ सुचेतुना शोभनचेतनेन अस्मदनुग्रहबुध्या रयिं धनं धत्तं दत्तं ॥ कीदृशं वसुमंतं निवासयोग्यगृहादियुक्तं शत
ग्विनं शतसंख्याकैर्गवादिभिर्युक्तं ॥ ॥ इति द्वितीयस्य तृतीये द्वितीयो वर्गः ॥ ॥ ते हीति पंचर्चं चतुर्थं सूक्तं दैर्घतमसं जागतं द्यावापृथिव्यं । ते
हीत्यनुक्रांतं । चतुर्विंशे अहनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमेतत्सूक्तं । तद्धि द्यावापृथिवी यज्ञस्य वाशस्त्राणि वैश्वदेवमिति सूत्रितत्वा
त्तथा आभिप्लविक उक्थ्ययोर्द्वितीये अहनि वैश्वदेवे द्यावापृथिव्यनिविद्धानीयं चातुर्विंशिकं तृतीय सवने मित्याभिप्लविकौ द्वितीये अन्यानि संदर्श
नात् आभिप्लविकात् द्वितीयादहः पृष्ठ्यस्य द्वितीये अहनि प्रातर्ज्ञमतिदेशात् प्रागेतत्पृष्ठ्याभिप्लवेनोक्तं अहनी आद्य आद्याभ्यामिति सू
त्रितत्वात् ॥ प्रथमाश्विनशस्त्रे विनियुक्ता संख्यितेऽश्विने त्यत्र सूत्रितं ॥ ते हि द्यावापृथिवी विश्वशंभुवा विश्वस्य देवीमित्य यस्येति ॥ ॥
से पारस्य प्रथमा ॥ ॥ ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ॥ सुजन्मनी धिषणे अंतरीयते देवो देवी धर्मणा सूर्यः ४२
शुचिः ॥ ते हि ते खलु प्रसिद्धे द्यावापृथिव्यौ अंतरीयतेरंतरिक्षेऽश्विः शुद्धः विश्वस्य शोधयिता वा देवो दीप्यमानः सूर्यो धर्मणा प्रकाशादे
र्धारणादिधारणेन युक्तः सन् ईयते गच्छति ॥ ईदृशौ देवी द्योतमाने तादृशकर्मयुक्तयोरनुग्रहादिति स्तुतिः ॥ कीदृश्यौ विश्वशंभुवा वि
श्वं सकलं भावयितारौ यथा तौ विश्वशंभुवा विश्वस्य सुखयितारावित्यर्थः ॥ ऋतावरी ऋतवत्यौ ऋतुशब्दाच्छंदसीवनिपावितिवनिप् ॥ वनोरच

ति श्रीनिकारश्च सः ऋतस्य उदकस्य उदकोत्पन्नादुदकं रजश्च ऋतमिति निरुक्तं धारयत्कवी आरूपेण धारकं कवि यद्योस्ते ताहृशौ उदकस्यादनाय प्र 97
यत्नमयत इत्यर्थः ॥ यद्वा धारयत् कविर्मेधावी आदित्यो ययोस्ते ताहृश्यौ सुदकधारी वित्त यो पतेऽइत्यर्थः ॥ सुजन्मनी शोभनजन्मवत्यो 1914
धिषणा धर्षणोपेते स्वव्यापारे प्रगल्भ इत्यर्थः ॥ देवी द्योतमाने अत्र यद्यपि धिषणे इत्येतत् धिषणे रोदसी इति तन्नामसु पठितं ॥ द्या
वापृथिव्योर्नाम तथापि द्यावापृथिवी इत्यस्य विद्यमानत्वाद्यौगिकमित्युक्तं ॥ ॥ अथ द्वितीया ॥ ॥ उरुव्यचसा महिनी असश्चता पिता
माता च भुवनानि रक्षतः ॥ सुधृष्टमे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥ ॥ उरुव्यचसा प्रभूतव्यचनवत्यौ विस्तीर्णे म
हिनी अत एव महत्यौ असश्चता असज्यमाने परस्परयुक्ते इत्यर्थः ॥ पिता पालयित्री द्यौः माता निर्मात्री पृथिवी चैतत् उभे भुवनानि भूतजा
तानि रक्षतः पालयतः द्यौः पितः पृथिवी मातरित्यादि श्रुते मातापितृरूपत्वं किंच सुधृष्टमे अतिशयेन धृष्टे छांदसस्तकारलोपः प्रगल्
भे रोदसी द्यावापृथिव्यौ वपुष्ये न वपुषा हितेन प्राणिनां पितरावि द्वारोरक्षके इत्यर्थः ॥ तदेतोपपादयति यद्यस्मात् सीं सर्वतः पिता पित्र
नीया द्यौः रूपैः निरूपणसाधनैः प्रज्ञाप्तैः प्रकाशैः निरूप्यमाणैः रश्मिभिर्वा अभ्यवासयत् ॥ अभिवासयति अधितिष्ठति त
स्मात् पिता माता च भुवनानि रक्षतः ॥ ॥ अथ तृतीया ॥ ॥ स वह्निः पुत्रः पित्रोः पवित्रवान् पुनाति धीरो भुवनानि मायया ॥ धेनुं च पृश्निं
वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥ ॥ पित्रोः मातापित्रोर्द्यावापृथिव्योः पिता माता चेति पितरौ प्रोच्येते इत्यत्र यण इति पितुर्विभक्ति
रहितापुत्रः पुरु त्रातापुत्रस्थानीय आदित्यः पवित्रवान् पावनरश्मियुक्तः धीरः धीमान् स वह्निः फलस्य वोढा धारकः सन् मायया प्रज्ञयास
र्वा यथा भुवनानि प्रभूतजातानि पुनाति पावयति प्रकाशयतीत्यर्थः ॥ किंच स एव पुत्रः पृश्निं शुक्लवर्णां धेनुं प्रीणयित्री भूमिं करतसं शोभ
नसामर्थ्यं शोभनाद्रेकं वा वृषभं सेक्तारं द्युलोकं च मायया पुनाति प्रकाशयतीत्यर्थः ॥ किंच अस्य द्युलोकस्य यद्वा कर्मणि षष्ठी वृषभं द्युलोकं
शुक्रं पयः दीप्तं पयः सरद्यामुदकं धुक्षत दोग्धि दुहेर्ल्लङि सन्धुङिश्रलइगुपधादनिटः क्सइतिक्सः ॥ क्सादेशः ईदृशा महानुभावः आ
दित्य स्तयोः पुत्र इति द्यावापृथिव्योः स्तुतिः ॥ ॥ अथ चतुर्थी ॥ ॥ अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ॥ वियोम
मे रजसी सुक्रतूययाजरेभिः स्कंभनेभिः समानृचे ॥ ॥ पूर्वं पुत्रमहात्म्येन तत्प्रशस्येदानीं सोसाक्षात्कृत्य प्रशंसति अयं देवानां मध्य
देवतमः अप इति कर्मनाम तेन तद्वान् लक्ष्यते कर्मवतां मध्ये प्रकृष्टकर्मा अयमित्यर्थः कुत इत्याह ॥ यो देवो विश्वशंभुवा सर्वप्रकारेण भूतानां
सुखस्य भावयित्र्यौ रोदसी द्यावापृथिव्यौ महानुभावः जजान उत्पादितवान् न केवलं इत्यादनमात्रं अपि तु यो देवो रजसी रंजनात्मिके द्यावापृथि
व्यौ रजसी रंजनात्मिके द्यावापृथिव्यौ रजसी इति द्यावापृथिव्योर्नाम रजसी सदसी इति तन्नामसु पाठात् ॥ उरुरूपविमम विशेषेण परिछिनः
त्ति किं तत्पभगाय नत्यादिसुक्रतु यथा शोभनकर्मभवाय येन कर्मणा प्राणिनां सुखं संभवति तादृक्कर्मेछया अथ वेतेन तु तरसंबध्यते सुक्रतु
यया इत्तं न मिमिते न मम द्यावापृथिव्याव जरेभिः अजीर्णैर्दृढतरैः स्कंभनेभिः गतिर्वधनैः शंकुभिः समानृचे सम्यक् सर्वतः पूजितवान् स्था
पितवानित्यर्थः ॥ ऋचस्तुतावित्यस्य लिटि रसामान्यादि हलः तस्यशीतितस्मान्नुट् हिहल इत्यभ्यासस्य नुट् ॥ यस्मादेवं तस्मादयमेव देवं अयमेवापस्त
म इति एवं महानुभावेन परमश्रवेणास्तेनेति स्तुतिः ॥ ॥ अथ पंचमी ॥ ॥ ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृ

३·भा·अ·२ हत। अति प्रभृतं स्थवः सर्वत्र प्रसिद्धं मंनं सर्वत्र श्रूयमाणं। येनाभिभूतो सतनामविश्व श्रवनाय्य मोजो अस्मे समिन्वतं॥ ॥ तं प्रसिद्धे यावापृ अ·३
थिवी द्यावापृथिव्यौ गणान अस्माभिः स्तूयमानसत्यान्मोणिवर्तें प्रत्ययः॥ महिम हत। अति प्रभृतं श्रवः सर्वत्र प्रसिद्धं मंनं सर्वत्र श्रूयमा
५८ णं कीर्तिवानी मार्भ्यं धासथः धनं दधाथे तें। यद्वा गमः सिद्ध हृत्समिति सिप नथाग्नु हत म हत अ प्रतिभृतं श्रवं बलं धासथः त एव इत्यवि
ज्ञायते॥ येनानबलेन विश्व हासर्वं घपर्व हः सत्रशी पुत्रादिरूपाः प्रजाः अभिततनाम अभितोविस्तारयाम। तना तेर्लेटि छांदसो विक
रणस्य लुक् आदुत्तमस्येत्य इत्वमः॥ तस्यच्छांदस्य सम्भूय थेति आर्द्धधातुकत्वात्॥ अभ्यस्ता शुद्दात्तवा धातुस्वरः वृत्स्यद्रतिमनुष्य
नाम॥ वृत्स्यः चर्षण य इतिनेनामम्पाधात॥ किंच पनायं सत्यं ओजः शरीरबलं अस्मे अस्मासु सम्यगिन्वतं॥ प्रवर्धयतमित्यर्थः॥ इन्व
तिर्व्याप्तिवचनः इन्वतिनन्नत्ते मदयतिनामसुपाधात॥ ॥ इति द्वितीयस्य तृतीये त्रयोवर्गः॥ ॥ किमुश्रेष्ठ इति द्वाविंशत्यृचं पंचमं सूक्तं दीर्घत
मसं मार्षं च अंत्यादिप्रथमादि श्लिष्टव्रतपरिभाषयाजगत्यः॥ अनुक्रान्तं च किमुश्रेष्ठः पंचूनार्भवं त्रिष्टुबंतमिति। ब्राह्मणश्राव्ये च प्रहारे वैश्व
देवशस्त्रे आर्भवं निविद्धानं हि प्रतीकं। तत्र किमुश्रेष्ठ इत्येतदत्यर्थं प्रतीकं व्यूढश्चोतिसत्र इ सूत्रितं किमुश्रेष्ठ उप नो वाजा इति द्वे यो इत्यार्भवं
च तस्मश्चेति॥ ॥ तत्र प्रथमा॥ ॥ किमुश्रेष्ठः किं यविष्ठो न आजगन्ति किमीयते दूत्यं कद्यदूचिम॥ न निंदिम चमसं यो महाकुलोग्ने भ्रातर्दुण
इद्भूतिमूदिम॥ ॥ ऋभवो नाम सुधन्वनः सूर्यः पुत्राः कर्मभिर्देवत्वं प्राप्ता इति तं च मनुष्याः संतः सुकर्मणा देवत्वं प्राप्य कृत्स्नाचित्तकर्मकाले
सोमपाना प्रपद्यन्त तान्प्रति देवैः प्रेरितोग्निः परस्परसमानरूपान दृष्ट्वा स्वयमपि तदाकारं धृत्वा तेषु मध्ये स्वयं चतुर्थः सन्नपार्नु प्रयुज्य
ते चक्रभवः आगतं तं समानरूपं अवलोक्यति कुमसमर्थाः परस्परमेवमंदिशन्त॥ अयं किमुश्रेष्ठः किं तु अस्मत्तायेत्रप्रशस्यतमः वय
सार्थकः सोस्माना अगन आगमत्प्राप्तः गमेर्लुङि मंत्रे घसः हारः छदुः हृद्धुस्या इहतेषु मेनोभवात्तोत्तदित्यन्तं॥ अजगं गमितिगतिर्कमा अगं
न्जगमितितिनाम सत्यानं॥ किंयविष्ठः किंवा अस्माकं युवतमः अस्मनः वर्ती यान आजगन्प्राप्तः किंवा दूत्यं दूतकर्म देवसं बंधि ईयते ग
च्छति देवैः प्रेरितो दूतोस्मानागतोवा दूतस्य भावः कर्म दौत्यमिति यन यदूचिमय दूतच्छम॥ तत् यं निश्चितव्यमित्यर्थः॥ वयं ता वक्तारः इदानीं च त्वा
रः समानरूपाववर्तामहे॥ तस्मादयमविव्हः किमुश्रेष्ठ इति विचिकित्सां पूर्वसंदिग्धं कथं चिकित्सां यं निश्चित्यतत्प्रत्यापरोक्षेण ब्रुवते हे अग्नय
स्मानः ब्रातल्लृगाडीभ्यां तथावस्तात्त्वं कीय भागं त्वाकृतं तिनद्रुतसमानरूपमाश्रित्य वलात्त्वं मसपानाय प्रयत्नइतिभातरिव्यत्रं हता
दृशा ते चमसं नानिंदिम न्यधिकृतः समागमइतिपानमकुशाचमसंन दूषणयाम शोणिकुमाया छंदसिद्धवतीवक्यमितिद्विर्वचनाभावः॥ अ
दूष्यत्वेकारणमाह॥ यश्चमसो महाकुलः महाकुलोसत्तः तद्धानिमित्तत्वात्॥ वक्ष्यति च त्वष्टाग्ना संतयौनिज इति अतः कारणात्। द्रुणः
विकारत्वकविकारः तनश्चत स्वेत छंदः द्रारविकारत्वमसत्यभूतिं प्राप्तिं इडिम अमः विदि छांदसो लिटि वचि स्वपादिसंप्रसारणं॥ कीर्ति
यमादिद्रू॥ ॥ अथ द्वितीया॥ ॥ एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवं तद्व आगमं॥ सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो ५८
भविष्यथ॥ ॥ एकं चमसमितिएवं देवाग्निः तानप्रत्यवाचदृतौधन्वाः सुधन्वनः पुत्राः यूयं एकं चमसं त्वष्ट्रा संपादितं पूर्वमेकमेव

संतं चमसं चतुरः कृणोतन चतुः संख्याकान कुरुत॥ चतुरः इत्यसो त्वं तोदात्तत्वं॥ पूर्वं वनप सयथा इप रितनत्वच्छ आह चमसा इष्टा करोतिरूप क ११
स्य कृतिरूप आह चतुरस्कं रीतिचतुष्कं निर्धारितेन कुरुत मह मेव ब्रवीमि किंतु युष्मान्प्रतितत इकं च तुर्धाकरणरूपं कर्म इतरत्र वक्ष्यमाणं अस्व · 1914
रथादिकरणरूपं च कर्म देवा इंद्रादयः अब्रुवन्वदत्त प्राप्युपायत्वेन तत्ता दृशं कर्म वः युष्मद गामं प्राप्तास्मि॥ तस्मादेवं तस्मा घूर्यं यद्येवाकरि
ष्यथ य एवं मदुक्तप्रकारेण कर्तुं शक्नुथ॥ तथा च तदेवैः सार्कं सह यज्ञपात्राभविष्यथ इति तेरुक्तमित्यर्थः॥ ॥ अथ तृतीया॥ ॥ अग्निं दूतं प्र
तियदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः॥ धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि॥ ॥ हे आगत देव अग्निं अंगनादिगुणविशिष्टं
दूतं दूतकर्म प्राप्तवंतं प्रतियतकार्यं अब्रवीतन अब्रुवन्यत्वं यं न मध्यमः पूर्ववत्तनप॥ किमिति अश्वः कर्त्वः एकस्मादश्वात् अश्वांतरं कर्तव्य
मित्यर्थः॥ अश्वा इश्वमत स्वतेतिवक्ष्यमाणत्वात् कृत्यार्थे तवै केनितिवन्प्रत्ययः इत अपिचरथः कर्त्वः कर्तव्यः धेनुः कर्त्वा चर्मरहिताम्रता
गौः नित्य दीर्घा पुनर्नवं तत्ना कार्या तदुक्तं त्वं निश्चर्मणो गामरिणीतिधीतिभिरितिवक्ष्यमाणत्वात् तथा इहोपितरौ जीर्णौ संतौ पुनर्युवत्वा
युवानौ द्यावाभोपदर्शयो च त्वावपता कर्तव्या हे भ्रातरः युष्माकं देवानां तेरक्तानि कर्माणि कृत्वा अनुपश्चात् कर्तृत्वाकर्मणा एमसि एमः॥ आ
भिमुख्येन प्राप्नुमः इणगतौ॥ इदंतो मसि॥ यद्वाकृपारि इं वाक्यं हे ऋभवो यूयं आगतमग्निं दूतं प्रतिपद्य ब्रवीतन यत्कार्यं वक्ष्यमाणरूपं कर्त
व्यत्वेन वदथ अंगीकुरुथ तानि सर्वाणि संपाद्य हे भ्रातरः कृत्वा कर्मणा एमसीति ब्रूथेति केचिदाहुः॥ ॥ अथ चतुर्थी॥ ॥ चकृवांस ऋभवस्त
दपृच्छत क्वेदभूद्यः स्य दूतो न आजगन्॥ यदावाख्यच्चमसांचतुरः कृतानादित्त्वष्टा ग्नास्वंतर्न्यानजे॥ ॥ हे ऋभवः तत्कार्यं यथा च वांसः कृतवंतो यूयं
अपृच्छत॥ प्रश्नं कुरुत कुरु तेर्लिटः क्वसुः॥ यत्र यदपि ऋभुरिति त्रयाणां मध्ये एकस्य नाम तथापि तस्य प्राधान्याच्छत्रिणो गच्छंतीतिवत्सर्वेष्वृभवदु
पचर्यते किमिति स्यः स्य दूतः क्व अभूत् क्व गतः स इत्युक्तं कुर्वाह॥ यः यो दूतो नोस्मान् आजगन् आगमत्॥ प्राप्तः एवं भूतेसति यदा यं त्वष्टा चतुरः कृतवा
न चमसमान अवाख्यत॥ अभिपश्यतिख्यातेर्लुङि अस्यतिवक्तिख्यातीति ङ्कुरादेशः॥ आत् अनंतरमेव त्वष्टा तस्य चमसस्योत्पादकः एतं नाम
कादेवः ग्नासु स्त्रीषु मे नाम्ना इति स्त्रीणामित्तिनिरुक्तं अंतर्मध्ये न्यानजे न्यक्तकाभूत् स्त्रियया आत्मानममन्यतेत्यर्थः॥ अज्जेर्लिटि तस्मान्नुट्॥ छां
दसानुनासिकलोपः॥ ॥ अथ पंचमी॥ ॥ हनामेनां इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंदिषुः॥ अन्या नामानि कृण्वते सुते सचां अन्यैरे
नान्कन्या३ नामभिः स्परत्॥ ॥ एतान् वक्ष्यमाणान् हनाम इति यत् यदा अब्रवीत् त्वष्टा पूजार्थं बहुवचनं एवं च स्यप्रकृतपरामर्शित्वात् ऋभूणां
प्रकृतत्वात् ते वायुः अंतरिक्षेण यांति अंतरिक्षात् दायांति। तथा वरुण आप्यां उदकाभिमानिदेवः समुद्रः समुंदनस्वभावरद्भिः तास्य आयाति॥ यद्वा
पूर्वं दर्शसहाय्या यागताः एते देवाः कृतकार्याः संतः पुनर्युष्मान् कामयमानाः स्वस्वदेशं प्रतियांतीत्यर्थः॥ ॥ इति द्वितीयस्य तृतीये हननप्रसक्तिं
दृष्ट्वा यतिये देवपानं देवपातव्यं चमसं य ऋभवोनिंदिषुः निंदां अकुर्वन् देवयोग्यत्वात् च चमसं मनुष्याः ऋभवः स्वीकृत्य चतुर्धा व्यभजन्। तान् हना
मतिय दा अब्रवीदित्यर्थः॥ तदा प्रभृति मनुष्याः सुतेऽभिषुते सोमपानाय प्रस्तुतेसति सचा सह परस्परं अन्यानि नामानि अन्यानि द्वा त्वष्टुर्ध्य
न्यात्रादीनि कृण्वते कुर्वंति पूर्वनाम प्राप्ताः स्यापहृत्य काले अध्वर्युरुपहूय स्वहाते रूपत्वयत्त्वमन्यै रेवनामभिः॥ आत्मानं त्वष्ट्रा च धर्मीत्याप्र
त्याप यंतीत्यर्थः॥ पूर्वमन्यानि दृश्यं प्रसक्तानीत्येतदाह॥ एना एनान् कन्या स्वात्मनः पवित्रीमाता अन्यैरेवनामभिः स्परत्॥ प्रीणयति। स्पृ प्री

भा० अ० २ ति चक्रनयोः देयद्रागमः ॥ इति द्वितीयस्य तृतीये चतुर्थो वर्गः ॥ ॥ अथ षष्ठी ॥ इंद्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत । अ० ३
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ॥ पूर्वसूक्तानां क्रमेण विनियोगमाह । इंद्रो हरी युयुजे एतन्नामानावश्वौ रथे योजित
४९ वान् तथा अश्विना अश्विनौ रथं योजितवंतौ तथा बृहस्पतिर्बृहस्पतेर्मंत्रस्य पालयिता एतन्नामको देवो विश्वरूपां नानारूपोपेतां गां उपाजत ॥
उपागमत स्वीकृतवानित्यर्थः ॥ यद्यप्यत्र गोरिति विशेषो न श्रुतः ॥ तथापि पूर्वत्र धेनुः कर्त्वेत्युक्तत्वात् ऋभुभिः कृतत्वाच्च धेनुं विश्वरूपामिति
वक्ष्यमाणत्वाच्च विश्वरूपा गौरित्यवसीयते ॥ अत एव विश्वरूपामित्यस्याश्च पंक्तिरिति केचन व्याचक्षते तेन दत्तं युष्मत्संपादितानि रथा
दीनींद्रादयः स्वभागत्वेन स्वीकृतवंतः ॥ तस्मात् हे ऋभुर्विभ्वा वाजश्च यूयं देवान् इंद्रादीनागच्छत गत्वा च हे स्वपसः शोभनाश्वरथादिकर्मवंतो
यूयं यज्ञियं यज्ञार्हं यज्ञसंबंधिनं भागं सोमरूपं देवत्वं प्राप्ताः संतः ऐतन प्राप्नुत कर्मसामर्थ्येन हविर्भुजो भवतेत्यर्थः ॥ इत्ययमृषिमा
ह ॥ ॥ अथ सप्तमी ॥ ॥ निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ताकृणोतन ॥ सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ
अयातन ॥ ॥ निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ताकृणोतन ॥ सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥
हे सौधन्वनाः यूयं निश्चर्मणः मृतायाः गोः सकाशादुत्कृत्तात् चर्मणः गां नूतनां निरिरिणीत ॥ तन्निर्गमयत उत्पादितवंतः स्थाने न चर्मणा संवी
तां तत्सदृशीमन्यां धेनुं कृतवंत इत्यर्थः ॥ यद्यपि पूर्वमश्वादीनां विनियोग उक्तः तथापि ते यामत्यंतदुःखसंपादकत्वात् पुनराह ॥
न केवलं गोकरणमेव ॥ अपि च या जरंता या जीर्णौ पितरौ युवं तौ युवशा युवानौ कृणोतन कुरुत ॥ किंच अश्वादश्वं एकेन विद्यमानेन
नाश्वेनाश्वांतरमतक्षत ॥ प्रयत्नेन संपादितवंतः यस्मादेवं कृतवंतस्तस्माद्रथं युष्मदीयं युक्त्वा अश्वैर्योजयित्वा देवान् इंद्रादीनुपायातन देवसमी
पं प्राप्नुत ॥ ॥ अथाष्टमी ॥ ॥ इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनं ॥ सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादया
ध्वै ॥ ॥ इदानीमपि देवैरनुमत्य तान् संबोध्य पूर्वमनेन यमुक्तवंतस्तदनुवाचयति ॥ हे सौधन्वनाः पुत्राः यूयं इदमुदकं सोमलक्षणं
पिबत इत्यब्रवीतन उक्तवंतः अब्रवीतनेति मध्यमबहुवचनस्य तस्य तनबादेशः पिबता ह्वचोऽतस्तिङ इति दीर्घः ॥ एतत्प्रातःसवनिकानि प्रायेण ॥ अथ
वा इदं मुंजनेजनं मुंजवान्नाम पर्वतः सोमोत्पत्तिस्थानं तत आहृतत्वात् मुंजनेन शोधितं ॥ अपगतकृणमित्यर्थः ॥ इदं सोमरसरूपमु
दकं पिबतेत्यब्रवीतन एतन्माध्यंदिनसवनाभिप्रायं हे ऋभवो यूयं तत उभयं सवनसंबंधि सोमपानकार्यं नेव हर्यथ नेव कामयथ ह
र्यतिः कांतिकर्मा हर्यति इति निघंटौ तत्कर्मसु पाठात् ॥ तृतीये सवने तु मादयाध्वै अन्यथैतत् साभयथ ॥ ऋभवो देवाः सोमस्य मत्तास्त्विति
तृतीयसवने एषां सोमपानमज्ञायत एवं यूयमभ्युक्तवंतः अथवा ऋतून् प्रति तस्य देवबाक्यं ॥ हे सौधन्वनाः यूयं देवत्वं प्राप्य देव
यजनं प्रति सोमपाना यरथ नागत्य श्रीनानश्वान प्रातः सवने इदमुदकं सोमलक्षणं पिबतेत्यब्रवीतन तत्र यदि नेच्छथ इदं वः मुंजने
जनं मुंजिनद्विषितं पिबतेत्यब्रवीतन ॥ पश्चात्तद्वयं यदि नेव हर्यथ ॥ हे अश्वा यूयं तृतीयसवने मादयाध्वै तत्रापि न प्रचरात ॥ ॥ अथ न ४०
वमी ॥ ॥ आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ॥ वधर्यंतीं बहुभ्यः प्रैको अब्रवीदृता वदंतश्चमसाँ अपिंशत ॥
॥ चमसस्य चतुर्धाकरणकाले किमिति सत्यं वदंतो यूयं भजनीयं तदाह ॥ एकः त्रयाणामन्यतमः आपो भूयिष्ठा इत्यब्रवीत् न ह्युदकात्प्र

शस्तं लोकोपकारकं तत्वांतरमस्ति आपो भूयिष्ठा इत्यमवादीत् ॥ आपामेव श्रेष्ठत्वमपएव ससर्जादाविति शास्त्रात् ॥ ततोन्योन्यमग्निर्भूयिष्ठः 101 / 19 14
इत्यब्रवीत् । आंतरं बाह्यं च यद्द्राव्यपाकभुक्तजरणादि व्यापारेणाग्नेरेव तदग्निर्वोढृत्वात् ॥ अग्नेरेव भूयिष्ठमित्यन्यस्तथा च धर्यंतीं बधरिति
वधेनाति बज्रनाम वधः अकृ इति तन्नामसु पाठात् ॥ तदिच्छंतीं दृष्ट्युदकार्योत्तव धर्यंतीमेघपंक्तिरुच्यते ॥ यद्यपीयं वधार्यं वज्रेण स्वयमे
वनापेक्षते तथापि रूपार्थमिंद्रवज्रेण हन्यमानत्वात् तदिच्छंतीमुपचर्यते ॥ बहुभ्यस्तथामथाय वधर्यंतीं वधमात्मन इच्छंतीं भूमिं प्रति
हसारेको यजमानस्तमेकः बहुभ्यः संवादिभ्यः श्रेष्ठतमामब्रवीत् उदकस्यापि मेघकारणत्वात् एवमेतासु तानि उक्तरूपाणि यथार्थानि
वाक्यानि वदंतः परस्परं ब्रुवंतः चमसान् अपिंशत अवयवविभागं कृतवंत चतुर्धा विभक्तत्यर्थः ॥ पिंश अवयवे तुदादित्वं मुचादीनामिति नुम् ॥ इद
मत्र कृत्तवदनं अपेक्ष्य ऋभूणां वाक्स्यारणा यास्कः ॥ ऋभव उरु भांतीति वर्तेन भांतीति वर्तेन भवंतीति वेत्युक्तत्वात् ॥ ॥ अथ दशमी
॥ ॥ श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतं ॥ आ निम्रुचः शकृदेको अपाभरत् किंस्वित्पुत्रेभ्यः पितरा उपावतुः ॥ ॥
अत्र ऋभवः एव ऋत्विकस्तिविषरूपेण स्थिता सर्वं यज्ञनिर्वहंतीत्याह ॥ श्रोणां शोणं छांदसीति परस्परूपाभावः ॥ शोणवर्णमुदकं रुधिरमेकः ऋभु
युगमध्ये अत्विक् गामवाजति बाह्यभूमिं प्रति गमयति रशनया गलेन स्थापयति ॥ तथा एको मांसं संस्कृत यस्य छेदनसाधनेन स्वधितिना आभृतं
हृदयजिह्वावक्षप्रभृत्याकारेण आहृतं संपादितं मांसं पिंशति अवयवीकरोति स्वधितिनात्तं हृदयवालिभजतीत्यर्थः ॥ अथैकोनिम्रुचः नि
र्गमयणादिस्थानात् । मांसात् शकृत् कुक्षिस्थं उरक ऋभुर्णं वध्यानामकं अपाभरत् निरसनाय एवं ऋत्विग्रूपेण स्थितेभ्यः पुत्रेभ्यः पुरस्तात्स्व्यः
पुत्रस्थानीयेभ्यः ऋतुभ्यः सर्वं यत्नानुष्ठितेषु पितरयत्नस्य पालयितारौ जायापती किंस्विदुपावतुः किं नु खलु प्राप्नुतः अवतेः प्राप्त्यर्थोंऽस्ति
माविधुः ॥ सर्वं तैरेवानुष्ठितमिति तयोर्न किंचित्कृत्यमस्तीत्यर्थः ॥ अथवा अयमर्थः ॥ एषां तेषामन्यमतः श्रोणां वगुकां गांउदकं प्रत्यचगमयत
। अपरः मन्नरः यामासविक्रयिण्याम् तं संपादितं मांसं पिंशति पित्रोः अपरः आ निम्रुचः अस्तमयपर्यंतं गवां शकृत् पुरीषं दूरतः अपाभ
रन् अनुष्ठितं सर्वं निष्ठितं एतस्मात् पितरौ अन्नस्य पुत्रेभ्यः किंस्विदुपावतुः उपगच्छतामिति ॥ ॥ इति द्वितीयस्य तृतीये पंचमो वर्गः ॥
ति ॥ ॥ अथैकादशी ॥ ॥ उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः ॥ अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥ ॥
पुराण प्रतिध्वानः सौधन्वनः पुत्राः कर्मणा देवत्वं प्राप्तवंतो ऋभून् स्तुत्वा वदंत प्रतिध्यायंति अपि ऋभवः पान ऋभूनिदानीं स्तौति तथा च यास्कोनिरु
क्तपुरार्थे यामि स्थानं वभवनवहुधानि रच्यंत तत्र उदाहरणत्वं न विद्वांसो मीत्यता मुदाहृत्या ऋत्यर भ या घ भव उच्यत उत्कार्तास्मिन्नर्थे एता
म्नचमुदाहराः ॥ हे ऋभवः उरु प्रभवंतः भासमानाः स्वं कृतेनादित्येन भासमाना वा कृतेनादकेन उदकार्यं मुख्यं नावारश्मीनामुरु भासमानः
त्वं प्रसिद्धं तथा आदित्यादुत्पत्तिरप्युदकार्थं भवनमपि रश्मीनां घर्मकाले भूमिगतं सारमादाय पुनर्वर्षकाले प्रवर्षतीति प्रसिद्धं ॥ आदि
त्याज्जायते वृष्टिरिति शास्त्रात् ॥ तथाविधा नरः प्रकाशा ऋभवः स्वपस्यया उदकादेनेतारो यूयं उद्वत्सु उन्नतप्रदेशेषु मे वाहिषु तृणं व्रीहियवादिरूपं अस्मै
प्राणिजाताय यदुपकारार्थं अकृणोतन कृतवंतस्तु उपसर्गश्छंदसि धात्वर्थे इति । तथा निवत्सु प्रवणप्रदेशेषु अस्माएव अपउदकान्यकृणो
तन अकुर्वन किं स्वभोगार्थं न स्यात् ॥ स्वपस्यया शोभनकर्मेच्छया शोभनं कर्मभिः कृतमिति यजमानाः स्तुवंति तदृच्छयेत्यर्थः ॥ किंच यू

भा० अ० २ यंअगोह्यस्य अयाद्यस्यादित्यस्य यदेमंडलेयत्र यावत्कालं असूरून्नतमयंतः स्वराजो वियन्निग्रद्वावर्तं प्रतावंतमेवकालमहान्यपि । नित्यावाश अ० ३
५० भिचथ ॥ यमरस्वन्ने ॥ अस्मात्कुडि पूर्ववन्त्स्यतनबादेशः अदातिवाक्षपोरुदनानावंतंकालं अघाहनिइदंइदानीमनुगच्छथ ॥ अनुसत्यनगच्छथ
यावंतंकालंगोभिर्वियन्निग्रद्वावर्तं प्रतावंतमेवकालमहान्यपि नानुगच्छथेत्यर्थः ॥ यद्वा अगोपनीयस्यत स्वर्गे हे अंतरिक्षे यतया यावंतंकालं अस
मनरश्मिमद्वायमकुरतत तावंतंकालं अघेदानीं वर्षसमये इदं सस्याभिवर्धनरश्मिप्रवाहरूपं कर्मनानुगच्छथ अनुसत्यन प्राप्नुथ या
वंतंकालं विवर्षथ तावंतमेव कालं प्रवर्षयथेत्यर्थः ॥ ॥ अथ द्वादशी ॥ ॥ संमील्ययद्भुवनापर्यसर्पत क्वस्वित्तात्यापितरावासतुः ॥ अशा
पत यः करस्नंव आददे यः प्राब्रवीत्योनस्माअब्रवीतन ॥ ॥ हे ऋभवो रश्मयो यूयं यत् यदा भुवनाभूतजातानिसमील्यसमीलनं कृत्वाच
लुधरपटलेनाच्छाद्य पर्यसर्पत परितः सर्पणं कुरुथ वर्षयेत्यर्थः ॥ तात्यातानीत्वायमानेऋभुसके यद्वातात्यातास्तवपोसकौ हरसत्यप्रत्य
यादकारस्यात्वंच ॥ अथवापितरौ क्षीरपर्णं तात्यातकालीनौ पितरा जगतः पालकौ सूर्याचंद्रमसौ क्वस्विदासतुः कुत्रखलुतिष्ठतः अस्तोर्लेङिव्य
त्ययेनभूभंवाभावः ॥ यद्वा असते र्गत्यर्थस्य लिङेन रूपं अहोरात्रविभागेन प्रवर्षयथेत्यर्थः ॥ किंचर्ड्द्वगान आयुष्मान यः कोपि वृष्टिप्रतिबंध
कारी राक्षसादिः करस्नं बाहू नामैतत ॥ करस्नौ बाहू इत्युक्तत्वात ॥ अव्रत्कारान्तं युष्मदीयं हस्तं अददे गृण्हाति प्रतिरोधं करोति ॥ तमराघतना
द्रायथ यश्च प्राब्रवीत प्रकर्षेण वाचानिरंधत स्मै प्राव्येवाब्रवीतन प्रकर्षेण भर्त्सनादिवाचं कुरुथ यद्वायोनूनं स्तौति तं प्रकर्षेणस्तुतेत्यर्थः ॥ ॥
अथ त्रयोदशी ॥ ॥ सुषुप्वांसऋभवस्तदपृच्छतागोह्य क इदंनो अबूबुधत ॥ श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्याव्यख्यत ॥ ॥ हे ऋ
भवो रश्मयात्मका यूयं सुषुप्वांसः आदित्यमंडले स्वपंतीव वर्तमाना यूयं ॥ स्वपेः क्वसुः ॥ ततत मादित्यं तद्वाक्यमपृच्छत प्रश्नं कुरुथ । किंतदितिचेत ॥
उच्यते ॥ हे अगोह्य केनापि गोपनीयादित्य स्वामिन नोस्मदीयमिदं कर्म वर्षणरूपं को अबूबुधत ॥ बोधयति प्रेरयति साहाय्यं करोति । बुधेः
र्ण्यंतात्लुङि रूपं बस्तः सर्वस्य वासयिता आदित्यः बसेरौणादिकः प्रत्ययः ॥ बवयोरभेदात्बस्तं बोधयितारं प्रेरयितारं श्वानमब्रवीत ॥ अंतरिक्षे
श्वसंतं वायुं प्राबादीत ॥ अस्तौ युष्मान्प्रेरयतीति अथ वायुसहायेन वर्षतां यूयं संवत्सरे पूर्णे अघेदानीं इदं जगत व्यख्यत विविधं प्रकाशितवं
तः पूर्वं सूर्याचंद्रमसौ यथा दृश्येते तथा वर्षितेदानीं वर्षकाले तातौ विश्वं जगद्व्यक्तं कुरुतेत्यर्थः ॥ ख्याते र्लुङ्यस्यति वक्तिख्यातीत्यङ् ॥ ॥ अथ च
तुर्दशी ॥ ॥ दिवायांति मरुतो भूम्याग्निरयं वातो अंतरिक्षेण याति ॥ अद्भिर्याति वरुणः समुद्रैर्युष्मां इच्छंतः शवसो नपातः ॥ ॥ हे शवसो बलस्य
कार्यस्य बलस्य न पातो न पातयितारः ऋभवः युष्मान इच्छंतः इच्छन्नुकूलतत्क्रियया युष्मानेवेच्छंतः सर्वे देवा आयांति कस्मादितितदुच्य
ते ॥ मरुतः वृष्ट्यनुकूलाः देवाः दिवाघुलोकादंतरिक्षं प्रति यांति आगच्छंति सोंबेकास्वइति तृतीयाविभक्तेः र दात्तत्वं भूम्या भूमेः सकाशात अग्निर्याति
आगच्छति अयंवातः सर्वत्र संचारी वायुः अंतरिक्षेण याति अंतरिक्षादायाति ॥ तथा वरुणआवस्तोजलाभिमानिदेवः समुद्रैः समुंदनस्वभा
वैरद्भिः ताभ्य आयाति ॥ यद्वा पूर्वं वृष्टिसहाय्याय गताए ते देवाः कृतकार्याः संतः पुनर्युष्मान कामयमानाः स्वस्वदेशं प्रतियांतीत्यर्थः ॥ ॥
इति द्वितीयस्य तृतीये पंचत्रिंशो वर्गः ॥ ॥ मानोमित्र इति द्वाविंशत्यृचं पंचमं सूक्तं दैर्घतमसं । तृतीयाषष्ठ्यौ जगत्यौ शिष्टास्त्रिष्टुभः अश्वस्य स्तूय ५०
मानत्वात्तेनोच्यते सा देवतानित्याय नेनाश्वो देवता ॥ अत्रानुक्रमणिका ॥ मानो द्व्यधिकाश्वस्तुतिस्तृतीयाषष्ठ्यौ जगत्याविति ॥ अश्वमेधे

105
1914

स्यमध्यमे हन्यधिगुप्रैष अध्रिगोनामौधमिति सिद्धापादुंशतिरस्य वक्तव्य इत्युक्तात पुरस्ताद्धेतन्मृक्तमधिपेत्तत्राणिस्तत्यानि भवंतीतिखंडे सूत्रितं
। अध्रिगोनामौधमितिसिद्धापादुंशतिरस्य वंक्तव्य इति वामानोमित्र इत्यावपेताति ॥ ॥ तत्र प्रथमा ॥ ॥ मानोमित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षामरुतः
परिख्यन ॥ यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ ...

भा० अ० २ अभिमुख्येन हविषा गमयिता अश्वो यां किं च शमनं तत आहुः पूर्वार्द्धे तेरसनम् पूर्वपदप्रकृतिस्वरत्वं च ॥ यद्वा आभिमुख्येनावयवप्राप्ति प्रस्तावोऽस्यते ॥ अ अ० ३
वयवत इति लिङ्ग अभ्याव्यासपसर्गवारित्यलोपः अग्निमिन्धान आग्नीध्रादि धिदुति मुकुवान ग्रावाभाः ग्राः क्रान्त्या ऽह्नानि निशा चक्र कृ कर्मण्यण् उत
५,१ अपि च वाजं ला प्रशास्ता म् विप्र इति मेधाविनाम शोभनमेधा यज्ञत्रस्याते ॥ अ स्तावा इति आतवि घाभिस्यत्र स्तोकाज्ञानेज्ञातविषावं इति प्रशा
सर्वविदः सर्वं वेदितुमर्हतीत्यर्थः तादृशं संभव प्रशंसनाभिध्यः स चानुत् कलिगुणलक्षकः एतत् संवेतन प्रसिद्धेन स्वरं कृतं न कस्मिनु अरणी यं कृ
तं न स्वकृतं न वा उच्चारसो एवाद्विनाम एवं संपाद्विनेन त्विष्टेन कर्मणा विष्टेन यज्ञेन वक्षणाः अभितो घृतकुल्यादीन प्रवहण स्वभावः प्रसिद्धा नदी
घा नदी वां आपृण ध्वं सर्वतः पूरयत यज्ञं सम्यक् निवर्त्य पश्चात् साधयत इत्यर्थः ॥ ॥ इति द्वितीयस्य तृतीये सप्तमो वर्गः ॥ ॥ यूपव्रस्का उत ये यूपवाहाः
चषालं ये अश्वयूपाय तक्षति ॥ ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ॥ यूपव्रस्काः यूपार्हवृक्षस्य छेत्तारः ऋत्विजः उत ये
च यूपवाहाः छिन्नस्य वोढारः ये च चषालं यूपस्योपरि स्थाप्यं यूपाग्रभागं चषालमाहुः ॥ ये अश्वयूपाय अश्वबन्धनयूपाय तक्षति इति वचनव्य
त्ययः साधु संपादयन्ति ये चार्वते अरणवते अश्वाय पचनं मांसपाकसाधनं काष्ठभाण्डादिकं संभरन्ति उतो अपि च नास्मान् संबन्धिनां तेषां त्विता अ
भिगूर्तिः संकल्पः सर्वथा करणीयमिति बुद्धिर् इन्वतु व्याप्नोतु ॥ इन्वतिर्व्याप्तिवचनः इन्वति नक्षतीति उक्तं ॥ यद्वा तेषां अभि
गूर्तिर् नोऽस्मान् अनुयागं साधु पारं प्रापय्य कृतेन यागेन यान्यवितस्यर्थः ॥ ॥अथ सप्तमी ॥ ॥ उप प्रागात् सुमन्मेऽधायि मन्म देवानामाशा उप वी
तपृष्ठः ॥ अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुं ॥ ॥ मन्म मननीयं फलं सुमत् उपप्रागात् उप प्रतनसमतस्य चमित्यर्थं
तियामिकः ॥ यद्वा स्वयमेव मामाधायितं तं मयि अधायि धीयते ॥ कृतः भूतोऽश्वो अगतः स च मया धृत इत्यर्थः ॥ किमर्थं वीतपृष्ठः साधु पाप
णेन प्राप्तपार्श्वभागः कान्तिमान् वा अत्यन्तं स्यादित्यर्थः ॥ तादृशोऽयं देवानामाशाः पूरयितुं उपगच्छतु ॥ यागार्थमेनं सुबन्धुं शोभनबन्धनमश्वः
देवाना माशास्यमानानां पुष्टे पोषणाय चकृम कुर्मः ॥ तं च विप्रा मेधाविनः ऋत्विजः क्रियायातीन्द्रियद्रष्टारः ॥ अन्वेषा विप्राः पश्चाद् अनुमदन्ति
अनुमोदन्तां सम्यक् कृतमिति परितुष्यन्तु ॥ ॥ अथाष्टमी ॥ ॥ यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ॥ यद्वा घास्य प्रभृ
तमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु ॥ ... दाम सदाम नैर्वतो या नरज्जुरस्ति ॥ शिरः शब्दादुपच्छन्दसीतियत् यच्च तद्भिन्न इति शीर्षण्या भावति रशनर्ः ॥ यद्वास्या
श्वस्य मुखे प्रभृतं प्रहृतं प्रक्षिप्तं तृणमस्ति घासो ऽर्थस्य संप्रसिध्यर्थः ॥ सर्वा सर्वाणि ताता तानि सर्वाण्यपि हे अश्व ते तव संबन्धीनि देवेष्व
स्तु संतु देवेषु मध्ये भवन्तु देवान् प्राप्नुवन्तु ॥ न च नश्यन्त्विति भावः ॥ अत्रापि युक्तानां सर्वेषां देवत्वं किल अश्वस्य तत्स्वामिनां निगमनीया ॥ ॥ अथ न
वमी ॥ ॥ यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ॥ यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ अश्व
स्य यन्मांसं संश्लिष्टमविता अश्ववालं रोपशंसनकाले यत्रेत्यालिप्तमस्ति रूपेणा ॥ शुमनसोऽस्ति स्वधितौ छेदनकाले
अवदानकाले चलित्वा समितुर्शमितुर्हस्तयोर्लिप्तमस्ति विज्ञानेनाकाले यच्च न खे भूतिसंता सर्वा तानि सर्वाणि हे अश्व ते तव संबन्धीनि ९३
देवेषु स्तुसंतोषार्थं संभवन्तु ॥ ॥ अथ दशमी ॥ ॥ यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ॥ सुकृता तच्छमितारः कृण्वन्तु
मेधं शृतपाकं पचन्तु ॥ उदरस्य संबन्धि यदूवध्यमीषज्जीर्णं तृणं पुरीषमपवाति अपगच्छति । यश्चामस्यापक्वस्य क्रविषो मांसस्य गन्धोऽस्ति

उत्पन्नोऽस्ति पाकस्य रसमयं यत्किंचिदूवध्यं अपक्वस्य च गन्धोऽस्ति आमगन्धोऽस्ति तत्सर्वं शमितारो विशसनकर्तारः सुकृता कृण्वन्तु सुकृतं दोष 105/1914
रहितं कुर्वन्तु उत अपि च मेधं यज्ञार्हं पशुरूपमवयवं शृतपाकं देवयोग्यपाकोपेतं यथा भवति तथा पचन्तु पितृमनुष्यादियोग्यमतिपक्वं मा पचन्तु किंतु सम
कृतं कुर्वन्त्वित्यर्थः ॥ ॥ इति द्वितीयस्य तृतीये अष्टमो वर्गः ॥ ॥ अथैकादशी ॥ ॥ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ॥ मा तद्भूम्या
माश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ॥ हे अश्व ते तवाग्निना पच्यमानाद् गात्रात् यद् द्रव्यं रूपं रसो वा यत्किंचिदभिधावति ॥ तथा निहतस्यानः
शोधयेण हतस्य ते यदङ्गं रसरूपं शूलमभिलक्ष्याव धावति निर्गच्छति तत्तदङ्गं भूम्यां माश्रिषत् आश्रितं माभूत् ॥ श्लेषः पुषादिर्वा इडः ॥ पाक स
मये तथा मा तृणेषु विशसनसमये दर्भेषु माश्रियत मापगच्छतु तर्हि तस्य तिलवृत् गच्छत्विति चेत् उच्यते ॥ तत् तादृशं उशद्भ्यः हव्यं हविः काम
यमानेभ्यो देवेभ्यो रातं दत्तमस्तु ॥ ॥ अथ द्वादशी ॥ ॥ ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ॥ ये चार्वतो मांसभिक्षामुपासत
उतो तेषामभिगूर्तिर्न इन्वतु ॥ ॥ पक्वं वाजिनमश्वं अश्वावयवं परिपश्यन्ति परितः पावनः शुध्यत्येतं ये ईं एनं सुरभिः शोभनगन्धोऽतो
निर्हर विश्व इत्यस्मभ्यं देहीत्याहुः ॥ यद्वा निःशोषणं देवेभ्यो हरेत्याहुः यतः सुरभिः अतो देवयोग्यमिति किंच ये चार्वतो मांसभिक्षामुपास
ते ॥ येन गः अस्यार्वतो अश्वस्य हुतशिष्टमांसयाचनां उपासते कांक्षन्ते ॥ उतो अपि च तेषामुक्तविधानामभिगूर्तिः अभितः उद्यमनं नोऽस्मा
निन्वतु प्राप्नोतु ॥ यथा स्माभिरश्व उपालभ्य रक्ष्यः स्यात् तथा यत्नानि कार्याणीत्यर्थः ॥ यद्वा यं मंत्रो देवपरो व्याख्येयः ॥ ये देवाः वाजिनं पक्वं प
रिपश्यन्ति कदा दास्यतीति विलंब्य्व दृष्ट्वा ये च सुरभिरिमं निर्हरेति ॥ शोधेणास्मभ्यं देहीत्याहुः ॥ ये चार्वतोऽश्वस्य मांसभिक्षामुपासते तेषामभि
गूर्तिर्न इन्वतीति तेषां उद्यमः सफलो भवत्वित्यर्थः ॥ ॥ अथ त्रयोदशी ॥ ॥ यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ॥ ऊ
ष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वं ॥ ॥ मांस्पचन्याः मांसपचन्याः पचतेरधिकरणे ल्युट् ॥ मांसस्य पचिपुरुषमोरित्यलोपः
उखायाः स्थाल्याः नीक्षणं पाकपरीक्षासाधनं काष्ठं तथा यान्यानि पात्राणि यूष्णो रसस्य क्वथितस्य आसेचनानि आसेचनसाधनानि तथा ऊ
ष्मण्या ऊष्माणं वारणार्हाणि पात्राणि ॥ तथा चरूणां पात्राणां मांसपूर्णानां अपिधानानि तत्साधनानि तथा अङ्काः हृदयादयवयवानां चलसाध
नाः वेतसशाखाः सूनाः अवदानसाधनाः स्वधित्यादयः एतमश्वं अश्वावयवं परिभूषयन्ति परितो भूषयन्ति ॥ स्वस्वव्यापारेण साधयन्ती
त्यर्थः ॥ भूष अलंकारे भौवादिकः ॥ ॥ अथ चतुर्दशी ॥ ॥ निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ॥ यच्च पपौ यच्च घासिं जघास सर्वा
ता ते अपि देवेष्वस्तु ॥ ॥ यत् निक्रमणं नितरां क्रमते यत्र तन्निक्रमणं स्थानं नितरां सीदन्त्यत्रेति निषदनं विवर्तनं विविधं वर्तनं उत्सन्ता
लुननं यच्च तत्सर्वं नाधिकरणे ल्युट् यच्चार्वतोऽश्वस्य पड्बीशं पादबंधनं यद्वा बंधनं पड्बीशं प्ररोगं अत्र सर्वत्र देवार्थस्याश्वस्य रोमादीनामपि नि
रर्थकत्वाभावात् तत्स्थानमपि स्वीकियते ॥ यद्वा निःपाप रावगंतव्यो आलंभसमये निष्क्रमणं निक्रमणादयोऽस्य संतीत्यर्थः ॥ यच्च
पपौ यदुदकं पपौ च तथा घासिं अदनीयं तृणादिकं जघास अभक्षयत् ॥ हे अश्व ते तव तानि सर्वाणि क्रमणादीनि देवेष्वस्तु संतु देवेषु व्या
प्नुवन्तु तान्यपि निरर्थकानि माभवन्त्वित्यर्थः ॥ ॥ अथ पंचदशी ॥ ॥ मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ॥ इष्टं वीतम
भिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वं ॥ ॥ हे अश्व त्वां धूमगन्धिः धूमेन व्याप्तोऽग्निः मा ध्वनयीत् धूमं दृष्ट्वा शब्दं माकार्षीदित्यर्थः ॥ अः

आ·अ·२ श्वस्य ग्रहणे प्रायश्चित्तविधानात् यद्युद्रे पच्यमानाश्वावयवानां धूमगंधिरग्निर्मा ध्वनयीत ध्वनीमा मलिनां इभंगस्यात् ॥ नोनयतीत्यादिनाच अ·३
इ प्रतिषेधः ॥ घ्रांत घ्रणातिरध्यभावः किंचाभ्राजंती त्वयंनाग्निसंयोगेन दीप्यमाना उखाली माभिविक्त मभिनतायाचीचलत ॥ नापातिशयेन मा
५२ नीनग्दीत्यर्थः ॥ आविक्त भयचलनयोः छांदसो विकरणस्य लुक् लुङि वासलोपश्चलोपीति सलोपः ॥ उखाली विशेष्यते ॥ जिघ्रिः जिघ्रतीतापेन ग्रां
गंधायादानं आद्रानमहनं इतिकिन प्रत्ययस्य तेन तादृशमश्वं इष्टं वृत्तं गूर्तमभिघूर्तं वीतं होमायानीतं अभिगूर्तं आभिमुख्येन प्रदानायोद्यतम ॥
यष्टुं इष्टं प्रयाजेन प्रीतं वीतं पर्यग्निकृतं अभिगूर्तं येषत्रामहरूत्याचुरक्षं ॥ वषट्कृतं वषट्कारेण देवसंस्कृतं एवंतं देवासो देवाः प्रतिगृ
णंति प्रतिगृह्णंति ॥ ॥ इति द्वितीयस्य तृतीये नवमो वर्गः ॥ ॥ अथ षोडशी ॥ ॥ यदश्वाय वासः उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै ॥ संदानम
र्वंतं पड्बीशं प्रिया देवेष्वा यामयंति ॥ अश्वाय संस्तृष्यमानाय अधीवासस्तु पर्याच्छादनवासे च वासः उपस्तृणंति स्वयंत आच्छादयंति ॥ सत्त्रआच्छाद
नविशेषात्मिकः ॥ तथास्मा अश्वाय यानि हिरण्यानि सौवर्णरजतकांस्यानि कल्पयंति तथा अर्वतं पद्ग्रथयोर्द्वितीया ॥ अर्वतोश्वस्य संदानं शि
रोबंधनं पड्बीशं पादयुग्मविटं पादबंधनं एतानि प्रियाः देवानां प्रियतमानि बालाले वाञ्छावितानि देव आयामयंति ॥ ॥ अथ सप्तदशी ॥ ॥
यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ॥ स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ ॥ महसा बलेन शूकृत
स्य शूकारानुकरणमतत्पश्चकारं कुर्वतस्तव सादे सादनेन गमने निमित्तभूते सातिसदे भवि घञ्न कृपालिन इत्येताद्रा त्वं दर्पेणोगमनं कुर्वन् शू
कारं कुर्वतस्ते त्वां पार्ष्ण्या वा कशया वा तुतोद व्यथयति तानि सर्वाणि अध्वरेषु यागेषु ब्रह्मणा मंत्रेण सूदयामि क्षरामि ध्मि ओहति
तनकत्यर्यामीत्यर्थः ॥ तत्र दृष्टांतः अध्वरेषु यागेषु हविषः हविरुत्यानि स्रुचेव स्रुचेवस्कबाद्यनाद् यंति हुत ॥ ॥ अथाष्टादशी ॥ ॥ चतु
स्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्य स्वधितिः समेति ॥ अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ ॥ वाजिनोश्वस्य देवबं
धोर्देवानां प्रियस्य चतुस्त्रिंशद्वंक्रीः वक्रीः पार्श्वास्थीनि स्वधितिः छेदनद्रव्याधनोसिः समेति सम्यगाच्छति छेदनाया इतरेषामजादी
नां षड्विंशतिरेव । षड्विंशतिरस्य वंक्रयः इति प्रैषात् ॥ विशसनस्य कर्तः अस्याश्वस्य गात्राणि शरीरावयवान् अच्छिद्राणि यथा भवंति तथा वयुना
वयुनानि प्रज्ञानानि वयुनमिति प्रज्ञानामसु वयुनं अभिख्याति तं नामसत्वात् कृणोत कुरुत तत्तनत्वतां पश्चिमतिलवादशाः हृदयाजिह्वा वक्षः प्रभृतीनि
प्रज्ञायमध्याच्छिनानि माकुरुतेत्यर्थः ॥ तदर्थं परुः परुः प्रतिपर्व प्रतिहृदया घवयवं अनुघुष्य उद्घुष्य इदमेव घोषमिति संख्यायैव विशस्त विशासनं कुर
त शासहिंसायां छांदसः शपोलुक् ॥ गात्रंगात्रमस्यानूनं कृणुतादिति प्रैषात् ॥ ॥ अथैकोनविंशी ॥ ॥ एकस्त्वष्टुरश्वस्या विशस्ता द्वा यंतारा
भवतस्तथ ऋतुः ॥ या ते गात्राणामृतुथा कृणोमि ताता पिंडानां प्रजुहोम्यग्नौ ॥ ॥ त्वष्टुः त्वष्टृदीप्तस्याश्वस्य विशस्ता विशसनस्य कर्ता एकः ए
क एव तस्मकः ऋतुः एतद्वलक्षितः कालः तास्य सर्वयामपि पर्यवसितत्वात् यद्वा ऋतुः किं शंकाभिशासनाय गतानाभिता ॥ तथा द्वा यं
तारा नियमायितारौ अहोरात्रे द्वौ द्यावापृथिव्यौ वा [illegible] इति प्रकृतिभावो [illegible] ॥ हे अश्व तेन [illegible] गात्राणाम ५२
ध्ये यायानि हृदया घवयवानि ऋतुथा कालेरणोमिचिनत्रिसंपादयामि पिंडानां मध्ये तानि तानि [illegible] प्रजुहोमि प्रकर्षे
ण हुतं करोमि ॥ ॥ अथ विंशी ॥ ॥ मा त्वा तपत्प्रिय आत्मापियंतं मा स्वधितिस्तन्व आ तिष्ठिपत्ते ॥ मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना

मिथू कः ॥ हे अश्व त्वा त्वां अपियंतं देवान्प्रति गच्छंतं प्रिय आत्मा भोगाय तत्त्वस्तव प्रियतनो देहो मा तपत् तप्तं मा कार्षीत् ॥ व्योमज्ञानेतायथा 107
माभूदित्यर्थः ॥ स्वधितिः शस्त्रं ते तव तन्वः तनूः अंगानि मा तिष्ठिपत् [illegible] कामार्थं तस्था पयतेर्लुङि [illegible] द्वित्वं ॥ तथा 1914
ते तव गात्राणि गृध्नुः [illegible] अविशस्ता विशसने अकुशलः [illegible] अतिहाय [illegible] नातिक्रम्य मिथु
मिथ्या व्यर्थं असिना छिद्राणि [illegible] मा कः मा कार्षीत् [illegible] मंत्रे घसेति च्लेर्लुक् गुणः हल्ङ्याभ्य इति तलोपः ॥ ॥ अथैकविं
शी ॥ ॥ न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ॥ हरी ते युंजा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ ॥ न वा उ नेतरव
उ एतन्म्रियसे वा [illegible] कार्यः [illegible] धारणे ने वेदानां [illegible] अतएव न रिष्यसि न हिंस्यसे
यथाहिंसाया अभावान् [illegible] उच्यते सुगेभिः पथिभिः शोभनगमसाधनैर्मार्गैर्देव
यानलक्षणैः ॥ देवान् इदेषि [illegible] अतो युक्तवाजिः कुःसाधनैरिति तत्राह ॥ ते त्वां [illegible] हरी एतन्नामानौ [illegible] युक्ता
अभूतां भविष्यतः [illegible] हरी [illegible] पृषत्यौ [illegible] अभूतां युक्तौ भविष्यतः ॥ एष
यामरतामिति [illegible] ॥ युक्ताविति [illegible] समासः इति नुम ॥ [illegible] तथा रासभस्य [illegible] धुरि वर्तनि यु
क्तो वाजी अश्वः उपास्थात् [illegible] गच्छत् [illegible] इत्यर्थः ॥ यद्वा [illegible] अत्र [illegible] तानि [illegible]
हनानि वदंति ॥ उपाकरणकाले [illegible] कुर्यात् । तद्यानि [illegible] यजमानयाचनार्थो भवति । तथा च [illegible]
[illegible] ॥ ॥ सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिं ॥ अनागास्त्वं नो
अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥ वाजी अश्व आलभ्यमानो नोस्माकं सुगव्यं शोभनगोसमूहं [illegible] विश्वापुषं रयिं विश्व
स्य पोषकं धनं कृणोतु करोतु ॥ [illegible] ॥ यद्वा [illegible] सर्वत्र गोरजादि
[illegible] ॥ तथा स्वश्व्यं शोभनाश्वसमूहयुक्तं ॥ तथा पुंसः पुमान् पुत्रः
[illegible] पुमपत्यसाधारणः अतः पुमपत्यानीत्यर्थः ॥ यद्वा [illegible] पुत्रान् [illegible] पुमपत्यानि च
त्यर्थः ॥ उत अपि च विश्वापुषं रयिं विश्वपोषणसमर्थं धनं किंच नोस्मान् अदितिः अदीनोश्वः अनागास्त्वं कृणोतु सर्वतो निष्पापत्वं
करोतु ॥ [illegible] पापस्याभावे असंभवाद् पापत्वं प्रार्थ्यते । किंच हविष्मान् हविर्भूतावयवोपेतो नोस्मा
कं क्षत्रं बलं [illegible] वनतां संभजतां करोतु ॥ ॥ इति द्वितीयस्य तृतीये दशमो वर्गः ॥ ॥ यदक्रंद इति त्रयोदशर्चं सप्तमं सूक्तं दीर्घ
तमसं त्रैष्टुभं अश्वस्य स्तूयमानत्वात् [illegible] यदक्रंदः [illegible] अनुक्रमणिका ॥ अश्वमेधकर्मण्यमेधे [illegible] उपाकरणायाः [illegible]
[illegible] स्तौति । तथा च [illegible] उपाकरणाय यदक्रंद [illegible] स्तौत्य प्रणु
[illegible] ॥ ॥ तत्र प्रथमा ॥ यदक्रंदः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि
जातं ते अर्वन् ॥ ॥ हे अर्वन् अरणीकुशलाश्व ते तव जातं जन्म [illegible] उपस्तुत्यं उपेत्य सर्वैः स्तोतव्यं ॥ [illegible]

आ·अ·२ एककं कथं स्तुत्यत्वमिति उच्यते॥ यद्यस्मात् समुद्रात् अंतरिक्षनामैतत्॥ उदकसमुदनापादानात् यक्षगंधर्वादिसंमोदनाधिकरणात् अंतरिक्षात् अ·३
५३ प्रथमं पूर्वं जायमानः उद्यन् यद्वा समुद्रात् आदित्यः समुदनात् उत्पन्नस्तस्मात् जायमानः सूर्यरश्मिर्वं स वाजिरत्न अभिवक्ष्यमाणत्वात्। उतवा
अथवा पुरीषात् सर्वकामानां पूरकात् उदकात् प्रथमं जायमानः सन्नाद् दृश्यस्त्वं यद्यस्मात् अक्रंदः महाशब्दमकरोः यजमानमनुग्रहीतुं किंचिते
पतन साधनौ पक्षौ श्येनस्य पक्षाविव तौ यथा तौ प्रपतनसाधनौ तादृशाविव इत्यर्थः॥ तव बाहू इव तौ यथा वेगवंतौ तादृशाविव इत्यर्थः॥ य
स्मादेवं तस्मात् तत् जन्म स्तुत्यमित्यर्थः॥ ॥अथ द्वितीया॥ ॥ यमेन दत्तं त्रित एनमायुनगिंद्र एनं प्रथमो अध्यतिष्ठत्॥ गंधर्वो अस्य रशना
मगृभ्णात् सूराद् अश्वं वसवो निरतष्ट॥ ॥ यमेन नियामकेनाग्निना दत्तमेनमश्वं त्रितः पृथिव्यादिषु त्रिषु स्थानेषु वर्तमानः स्तीर्णतमो वा
वायुः अयुनक् रथे योजितवान् किंचेममश्वं इंद्रः प्रथमः प्रथम इति मुख्यनाम अध्यतिष्ठत्॥ अधितवान् अस्य गंधर्वः सोमः सोमेन सम
यामि एक इति वक्ष्यमाणत्वात् स चास्याश्वस्य रशनां नियमनरज्जुं मगृभ्णात्॥ अग्रहीत् ईदृशोऽश्वः कुतः समुत्पन्न इति चेत् उच्यते॥ हे
वसवः रश्मयो यूयं सूरात् आदित्यात् अश्वं एवं महानुभावं निरतष्ट निः तक्षणेन साधु संपादितवंतः यद्वा वसवः अष्टौ एवगणा मादयः परात्
श्यते इव सवः स्वस्वव्यापारेण सर्वस्याच्छादयितारो यूयं सूरात् आदित्यात् अश्वमेनं निरतष्ट अत स्तननिरित्येष समित्येतस्य स्थाने तक्षतिः कृ
तातिकर्मा स च क्रियासामान्यवचनः॥ अतो निरित्याधारणे वर्तते सम्यग्धारितवंत इत्यर्थः॥ न सेलुंगि छांदसः शपो लुक् स्कोः संयोगा
द्योरिति कलोपः॥ ॥अथ तृतीया॥ ॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन॥ असि सोमेन समया विपृक्त आहुस्ते त्रीणि
दिवि बंधनानि॥ ॥ हे अर्वन् त्वं यमः असि नियमीता अग्निरसि तेन दत्तत्वात् तद्रूपस्य पदं तौ तथा आदित्योसि सूरान्निरतष्टत्वात् तथा गुह्येन
व्रतेन गोपनीयेन दुर्ज्ञेन रूपेण वा कर्मणा सर्वं व्याप्तिरूपेणेत्यर्थः॥ तेन त्रितः त्रिषु स्थानेषु तायमानो वायुरसि त्रितयमायुनगिति युक्तत्वात् त
द्रूपत्वं अथवा गुह्येन व्रतेन गोपनीयेन कर्मणा यागादिसाधनरूपेण त्रितः त्रित एतन्नामक ऋषिः असि किंच हे अश्व त्वं सोमेन समया समीप विप्र
क्तोसीत्येष समित्यर्थे संपृक्तोसि तेन गृहीतत्वात्॥ हे अश्व एवं रूपस्य तव यद्दिवि द्युलोके आदित्ये वा वर्तमानस्य त्रीणि बंधनानि उत्पत्तिकार
णान्याहुः पुरा विद्वांसः वसवः आदित्यश्च स्थानं चेति त्रीणि॥ ॥अथ चतुर्थी॥ ॥ त्रीणि त आहुर्दिवि बंधनानि त्रीण्यप्सु त्रीण्यंतः समुद्रे॥ उतेव
मे वरुणश्छंत्स्यर्वन्यत्रा त आहुः परमं जनित्रं॥ पूर्वोक्तदिवि त्रीणि बंधनानीयुक्तं इदानीं स्थानत्रये व्यापि त्रीणि बंधनानीत्याह॥ हे अर्वन् तव दि
वि बंधनानि त्रीण्याहुः॥ तानि पूर्वमुक्तानि अप्सु अनुष्ठीयमानत्वात् मूलकारणत्वात् अप्शब्देनाभिधीयते पृथिव्यां त्रीणि बंधनान्याहुः॥ अंतरिक्षं वा
अमिति त्रीणि॥ तथा समुद्रे अंतः समुद्रमध्ये समुद्रवणात् दपादानात् समुद्रमंतरिक्षं तस्मिंस्त्रीणि रहस्यत्वानि निमित्तानि मेघविद्युत्स्तनितानि
ति उत अपि च इव त्वं अर्थः अपि च हे अश्व वरुण आपस्य वारकः फलस्य आवर्जयिता वा त्वं मे मह्यं प्रति कथयसि किं कथयसीति चेत्॥ उच्यते त
तव परमं जनित्रं निरतिशयं जन्म जनेः शनादिकं इत्यस्य यः॥ यत्र येषु त्रिषु स्थानेषु आहुः कथयंति॥ यद्वा यत्र यस्मिन्नादित्ये परमं जनि
त्रमाहुः सूरादश्वं वसवो निरतष्टेत्युक्तत्वात्॥ तादृशं प्रशस्यं जन्म फलसाधनभावेन कथयसीत्यर्थः॥ ॥अथ पंचमी॥ ॥ इमा ते वाजि ५३
न्नवमार्जनानीमा शफानां सनितुर्निधाना॥ अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षंति गोपाः॥ ॥ हे वाजिन् अश्व ते तव धीत्य वमार्जना

न्यंगसंशोधकानि स्थानानि इमानि इमानि उक्तानि फलोत्पादकानि किंच सनितुर्यागस्य संभक्तुस्तव इमाइमानि शफानां निधानानि स्थानानि संचारप्रदेशा 109
इत्यर्थः॥ किंचात्र यत्र तव भद्राः भंदनीयाः कल्याणरशनाः योक्तादिषु संयुक्ताः रज्जूरहमपश्यं एषु कल्पस्थानेषु पश्यं रशनाविशेष्यंते योगोपायगोप 1914
यितारः रशनाः ऋतस्य सत्यभूतस्य यज्ञसाधनस्य वाश्वस्य कर्मणि यज्ञीकृतमभिरक्षंति अभितः पालयंति। ता अपश्यं हे वाजिन् अयि इमानि तव मा
र्जनानि अंगप्रक्षालनसाधनानि उदकानि इमानि सनितुस्तव शफानां निधानानि देवयजनभूमयः संचारप्रदेशा वा अवाप्तेन देवयजनस्थाने या
रशनाः गोपास्तव पालयितारो गोसाश्व पुरस्तात् कृतिः वा कृतस्य संबंधिन्या अभिरक्षंति ता अपश्यं॥ ॥ इति द्वितीयस्य तृतीये एकादशो वर्गः॥
॥ ॥अथ षष्ठी॥ ॥ आत्मानं ते मनसारादजानामवो दिवा पतयंतं पतंगं॥ शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ हे अश्व तेतव
आत्मानं शरीरं मनसा अस्मदीयेन प्रकृष्टगमनवता चेतसा आरात् अतिदूरस्थितं अजानां जानामि अतिव्याप्तं भावयामीत्यर्थः॥ कथं अवः अव
स्तात् समर्थात् इमः भूमितः दिवा अंतरिक्षेण मार्गेण पतंगं आदित्यं पतयंतं गच्छंतं व्याप्नुवंतं यद्वा यतो दिवा अंतरिक्षेण मार्गेणादित्यं वा
पतयंतं पतंगमादित्यं अवः व्याप्नोषि॥ अतो व्याप्तं जानामि किंच शिरः अपश्यं शिर एवं पश्यामि॥ कथं सुगेभिः शोभनगमनसाधनैः अरे
णुभिः अपांसुभिः पथिभिर्मार्गैः आदित्यमंडलादित्यपरिभूतैः सत्यलोकमार्गैरित्यर्थः॥ तत्र प्रतिबंधाभावान्मार्गेणामुक्तरूपत्वं॥ तथाविधै
रेव॥ जेहमानं दुर्गस्थानुयन् पतत्रि पततनवतं शिरो अपश्यं भावयामि एवं लोकत्रयव्याप्तं भावयामीत्यर्थः॥ यद्वात्मानं मयं भावया
मि मनसा दिवा आतनात्मः कनांतरिक्षमार्गेण दिवः सकाशात् अवः अवस्तात् अथा प्लुत्य पतयंतं यागदेशं प्रति व्याप्नुवंतं अत एव पतंगं
पतनशीलं धः पतनादित्यसदृशं वा एवं तव शिरो भावयामीत्यर्थः॥ शिरश्चेन्मम पश्यं तत्र रूपे देवयजनमार्गे जेहमानं यस्त यज्ञं व्याप्नुवंत
पतत्रि शीघ्रगामि शिरः पश्यामि॥ यद्यपि आत्मशब्देन सशिरस्कं शरीरमुक्तं तथापि देहात् पूर्वं शिरसो दृश्यमानत्वात् पृथगभिधीयते॥ ॥
अथ सप्तमी॥ ॥ अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः॥ यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः॥ ॥
एवं गमनानंतरं हे अश्व ते तवाजसं॥ उत्तरूपेणात्कृष्टतमं रूपं अत्रास्मिन् यागदेशे अपश्यं पश्यामि किं कुर्वन् गोभूम्याः पादे स्थाने देवयजनप्रदेशे
आज्ञि धावनस्थाने वा॥ इषः कर्माणि वा॥ उपद्रव्यमाणमनं अन्नानि वा सर्वतो जिगीषमाणं तु मिच्छंतं हे अश्व ते तव मर्तो मनुष्या भोगं भाग
धेयं भन्वानट् अशाति तीतिक मानुक्रमेण समीपं गमयति आदित् अनंतरं तदानीमेव तदनुग्रहात् वा कं च मह अयसिष्ठः महात्मस्यैव ग्रसि
त तमो प्रकाशितं तमः सन् ओषधीः लान्यजीगाः निरति श्रस्मयसि महानुभावोपि त्वं लोकिका श्ववत् तु स्तनपुरः पणदीयमानं स्वल्यं भक्षं अ
नुग्रहात् स्वीकरोमीत्यर्थः॥ ॥अथाष्टमी॥ ॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोनु भगः कनीनां॥ अनु व्रातासस्तव सख्यमीयुरनु देवा
ममिरे वीर्यं ते॥ ॥ इदानीं एतस्य लोकस्यापि मुख्य इति प्रतिपाद्यते हे अर्वन् गमन शीलाश्व त्वा त्वामनु अनुसृत्य रथो गच्छति ततः पुरता
श्वस्य गमनात् तथा मर्यो मर्त्यः त्वा त्वामनु जात्यकवचनं॥ अनु गावः गावोपि त्वामनु गच्छंत्येति॥ तथा कनीनां कन्यकानां स्त्रीणां भगो भाग्यं सौं
दर्यं च इत्यनुतथा व्राता सोव्राताः संघात्मका अन्ये अश्व महान्तः तवानुद्देवगणा व्रातामनु अनुसृत्य तवैवीर्यं वीरकर्म मिरे अत्या माति अ
तः सर्वोपि त्वामनु सरंतस्तं तु सर्वस्य श्रेष्ठ इत्यर्थः॥ ॥अथ नवमी॥ ॥ हिरण्यशृंगोयो अस्य पादा मनोजवा अवर इंद्र आसीत्॥ दे

आ०अ०२ नाइंद्रस्यहविरयमायन्योअर्वंतंप्रथमोअध्यतिष्ठत॥ ॥अयमश्वोहिरण्यशृंगः हिरण्मयीयश्शृंगोच्चा उन्नतशिरस्कः हृदयरमणशृंगस्तादृशी अ०३
यशिरोरुहावास्यपादाअयःअयोमयाः अयःपिंडसदृशाइत्यर्थः॥ तथामनोजवाः मनोवेगाः अथावेनहिंद्रश्चितोपर्णदृढासामव्याश्वस्यसाम
५४ र्थ्यंप्रतिमनोवेगइंद्रोप्यवरासीत्आसीत्किंचास्याश्वस्यहविरर्थं हविषाअदनंभक्षणंस्वार्थिकोयत् अदनयोग्यंहविर्वाअपश्यदेवाःम
देवाः आयन्प्रापुः यइंद्रोअर्वंतंप्रथमः प्रथमभावीसन्अध्यतिष्ठत्अधिष्ठितवान्सइंद्रोविद्यमानस्वकीयत्वेनहविर्भावेनगृहीतवानित्यर्थः॥ इंद्रएनं
प्रथमोअध्यतिष्ठदितिश्रुतं॥ ॥अथदशमी॥ ॥ईर्मांतासःसिलिकमध्यमासःसंशूरणासोदिव्यासोअत्याः॥ हंसाइवश्रेणिशोयतंतेयदा
क्षिषुर्दिव्यमज्ममश्वाः॥ ॥अत्राश्वसमूहस्तुतिद्वारेणयंतृस्तूयते॥ ईर्मांतासः ईरिताः अंतायेषांतेतथोक्ताः विरलांताइत्यर्थः॥ सिलिकमध्य
मासः संसृताः संगतामध्यप्रदेशायेषांतेतादृशाः॥ तथासिलिकमध्यमासः संसृतः संगतः सहतोमध्यभागोयेषांतेतादृशाः पुष्टत्वात्स्थो
दरत्वाः संलग्नमध्याइत्यर्थः॥ जघनपुरोभागावपेक्ष्यसिलिकमध्यमाइत्युक्तं॥ समित्ययमुपसर्गोयतंतइत्याख्यातेनसंबंधयितव्यः॥ शू
रणासः विक्रमशीलाः दिव्यासोदिविभावः अत्याः अतनशीलाः सघष्प्ययमश्वनामतथाप्यश्वत्वस्यवक्ष्यमाणत्वात्अयंयौगिकोवग
तव्यः॥ ईदृशाः अश्वाः श्रेणिशः एकव्यापाराणांबहूनांसमूहः श्रेणिरित्युच्यते श्रीः प्रधावनायश्रेणिशः पंक्तीभूयसंयतंतेसम्यक्प्रयत्नं
कुर्वंति॥ तत्रदृष्टांतः॥ हंसाइवयथाश्रेणिभूत्वाईर्मांतासयाद्युक्तरूपाः संतः अंतरिक्षेगमनायप्रयतंतेतद्वत्॥ कदाइत्युच्यतेयत्यदाअश्वाः
दिव्यंअज्मंगमनगंतव्यंवामार्गं आक्षिषुः व्याप्नुवंतितदा॥ अयंमंत्रोयास्केनैवंव्याख्यातः ईर्मांतासः पृथ्वंतावासिलिकमध्यमाः संसृतमध्य
माः संसृतमध्यमाः शीर्षमध्यमावापिवाशिर आदित्योभवतितदनुशेतेसर्वाणिभूतानिमध्येचैषांतिष्ठतीदमपेतरुष्ठिरएतस्माद्देवस
माश्रितान्येतानींद्रियाणिदिव्यासोदिविभवाः शूरणासोभवंतिअत्याः शूरःशवतेर्गतिकर्मणोदिव्यादिविजाअत्याअतनाः हंसाइवश्रेणिशोयततेहं
साहंतेर्घ्नंत्यध्वानंश्रेणिशइतिश्रेणिः श्रयतेः समाश्रिताभवंतियदाक्षिषुर्यदायुःदिव्यमज्ममजनिमाजिमश्वाइति॥ ॥इतिद्वितीयस्यतृती
येद्वादशोवर्गः॥ ॥अथैकादशी॥ ॥तवशरीरंपतयिष्ण्वर्वन्तवचित्तंवातइवध्रजीमान्॥तवशृंगाणिविष्ठितापुरुत्रारण्येषुजर्भुराणाचरं
ति॥ ॥हेअर्वन्तवशरीरंपतयिष्णुपतनशीलंव्यापइत्यर्थः॥ तथातवचित्तंमनोवातइवध्रजीमान्ध्रजीप्रगमनवायुरिवतद्वत्ध्रजीप्रगमना
नुकूलमित्यर्थः॥ किंचतेतवशृंगाणिशिरसोनिर्गताः शृंगस्थानीयाः केशाः पुरुत्रापुरुषुबहुषुप्रदेशेषुविष्ठिताविष्ठितानिविविधंस्थितानि
किंचतेएववारण्येषुजर्भुराणामनोहराणिपूर्यमाणानिवाएवंभूताः केशाश्चरंति॥ यद्वाश्वस्यशृंगाभवात्तद्दुर्ंनतानितेज्ञांसिपरिगृ
ह्यंते॥ आश्वमेधिकमध्यमेहनिअग्निष्टोमेमानोमित्रइतिसूक्तानंतरमुपप्रागाच्छसनमितिद्वेऋचौयांसमीयेसत्रितंच उपप्रागाच्छसन
मितिद्वेइति॥ ॥अथद्वादशी॥ ॥उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनसादीध्यानः॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोयंतिरे
भाः॥ ॥अयमर्वाअरणकुशलोवाजीअश्वःशंसनंस्थानंउपप्रागात्उपप्रैति॥ किंवास्यपुरः पुरस्तान्नाभिर्नहनंबंधुभूतइत्यर्थः॥ यद्वास्य ५४
बंधनस्थानीयः अविमुक्तत्वात्एवंभूतोजः पुरोनीयतेपुरतः प्राप्यतेअनुअनुसत्यपश्चात्अनंतरंअत्रचयच्चयुभयोः पर्यवसितार्थ
एकएवतथाप्यज्ञाश्वोभयानंतर्यलप्रकरणापद्रइयं॥ यद्वाअश्वितिक्रियासंबध्यतेकवयः अनूचानाः रेभाः॥ स्तोतारक्रतिज्ञायंतिगच्छ

तियथाभनूचानाक्वयइतिश्रुतेः॥ यद्वाकवयरेतिमेधाविनामकविर्मनीषीतिनंनामसुपठितानरेभइतिस्तोतृनामरेभःजरितेतितत्रपाठात्॥ ॥ 111/1914
अथत्रयोदशी॥ ॥उपप्रागात्परमंयत्सधस्थमर्वाँअच्छापितरंमातरंच॥ अद्यादेवाञ्जुष्टतमोहिगम्याअथाशास्तेदाशुषेवार्याणि॥ ॥अर्वाअर
णकुशलोयमश्वः उपप्रागात् उपगच्छतिकिंपरमंउत्कृष्टंसधस्थंसहस्थानंसुकृतिभिरेकत्रनिवासयोग्यंस्वर्गाख्यंयद्स्तितत्किमर्थंपितरंमा
तरंचअच्छआभिमुख्येनप्राप्तुंहअश्वोयस्मिन्कालेहुतवयः श्रीततमः स्वर्गंप्राप्नोमीतिहर्षयुक्तइत्यर्थः॥ एवंभूतोदेवानगम्याः गच्छेर्देवान्हि
गम्यः यज्ञउपयुक्तस्ययशोः स्वर्गंप्रासेः सगर्भ्योनुः सन्वासपृथ्व्यइत्यादिमंत्रांतरप्रसिद्धेवर्तितनार्थः॥ अथानंतरंयजमानः आशास्तेकुसमेरा
रूपहविर्दृतवतस्वस्मैकानिवार्याणिवरणीयानिधनानि॥ यद्वापुरुषस्यध्यत्वः आशास्तेप्रार्थयंतेयजमानार्थं॥ ॥इतिद्वितीयस्यतृती
येत्रयोदशोवर्गः॥ ॥अस्यवामेतिद्विपंचाशदृचमष्टमंसूक्तंदैर्घतमसंअत्रेयमनुक्रमणिका॥ अस्यद्विपंचाशदलपस्तवंत्वेतत्संशयोथाप
नप्रश्नप्रतिवाक्याभ्यसाप्रायेणज्ञानमोक्षास्तरप्रशंसाचपंचपादंसार्कंज्ञानांयद्वायत्रयंसाधिंकेसमाद्धर्गभौगौरीरितिजगत्यएतदेतंतुविश्वदेवंत
स्याः समुद्राइतिवाचः समुद्राआपोवास्तरंसाप्रस्तारपंक्तिः शकमयमितिशकधूमउक्षाणंपृश्निमितिसामस्त्रयःकेशिनइत्याग्निः सूर्योवायुश्चकेशि
नश्चत्वारिवाग्वाचांद्विमित्रंसोवोद्वादशारितिसंवत्सरसंज्ञकालचक्रवर्णनंयस्त्रसरस्वत्येयज्ञेनसाध्यंत्यः परानुष्टुपसौरीपर्जन्याग्नेदेवतावांत्यास
रस्वत्त्तेसर्पायवेति॥ अत्रस्तुत्यबहुत्वेनस्तुतिभागस्याल्पत्वात्दिदंसूक्तमल्पस्तवनं।नसक्रांतरबहुस्तवनं॥ इदमेवबलक्षणंतुद
चनद्यस्तेअस्मिन्सूक्तेप्रायेणसंशयोत्थापनादयोबहवोर्थाः प्रतिपाद्यते॥ अचिकित्वाँश्चिकितुषइत्यनयासंशयउत्थाप्यते॥ पृच्छामित्यत्रप्र
श्नः प्रतीयतेइयंवेदिरित्यत्रप्रतिवचनंयाईचकारत्यादिनाज्ञानप्रशंसाप्रतिपाद्यते॥ अपश्यंगोपामित्यादिनाब्रह्मसाक्षात्कारकृतस्यप्रशंसानक्ष
रतागम्यंरंब्रह्मद्वाकपर्णेत्यादिनातस्यप्रशंसापंचपादंपितरंसार्कंज्ञानांसमर्थयदायत्रअधिअयंसाधिंकेसमाधंगर्भागौरीमिमायेतिषट्कज
गत्यः समानमेतदित्यनुष्टुप्तस्याः समुद्राइतिप्रस्तारपंक्तिरिति॥ मत्रार्थः॥ अनुक्रमण्यामप्युक्तं॥ आद्याचतप्रस्तारपंक्तिः निसाअनादेश
परिभाषयात्रिष्टुभः॥ गौरीर्मिमायेत्येतदंतानांविश्वेदेवाःदेवतास्याः समुद्रइत्यस्याः पूर्वार्धस्यवाग्देवताउत्तरार्धस्यआपः॥ शकमयमिति
तस्याः पूर्वार्धस्यशकधूमः उक्षाणंपृश्निमित्युत्तरार्धस्यसोमोदेवतात्रयः केशिनइत्यस्याः अग्निसूर्यवायवः चत्वारिवागित्यस्यावाग्देवताइ
द्रंमित्रंवरुणंरकमित्यानमित्येनसूर्यंदेवदाद्वादशप्रधयइत्यस्याः संवत्सरात्माकालोदेवतायस्तेस्तनइत्यस्याः सरस्वतीयज्ञेनेत्यस्याःसा
ध्यादेवताः समानमेतदित्यस्याः सूर्यः पर्जन्यावाग्नयोवादेवतायस्तेस्तनइत्यस्याः सरस्वती।यज्ञेनेत्यस्याः साध्यादेवता॥ समानमेतदि
त्यस्याः सूर्यः पर्जन्योवादेवतादिव्यंसुपर्णमित्यस्याः सरस्वान्सूर्योदेवतावा॥ सूक्तविनियोगः शौनकआह॥ स्तोमंस्तुत्वाद्विरो
मोदाग्निराचोपपातिः शुचिः॥ सतांतलप्रास्यवामीयंशिवंमुच्यतेकिल्बिषादिति॥ महाव्रतेनिष्केवल्येविश्वेदेवंनिविद्धानीयद्विप्रतीकंत्रास्यवा
मस्येत्यादिकंचत्वारिंशत्त्वंचप्रथमंप्रतीकंपंचमारण्यकसूत्रितं॥ अस्यवामस्यपलितस्यहोतुरितिसलिलस्यदैर्घतमसएवत्वचत्वारिंशतेति॥
॥ ॥तत्रप्रथमा॥ ॥अस्यवामस्यपलितस्यहोतुस्तस्यभ्रातामध्यमोअस्त्यश्नः॥ तृतीयोभ्राताघृतपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रं
॥ ॥अत्राद्वितीयपादेतद्व्यस्कृतेः प्रथमपादेप्रतिविभक्तीयोग्यक्रियार्थंसंबध्यतेअध्याहार्यः यायंदिविद्योततेतस्यास्यपलित

स्य पालयितुः प्रकाशरश्म्यादिप्रदानेन पालकस्य तथा योयं दिवि द्योतते तस्यास्य होतुः ह्वातव्यस्य आह्वातुर्वा ईश्वरस्य आदित्यस्य मध्यमो मध्यमस्थानो म
ध्ये भवो वायुरुच्यते आदित्याग्नी अपेक्ष्यास्य मध्यमत्वं स चाश्नः सर्वत्र व्याप्तः नहि वायुरहितः कश्चित्प्रदेशोस्ति तादृशो भ्रातास्ति भ्रातृस्थानीयो भ
वति यथा लोके भ्राता पित्र्यर्जितधनस्य भागं हरति तद्वन्मध्यस्थानमंतरिक्षलोकं हरतीति वा तद्वर्थं रश्मिभिर्हृतानां भौमानां रसानां हरणाद्वा भ्रा
तेत्युच्यते पित्र्येण धनेन स्वार्जितेन वा भक्तव्यो भवतीति भ्राता॥ मध्यमो वायुरपि तस्य यथेरसैर्भक्तव्यो भवति। किंच घृतपृष्ठः घृतमाहरति लक्षणं
पृष्ठे यस्य तादृशो भ्राता तस्य तृतीयोस्ति भवति॥ त्रयाणां पूरणस्तृतीयः। उक्तोभयापेक्षया तृतीयत्वं भ्रातृत्वं प्रतिपादितप्रकारेणात्रापि द्रष्टव्यं
रात्रौ सवितृलक्षणो भागस्य हरणात् दिवा स्वकीयलक्षणो भागस्य तदर्थमेव भक्तव्यत्वाद्वा भ्रातृत्वं॥ अत्र एषु भ्रातृषु मध्ये पुरोदेशे वा विश्पतिं
विशां प्रजानां पालयितारं सप्तपुत्रं सप्तरश्मिपुत्रोपेतं। ऐतिहासिकपक्षे अदितिः पुत्रकामेति प्रस्तुते मित्रावरुणादिसप्तपुत्रेष्वस्यादि
त्यस्य सप्तमपुत्रत्वं ईदृशं महानुभावमादित्यमपश्यं अद्राक्षं भावनायात्मत्वेन साक्षात्कारोमीत्यर्थः॥ तद्योहं सोसौ योसौ सोहमिति श्रु
तेः॥ एवं वा अस्य वामस्य विश्वस्योद्गिरितुः स्वपुरित्यर्थः॥ पलितस्य पालयितुः स्वस्रष्टजगत्पालनशीलस्य होतुरादातुः स्वस्मिन्संहर्तुरित्यर्थः॥
परमेश्वरस्य सत्यादिकत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धं॥ तस्य तादृशस्य परमेश्वरस्य भ्राता तत्कार्यद्वारा तदंशभूतः सूत्रात्मा मध्यमः स
र्वत्र मध्ये वर्तमानोखिलजगद्धारकत्वेन वर्तते॥ स चाश्नः व्यापनशीलः वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सं
दृब्धानीति श्रुतेः वक्ष्यमाणविराडपेक्षया वास्य मध्यमत्वं॥ किंचास्य परमेश्वरस्य तृतीयः घृतपृष्ठः घृतमित्युदकनाम तेन तत्कार्यं श
रीरमुच्यते तदेव पृष्ठं स्पर्शकं वास्य स तादृशः एवं संस्कृतेति निरुक्तं॥ यद्वा प्रदीप्तपृष्ठः एवं च स्थूलशरीरोपलक्षकः प्रकाशितश
रीराभिमानीत्यर्थः॥ न त्वयं सूक्ष्मशरीराभिमानीस्वात्मवत्स्पर्शनाविषयो भवति॥ अत्र एषु मध्ये विश्पतिं विशां प्रजानां पतिं उपलक्षण
मेतत्। सर्वस्य पतिमित्यर्थः॥ सर्वस्य पतिः सर्वस्येशान इति श्रुतेः सप्तपुत्रं सप्तलोकाः पुत्रा यस्य तादृशं सप्तमाययास्रष्टसर्वलोकमित्यर्थः
अपश्यं पश्ययं साक्षात्कारोमीत्यर्थः॥ अयमर्थः॥ स्वाधीनमायाजगत्कारणभूतः परमेश्वर एक एव तत उत्पन्नौ स्थूलसूक्ष्मशरीराभिमानिनौ
द्वौ विराट्सूत्रात्मानौ तेषु मध्ये द्वयोः साक्षात्कारेण मोक्षाभावात् सत्यादिकारणं परमेश्वरं ज्ञेयत्वेन प्रसिद्धं श्रवणमननादिसाधनेन सा
क्षात्कारोमीत्यर्थः॥ एवमुत्तरत्राप्यध्यात्मपरतया योजयितुं शक्यं तथापि प्रकरणविरोधात् स्तुतिभिः भजनीयस्य सत्त्वाभावाद् ग्रंथविस्तरभ
याच्च न लिख्यते॥ यत्र द्वा सुपर्णेत्यादौ स्फुटमाध्यात्मिकोप्यर्थः प्रतीयते तत्र तत्र प्रतिपादयिष्यामः॥ अयं मंत्रो यास्केन व्याख्यातः॥ अस्य वाम
स्य स्तुतिभिः भजनीयस्य पलितस्य पालयितुरित्यादिना तद्व्याख्यानमत्रानुसंधेयं॥ ॥अथ द्वितीया॥ ॥सप्त युंजंति रथमेकचक्रमेको अ
श्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः॥ ॥एकचक्रं एकस्मिन्नंगोपेतं यद्यपि त्रीणि चक्राणि तथापि तेषामे
करूपत्वादेकचक्रमित्युच्यते॥ रथं हरणस्वभावं सूर्यस्य वेसंधिनं सप्त एतत्संख्याका अश्वा युंजंति अनुबध्नंति वहंत्यहोरात्रनिर्वाहाय किंच स्तुतः ५५
सप्तनेत्याह॥ एको अश्वः सप्तनामा॥ एक एव सप्ताभिधानः सप्तधा वहन् प्रकारो वा एवं वायुः सप्तरूपं धत्वा वहतीत्यर्थः॥ वाय्वधीनत्वात्तंतरि
क्षसंचारस्य॥ एवं चक्रमित्युक्तं कीदृशं तदित्यत आह॥ त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतं अजरं अमरणधर्मकं अ

113/1914

शिथिलं पुनस्तदेव विशेष्यते॥ यत्र यस्मिन् चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्वाणि भूतजातानि अधि आश्रित्य तस्थुः तिष्ठंति यद्वा एक
चक्रं एकचारिणं असहायेन संचरंतं रथं आदित्यमंडलं सप्त युंजंति सर्पणस्वभावाः सप्तसंख्याका रश्मयः सप्त प्रकारकार्याः असाधारणाः प
रस्परविलक्षणा ऋतवः॥ एकसाधारणं चैवं। अथ मासद्वयात्मकाः षट् अपरो अधिकमासात्मक इत्येवं सप्त तं वा युंजंति। एतस्य कार्यं निर्वहंती
त्यर्थः॥ स चैकः असहायः अश्वो व्यापनशील आदित्यः सप्तनामा स्वरसान्संनमयिता रोरश्मयो यस्य तादृशः सप्त ऋषयः स्तूयमानो वा आदि
त्यो वहति धारयति भ्रामयतीत्यर्थः॥ किंच॥ त्रिनाभि चक्रं त्रिस्थाना नाभिस्थानीयाः संबंधाना यस्य एकत्वेन तादृशः कृतयो ग्रीष्मवर्षा हेमंताख्याः
यद्वा भूतभविष्यद्वर्तमानाख्याः त्रयः कालास्त्रिनाभयस्तद्युक्तं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यं चक्रं अजरं मरणरहितं नहि
कदाचिदपि कालो म्रियते॥ अनादिनिधनः काल इति स्मृतेः अनर्वं अप्रतिहतं ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतं अयमादित्यः पुन
रावर्तयति। संवत्सरादर्वाचीनानां तत्रैवांतर्भावात्॥ तथा युगादीनां तद्व्याप्तिसाध्यत्वात् संवत्सरस्य चक्रत्वेन निरूपणं पुनः कीदृशं तत्र यस्मिं
चक्रे इमा विश्वा भुवना इमानि सर्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठंति कालाधीनत्वात्सर्वस्य स्थितेः ईदृशस्य कालस्य प्रकारणभूत परमे
श्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षाद्यर्थप्रशंसा वेत्यनुक्रमण्यामुक्तं॥ अयमपि मंत्रो यास्केन सप्त युंजंति रथमेकचक्रमेकचारिणमित्या
दिना व्याख्यातः॥ तत्राप्यनुसंधेयं॥ ॥अथ तृतीया॥ ॥इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहंत्यश्वाः॥ सप्त स्वसारो अभि सं नवंते य
त्र गवां निहिता सप्त नाम॥ ॥इममुक्तस्वरूपमादित्यमंडलाख्यं संवत्सराख्यं वा रथं ये सप्त रश्मयो अधितस्थुः अधिष्ठिताः संवत्सरपक्षे अयनऋतु
मासपक्षदिनरात्रीमुहूर्ताख्याः सप्त अवयवा अधितस्थुः तत्तादृशं रथं सप्तचक्रं चक्रवाचरणात् क्रमणाद्वा चक्राणि रश्मयः ते सप्त यस्य रथस्य तादृश
मुभयविधं रथं सप्तवर्णका अधिष्ठिताः अश्वाः व्यापनशीलाः सप्त वहंति निर्वहंति च तादृशं रथं सप्त स्वसारः स्वयंसरणाः स्वरादित्यस्तेन सारिताः पर
स्परं स्वसृभूता वा सप्तसंख्याका रश्मयः ऋतवश्च अभिसंनवंते आभिमुख्येन संगच्छंते। असाधारणाः परस्परविलक्षणाकार्याः ऋतवः सर्वधा
रणा एक इति सप्तत्वं यद्वा नरूपा मासद्वयात्मकाः षट् त्रयोदशमासात्मकः सप्तम इति सप्तत्वं कीदृशो रथ इति तदुच्यते॥ यत्र यस्मिन् रथे उभयवि
धे गवां वाचां स्तुतिरूपाणां सप्त सप्तविधानि नामनमनानि सप्तस्वरूपाणि निहितानि सप्तस्वसारोपेते: सामाभिस्तुत्यं रथमित्यर्थः यद्वा गवा
मुदकानां सप्तकपर्णस्वभावानि नामनमनानि यत्र यासु स्वसृषु निहिताः स्वसारः परस्परं स्वसृभूतादयः॥ अभिसंनवंते॥ ॥अथ चतु
र्थी॥ ॥को ददर्श प्रथमं जायमानमस्थन्वंतं यदनस्था बिभर्ति। भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत्॥ ॥एवं प्रपंचस्य का
लायततां प्रतिपाद्य तत्कारणभूतस्य परमेश्वरस्याविषयत्वमाह॥ को ददर्श को द्रष्टुं शक्नुयात् कदा प्रथमं सृष्टेः पूर्वं अव्याकृतावस्थायामित्यर्थः
किं जायमानं प्रथमभावविकारमापन्नं उत्पद्यमानं प्रपंचमित्यर्थः॥ दुर्ज्ञेयत्वे हेतुमाह॥ यद्यस्मात् अस्थन्वंतं अस्थिमंतं सशरीरं उपलक्षणमे
तत्कार्यभावमापन्नमित्यर्थः॥ अनस्था अस्थिरहिता अशरीरा सांख्यप्रसिद्धा प्रकृतिः वेदांतप्रसिद्धा ईश्वराय ना माया वा बिभर्ति गर्भवद्धत्ते:
धारयति अव्याकृतावस्थायां अनस्थाः अशरीरः परमेश्वरो वा बिभर्ति यथा केवलः परमेश्वरो मायाशबलितः सन् इदं जगन्निर्मितवानिति
ति मायदं द्वादिसहितस्य कस्यचिदभावात् को ददर्श न दानीमतीनित्य आत्मा चानित्यः तत्संयोगात् कश्चिद्दात्मा ज्ञानानीति चेत् सोपि न संभ

भा॰ अ॰ २ कुतीत्यत्र आह॥ भूम्याः संबंधि पार्थिवं स्थूलशरीरं असुः प्राणः तदुपलक्षितं सूक्ष्मशरीरं असृक् शोणितं एतत् सर्वथा तत् पुलस्कं य पापशरीरं अ॰ ३
पंचभूतात्मकं। तथापि भूतद्वयस्य प्रत्यक्षत्वात् रूपस्पर्शाभ्यां आत्मनः संबंधः केननः क्वस्वित् कुत्रास्ते न कश्चिद्वेत्तीत्यर्थः॥ नान्यत्किंचनमिषदिति
५३ श्रुतेः विद्वांसं जगत्कारणविषयज्ञानवंतं अन्यं गुर्वादिकं एतत् कारणं प्रष्टुं कः शिष्यः अल्पमतिरुपगात्॥ उपगच्छति नाद्दृशो देहेंद्रियसंघा
तरूप आत्मा तस्मिन्नात्मये कृताहं प्रष्टा प्रतिवक्ता वा भावपि नास्तीत्यर्थः॥ ननु तत्र द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतेः॥ यद्वा प्र
थमं प्रथमभाविनं जगतः कारणभूतं कोददर्श कः साक्षात्करोति॥ जायमानं मनुष्यत्वं मनुष्यं अनस्थिकः परमेश्वरः शरीरं अशरीरं यद्यस्मा
त् बिभर्ति द्रष्टुरपि तत्कार्यत्वादिति भावः शिष्टं समानं॥ ॥अथ पंचमी॥ ॥पाकः पृच्छामि मनसाविजानन् देवानामेना निहिता पदानि॥ वत्से व
ष्कयेधि सप्त तंतून्वि तत्निरे कवय ओतवा उ॥ ॥पाकः पक्तव्यः अपक्वमतिरहं मनसा संहृतेन अविजानन् अतिगहनं तत्त्वं विशेषेण ज्ञातुं मश
क्नुवन् पृच्छामि प्रश्नं करोमि॥ अज्ञाने कारणमाह॥ अनाप्तानि पदानि संदेहास्पदानि तत्त्वानि देवानां निहितानि देवानामपि गूढानीत्यर्थः॥ यद्वा देवा
नां पदानि तत्त्वानि निधिवद्गोपयित्वा स्थापितानि अतः पृच्छामि तत्त्वज्ञानोपयोगाय इति शेषः॥ तानि कानीति उच्यते। वत्से सर्वस्य निवासभूते बष्क
ये। बाष्कतिः समनामतत्वं वत्सोतितन ष्कय आदित्यः॥ यद्वा बष्कयानामिकृहायनो वत्सः पुनरपि वत्स शब्दस्य पृथक् कोनिर्देशात् बष्कय शब्देनत काल
मात्रं वध्यते। तस्मिन्नादित्ये अधि अधिकं सप्त तंतून् तायमानान् सप्त सामसंख्या न बृहत्यां मेधाविनो यजमानार्तुं तद्वेजगद्रूपातिर्यकृतं तंतून बेतुं वित
त्निरे वितन्वति यद्वा सप्त तंतवः सप्त छंदांसि तानि वितन्वते। किमर्थं ओतवे सप्त सामसंख्या न पतिर्यक् तंतुसंतानाय यज्ञनिर्माणायेत्यर्थः॥
यज्ञानांक्षितेः सूर्याधीनत्वादिति भावः॥ ईदृशं तत्त्वं पृच्छामीत्यर्थः॥ ॥इति द्वितीयस्य तृतीये चतुर्दशो वर्गः॥ ॥अथ षष्ठी॥ ॥अचिकित्वांच्चि
कितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्॥ वि यस्तस्तंभ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकं॥ ॥अचिकित्वान् देवतातत्त्वमजानन्नहं
चिकितुषः विशेषेण तत्त्वं जानतः कवीन् क्रांतदर्शिनः अधिगतपरमार्थान् अत्र अस्मिन् तत्त्वविषये पृच्छामि। किमर्थं विद्मने वेदनाय परमा
र्थज्ञानाय किं जानन्नेव पराभवाय यथा न त्वात्मानविद्वान् पृच्छामि अपितु अज्ञानादेव यः परमेश्वरः तस्तंभ उत्तंभितवान् नियमितवान् अथ
य आत्मा सत्यानिर्ध्यातिरेषां लोकानाम संभेदायेति श्रुतेः॥ किं इमाः इमानि षट् लोकान् रंजनात्मकान् लोकाः रजांस्युच्यंत इति निरुक्तं। यद्यपि
लोकाः सप्त तथापि मर्त्यलोकस्य कर्मिणां सर्वेषां साधारणत्वाभावात् षडित्युक्तं॥ ननु षट्लोकाः सप्तमः किमिति न दिष्ट इत्युच्यते॥ अजस्य
जननादिरहितस्य चतुर्मुखस्य लक्षणः रूपे स्वरूपे एकं सत्यलोकाख्यं पुनरावृत्तिरहितं स्थानं किमपि स्वित् किं स्विदेतत् न केनाप्यधिगंतुं श
क्यमित्यर्थः॥ कश्चिदेवा पार्सकं ऋचितादिमार्गेण गंतव्यत्वादिति भावः॥ यद्वा षट् रजांसि विलक्षणाः षड्ऋतवः नान्यस्तंभयत तं अजस्य ग
मन जीतस्य जन्मरहितस्य वादित्यरूपे रूप्यमाणे दृश्यमाने मंडले एकं अद्वितीयं किमपि स्वित् किंस्वित् यत्किंचिद्वा दुः मनसगंतव्यं तत्त ५६
मसि तत्पृच्छामि॥ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिश्रुतिप्रतिपादितं तत्त्वमित्यर्थः॥ अथवा षट् इमानि रजांसि विविधान् भू
लोकांश्च॥ वि यस्तस्तंभ तिस्रो भूमी धारयंत्रीरुत द्यूतिनिगमः॥ तस्याजस्य परब्रह्मलक्षणः रूपेण नानाविधाकारभाजि जगति किमपि स्विदेकं स
त्यात्मकं सत्तीतिप्रश्नः अविशेषमस्मिन् नानास्तं एकरूपं सत् किं स्यात् प्रश्नः अस्तीत्येवोपलब्धव्यमिति श्रुतेः॥ ॥अथ सप्तमी॥

इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः॥ शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः॥ ॥इहेदानीं इमं तद्वक्ष्यमाणं तत्त्वं अंग ११५ / १९१४
क्षिप्रं अविचारेण ब्रवीतु कोयो वेद सः कः ईदृशं तत्। अस्य पुरतो दृश्यमानस्य वननीयस्य स्तुतिभिः वननीयवर्गतुरादित्यस्य पदं सर्वैर्गंतव्यं स्व
रूपं निहितं गूढं वनं तेनाकिं वास्यादित्यस्य शीर्ष्णः शिरोवदुन्नतस्य सर्वेषामुत्कृष्टस्य वा गावः रश्मयः पर्यकाली नारश्मयः क्षीरमुदकं दुह्रते क्षरंति
। वव्रिं रूपनामैतत् रूपं वसानाः आच्छादयंतः अतिविस्तारेण नक्षसातपतः केवनास्य गावो रश्मयः उदकं स्वस्य पदास्येनैव मार्गेण आपुः
पिबंति भूमिनिरुदकां कुर्वंतीत्यर्थः॥ तस्य स्वरूपं ब्रवीत्वित्यन्वयः॥ ॥अथाष्टमी॥ ॥माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे॥
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वंत इदुपवाकमीयुः॥ ॥माता सर्वस्य निर्मात्री पृथिवी पितरं पालकं द्युलोकं तस्थ तच्छब्दः द्युलोकस्थ आदित्यः
मित्यर्थः॥ तमापबभाज आभजते किमर्थं ऋते उदके तद्वानिमित्तभूते सति केन द्वारेण धीती ध्यात्या कर्मणा यागादिरूपेण स्वकीयेनाज्यसोमादिह
विषा तर्पयतीत्यर्थः॥ अग्रेतानः पूर्वं पिता च मनसा अस्याम् अभिप्रायं वतावेतत्सा संजग्मे हि संश्लिष्टौ वर्तेते खलु द्रष्टुकरादित्यर्थः॥ अनंतरं सा
माता बीभत्सुः गर्भबंधने छादनी गर्भरसा जनाः गर्भरसेन गर्भोत्पत्तिनिमित्तेन रसेन निविद्धा नितरां युक्तासीत्॥ यद्वा गर्भरसः ओषध्याद्यु
त्पादनसमर्थमुदकं यस्याः सा तादृशी उदकेनार्यंतं क्लिन्नानि विद्धा कृषिबलेन जलमुत्खनितरां विद्धारिता भवति बीजे वा पार्थं अत्रायं समाधिर्याक्रान्
नयापि च अपत्यार्थं स्वपतियुवानं योनिसिक्तस्यामनुरागयुक्तः संगतो भवति सा चान्तर्वत्नी सती पुमान् जनयतीति तद्वदत्रापि॥ अनंतरं नमस्व
त इत भावि। वृष्टिप्रियं यज्ञायनं वंत एव मुपवाकं उपेत्य वचनं परस्परं सम्यगभिदृष्टस्यास्य तिरस्यानीति मत्यृत्विक्वचनमीयुः प्राप्नुवंति यद्वा हविर्ल
क्षणान्नवंत उपत्यक्त्वनं प्रवादिकं पर्मायुः ऋत्वा सत्यां सस्यादिद्वारा यागमनुतिष्ठयुरित्यर्थः॥ ॥अथ नवमी॥ ॥युक्ता मातासीद्धुरि दक्षि
णाया अतिष्ठद्गर्भो वृजनीष्वंतः॥ अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु॥ ॥भूतानि बिभर्तीति तस्मिन्भूतानीति माता द्यौः दक्षि
णायाः अभिमतप्रदानः समर्थायाः पृथिव्याः धुरि निर्वहणाय युक्ता आसीत् वर्षणाय समर्थाभूदित्यर्थः॥ कथमिति तदुच्यते॥ गर्भो गर्भस्था
नीय उदकसंघो वृजनीषु उदकवत्सु मेघपंक्तिषु अंतर्मध्ये अतिष्ठत् तिष्ठति अंतः अनंतरं वत्सः पुत्रस्थानीयः उदकसंघः त्रिषु योजनेषु
मेघ रश्मि वायुषु संयुक्तः सन् अमीमेत् वर्षणसमये गर्जयति अनंतरं विश्वरूप्यं विश्वरूपवतीं गाम् अपश्यत् अनुक्रमेण पश्यति वर्ष
यतीत्यर्थः॥ यद्वा त्रिषु योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रत्यमीमेत्॥ अनंतरं सर्वजनानुक्रमेण विश्वरूपं सस्यादिभिर्नाना
रूपवतीं भूमिमपश्यत् पश्यति॥ ॥अथ दशमी॥ ॥तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयंति॥ मंत्रयंते दिवो अमु
ष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वां॥ ॥एकः प्रधानभूतः असहायो वा पुत्रस्थानीय आदित्यः संवत्सराख्यः कालो वा तिस्रो मातॄः सस्य
रक्षा कृत्यादि पृथिव्यंतरिक्षद्युलोकत्रयाणीत्यर्थः॥ तथा त्रीन्पितॄन् जगतां पालयितॄन् लोकत्रयाभिमानिनोऽग्निवायुसूर्याख्यान् ऊर्ध्व
स्तस्थौ उन्नतः अमंतरा धर्मि वर्तिभूतं भविष्यदाद्या सनातस्तर्पक्षे सर्वेभ्य उन्नतः इमे न नाव ग्लापयंति ग्लानिं न कुर्वंति न हि काल
आदित्यो वान्येन पराभूयंत इति दिवः एष द्युलोकस्योपरि अंतरिक्षे मंत्रयंते गुप्तं परस्परं भाषंते देवाः किं विश्वविदं विश्वं वेदनसमर्थे
विं श्ववेदनीयां वा अविश्वमिन्वा असर्वव्यापिनीं वा वाचं गर्जितरूपलक्षणां अमुष्य आदित्यसंबंधिनीं मंत्रयंत इत्यर्थः॥ ॥७।१०॥

भा॰ अ॰ २ इति द्वितीयस्य तृतीये पंचदशो वर्गः॥ ॥ अथैकादशी॥ ॥ द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य॥ आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि अ॰ ३
५.७ विंशतिश्च तस्थुः॥ ॥ कालस्यात्मकस्य सत्यात्मकस्य वा आदित्यस्य चक्रं पुनः पुनः क्रमणशीलं मंडलाख्यं रथचक्रं वा वर्वर्ति पुनः पुनर्वर्तते संचरति
द्युत्रपर्यायं परितः द्वादशारं द्वादश संख्याकं मेषादि राश्यात्मकैर्वा अरैः रथांगावयवैर्युक्तं तच्चक्रं नहि जरा
यै न खलु जरायै भवति हे अग्ने सर्वदा गमनयुक्तादित्य द्वा अग्नेरेव स्थानत्रये तत्तदात्मना वर्तमानत्वात्सा वाय्वग्निरिलक्ष्यते॥ अत्रास्मिन्
चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परं मिथुनभूताः सप्तशतानि विंशतिश्च विंशत्युत्तरसप्तशतसंख्याकाः पुत्राः बभूवुः पुत्रवदुत्प
द्यमानाः प्राणिनां दुःखावाता वा अहोरात्रसंवत्सरस्याहोरात्राः सप्त पोरः समानदत्यारण्यकं॥ ॥ अथ द्वादशी॥ ॥ पंचपादं पितरं द्वाद
शाकृतिं दिव आहुः परे अर्धे पुरीषिणं॥ अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितं॥ ॥ पंचपादं पंचसंख्याकऋत्वात्मकपा
दोपेतं तत्र हेमंतशिशिरयोरेकत्वाभिप्रायं पितरं सर्वस्य प्रीणयितारं द्वादशाकृतिं द्वादशमासरूपाकृतयोऽस्य तादृशं पुरीषिणं रस्युदके
न तद्वंतं प्रीणयितारं वा पुरीषमित्युदकनाम उदकलक्षणं संवत्सरचक्रं द्युलोकस्य परे अर्धे तात्याला छंदं परस्मिन्नर्धे तरिक्षलक्षणे
स्थित आदित्य इत्यर्थः॥ तस्मिन्नर्पितमाहुः एतदुत्तरत्र मंत्राप्यनुषज्यते॥ तदधीनत्वार्पितं तत्र दृधीनं अतः संवत्सरं पर्यायत्वमाहुरित्यर्थः॥ अ
थ इमे अपि च अन्ये कवयो न ह वा एवमाहुः किमिति उपरे उपरमंते तस्मिन्नुपरताः प्राणिनोऽत्रेति वा परः संवत्सरः तस्मिन्स दृशं सप्तचक्रे स
मादित्यरश्मयस्तद्वारेण च कल्पनीयाय स्यंसनत्रयोक्तः यद्वा अयननर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त सप्त चक्राणि पुनः पुनः क्रमणानि यस्य तादृ
शे षळरे षळृतव एव अराः नाभौ एव तत्र संबंधाय स्य तथोक्तलक्षणे संवत्सरे रथ विचक्षणं विविध दर्शनकरमादित्यं अर्पितमाहुः तदुक्तं भवति
अमुमादित्यं दक्षिणोत्तरहपुभिनं मगलत्रीब्रर्मदादि भावस्य चकालाधीनत्वात्तदधीनमाहुः अन्ये तु संवत्सराद्यात्मकस्य कालस्य सूर्यागम
नागमनसाध्यत्वात्तदायत्तत्वमाहुरिति॥ ॥ अथ त्रयोदशी॥ ॥ पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा॥ तस्य नाक्षस्तप्यते भूरि
भारः सनादेव न शीर्यते सनाभिः॥ ॥ पंचारे पंचर्तुरूपैररैः युक्ते चक्रे संवत्सरात्मके परिवर्तमाने संवत्सर परिवत्सरादिरूपेण पुनः पुनरावं
र्तमाने सति तस्मिन्कालचक्रे विश्वा भुवनानि सर्वाणि भूतजातानि वर्तंत इत्यर्थः॥ किंच तस्य चक्रस्य मध्ये वर्तमान अक्षो भूरिभारः सकलभुव
नवहनेन प्रभूत भारोऽपि न तप्यते न पीड्यते किंच सनादेव सनातन एव सनाभिः समाननाभिकः सर्वदैकरूपनाभिरसेन शीर्यते न भिद्यते
यथा लौकिकं रथाक्षो भारेण भग्नो भवति अक्षघातेन चक्रनाभिर्विशीर्णा भवति तद्वदत्रापि नास्तीत्यर्थः॥ ॥ अथ चतुर्दशी॥ ॥ सनेमि च
क्रमजरं वि वावृत उत्तानायां दश युक्ता वहंति॥ सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा॥ ॥ सनेमि समाननेमि एकप्रकार
बाह्यवलयं अक्षीणनेमि चक्रं संवत्सराख्यं अजरं सनातनमप्यजरारहितं विवावृते पुनः पुनर्विशेषेण वर्तते॥ उत्तानायां ऊर्ध्वतानायां दिशा
यां उपरिविस्तृतभूम्यां वा दश युक्ता इंद्रादयः पंच लोकपालाः निषादपंचमाश्चत्वारो ब्राह्मणादयो वर्णाः मिलित्वा दशसंख्याकाः युक्ताः स्वस्वव्या ५७
पारयुक्ता वहंति निर्वहंति तत्तदंगं निर्वहंतीत्यर्थः॥ तं निर्वाहार्थत्वात्कालस्य किंच सूर्यस्यादित्यस्य चक्षुः ख्यानः स्वभासा सर्वस्य चक्षुःस्था
नीयं वा मंडलं चक्षुः ख्यातेर्वा चष्टेर्वेति निरुक्तं रजसा रजसा उदकेन आवृतं व्याप्तं एति गच्छति॥ उदकं रज उच्यत इति यास्कः॥ तादृशे मंडले वि

117
T914
श्वा भुवनानि सर्वाणि भूतजातानि अर्पिता अर्पितानि तदधीनत्वात्तेषां॥ ॥ अथ पंचदशी॥ ॥ साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो
देवजा इति॥ तेषामिष्टानि विहितानि धामशः स्थात्रे रेजंते विकृतानि रूपशः॥ ॥ साकंजानां एकस्मादादित्यात्सहोत्पन्नानां सप्तानामृतूनां मध्ये स
प्तथमृतुं एकजं एकमेवेति यद्य॥ एकजं एकोत्पन्नमाहुः कालतत्त्वविदः चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन संताघाः षळृतवो भवंति
अधिकमासेन कृतस्य घते सप्तमर्तुः न च त्रयोदशो मास एव नास्तीति मंतव्यं॥ अस्ति त्रयोदशो मास इत्याहुरिति श्रुतेः तदेवोच्यते॥ षळिद्यमा इद्
यमा एवकारार्थः षळेव कृतयो मासद्वयरूपाः ऋषयो गंतारः ते च देवजाः देवादादित्याज्जाताः इत्येवमाहुः सप्तमाधारस्य त्रयोदशस्य मासस्य
द्वयाभावः॥ निःसृष्टोधिकमासः मंडलं तपति रवि विशतीत्यादिस्मृतेः॥ तस्मात्षडेवर्तवो जाताः अदेवजन्मैकः तेषामृतूनां स्वरूपाणि इष्टानि सर्वेप्र
प्सितानि धामशः तत्तत्स्थाने विहितानि पृथक्पृथक् स्थापितानि विरूपशः रूपभेदेन विकृतानि विविधाकृतियुक्तानि रूपभेदस्तोऽत्रिरीये
गत्स्वातः शरसमाद्धवसंताय प्रायच्छत यव ग्रीष्मायेत्यादि स्थात्रे अधिष्ठात्रे तस्मा आदित्याय रेजंते चलंति॥ जगन्निर्वाहाय पुनः पुनरावर्तंत इत्यर्थः
॥ ॥ इति द्वितीयस्य तृतीये षोडशो वर्गः॥ ॥ अथ षोडशी॥ ॥ स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदंधः॥ कविर्यः पुत्रः स
ईमा चिकेत यस्ता विजानात्स पितुष्पितासत्॥ ॥ ममरश्म्यापाःदीधितयः स्त्रियः संस्त्यानवत्यो योषितः सतीः सत्यो पि द्युदकरूपगर्भधार
णात्स्त्रीत्वं एषां रश्मीनां आविष्टलिंगत्वात्॥ स्त्रीलिंगभाजान् उतान् रश्मीनेव पुंस आहुः प्रभूत दस्युदकसेक्तृन् पुरुषानाहुः प्रतिनिर्देशापेक्षया
पुंलिंगता॥ आमुमर्थमर्त्यं तन्निरूढं अक्षण्वान् तान् दृश्यपेतः कश्चित्महान् पश्यत् जानाति अंधः अतथारूपः स्थूलदृष्टिः न विचेतत् न विचे
तयति किंच यः कविः क्रांतदर्शी पुत्रः स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः पुरजगतां त्रातारत्स्युदकलक्षणोऽग्निः सः ई स एव पुत्रः यद्वा ई ए
नमर्थं स्त्रीणां सतीनां पश्चात्पुरुषभावं आचिकेत न मर्त्यतां ज्ञानातीति पितः स्थितं पुत्र एव जानाति नान्योयः कश्चित्तानि विजानात्स्त्रीपुरुषपुत्ररूपा
णि जानीयात् पितुष्पितासत् पितापि स्याज्जगत्पालकारश्मिसमूहः तस्यापि पिता आदित्यः स भवति आदित्य एव भवतीत्यर्थः॥ यद्वा लौकिको
ऽग्निरियं यस्तानि जानाति स एव भवति स्वयं पितुः पुत्रः संनपि स्वपुत्रापेक्षया पिता च भवति पुत्रपौत्रादिसहितः चिरकालजीवी भवति इत्या
धिदैवतमथाध्यात्मंयाद्वदा स्त्रियः सतीः स्त्रीत्वं प्राप्ता आहुः लौकिकाः तां उ तानेव मम स्वपुंसः पुरुषानाहुः प्रतिपादयंति तत्त्वज्ञाः॥ कथ
मन्यस्यान्यभाव इत्युच्यते॥ एकस्यैव निरंशस्य सर्वत्रोपाधिकस्यात्मनस्तत्तदुपाधिस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः श्रूयते हि स्त्रीत्वं पुमानसि त्वं
कुमार उत वा कुमारी त्वं त्वाद्यस्त्रीत्वं चोभयापि वस्तुतात्मा स्त्री नपुंसकं भवतीति श्रुतिरपि तद्भावं बाधयति॥ नैव स्त्री न पुमानेष न चैवायं न
पुंसकः॥ यद्यच्छरीरमादत्ते तेन तेन स रक्ष्यत इति॥ द्वितीयः पादः पूर्ववत्॥ किंच पुत्रः वयसा अल्पोऽपि यः कविः क्रांतप्रज्ञो ज्ञानी स्यात् ईमिमम
र्थं स विविक्तं जानाति एवमुक्तलक्षणस्य परमात्मनः तानानि स्त्रीत्वपुंस्त्वादीनि विजानात् औपाधिकानि जानीयात् स पितुः स्वोत्पादक
स्यापि तात रक्षितस्य पितासत् पितृवत्पूज्यो भवति उक्तमर्थमभिप्रेत्य तांड्यब्राह्मणं शिशुर्वा आंगिरसो मंत्रकृतामासीत्स पितॄन् पु
त्रका इत्यामंत्रयत तत्पकंपन्त देवानपृच्छंत ते देवा अब्रुवन् एष वाव पिता यो मंत्रकृदिति मंत्र द्रष्टुर्बालकस्यापि तत्त्ववित्पितुः पितासदिति कि
मश्चर्यमित्यभिप्रायः॥ ॥ अथ सप्तदशी॥ ॥ अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात्॥ सा कद्रीची कं स्विदर्धं परा

सा॰ अ॰२ गावः क्वस्वित्सूते नहि यूथे अंतः॥ ॥अत्राग्नौ हूयमाना हुतिर्गोरूपेणोच्यते गौः गोरूपा गमनशीला वा आहुतिः संस्थानपात्रं वत्सस्थानीयमग्निं
५८ अवः अवस्तात् अधोदेशे परेण पदा पादस्थानीयेन स्वावयवेनाग्नौ ज्वलिता भ्रमती धारयंतीति तथा परः परस्तात्॥ अपरदेशे येन अनेनावरेणच ७३
पदा पादस्थानीयेनाग्न्यन्नमेव वत्सं बिभ्रती उदस्थात् स्वयं प्रत्युत्तिष्ठति। अग्नौ दत्ता ह्याहुतिः सम्यगादित्यमुपातिष्ठत इति स्मृतेः॥ ॥अथैवं
भूतवती सा आहुतिः कद्रीची कुगतं त्यानिश्चयगमना आदित्यं प्राप्नुवतीत्यर्थः॥ कंस्वित् कं फलभाजं पुरुषं प्रति अर्धमार्गमागत्य फलमु
त्पादयतीत्यर्थः अर्धं कं उं परागान परागच्छति आगत्य च क्वचित् सूते तु कुत्र प्रदेशे फलमुत्पादयति॥ नहीतरगोवदियं यूथे अंतः सजाती
गामध्ये सूते साधारण्येन यत्र क्वचिन्न सूते अपि तु कस्मिंश्चिदनुष्ठातरि अंतः समद्यान कानुरखल्विति॥ यद्वा आदित्यरश्मिसमूहरूप
गोरूपेणोच्यते गौः उदकलक्षणा रश्मिरूपगौर्वत्सं वत्सवद्रक्षणीयं यजमानं उदकं कर्मणा बिभ्रती उदस्थात्॥ अथ तथाभूता सा कद्रीची
अदृश्यगमना सती कंस्विदर्धं अर्धस्थानभाजं वा क्वस्वित्पुरुषमादित्यं परागात्॥ अप्रतिनिवृत्ता गता तत्र यं त्येताः सूर्यस्य रश्मयो यत्र
देवानां पारं तु काधिकः स इति श्रुतेः॥ तथा भूता च क्वस्वित्सूते निकस्मिं निदाघ लोके जनयति न सर्वत्र विशिष्टं सामान्यं॥ ॥अथाष्टादशी॥ ॥
अवः परेण पितरं यो अस्यानुवेद परएनावरेण॥ कवीयमानः क इह प्रवोचद्देवं मनः कुतो अधि प्रजातं॥ ॥अवः अवस्तात् स्थितं अ
स्य पितरं पालकमग्निं परेण आदित्येन सह यो अनुवेद अनुक्रमेण जानाति॥ तथा परः परस्तात्स्थितमादित्यमस्य पितरं पालकं र
क्षादिना पालयति। तादृशं आदित्यं एना अनेन अवरेणाग्निना सह योनुवेद॥ अग्न्यादित्योर्व्यतिहारेणोपास्ते यद्वा अभिभूतरजस्तम
स्कोऽयं दृढमतो अतएव स्वाधीनमायावेनावकल्पेन बाधिगच्छति स तादृशः पुरुषः कवीयमानः कविवदाचरन् क्रांतदर्शित्वमात्मनः
ख्यापयन् क इह अस्मिन् लोके प्रवोचत् प्रब्रवीति किं वदेत् द्योतमानं देवं ब्रह्मविषयमालौकिकं वा मनः कुतः कस्मात् हेतुविशेषादधिअ
धिष्ठानप्रजातं उत्पन्नं उभयमपि दुर्लभमित्यर्थः॥ ॥अथैकोनविंशी॥ ॥ये अर्वांचस्तां उ पराच आहुर्ये परांचस्तां उ अर्वाच आहुः॥
इंद्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहंति॥ ॥ये सर्वे सोमयोश्चक्रे वर्तमाना रश्मयो ग्रहादयश्च तत्परिभ्रमणवशेन अ
र्वांचः अर्वागंचनाः अधोमुखाः संति तां उ तानेव परांच आहुः पराङ्मुखांचनान् धोनाहुः कालविदः। तथा प्रथमं ये परांचः परागं
चनाः तां उ तानेव अर्वांच आहुः॥ हे सोम त्वं इंद्रः परमेश्वरः इदं भूमिर्दृष्याधारक आदित्यः। यद्वा द्वादशादित्यानां मध्ये इंद्रोप्येकः वि
वस्वदिंद्र युवां इत्यादौ यमर्पादृः स च युवां या यानि मंडलपरिभ्रमणानि रजसो रंजनात्मकस्य लोकस्य कर्मणि पश्चाल्लोकं वहंति
निर्वहंति तत्र दृष्टांतः॥ धुरा न शकटस्य धुरि युक्ताः समर्पिताः पुरुषाः तत्परिभ्रमणवशेनार्वांचः परांचोप्यधोमुखा ऊर्ध्वमुखमा
स्थाने कश्चिद्भवंतीति तद्रुत॥ ॥अथा विंशी॥ ॥द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो
अभिचाकशीति॥ ॥अत्र लौकिकपक्षिद्वयदृष्टांतेन जीवपरमात्मनोः स्तूयते॥ यथा लोके द्वौ सुपर्णौ पतनौ शोभनगमनौ सयुजा स ५८
मानयोगौ सखाया समानवयाः॥ अनेन भेदो दर्शितः॥ सादृश्यं यस्य नेति॥ ध्यानौ समानं वृक्षं परिषस्वजाते एकमेव वृक्षं परिषस्वजाते
आश्रयस्तयोरन्यः एकः पिप्पलं पक्वं स्वादु तरमिति। अन्यः आत्मा अपरः अनश्नन् अभिचाकशीति। अभिपश्यतीति दुत्॥ साक्षि

रूपेण पश्यति। सादृश्यं यस्य नेति। धुरा आत्मव्याप्तिमान्वाचे आत्मव्याप्तिमा च्यते द्रूपेण सरूपतां सलोकतां अश्नुते॥ द्वौ सुपर्णौ जीवात्मप 119/1919
रमात्मानौ सयुजा समानयोगौ योगो नाम संबंधः स च तादात्म्यलक्षणः स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा एवमन्यस्यापि
स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मन एवमेकस्वरूपमित्यर्थः॥ अनेन यास्कमतानुसारिणा अतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः
स च परमात्मा जीवादन्यो जीवाश्रयणादिति मतं निरस्तं भवति॥ ननु संबंधो द्विष्ठः स च पक्षिणोरिव भेदमपेक्षते॥ अतः कथमैकात्म्यमिति
न तथाधिकभेदं वा स्तवभेदं वा पश्यप्रश्नः॥ अत एव सख्यायौ समानसखा समानवयाः अनेन भेदो दर्शितः॥ नान्यकस्य यादृशं भेदः स्यान्
यस्येति ख्यत्वा भेदः स्फुटं प्रतिभाति। कथं तादात्म्यमुच्यत इति न वक्तव्यं नात्र परस्परं दृष्टांतः॥ दार्ष्टांतिकभावः॥ अपि तु यस्य यादृशं ख्या
नं स्फुरणं परमात्मन स्तदेव स्यान्मितरस्यापि जीवात्मनः इति सख्यायामिवोच्यते एकरूपप्रकाशावित्यर्थः॥ अत इत्थं मैकात्म्यं अनेन वा
स्तवभेदोपि निरस्तः समानं वृक्षं परिषस्वजाते इत्यनयथाश्रयांतराभावादुभयोरेकाश्रयत्वमभ्युपगंतव्यं॥ तद्वत्सयुजा सखायावि
त्युभयप्राप्त्येकयोगत्वान आश्रयणीयं रथ्यत इति दृष्टांतः द्वाभ्यां समानं एकं एव जीवस्य भोगार्थत्वात्। परमात्मनस्तु सर्वं
महाभूतारंभकत्वान स्योपलब्धिस्थानत्वात्र उभयोरपि समानं। तादृशं समानं वृक्षं परिषस्वजाते परिष्वक्तवंतौ आश्रयंतः न च जीवस्य खलु
तदीश्वरत्वे कथं जीवबुध्या संसारशोकाविति वाच्यं। तयोर्मोहकृतत्वात्॥ तथा चाथर्वणिका अनुमंत्रमाम्नायस्य सदेहनिवर्तकमुत्तरं मंत्र
मनमामनंति। समाने वृक्षे पुरुषो निमग्नो नीशया शोचति मुह्यमानः॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति॥
अस्यायमर्थः॥ एक एव शरीरे वृक्षे पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयमपीश्वरोप्यनीशत्वबुध्या मुह्यमानो गूढः सन् शोच
ति संसारं अहं कर्ता सुखी दुःखीति जननमरणमनुभवति यदा तु जुष्टं नित्यं तत्र अन्यं संसारशोकातीतं दृशं परमेश्वरं पश्यति स्वानन्य
तया साक्षात्करोति तदा वीतशोकः देहाद्व्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन् अस्य महिमानमिति निरस्तसमस्तो
पाधिकस्य परमेश्वरस्य महिमानं सर्वात्मत्वं तत्त्वादि महिमानमिति निवृत्तिप्राप्नोति। न च तदा वा अन्योतन्महिमा प्राप्यते अनंतस्तद्रूपो
भवतीत्यर्थः॥ तस्माद्ब्रह्मैकत्वे एकरूपभेदस्त साद्भृत इति प्रसिद्धं॥ अनुभवदशायां लौकिकबुध्या भेदमभ्युपेत्य तयोरन्यो जीवात्मा पिप्प
लं कर्मफलं स्वादु भूतमति भुंक्ते यस्य यदुपार्जितं तत्तस्य स्वादु भवति अन्यः परमात्मा अनश्नन् स्वादायाभावात्। अन्यो ईश्वरः साक्षी अ
नुध्यानभक्षणाभावात्सि। अन्यकामत्वेनाभुंजानः स्यादायाभावादाप्तकामः स्यादितिश्रुतेः॥ तस्माद्वास्तवभेदमुपजीव्य तयोर
न्य इत्युक्तं वस्तुतस्त्वात्मा शयाशोचति मुह्यमान इत्युक्तत्वाद्भेदरूपता दृशः परमात्मा स्वात्मन्यध्यस्तं जगत् साक्षितान पश्यति॥ अत्र द्वौ द्वौ
न्तर्हितौ मरुता धर्मकर्तारावित्याश्रितरूप निगदितं अस्य मंत्रस्य व्याख्यानमनुसंधेयं॥ ॥इति द्वितीयस्य तृतीये सप्तदशो वर्गः॥ ॥
अथैकविंशी॥ ॥यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरंति॥ इनो विश्वस्य भुवनस्य गोपाः स माधीरः पाकमत्राविवेश॥ ॥
अत्रादित्यमंडले सुपर्णाः सुपतनाः शोभनगमना रश्मयः अमृतस्य उदकस्य भागं भजनीयमंशं आपूर्य अनिमेषं अनवरतं विदथा
वेदनेन ज्ञानेन अस्माभिरंकृत्यमिति बुध्या अभिस्वरंति अभिप्रापयंति। यश्च विश्वस्य भुवनस्य भूतजातस्य इनः स्वामी तथा

भा० अ० २ तस्यैव गोपाः गोपयिता रक्षिता य आदित्यः परमेश्वरः धीरो धीमान् प्राज्ञः स इत्थंभूतः स मा मां पाकं पक्वं अपक्वप्रज्ञं अत्रास्मिन् सर्वजीव अ०३
५९ समूहे आविवेश प्रविशति अत्रास्मदीयदेहे तानि यामनेन तया प्रविष्ट इत्यधिदैवपक्षे। अथाध्यात्मपक्षे यत्र यस्मिन्नात्मनि सुपर्णाः शो
भनपतनानि स्वस्वविषयग्रहणाय गमनकुशलानींद्रियाणि चक्षुरादीनि अमृतस्य भागं अत्र विषयावच्छिन्नचैतन्यममृतमित्युच्यते। तस्य
भागं भजनीयं स्वस्वांशं अनिमेषं निमेषरहितं अनारतं विदथा वेदनेनावच्छिन्नचैतन्येनावरक्षानि अभिस्वरंति अभिप्रयंति। आवर
णापगमनेन स्फोरयंति किं च यस्मिन् स्वाम्यस्य देहस्य विश्वस्य भुवनस्य गोपाः गोपयिता रक्षिता। यद्वा विश्वस्य भूतजातस्य स्वामी अस्य दे
हस्य गोपाः अनेन तत्पदार्थ ईश्वरः प्रतिपादितो भवति स परमेश्वरो धीरः समाधिस्थितिषु स्थः सर्वज्ञो वा अविक्रियः मा मां पाकं परिपक्वमन
स्कं यागदानादिना अपगतरजस्तमस्कत्वेन दर्पणवदतिनिर्मलसत्त्वादिनामनस्कं मां आविवेश रूपचिन्नतादर्शं च स्फुरतीत्यर्थः। यद्वा
परिपक्वमनाः अहं पूर्वम् अज्ञानदशायाम् अहं ईश्वराल्लीलाविद्वान् ततः परमस्ति कश्चित्सर्वज्ञस्स ईश्वरः सत्यज्ञानादिलक्षण इति निश्चयप
श्चात् गुरुशास्त्राभ्यां सम्यगवगम्य निदिध्यासनपर्यंतं गत्वा असंभावनाविपरीतभावनांश्च दृश्यभावनायाः साक्षात्कृत्य परिपूर्णः
परमात्माभूतमित्यर्थः। अयमप्येवमाधीरः पाकमत्राविवेशेत्यनेनोच्यते। ननु अनवच्छिन्नस्य परमात्मनः सर्वत्र व्याप्तत्वात्। प्राप्तिरेव नोपपद्य
ते। सत्यं च अत्र प्राप्तिर्द्विविधा प्राप्तप्राप्तिरप्राप्तप्राप्तिश्चेति। प्राप्तस्यापि कण्ठचामीकरस्याज्ञानावरणात् ज्ञानहननद्वारेण प्राप्तिरुपपद्यते अस्य
मंत्रस्य यं निरुक्तं। यत्र सुपर्णाः सुपतना आदित्यरश्मय इत्यादिकं तदत्र द्रष्टव्यं॥ ॥अथ द्वाविंशी॥ ॥यस्मिन्वृक्षे मध्वदः सुपर्णा निविशंते
सुवते चाधि विश्वे। तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद॥ ॥अत्र वृक्षत्वरूपकल्पना अधिदैवे आदित्यमध्यात्ममात्मानं च प्रशंस
ति। यस्मिन्नादित्ये वृक्षे वृक्षवत्सर्वफलाश्रयभूते मध्वदः माध्विस्य उदकनाम तदत्तीति मध्वदः उदकस्यात्तारः सुपर्णाः सुपतना रश्मयो
निविशंते प्राविशंति निसुवते च पुनरुदयकाले प्रकाशं जनयंति च यस्मादादित्यात्। कुत्र अधि विश्वे विश्वस्योपरि तस्यादित्यवृक्षस्यापि
प्यलं पालकं फलं स्वादुरुवमत अग्रे उपरि उपासनानंतरं आहुः कथयंति तत्त्वविदः। यद्वा सर्वस्योपरि वर्तमानमाहुः। ईदृशं पितरं जगतः पाल
यितारं यो न वेद नोपास्ते स तन्नोन्नशत् नशतिर्गतिकर्मा तत्फलं प्राप्नोति। वेदितुस्तु अग्रे पिप्पलमाहुरित्यर्थः। इत्यधिदैवपक्षे अथा
ध्यात्मपक्षे। यस्मिन्परमात्मनि वृक्षवद्रूपमनादिरहिते अविक्रिये सुपर्णाः शोभनगमनानींद्रियाणि मध्वदः मधुनो ज्ञानस्यात्तारीणि तज्ज्ञा
नेन ज्ञानभाजो इत्यर्थः। निविशंते स्वापकाले स्वस्वविषयेभ्यः प्रतिनिवृत्तानि। अनिवृत्यात्मीयं ते पुनः प्रबोधकाले अधि विश्वे विश्वस्योपरि
सुवते च उपयंति स्वस्वविषयानुलभंत इत्यर्थः। तस्य परमात्मनः पिप्पलं पालकं संसारमुद्धारकं स्वादु स्वादनीयं अमृतत्वलक्षणं ज्ञानं यत्फल
स्वादने पुनः क्षुत्तृष्णाशोकमोहजरामरणादयो न भवंति किं च स्वादुत्तमं इतरस्वर्गादिफलानि पुनर्जननाद्यापादकत्वादपातस्वादूनि यत्
फलं अग्रे स्वरूपज्ञानोत्तरज्ञानफलमाहुः यः पुमान् पितरं पालकं ज्ञानं फलं तत्फलाधारमात्मानं वा न वेद न जानाति अत्र शोधस्तु तीयपंक्ति स एव ५९
नाश फलं प्राप्नोतीत्यर्थः। यद्वा चर्मवदाकाशमित्यादिश्रुतेर्ज्ञानात्। अन्योपायस्यामृतत्वप्राप्तिं निवारयति। अहल्यं विनिगुरुशास्त्रात्त
त्फलं नानशत न प्राप्नोति अत आत्मानं बोधयेद्ब्रह्मविद् ब्रह्मैव भवतीत्यादिकानुज्ञाप्राप्तिमाह। तस्मादीदृशं परमेश्वरं विदित्वा मुक्तो भूयादित्यर्थः।

॥ ॥अथ त्रयोविंशी॥ ॥यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत। यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः॥ ॥ 121/1914
गायत्रे अधि गायत्रमाहितं प्रापणात् सर्वलोकत्वात् गायत्री भूस्तदीयस्थानं गायत्रं अधि उपरि तत्र गायत्रमाग्नेयं पदं आहितं। प्रथमस
हत्तानन गायति त्रायत इति व्युत्पत्त्या च प्राणापतन्मुख्यदेवताग्निः सा हि चर्यांत गायत्र्यासतिदृसंतत्वात्तस्याग्निरपि गायत्रः। गायत्रीभिरिति श्रुतेः
अस्यामग्निस्थापित इति यदग्निर्यथा त्रैष्टुभात् द्वितीयत्वा द्युस्थिपर्जन्याविद्युद्रूपा त्रैष्टुभेन युक्तादंतरिक्षात् त्रैष्टुभं स्तोभसमुदाययुक्तं उ
र्ध्वाधि अधः तिर्यग्लक्षणस्तोभत्रयापन्नं वायुं निरतक्षत साधु संपादितवंतो देवा इति यद्वा इति वा अथवा जगति सर्वेति ये उद्गतमेव तत्ती
य भूतद्युलोके जगतगमनशीलं आदित्याख्यं पदं माहितमिति यदहितादित्यं पितृस्थाने पुत्रयाणाम् अग्न्यादीनां पदाधनं य इत्य एवं गावि
दुर्जानंति तेन एवामृतत्वमानशुः अमरणरूपं पदं समाप्नुवंति इत्यधिलोकं। लोकप्रतिपादकं अथाधियज्ञं। यज्ञप्रतिपादकं गायत्रे प्रातः सवने
अधि उपरि गायत्रच्छंदः पदमाहितमिति यच्च तथा त्रिष्टुभान्माध्यंदिनात्सवनात् त्रैष्टुभं छंदो निरतक्षत। तत्र आहितमिति। यत्त वा किं चेत्यर्थः।
जगति तृतीयसवने जगतज्जागतं पदमाहितमिति यत्तत्तादृशं सवनत्रयपुच्छंदस्त्रयसंस्थानं ये नरा विदुः यजमाना विदुर्जानंति ते अमृत
त्वं ज्ञानानुष्ठानद्वारेण मोक्षमानशुः आप्नुवंति। अथवा गायत्रं प्रातः सवनं त्रिषु सवनेषु छंदस्त्रयपरिमाणात्सवनान्यपि तत्तच्छंदःशब्देनो
च्यते। गायत्रं प्रातः सवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमिति श्रुतेः। तादृशे प्रातः सवने अधि उपरि गायत्रं अष्टाक्षरात्म
कं आहावप्रतिगररूपं गायत्रं पदमाहितं तद्यथा होता शंसावोमिति अक्षरेण तद्यथा शंसामो दैवमिति होता प्रातः सवने शंसावोमिति मं
त्रेणाध्वर्युमाकर्यते तस्यायमर्थः। हे अध्वर्यो शंसाव शंसनं कुर्वतः ओमित्यनुज्ञार्थो। त्वयानुज्ञाते यत्स्यात् भवति। सोयं त्र्यक्षरो मंत्रः। ततो ध्व
र्युः शंसामो दैवोमिति पंचाक्षरं प्रतिगृणाति। उत्तरं ब्रूयात्। तस्यायमर्थः। होतस्त्वं शंसनं कुरु। तत्र मोदैव हर्ष एव अस्माकं। अतो अनुज्ञा
ता। तदेतन्मंत्रद्वयं मिलित्वा अष्टाक्षरं संपद्यते। एवमुत्तरत्रापि। होताशस्त्रं पठित्वा उक्थं वाचीति चतुरक्षरं मंत्रं ब्रूयात् मदीयायां वाचि उक्
थं शास्त्रसंपन्नं तस्यार्थः। ततो अध्वर्युः ओमुक्थशा इति चतुरक्षरं मंत्रं ब्रूयात् ओ इति अंगीकारः। उक्थशास्त्रं त्वं शंसी भवतीत्यर्थः।
तदेतन्मंत्रद्वयं मिलित्वा अष्टाक्षरं संपद्यते। उक्थं वाचीति चतुरक्षरं मंत्रं ब्रूयात्। इंद्राय इति समाक्षरेण शंसामो दैवः पंचाक्षरेण त
द्यथा शंसामो दैवोमिति पंचाक्षरेणाध्वर्युः प्रतिगृणाति तन्मिलित्वा अष्टाक्षरं संपद्यते तदष्टाक्षरं गायत्रीसदृशं तस्या अपि पादस्याष्टा
क्षरत्वात् इदमेकं प्रातः सवनरूपगायत्रपदप्रतिष्ठापनं तथा सवनांतेपि शंसनानंतरम् उक्थं वाचीति चतुरक्षरमाह। ओमुक्थशा इति चतु
रक्षरमध्वर्युः तदष्टाक्षरं संपद्यते। एतदेकं परं गायत्रे गायत्रस्थापनं। तथा त्रैष्टुभात् माध्यंदिनसवनात् त्रैष्टुभं आहावप्रतिगरण
रूपं पदं निरतक्षत कल्पितं। तद्यथा माध्यंदिनसवने होताध्वर्यो शंसावोमित्याह्वयते षडक्षरेण अध्वर्युश्च शंसामो दैवोमिति पंचाक्ष
रेण प्रतिगृणाति तन्मिलित्वा एकादशाक्षरं संपद्यते। इदमेकं माध्यंदिनसवनादौ त्रैष्टुभं त्रैष्टुभाधानं। तथा सवनांतेपि शंसना
नंतरं उक्थं वाचीन्द्राय इति सप्ताक्षरमाह। अध्वर्युश्च ओमुक्थशा इति चतुरक्षरेण प्रतिगृणाति तन्मिलित्वैकादशाक्षरं सं
पद्यते इदमपरं त्रैष्टुभं त्रैष्टुभस्थापनं तथा तृतीयसवने होताध्वर्यो शोंशोंसावोमिति सप्ताक्षरेणाह्वयते शंसामो दैवोमिति

 पंचाक्षरेणाध्वर्युः प्रतिगृणाति ॥ द्वादशाक्षरं भवतीति तद्दिदं प्रथमं जागतेन जगत्योत्पादनं तथा पश्चाद्दविर्द्दसं नानंतरमाह ॥ उक्थंवाची द्वाय इदे वेभ्यउः
तिएतदेवा द्वादशाक्षरं भवति ॥ अध्वर्युश्चामित्येकाक्षरेण प्रतिगृणाति तदुभयं मिलित्वा द्वादशाक्षरं भवति ॥ तदिदं मपरं जागतं जागताधा
 दनाएवं त्रिपुच्छंदः कात्रिपुगायत्र्यादिसवने पुगायत्र्यादिच्छंदस्त्वयपदप्रतिष्ठापनं ॥ एतत्सर्वमेतरेय ब्राह्मणे देवविदः कल्पयितव्यादति
सं दृषिस्पष्टमाम्नानं ॥ ततो द्वृत्तं छंदसिद्धं ज्ञापनं ॥ य इतद्विदुः येनवज्ञानंति । तएवासृततमानशुः प्रानुवंत्यनुष्ठानंनु ष्ठानद्वाराएवम
ज्ञानं तोनुष्ठानेकवलेनाविपकलं नप्राप्नुवंतीत्यर्थः ॥ तस्यसाकल्याभावादितिभावः ॥ ॥ अथ चतुर्विंशी ॥ ॥ गायत्रेण प्रतिमिमीते अर्कमर्कं
णसामं त्रैष्टुभेन वाकं ॥ वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ ॥ गायत्रेण गायत्रछंदसा अर्कं अर्चनसाधनं मंत्रं प्रतिमिमी
१४ ते प्रत्यंकृतिनति ॥ प्रतिमिमीते । सामगायनं ॥ अर्कोमंत्रोभवतिय देनेनार्चनंतिनिरक्तं प्रतिमंत्रं गायत्रेणछंदसोपनिपबध्नंकरोतिउपल
क्षणमेतदन्येषां छंदसां । यद्वैतेरषां छंदसा मस्येवचतुश्चतुरक्षराधिक्येन तत्रछंदोभिः प्रतिमिमीतइत्यर्थः ॥ यद्वा प्रतिरुपः समित्येत
मित्यर्थेछंदोभिर्मंत्रानसंमितंकरोतीत्यर्थः ॥ अर्केण सामउतलक्षणेन मंत्रेण सामगायत्रं रथंतरसंज्ञकं साम प्रतिमिमीतेनन्वेकंसाम
त्वचावि यतइतितस्वैकं सामविद्धितं अतोर्कैः सामेतिवक्तव्यं कथमुच्यते अर्केणेति नवक्तव्यं एकं सामेकस्यामृच्यगीयते तृचपश्चादन्यानद्
न्नरगायत्रीत्यतिदेशतः प्राप्नोतिस्तुगानं अतएकवचनमविरुद्धं त्रैष्टुभेन वाकं अत्रत्रिष्टुबुपादानमितरछंदः प्रदर्शनार्थं अथवा
अनादेशे सर्वंत्रिष्टुभा ग्रहणात प्राचुर्याभिप्रायेण दमुक्तं त्रैष्टुभेनद्विवारत्रिवारास्त्तेन इत्येवं रूपं । वाकंवक्तव्यं एकैकं छंदः प्रति
मिमीते अथवाकं सक्तं एतावद्भिस्त्रिष्टुभिरपनिबद्धमिदं सक्तमिति वाकेन वाकं वर्गं अनुवाकं वा मिमीते कीदृशेन वाकेनेति सावित्र्य
ते ॥ द्विपदा चतुष्पदापादद्वय चतुष्टयविशिष्टछंदोभिर्निबद्धं मंत्ररूपेण चतुष्पाद्या पादश्चतुष्टयोपेतेन अनुष्टुबादिमंत्ररूपेण इतिद्विपदी
भिर्द्विपदाभिर्वर्गः इयत्रिष्टुभिश्चतुष्पदाभिरुपेतोवर्गः ॥ इयद्भिद्विपदरूपैर्वाकैः इयद्भिश्चतुष्पदरूपैर्वाकैश्चपरिमितोनुवाकः इतिसूक्तपक्षए
तावद्भिः सक्तैरयमनुवाकइतिकिंचाक्षरेण अक्षरेणैवसप्तवाणीः वागाधितिष्ठिताःनिसप्तछंदांसिसंमिमतेनिर्माणंकुर्वंति । अष्टा
क्षरा गायत्रीत्येकादशाक्षरात्रिष्टुब्द्वादशाक्षराजगतीति अक्षरैः पादाः परिमीयंते परिमिमीते पादैश्छंदांसि ततः पादैर्न्योछंद
सां अभिरमलभिति । तथाक्वर्गसक्तानुवाकादीनांवाक्यसंमुक्तमित्यक्षरप्रशंसा ॥ ॥ अथ पंचविंशी ॥ ॥ जगतासिंधुंदिव्यस्तभा
यद्रथंतरे सूर्यं पर्यपश्यत ॥ गायत्रस्य समिधस्तिस्र आहुस्ततो मन्हा प्ररिरिचे महित्वा ॥ ॥ जगतीरं अभित्वाश्रयत्र सूक्ताया स्व
स्यं सामजगत तेनब्रह्मलस्पृष्टिकालेसिंधुं स्यंदनशीलं उदकस्यस्पंदकं । वारिर्दियंदिवि द्युलोकेअस्तभायत स्तंभितवान् जागतोवाए
षयएषतपतीतिश्रुतिः रथंतरएतन्नामके साम्निस्तंभितं सूर्यं पर्यपश्यतपरिदृष्टवान्प्रजापतिः तदाधारभूतायामृचि सवदर्शमिति
सूर्यंप्रतिपादकं ग्रस्दर्शनात असौवायस्य र्दर्शनातिद्दिश्रुतिः । अतएवसूर्यं दर्शनंविधीययमाहुरित्यर्थः ॥ अथवास्तिस्र आहुः ततो
दातुः मन्हाबलेन महित्वामहत्वेन प्ररिरिचे प्ररिच्यते अन्यानि सामानि पृथकपृथक्निर्मितवान् । यद्वागायत्र छंदसा दोवाचीतस्याः
तिस्रमृतिरितुः क्रमेणाष्टाक्षरैकादशाक्षरद्वादशाक्षरैर्गायत्रीत्रिष्टुब्जगत्यात्मिका यस्माद्देवं ततस्तस्मात् गायत्री छंदसां कनि

123
1914

यागती मन्हा बलेन महत्वेन प्ररिरिचे सर्वाणिछंदांस्यतिक्रामति येन च बलेन सोममाहृतवती तादृशेनैवंभवति ॥ ॥ इति द्वितीयस्य तृतीय
प्रपाठकस्यावर्गः ॥ ॥ प्रवर्ग्यं घर्मं धुगानकानकाले उपह्वयंत इत्यादिकाः ऋचो उपह्वये सुदुघां धेनुमेतामिति इदं तिसूत्रितत्वात् ॥ ॥ सेषा
षड्विंशी ॥ ॥ उपह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां ॥ श्रेष्ठं सवं सविता साविषन्नोभीद्धो घर्मस्तदुषु प्रवोचन ॥ होता उपह्व
ये इत्यस्याः याभिकं एतां धेनुं भागछंती क्षीरेण प्रीणयित्रीं गां प्रवर्ग्ययोग्यां पुनःकीदृशीं सुदुघां सुसुखेन दोग्धीउत अपिचएनां गोः
ण्णांगाम सुहस्तः शोभनहस्तः दोहनकुशलः गोधुक् गादोग्धा अध्वर्युः दोहनदोग्धि यस्मादेवं तस्मात् उपह्वये इत्यर्थः ॥ तदर्थं सविता
सर्वस्यानुज्ञाता परमेश्वरो अस्मदीयं श्रेष्ठं प्रशस्यं सवं सोमयागं क्षीरंवा साविषत अनुज्ञानातुं कथमेवं नेच्छदश्रुतेर्यस्तुकध्याहारः । यत
यस्मात् घर्मः प्रवर्ग्यः ॥ यथ्योत्पतत तद्धर्मस्य घर्मत्वमिति तेत्तिरीयकं तत्तादृशी अभिद्धीमः धेनुसाध्यः तदुत्राव्देएवकारार्थः
। तस्मादेवकारणात् प्रवाचं सुप्रवर्ग्यमिउपह्वयइति । यद्वा एतां पुरतो दृश्यमानां धेनुं रक्ष्या प्रीणयित्रीं मचलक्षणां धेनुं उपह्वये आह्वयामिव
यदो हायाकिं सर्वां धेनुं सुहस्तः शोभनकुशलहस्तो येता गोधुक् गोदोग्धा आश्विनो वायुर्वा दोहात दोग्धि तद्धीनत्वाद्धर्मस्यकिंचतदर्थं स
वितापरकः परमेश्वरोस्मदर्थं अस्मदुपभोगाद्दृष्टमपस्थसाविषत अनुज्ञानातु प्रतिबंधं माकरोत्वित्यर्थः ॥ किमितीदमुच्यत इति उच्यते घर्मः प्री
षः अवर्षण जनितः सत्यशापः अभीद्धः प्रवृत्तः तदुषु प्रवाचं तस्मादेवकारणादुवीतसुदिचव्यादेशवच अन अस्यैतिवक्तीत्यादिनाक्रु
रदुः कांदसोइभावः ॥ ॥ अथ सप्तविंशी ॥ ॥ हिंकृण्वती वसुपत्नी वसूनां वत्समिच्छंती मनसाभ्यागात ॥ दुहामश्विभ्यां पयो अघ्न्येयं सावर्ध
तां महते सौभगाय ॥ ॥ यथाहृतागौः हिंकृण्वती वत्सं प्रतिहिंकारं कुर्वती वसूनां वसुपत्नी क्षीरदधि आज्यादि बहुधनानां सर्वदापालयित्री
इत्यश्विभ्यां वसून पालयितत्वस्य वाधिक्यं च प्रतिवाधते पुनः कीदृशी मनसा वत्समिच्छंती ईदृशी सा अभ्यागात अभ्यागमनं इयं आग
ता अघ्न्या गानाभ्मतव अहननीयागौः अश्विभ्यां ताभ्यां अर्थायपष्ठी रंदुहां दुग्धां साता दृशीमहतेसौभगाय प्रवृद्धयसौभाग्याय वर्धतां प्र
वृद्धा भवतु ॥ यद्वा अस्मभगाय क्षीरं वर्धयतां अत्रापिरक्षिपरत्वेन यथायोगं योज्यं ॥ हिंकृण्वती वर्षणाय शब्दयंती वसूनां गोसस्यादिध
नानां बहूनां वसुपत्नीत याम व पालयित्री वत्संतोकं वत्स वत्साय पर्णीयं मनसा इच्छंती प्रीणयितुं अभ्यागात अभिगच्छति संघरूपासाच्चा
घ्न्या अहंतव्या प्रतत्कव्यातााभ्यां स्थावरजंगमाभ्यां सत्यं त्यर्थः ॥ पयउदकं अश्विभ्यां अर्थाय यद्वा अश्विनौ वा द्यावापृथिव्यौ ताभ्यां सकाशाद् दुहां
दुग्धां तादृशस्मर्गाच यिता गाः क्षिप्रवर्ग्य अभिषवदोहनसमयं वत्सो मातुः सकाशादयनीयमाने गौरभीमदित्येषास्त्रिनंच ॥ गौरमी
मदनु वत्सं मिषंतं नमसदुपसीदतेति ॥ ॥ अथाष्टाविंशी ॥ ॥ गौरमीमेदनु वत्सं मिषंतं मूर्धानं हिंङ्कृणोन्मातवाउ ॥ सृक्वाणं घर्ममभि
वावशानामिमाति मायुं पयते पयोभिः ॥ ॥ गौर्धेनुः मिषंतं निमिलिताक्षं वत्समनुप्राप्य अमीमेत इति शब्दं करोति मीमयतिः ॥ नाद्कर्माः
यद्वा इकं वत्समनु आत्मानं प्रक्षिप्यतीति किंचतस्य वत्सस्य मूर्धानमातवे मातुं निर्मातुं लेहनेन ग्राथयितुं उद्राव्दाव धारणार्थे हि दुः कृणोति हिंका
रमकरोत करोति । किंच सृक्वाणं वत्सस्य आस्यदन्प्रांतं पनस्य स्रष्टारं घर्मं क्षीरस्य क्षरणशीलं वत्सं अभि अभिलक्ष्य वावशाना स्वशब्दं काम
यमाना मायुं शब्दं मिमाति ॥ निर्मातिकरोति तादृशी सती पयोभिः प्रभृतेः क्षीरैः पयतेप्यायते ॥ आप्यायनं करोति वत्सं अत्रापि मेघपरत

यायात्तनीयं एवमाहृता से यरूपा गोधेनुमिवं तं रुधिररूपं धीरा भावेनानिमीलिताक्षः लोकात्व्यं पुत्रं भनु अनुसृत्यामीमेत गर्जनशब्दं वर्षणाचिन्ह
रूपं करोति मूर्धन्यग्रनी यां भूमिमात वाउनिर्मातुं मेवसस्यादिमुकंकर्तुं हिंङ्कृणोत हिंकाररूपं शब्दं करोत प्रतिभिरनभेदाद पुनरुक्तः किंच सृक्वा
णं कलस्य स्वद्धारं घर्मं दीप्तं पुत्रमभिवावशाना अभिमुखेन कामयमाना पयोभिरुदकैः पयते प्यायते आप्यायनं करोति ॥ ॥अथ कोन
त्रिंशी ॥ ॥अयं स शिंक्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधिश्रिता । सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवंती प्रति वव्रिमौहत ॥ ॥
सोयं वत्सः शिंक्ते अव्यक्तध्वनिं करोति । येन वत्सेन माता आगत्याभितो वेष्टिता भवति किंच सा गौर्मायुं शब्दं मिमाति निर्मिमाति कुत्र स्थिता
ध्वसनावधिश्रिता ध्वसनस्थाने गवां निवासे अधिश्रिताधिष्ठिता सा नानाद्दत्रीचित्तिभिः ज्ञानैः लक्ष्यैर्वकैः कर्मभिर्मर्त्यं निचकार हीनी चैः करोति तद्गान
विनिर्हतमनुष्याः यथा बालकस्यान्नपानादिना हंकुर्वंतीति ताप्यतिगृह्यमियं करोतीत्यर्थः ॥ किंच विद्युद्भवंतीव हृक्षीरमयाविद्योतमाना
वव्रिं स्वकीयं रूपं च वव्रिरिति रूपनाम रूपं प्रत्यु हृत प्रकाशयति यद्वा वत्सस्ते ह्यातिशयस्वरूपविद्युद्भवंतीति पुष्टिवशीघ्र प्रदर्शनादूहत
अयमेवार्थः ॥ अर्थांतरं वा शाकपूणिर्वा मनिरुक्तावार्यः सकलमंत्रदेवताज्ञानामीत्यभिमानिलवान दुर्जयस्य तत्स्वरूपमसोज्ञाना
तिवलेवनं वामो हयामीति मनमिरुत्वासंद्धिर्भाभयलिंगा प्रादुरासीत् अथ तस्य पुरतः सच तामनु बंधबुबुत्सयाव तां स्वरूपं तामज्ञा
नन पप्रच्छ ज्ञानामितनरूपं प्रदर्शयति स चायं सशिंक इत्यया सा देवतातत्र प्रतीयमानं सत स्वरूपमित्युपादिदेश ॥ कथमेत्रा भयलिं
गत्वं वस्तुत उभयलिंगात् कथं देवतैक्यमिति उच्यते ॥ अत्रा भयलिंगत्वमुभयतासंभवति स्त्रीपुंलिंगद्वयेन मध्यमोत्र मलिंगद्वयेन
वतकथ भयं स ये नेतिपुंलिंग वाचिना शब्दत्रयेण मेघः प्रतीयते अधिश्रितासेत्यादिना स्त्रीलिंगवाचकेन माध्यमिका वाक् अत उभ
यलिंगत्वं तथाविद्युद्भवंतीनां तं मध्यमालिंगात्रमेघस्तनितयोर्माध्यमिकयोः प्रतीतेन थासति वव्रिमौहत इत्यत्र स्तत्र वर्षणरूपवं प्र
काशतस्याः रसं प्रत्याहरतमित्यय मर्थोविवक्षितः ॥ सचादित्यव्यापार उत्कृष्टलिंगत्वं तर्हि वस्तुत उभयलिंगत्व प्रतीतेः उभे अपि देवते य
लिंगं सा देवतेति न्यायात् ॥ अतः कथमेक देवतामिति अयं स येनेत्येनेषां वत्सयाश्रयेण न सर्वदेवतानामधिष्ठात्मिकायाः एकत्वा
श्रयणेन वा सर्वफलदा कर्तात्मन एकत्वाश्रयेण न वा देवतैक्योपपत्तेः अनेन मध्यमोत्तम भेदेनोभयलिंगत्वपक्षेपि देवतैक्यमुक्तं भवति अत
एकैकधाम ह्यानात्मदेवतेत्वकत्वादुत्क्तो देवतैक्यं अधिष्ठा वधिष्ठान भेदेन भेदश्च न विरुध्यते ॥ अयं सशिंक्ते इयं सा माध्यमिकायावाचोधि
ष्ठात्री देवता शिंक्ते अव्यक्तध्वनिं करोति येन गौरभीवृता गौरिति वाङ्नाम माध्यमिका वाक् यया अभिवृता अभितो व्याप्ता अधिष्ठितेत्यर्थः ॥ स
यं शिंक्ते अव्यक्तध्वनिं करोति येन गौरभीवृता गौरिति वाङ्नाम माध्यमिका वाक् यया अभिवृता अभितो व्याप्ता अधिष्ठितेत्यर्थः ॥ सयं शिंक्ते अथ
वा अयं स शिंक्ते इति नेयमाध्यमिका वाक् निर्दिश्यते अपि तु मेघः तस्यां व्यक्तिशिंक्ते ज्ञानायां स एव शिंक्ते उत्कृष्ट वर्षते मंचाः क्रोशंतीति वत । अ
यं स मेघः शब्दं करोति येन माध्यमिका वाग भिव्याप्ता शब्देन प्रकारेण व्याप्ते मिमाति मायुं स्तनितलक्षणं शब्दं करोति अथ वा यं लुप्तोपमामि
नोति स्वतेजः सर्वत्र प्रक्षिपतीति मायुरादित्यः ॥ तमिवातिदीप्तं करोतीत्यर्थः ॥ अथ वा सामर्थ्यादात्मानमादित्यसदृशं निर्मिमीते कुत्र स्थिता
ध्वसनावधिश्रिता ध्वंसने मेघेधिश्रिता सा इदं रूपा चित्तिभिः कर्मना मेतत्स्वकर्मभिः रुधिररूपेण मर्त्यं मरणधर्माणं स्थावरजंगमरूपं स्व

115
1914

निहिचकार नीचैः करोति मनुष्यान प्रणतान करोति भाव्यध्यात्मिकं फलनावनतं करोति । अथ वा चित्तिभिर्द्योतनलक्षणैः कर्मभिर्विद्युति विद्योतमाप
द्यमाना प्रति वव्रिमौहत वव्रिरिति रूपनाम ऊहति स्वसामर्थ्यादुपसंहारवाची प्रत्युपसंहरति उदकलक्षणं रूपं पुनरादत्ते रश्मिद्वारेणेत्यर्थः पुन
र्घर्मकाले आदत्ते एकस्यैव व्याप्तिषष्ठोधारणाद्विपुनः सूर्यरश्मिभावउपपद्यते तेन मृ अरुणवन्तं धाभुवकर्मितिवक्ष्यमाणत्वात् । एकातिस्य
विद्युद्रूपेणमेघविद्युत्स्तवीतानामभेदादपिप्रायेण इदं शरीरं जीवात्मभ्यां भिन्नं देहस्यासारतां देहस्यानित्यत्वं प्रतिपद्यते ॥ ॥अथ त्रिंशी
॥ ॥अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आपस्त्यानां । जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥ अनत प्राणधारणं कुर्वत जीव
जीवनवत तुरगातु त्वरयापातयतूर्णगमनं सततं जत ततः शयत्ते तत पश्चात् प्राणापाममनंतरं उक्तविलक्षणं सत ध्रुवमविचलितं सत प
स्त्यानां गृहाणां मध्ये अथेनं स्थाणुवन्निष्ठति आकारः वृद्धनावा ॥ अथ जीवस्य वैलक्षण्यमाह ॥ मृतस्य शरीरस्य संबंधी जीवः मर्त्येन मरणधर्म
केण शरीरेण सयोनिः पूर्वं समानो स्थानः यद्यपि जीवस्य न तन्मास्ति तथापि व पुत्रस्तत्संबन्धात तत्संबंधेनोपचर्यते ॥ तदेवाह ॥ अमर्त्यो अम
रणस्वभावः जीवः शास्त्रायीतं वा वा कलेदं ग्रियते न जीवो म्रियत इति श्रुतेः ॥ उक्तस्वभावो जीवः स्वधाभिश्चरति पुत्रकृते स्वधाकारपूर्वकदत्तैरन्नै
श्चरति वर्तत इत्यर्थः ॥ ॥ इति द्वितीयस्य तृतीये एकोनविंशो वर्गः ॥ ॥ अथ एकत्रिंशी ॥ ॥प्रवर्ग्ये भिप्लुव अपश्यं गोपामित्यका विनियुक्तास
त्रिंशंच ॥ अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं ॥ स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वंतः ॥ अहं गोपां सर्वस्य
लोकस्य रक्षिप्रकाशादिना गोपायितारं अनिपद्यमानं कदाचिदप्यविपण्णं तथा पथिभिः विचित्रमार्गैरंतरिक्षरूपैराचरंतं च पराचरंतं च उ
दयप्रभृत्यामध्यान्हमागच्छंतं मध्यान्हं प्रभृत्यासायं पराङ्मुखं गच्छंतं एवं महानुभावमादित्यं अपश्यं याथात्म्येन पश्यामि किंच स आदित्यः
सध्रीचीः सहांचरंतीः विषूचीः विष्वंगचरंतीः ॥ रात्रावपिचंद्रभौमादित्यानां प्रकाशयित्री स्त्विषावसानः आच्छादयन भुवनेषु भुवनेक देशेषु लोका
दिप्रदेशेषु अंतर्मध्ये आवरीवर्ति उदयास्तमयं कुर्वन पुनः पुनरावर्तते ॥ तमपश्यमित्यर्थः ॥ एषवै गोपा एष हीदं सर्वं गोपायतीत्याद्यम्ना
तब्राह्मणं अपश्यं गोपामित्याह ॥ असौ वा आदित्यो गोपा स हीमाः प्रजा गोपायतीत्यादि तैत्तिरीयकं चात्र द्रष्टव्यं ॥ ॥अथ द्वात्रिंशी ॥ ॥
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ॥ स मातुर्योना परिवीतो अंतर्बहुप्रजा निरृतिमाविवेश ॥ अत्र गर्भवासक्लेशपूर्वकज
नन प्रतिपादनेन तत्परिहाराय आत्मज्ञानमुच्यत इत्यर्थः प्रतिपाद्यते ॥ यः पुमान पुत्रार्थी ईं एनं गर्भं चकार ईहितं करोति विक्षिपति वा तस्कारण
भूतस्य विक्षेपद्वारेण न स पुमान अस्य तत्वं वेद कर्मणि षष्ठी वा एनं गर्भं न जानाति कथं भूतः कथं वा केन प्रयोजनेनेति स वा तत्त्वेन न जाना
तीत्यर्थः ॥ यश्च मातुरुदरस्थमुदरस्थं अन्यथानुपपत्या अनुमानेन वा वर्भायति संतस्मात् द्रष्टुः सकाशात स हिरुगिन्नु हिरुगित्यं तर्हितनामरू
ढ्या एव कारार्थः ॥ नु निश्चयेन अत्यंत मतर्हित एव खलु ॥ यद्वायः संसाराय स्थायं ईं एनं कृषिवाणिज्यवेदाध्ययनादिकं च कार सोस्य एतत्त्ववेदा
लोकांतरं जन्मांतरं वा ॥ तथा य ईं एनं ददर्श गिरिनदी समुद्रं वा धातिकं दर्शितीव न समये तस्मात् द्रष्टा हिरुगिन्नु पृथगेव अत्रानुभूतं
सर्वं न जन्मांतरं लोकांतरं जन्मांतरे वानुभवतीत्यर्थः ॥ स तादृशो मातुर्जनन्याः योनायोनौ अंतः परिवीतः उल्बेण जरायुणा परितो वे
ष्टितः सन व हुजन्मभाक् ॥ अथ वा उत्पन्नः सन स्वयमप्यपत्योत्पादनेन बहुप्रजाः एवंगर्भदुःखमनुभवन निरृत्यभिधानं प्रदुः

भा·अ·२ स्वमनुभवति यावत् । स रूप अज्ञानेनात्मज्ञानं गुप्तं भूतात्मतानं भवति तत्वरहिता याभ्यात्मतानस्य उत्कर्षं भवति । एवमात्मविदामभिप्रेतोर्थः ॥ नैरुक्ता अ·३
नां तु मनेयं ईवकारम ध्यस्थानो वायुर्मे धावा एतादृशीं करोति । मोस्य तत्वमिति । दोषः ॥ अथवा एतत्कर्म न जानाति बुद्धिमनसोः तयोर
६२ चेतनत्वाद्विति भावः यत्तु ई एतद्दर्शं पश्यति तस्मादपि हि रुक् अंतर्हितः प्राणिकर्मवशेन काले वर्षिता परमेश्वर आहित्यात्मनि गूढ इत्य
र्थः ॥ यईं ददर्श अंतर्हितं ईमेनद्दर्श पश्यति । त्रिलक्षण पुत्रो मातुर्भूमिमातुरंतरिक्षस्यमाने योनिवदुत्पत्याधारभूतेंतरिक्षे उभयो
रप्यंतरिक्षनामत्वात् सामान्यविशेषभावाद्रस्य्य: अंतरिक्षैकदेश यान्यामंतर्मध्ये बहुप्रजाः बहुप्रजानामः बहुप्राण्युपकारी अ
थवा जनिवां अंतर्भावितण्यर्थः ॥ बहूनां धाराणां मध्ये निष्पादनद्वारेण प्राणिनां वा । प्रजननमिताम्बनिति छूतिनि मरणसाधनां भूमि
मा विवेश प्रविशति प्राप्नोतीत्यर्थः ॥ ॥ अथ त्रयस्त्रिंशी ॥ ॥ द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयं । उत्तानयोश्च
म्वोर्योनिरंतरत्रा पिता दुहितुर्गर्भमाधात् ॥ ॥ द्योर्घने मात्रवर्तिनि मम यो द्युलोकः पिता पालकः तकवलं पालकत्व मात्रं अपितु ज
निता जनयिता उत्पादयिता त वापपतिमाह ॥ नाभिर्भवतात्राभे नाभौ मोरत्रात्र ति स्थितिविशेषः । ततश्चायं जायते अंनाद्वृतः रेतसा मनु
ष्यादिरूपं परिणतनसंबंधिनोद्वैतो रसस्यात्र सद्भावात् । अनेनैवाभिप्रायेण जनितोच्यते ॥ अतएव बंधुर्बंधिकानथ्येयं महती
पृथिवी मे माता मातृस्थानीया स्योधूलोपव्याप्तिनिर्मात्रीत्यर्थः । किंच उत्तानयोः ऊर्ध्वतानयोः चम्वोः सर्वस्य अधिष्ठानयोर्भोगसाधनयोर्द्या
वापृथिव्योरंतर्मध्ये योनिः सर्वभूतानि माणा श्रयमंतरिक्षं वर्तत इति शेषः ॥ अत्रास्मिन्नंतरिक्षे पिता द्युलोको अधिष्ठानयोर
भेदे नाश्रियो योरत्यंतमः स्वरश्मिभिः ॥ अथवा ईद्रः पर्जन्यो वा दुहितुः दूरेनिहिताया भूम्याः गर्भं सर्वोत्पादनसमर्थं दृष्ट्युदक लक्षणं
आधात् सर्वतः करोति । आश्वमेधिकमध्यमहनि ब्रह्मोद्यह्रोताध्वर्यः पृच्छामीत्यनया यजमानं पृच्छेयुः । तथा च सूत्रितं एकैकशो यज
मानं पृच्छति पृच्छामि त्वा परमंतं पृथिव्या इति ॥ ॥ अथ चतुस्त्रिंशी ॥ ॥ पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः । पृच्छा
मि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ॥ हे यजमान त्वां पृच्छामि प्रश्नं करोमि किं पृथिव्याः परमंतं उत्कृष्टां काष्ठां यत्र सर्वा
पृथिवी समाप्यते तं पृच्छामि तथा त्वामन्यत् पृच्छामि किं तदिति उच्यते । यत्र भुवनस्य भूतजातस्य नाभिः संनाहः सर्वप्राणिनां कर्मस्थानं य
तः बंधनं यत्र सर्वं संनद्धं भवति तमित्यर्थः ॥ किंच त्वा त्वां वृष्णो वर्षितुरश्वस्य व्याप्तस्य आदित्यस्य असौ वा आदित्यो वृषाश्व इति तैत्तिरी
यकं तस्य रेतः रेतोवत्कारणं तत्किमिति पृच्छामि । तथा वाचः सर्वस्याः परमं निरतिशयं व्योम स्थानं सर्वस्य वचसः कारणं एतत्प्रश्नचतुष्
यं पृच्छामि । अथ एनं पृष्टो यजमान इयं वेदिरित्येतमां प्रतिब्रूयात् इयं वेदिः परो अंतः पृथिव्या इति प्रत्याह इति सूत्रितत्वात् ॥ ॥ सेषा पंच
त्रिंशी ॥ ॥ इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ॥ अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ॥
पृथिव्याः प्रथनवत्या भूम्याः परो अंतः परमंतं पर्यवसानमियं वेदिः ॥ न हि वेदिरेषातिरिक्ता भूमिः इति एतावती वै पृथिवी । यावती वेदिरि ६२
ति श्रुतेः ॥ तथा अयं यज्ञो भुवनस्य भूतजातस्य नाभिः संनहनं तत्रेयं ऋत्स्वाहि सर्वफलोत्पत्ते सर्वप्राणिनां बंधकत्वात् ॥ अथवा वृष्णो
वर्षकस्यादित्यस्य रेतो यं सोमो रसात्मकः अग्नौ हुतः सोमरस आदित्यं प्राप्य यज्ञाद्भवति पर्जन्यः वृष्ट्यादिकालं जनयति । अयं ब्रह्मा

प्रजापतिः ऋत्विग्वा वाचो मंत्रादिरूपायाः परमं व्योम उत्कृष्टं रक्षकं स्थानं तत्रैवास्य मंत्रोत्रैव पर्यवसानाच्च ॥ ॥ इति द्वितीयस्य तृतीये विंशो वर्गः ॥ ॥ 117/1914
अथ षट्त्रिंशी ॥ ॥ सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्मणि ॥ ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परिभवंति वि
श्वतः ॥ ॥ सप्त सर्पणस्वभावाः सप्तसंख्या वा रश्मयः अर्धगर्भाः संवत्सरस्यार्धगर्भे गर्भस्थानीयमुदकं धारयमाणाः यद्वा अत्रलोकस्यार्ध
मध्यंतरिक्षं गर्भवद्वर्तमाना भुवनस्य लोकस्य रेतः सारं वृष्टिप्रदत्वेन रेतोभूताः तादृशा रश्मयो विष्णोर्व्यापकस्यादित्यस्य विधर्मणि जगद्
धारणव्यापारे प्रदिशा नतिष्ठंति वर्तंते किंच ते धीतिभिः प्रज्ञाभिः मनसा जगदुपकारः कर्तव्य इति बुध्या च विश्वतः सर्वतः द्वितीयार्थे तसिः वि
श्वं परिभवंति परितो भावयंति परितो भावयंति व्याप्नुवंतीत्यर्थः ॥ यस्मादेवं तस्मात्तेत एव विपश्चितो बुद्धियुक्ताः परिभुवः सर्वत्र व्या
प्ताश्च यद्वा सप्तार्धगर्भाः सप्त प्रकृतिमहदहंकारपंचतन्मात्राणीति मिलित्वा सप्तसंख्यानि अर्धगर्भाः अविकृतिरूपाविकाराश्रयाः मूलप्रकृतौ प्रकृति
विकृतरदासीनस्यात्मनश्चोत्पन्नत्वादर्धाज्ञानप्रपंचाकारेण परिणामादर्धगर्भाः पुरस्ताद्रस्य विक्रियत्वादित्यभिप्रायः ॥ अत एव तेषां प्रकृति
त्वं यस्मादेवं तस्मात् भुवनस्य रेतः कारणं कारणभूतानि तान्येव विष्णोर्व्याप्तस्य पुरुषस्य विधर्मणि प्रदेशात् प्रदेशेन तिष्ठंति ॥ इतरं तु समानं ॥
॥ ॥ अथ सप्तत्रिंशी ॥ ॥ न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ॥ यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥ ॥
अहं यदिवेदं विश्वं अस्मि तत्सः प्रपंचो प्यहमेवास्मि नामरूपांशं परमार्थत्यक्त्वा सर्वत्रानुगतास्मि अस्ति भाति प्रियमिति ॥ यो यं सच्चिदानं
दाकारोस्मि सोहमस्मीति न विजानामि विविच्य न जानाति सर्पं परं नारज्जु जनितमिदमहमस्मीति नितानं ज्ञातं अविवेकं ज्ञामित्यर्थः ॥ कार्यकारण
योरभेदात् ॥ कृत्स्न प्रपंचस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपंचजातमपि स्वरूपमेव भवति ॥ इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वं सर्वं
आत्मवेदं सर्वं सदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिभ्यः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् ॥ तदनन्यत्वमारंभणशब्दादिभ्य इत्याद्युपपत्ति
भ्यश्च प्रपंचस्य ब्रह्मानन्यत्वं सिद्धं । यद्वा इवशब्द एवमार्थः ॥ यदि वा इदं वा यदपरोक्षज्ञानं मज्ञातं अवितथ्यत ढार्येति कभूतमानुभविकं स
र्वात्मना यदस्ति तं न विजानामि न प्राप्नोमि शास्त्रजनितं सार्वात्म्यं ज्ञानं त्वानुभाविकमित्यर्थः । तत्र कारणमाह ॥ यतोहं निण्यः अंतर्हितंना
मतत । अंतर्हितः मूढचित्तः चित्तदेहवादी प्रत्यक्प्रवणता भावनपरिच्छिन्न इत्यर्थः ॥ तत्रोपपत्तिमाह संनद्धः अविद्याकामकर्मभिः स
म्यक्बद्धो वेष्टितः अत एव मनसा युक्तः भावनासहितेन बाहिर्मुखेन विक्षिप्तमनश्चेतसा युक्तः संचरामि संचारे ॥ अथ वा मनसा संनद्धं
श्च रामीद्रे इंद्रियपरवशएव संन संसारे दुःखमनुभवामि तत्तत्वात्म्यं ज्ञानामीति देवयते यास्कापीमं परिदेवनार्थत्वेनोदाजहार ॥ अथापि ।
परिदेवनाकस्मात्सिद्धावात ॥ न विजानामि यदिवेदमस्मीति बहिर्मुखत्वेन सात्म्यस्वरूपपरिज्ञानजनितदुःखमन्यत्र श्रूयते ॥ परांचि स्वानि
व्यतृणत्स्वयंभूस्तस्मात् पराङ् पश्यति नांतरात्मन् इति तादृशं वदेत इत्यनीत्याह ॥ यदा मा आगन् आगाणमिष्यातित दाकिंता दितिउच्यते
॥ कृत्स्नस्य परमार्थस्य परस्य ब्रह्म लक्षणः प्रथमजाः प्रथमो मोक्षः प्रथमोस्यं नः चित्तप्रत्यक्प्रवणजनितोनुभावः सदा मा प्राप्नोमि चित्तस्य बहि
र्मुखत्वं । परित्यज्य अंतर्मुखः इति अहित अनंतरमेव अस्य यथाननं अस्याः वाचः एकात्म्य प्रतिपादिकाया उपनिषद्धूर्चः यदिवेदमस्मी
त्यृचा यावरभागं भजनीयं ब्रह्मलक्षणं प्रत्यं परं ब्रह्मरूपं ईं अश्नुवे प्राप्नोमि चित्तस्य बाहिर्मुखत्वं । परित्यज्य अंतर्मुखत्वेन दुःसपारा

भा० अ०२ साय दा स्यात् तदानीमेव सुरूपं दृष्टुं सुखं कं भवति पश्चात्पापविलं वा भावात् यदा गिरिशिखरात् पतन पाषाणो बिलं वनपतति तद्वत् चित्तप्रत्यक्षस्व अ-३
त्वस्य दुःखाकत्वमपि तत्रैव श्रूयते। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति॥ ॥अथाष्टत्रिंशी॥ ॥अपांङ् प्राङेति
६३ स्वधया गृभीतोमर्त्यो मर्त्येना सयोनिः॥ ता शश्वंता विषूचीना वियंता न्यं१न्यं चिक्युर्न नि चिक्युरन्यं॥ ॥अमर्त्यः अमरणधर्मा यमात्मा मर्त्येन मर
णधर्मणा भूतात्मना देहेन सयोनिः समानस्थानः अवस्थात्रयपरिच्छेदकोदेहो स्ति तत्र सर्वत्र सोयमपि तिष्ठन्नित्यर्थः॥ यद्वा समानोत्पत्तिः उत्पत्ति
मत् सह वासेन स्वस्मिन्नप्युत्पत्तिरुपचर्यते। एवंभूतः सन् स्वधया अन्नोपलक्षितेन भोगेन गृभीतः गृहीतः यद्वा स्वधाशब्देनान्नमयं शरी
रं लक्ष्यते तेन गृहीतः सन् अपाङेति अशुक्लं कर्म कृत्वा अधोगच्छति प्राङेति शुक्लं कर्म कृत्वा ऊर्ध्वं स्वर्गादिलोकं प्राप्नोति॥ परमात्मैव सूक्ष्मशरीरोपाधि
कः सन् नानाविधकर्मकृत्वात् भोगायतनीय संतानं अपाङ् शरीरत्रयेण संबंधालोकांतरेषु संचरति स्थूलसूक्ष्मो भयशुक्लं कर्म कृत्वा शरीरपरिग्र
हेणलोकं गुणत्रयान्वितः सन् न परिभ्रमति॥ तथा च श्रूयते॥ गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूपस्त्रिगुण
स्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिरिति। इदानीमुभयप्राधान्येनाह। ता तौ भूतात्मकर्तात्मानौ शश्वंता अविभागेन सर्वदा वर्तमानौ
यद्वा सूक्ष्मशरीरपक्षे सर्वदा सहवासमुपपद्यते। स्थूलशरीरपक्षेपि सकृदिजातत्कारणानां भूतसूक्ष्माणां सद्भावात् न शरीरसंबंध उपप
द्यते॥ विषूचीना विषूच्याना सर्वत्रगमनौ वियंता नानालोकोपभोगाय सर्वलोकांतरेषु गच्छंतौ वर्तते॥ तत्र नराः अन्यं भूतात्मानं निचि
क्युः नितरां विशेषेण पश्यंति॥ जानंति अन्यमपरं देहव्यतिरिक्तं न निचिक्युः न जानंति केचन पामरा देहव्यतिरिक्तं न जानंति। केचनाविच
क्षणः कर्तृत्वभोक्तृत्वापन्नो देहातिरिक्तः कश्चिदस्तीत्यनुमिमते न कोपि देहद्वयव्यतिरिक्तमात्मानं जानंति अतो दुर्लभमात्मज्ञानमित्यर्थः॥ ॥
अथैकोनचत्वारिंशी॥ ॥ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः॥ यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समास
ते॥ ॥पूर्वमंत्रे देहात्मजीवात्मानावुक्तौ तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्ति तदत्रोच्यते॥ ऋचो अक्षरे अनया ऋक्शब्देन ऋक्प्रधा
नभूतास्सांगाः परा विद्यात्मकाश्चत्वारो वेदा उच्यंते॥ ऋगादीनामपराविद्यात्वं मुंडके श्रूयते द्वे विद्ये वेदितव्ये इति प्रतिज्ञाय तत्रापरा ऋग्वेदो
यजुर्वेदः सामवेद इत्यादिना तस्याः संबंधिन्यक्षरे अदृश्यादिगुणे क्षरणरहिते अनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि अक्षरशब्दस्य
ब्रह्मवाचकत्वमेतद्वैतदक्षरस्य प्रशासने गार्गि यया तदक्षरमधिगम्यते। येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतिषु प्रसिद्धं॥ ऋगक्षरयोः प्र
तिपाद्यप्रतिपादकभावः संबंधः सर्वे वेदाः खलु ब्रह्माधिगम्यते तं। त्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतेः॥ ननूपनिषद्भागानां तथा
त्वेपि इतरेषां कथं ब्रह्मविषयत्वमिति उच्यते। यद्यपीतरभागानां यागविषयत्वं तथापि बुद्धिशुद्धिकारणत्वात् ज्ञानकर्मश्रुत्यर्थोत्पादनद्वारा वेद
ज्ञानसाधनत्वेन ब्रह्मविषयाभविष्यंति वेदानुवचनेन ब्राह्मणा विविदिषंतीत्यादिश्रुतेः तदेव विशेष्यते परमे उत्कृष्टे निरतिशये व्योम ६३
न् व्योमनि व्योमसदृशे अलेपत्वनीरूपत्वव्यापित्वादिसादृश्येन व्योमेत्युक्तं यद्वा विशेषेण सर्वस्यरक्षकनिरधिष्ठानकस्य चिद्व्याप्तिस्वा
ध्यस्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात् तादृशे तत्र सर्वमध्यस्तमित्यर्थः॥ पुनस्तदेव विशेष्यते यस्मिन्परमात्मनि विश्वे सर्वे देवा अधि
निषेदुः निषीदंति आश्रित्य तिष्ठंति तस्मिन्यद्वैतरूपेण वस्तुनि ऋत्विगुपलक्षिताः सर्वेषां सांगा वेदाः पर्यवसिता इत्यर्थः॥ यथोः

11/9 1914

मर्त्यः तत्रादृशं देवादीनां स्वरूपं सर्वं भाष्यदं ब्रह्म वेदे तात्पर्यं प्रतिपाद्यं यद्ब्रह्म न वेद न जानाति स मर्त्यः ऋचा पूर्वोक्तेन ऋगादिशब्दवाच्येन
किं करिष्यति वेदज्ञानसाधनं न वेदेन वेदमविदित्वा किं साधयतीत्यर्थः। प्रयोजनाभावात् सर्वं स्वाप्यविहस्यं नैष्फल्यादिति भावः॥ अथवा
या अक्षरविदिता कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किंचिदपि कर्म कृतं न भवतीत्यर्थः॥ य इत् य एव तत्तत्त्वं विदुर्जानंति त इमे समा
सते तत्त्वमेव ज्ञातारः समासते सम्यक्तिष्ठंति अपुनरावृत्त्या स्वस्वरूपे वर्तमानं समासनं यद्वा एते विदुरिष्ठोजानंत्येवं नानुतिष्ठंति। इत्थं बोधा
रणात् इमेत एव समासते गवामयनादि सहस्रसंवत्सरसत्रपर्यंतानि सत्रापयंति॥ स त्रार्थः समेत्य शब्दः सत्राद्यधिकानां यागानामभावात्ते षामपि
फलमनंतं ज्ञानेनैव प्राप्तं भवतीत्यर्थः॥ कर्तॄणां बहुत्वात् बहुवचनानि देवाः अन्ये त्वन्यथा वर्णयंति॥ ऋचः ऋगर्चनीयमादित्यमादिमं उ
क्तं ऋगादिमयं यथा ऋग्भिः पूर्वाह्णे दिवि देवः ईयते आदित्यः एष एतन्मंडलं तपति तत्र ता ऋचः इत्यादिश्रुतेः॥ तस्य संबंधिनि अक्षरे परमे व्यो
मनिति उक्तलक्षणे ब्रह्मणि य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादिश्रुत्युक्तस्वरूपे यस्मिन्देवा द्योतमाना रश्मयो निषेदुर्वर्त
ते॥ य एतन्न ब्रह्मार्थं न वेद स केवलया ऋचा किं करिष्यति॥ ये जानंति भावयंति त एव विद्वांसः समासते भूम्यां सुखेन रोगादिरहिताः भो
गिनः संतश्चिरकालं जीवंति। अपरे प्रकारांतरेण प्रतिपादयंति॥ ऋचा अक्षरे ऋगुपलक्षितसर्ववेदसंबंधिन्यक्षरेण मंत्राधीनादेव
ता। प्रणवरूपे तुंकार अविनाशिनि सर्ववेदपुष्पात्त वा प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते॥ तान् वेदानभ्यतपत्तेभ्योभितप्तेभ्यस्त्रयो
वर्णा अजायंताकार उकारो मकार इति तानेकधा समभरत्तदेतदोमिति। तदिति परमे निरतिशये। न हि प्रणवादपि किंचिन्मंत्रजातमस्ति त्रि
कालातीतस्य ब्रह्मणः प्रतिपादकत्वात्॥ यच्चान्यत्त्रिकालातीतं तदप्योंकार एव तुमिति ब्रह्मेत्यादिश्रुतेः॥ वेदानां प्रणवस्य च स्थानप्रतिनिधि
भावः संबंधः य ऋचोधीते इत्याद्युपक्रम्य यः प्रणवमधीते स सर्वमधीते ओमिति प्रतिपद्यते एतद्वै यजुः त्रयीं विद्यां प्रत्येषा वागेत
त्परममक्षरमित्यादिश्रुतेः॥ यस्मिन्विश्वे सर्वे देवाः अधिनिषेदुः प्रणवस्य सर्वमंत्रात्मकत्वात्॥ मंत्रदेवत्वं देवतात्वं। मंत्र एव विग्रहः
मंत्रमयी देवता। ननु विग्रहवती देवी वज्रहस्तः पुरंदरः विग्रहेण देवतानसिध्यति। मंत्रेषु सर्वदेवतानां निवासात्॥ सर्वदेवनिवासत्वं
ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात्त्रिष्टुभादिविशिष्टं अयं मंत्रो निरुक्तेन व्याख्यातः॥ अपरे त्वपरार्थान्वर्णयंति॥ ऋचः
ऋगर्चनीयो जीवः तस्य संबंधिनि अक्षरे अविनाशे व्यापिनि वा परमात्मनि इत्यर्थः॥ अत एव जीवापेक्षया परमे उत्कृष्टे निरुपाधिके व्यो
मन् विशेषण सर्वाधिष्ठानत्वेन रक्षके व्योमसदृशे वा यस्मिन्परमात्मनि देवाः गमनवंतो व्यवहरंतो वा इंद्रियसंज्ञका विश्वे सर्वेपि अधि
निषेदुः निषीदंति आश्रित्य वर्तंते यस्तं न वेद न जानाति उपाध्यंशापरित्यागेन तदेव स्वरूपमिति॥ न पश्यति स जीवः कश्चनः किमृचा करिष्यति
कृतकृत्ये न जीव न जीवभावेन किं फलं प्राप्स्यति जननमरणादि क्लेश स्यात्याग इति भावः एतत्त्वं विदुस्त इत्यादि सिद्धं॥ अग्निहोत्रार्थं धेनुर्य
दि कुत्सितं शब्दं कुर्याति॥ तदानीं सूयवसादित्यनया यवसादिकं प्रयच्छेत। तथा च सूत्रितं॥ वाश्यमानायै यवसं प्रयच्छेत सूयवसाद्भगवती हि
भूया इति प्रवर्ग्याभिस्तवे एवं रूपविधानात्यामस्त्रितं चास्य सूयवसाद्भगवती हि भूया इति दध्यादिति॥ ॥सैषा चत्वारिंशी॥ ॥सूयवसा
द्भगवती हि भूया अथो वयं भगवंतः स्याम॥ अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरंती॥ ॥हे अघ्न्ये गो नाम तत आस्वनी

भा·अ·२ येगौस्त्वं सूयवसात् शोभनयवसयुक्तेन तृणादिकस्यात्री सती भगवती भगद् इति धननाम सर्वैर्भजनीयप्रभूतक्षीरादिधनवती भूयाः भव अ·३
६४ हि: पूरणः प्रसिद्धो वा लोके यवसादिभक्षणेन क्षीरादिसमृद्धिः प्रसिद्धा॥ अथो अनंतरमेव वयं यजमाना अपि भगवंतः प्रभूतेन धनेन तद्व
तः स्याम। अथ एकवारं पूर्वमुक्तं इदानीं सर्वदा कर्तव्यमिति प्रार्थयते विश्वदानीं विश्वकालं सर्वदा तृणं घासं अघ्नि भक्षय आचरंती सर्वतो निर्ग
छंतीति हे अघ्न्ये शुद्धं निर्मलमुदकं पिब॥ अयं मंत्रो यास्केनैवं व्याख्यातः॥ सूयवसादिनी भगवती हि भवाथेदानीं वयं भगवंतः स्याम अद्धि तृण
मघ्न्ये सर्वदा पिब च शुद्धमुदकमाचरंतीति॥ ॥इति द्वितीयस्य तृतीये एकविंशो वर्गः॥ ॥अथैकचत्वारिंशी॥ ॥गौरीर्मिमाय स
लिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ ॥गौरीः गरणशीला माध्य
मिका वाक् सलिलानि पानीयानि शब्दायमाना मिमाय शब्दयति॥ किं कुर्वती सलिलानि उदकानि तक्षती सम्यक् संपादयिती एकपदी एकपादो
पेता एकाधिष्ठाना मध्यवर्तमाना गमनसाधनेन वायुना एकपदी वा द्विपदी मेघाः तरिक्षाख्याभ्यां अधिष्ठानाभ्याम् आदित्यो वा द्वितीयः तथा सा च
तुष्पदी पादचतुष्टयोपेता दिक्चतुष्टयाधिष्ठाना अष्टापदी अवांतरदिशोपेक्षया अष्टपादोपेता अष्टाधिष्ठाना नवपदी उपरिदिग
पेक्षया सर्वेण वा नवदिगधिष्ठाना बभूवुषी एवंभूता भवंती छांदसः कुत्सः ततोपि उद्विसोः संप्रसारणं वक्तमनया परिगणनया सहस्रा
क्षरा अपरिमिताक्षरा व्याप्तिमत्यस्मात् बहुव्यापनं यद्वा लोके उदकवतीत्यर्थः॥ क्वेति तदुच्यते परमे व्योमन् उदकाश्रयत्वेनोत्कृष्टे अंतरिक्षे विरलमा
दः॥ गौरीः गरणशीला शब्दब्रह्मात्मिका वाक् मिमाय मति प्रतिशब्दार्थे धातुः प्रतिष्ठितानि घटादिद्रव्याणि तक्षती तत्तद्वाचकत्वेन निष्पा
दयंती एकपदी अव्याकृतत्वान् एकप्रतिष्ठाना एकरूपा वा सना द्विपदी सुपतिङ्भेदेन पादद्वयवती चतुष्पदी नामाख्यातोपसर्गनिपात
भेदेन अष्टापदी आमंत्रितस्य सहिता एषा भेदेनाष्टापदी नवपदी बभूवुषी साव्ययेन नवभिः पदैर्नवपदी अथवा सनाभिके उरःकंठादि
षु नवसु पदेषु भवंती पश्चाद्बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरा अकारेण व्याप्ता
अनेकध्वनिप्रकारा भवतीत्यर्थः॥ अयं मंत्र आचार्येणैवं व्याख्यातः गौरीर्निर्मिमाय सलिलानि तक्षती कुर्वती एकपदी मध्यमेन द्विप
दी मध्यमेन चादित्येन च चतुष्पदी दिग्भिः अष्टापदी दिग्भिश्चावांतरदिग्भिश्च नवपदी दिग्भिश्चावांतरदिग्भिश्चादित्येन च सहस्रा
क्षरा बहूदका परमे व्यन एवं भवतीति॥ ॥अथ द्विचत्वारिंशी॥ ॥तस्याः समुद्रा अधि वि क्षरंति तेन जीवंति प्रदिशश्चतस्रः॥ ततः क्षर
त्यक्षरं तद्विश्वमुपजीवति॥ ॥तस्याः उक्तायाः गौः सकाशात् समुद्राः उदकसमुद्रधनाधिकरणभूता मेघा अधि अधिकं प्रभू
तमुदकं विक्षरंति विविधं क्षरंति तेनोदकेन प्रदिशश्चतस्रः प्रकृष्टा दिश इत्यर्थः दिङ्गाश्रिताः तस्मादिश्चाश्रिताश्च अथवा प्रकृष्टा दिशो मुख्याश्च
तस्रः तत्रोपुताच्चस्यतस्थाः पुरुषा जीवंति ततः पश्चात् अक्षरं उदकं क्षरंति सस्यादिकमुप्या इयंतीत्यर्थः ततः सस्यादिकं विश्वं जगत् ६४
दुपजीवति॥ अयमपि यास्केन व्याख्यातः तस्याः समुद्रा अधि विक्षरंति वर्षंति मेघास्तेन जीवंति दिशाश्रयाणि भूतानि ततः क्षरत्य
क्षरमुदकं तत्सर्वाणि भूतान्युपजीवंतीति॥ ॥अथ त्रिचत्वारिंशी॥ ॥शकमयं धूममारादपश्यं विषूवता पर एनावरेण॥ उक्षाणं पृ
श्निमपचंत वीरास्तानि धर्माणि प्रथमान्यासन्॥ ॥शकमयं शकृन्मयं शुष्कगोमये संभूतं धूमं॥ आरात् नातिदूरे अपश्यं दृष्टवा

121
1914

नस्मि दिवा धूमस्य दूरे दृश्यमानत्वात् स एव दर्शनविषयः पो विषुवता व्याप्तिमता एना अनेन आवरेण निकृष्टेन धूमेन परः परस्तात् तत्का
रणभूतमयमपश्यं भइंधयजमान इत्यर्थः॥ किंचोक्षाणं फलस्य सेक्तारं पृश्निं शुक्लवर्णं प्राप्नुते तेन फलमिति स्वयं प्राप्नुत इति वा वीरैर्वोढ्री
रूपः सोमः तं वीराः विविधकरणाः कुशलाः ऋत्विजः अपचंत अनधात्वर्थानाद्रणति इत्यत्र प्रत्ययः करोत्यर्थः॥ सत्वाक्रियासामान्यवचन भ
त्रो चित्यादभिषवेण संपादितवंत इत्यर्थः॥ तानि तत्साधनाधर्माण्यनुष्ठानानि प्रथमानि प्रतमानि प्रकृष्टानि फलपर्यवसानीयानि आसन् संपादि
तान्यभवन्। यद्वा सोम उक्षा भवत् पूर्वं ते देवाः क्रतुना पक्वन् यतार्थे तद् वो धूमो मे घमासीत् उच्यते तत्परत्वेन वा मंत्रो व्याख्येयो यो विचक्षणैः॥ ॥
अथ चतुश्चत्वारिंशी॥ ॥त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषां॥ विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं॥ ॥के
शस्थानीय प्रकृष्टरश्मियुक्ता अग्निवाय्वादित्या वा यवः ते च ऋतुथा काले काले विचक्षते विविधलक्षणं भूमिं पश्यंति तेषां पृथक् कार्यमाह॥
एषां मध्ये एकोग्निः संवत्सरे ति सति संवत्सरं वपते दाहनेन केशस्थानीयोषधिवनस्पत्यादिकं छेदनेनापितकार्यं करोति॥ एकः अन्य आदित्यो विश्वं सर्वं
जगत् शचीभिः स्वकार्यैः प्रकाशवृष्ट्यादिकर्मभिः अभिचष्टे सर्वतः पश्यति एकस्य वायोः ध्राजिः गतिः ददृशे दृश्यते सर्वैर्न रूपं अप्रत्यक्षत्वात् स्पर्श
शब्द आकाशे पतंगधारणं पालिगर्गाम्यन इति लिंग्यायाविदेव इति॥ अयमपि मंत्रो यास्केन व्याख्यातः॥ त्रयः केशिन ऋतुथा विचक्षते कालेका
ले भिविपश्यंति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेको अभिविपश्यति कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपमस्य मध्यमस्या
थ य द्रष्टिमभि रभिप्रकंपयन्नेति॥ वाश्च देवता पशोश्चत्वारि वाग्जाति हविषा नुवाक्याश्चत्वारि वा परिमिता पदानि यत्तेन वाचः पदवीयमा यन्निति
सूत्रितत्वात्॥ ॥सैषा पंचचत्वारिंशी॥ ॥चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वा
चो मनुष्या वदंति॥ ॥वाक् वाचः कृत्स्नायाः पदानि चत्वारि वा कुपरिमिता परिमितानि एकैका वाग्जातिः सा चतुर्विधा विभक्तेत्यर्थः॥ तानि पदा
नि ब्राह्मणा वेदविदः मनीषिणो मनस ईषिणो मेधाविनो विदुर्जानंति तेषां मध्ये त्रीणि गुहा गुहायां निहितानि अर्पितानि नेंगयंति॥ न चेष्टंते नप्र
काशंत इत्यर्थः॥ वाचस्तुरीयं पदं मनुष्या अज्ञास्तत्ताव दंति व्यक्तमुच्चारयंति व्यवहरंति कानि तानि चत्वारीति अत्र बहवः स्वस्वमतेनोत्तरो
धनं वदुधा वर्णयंति॥ सर्वा वैदिकवाक् तालस्य संग्रहरूपा भूरादयास्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात् तासां व्याहृतीनामव
सारसंग्रहभूतत्वाद् ओंकारात्मकस्य प्रणवस्य इति स प्रणवात्मिका व्याहृतीषु सर्वा वाक् परिमितेति केचन नैरुक्तादिनो वदंति अपरे व्याकर
णमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन क्रियाप्रधानमाख्यातं द्रव्यप्रधानं नाम प्रागुपसृज्यते अख्यातपदस्योपसर्गाः
प्रादिः उच्चावचेष्वर्थेषु निपतनान्निपातः॥ अपितु चेत्यादिः॥ एते चैव सार्वा वाक् परिमितेति अस्य वाचाः कृत्स्नायावाचः चतुर्धा व्याकृतत्वात्॥
वाग्वै पराच्यव्याकृतावदत्तामिंद्रो मध्यतोवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यत इति श्रुतेः॥ सत्र प्रथमाध्याये खं॰४ अन्ये तु याज्ञिका मं
त्रकल्पो ब्राह्मणं चतुर्थी लौकिकी इति याज्ञिकैः समाख्यातो नुष्ठेयार्थप्रकाशादिर्मंत्रविधानप्रतिपादको वेदभागो इति मंत्राः कल्पोक्त
ऊर्ध्वमित्यादिनोक्तः कल्प्यमंत्रतात्पर्यार्थप्रकाशो वेदभागो ब्राह्मणं भोगविषयगामानयेत्यादिरूपा व्यावहारिणी॥ एषैव सर्वा वागभि
द्वेनियमितेति याज्ञिकाः॥ कल्पस्तु सामादिश्च चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारि

भा॰अ॰२ वीत्येति द्वासिकाः पशुपुरुगणवेषु गोषामाननिचेत्यात्मवादिनः॥ अपरे मांत्रिकाः प्रकारांतरेण प्रतिपादयंति। परा पश्यंति मध्यमा वैख अ॰३
रीति चत्वारीति। एकैव नादात्मिका वाक् मूलाधारात् उदिता सती परेत्युच्यते॥ नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात्। सैव हृदयगामिनी पश्यं
६५ तीत्युच्यते। योगिभिर्द्रष्टुं शक्यत्वात् सैव बुद्धिंगता विवक्षां प्राप्ता मध्यमेत्युच्यते॥ मध्ये हृदयाख्ये उदीयमानत्वात् मध्यमा या। अथ यदा
सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते॥ एवं चत्वारि वाचः पदानि परिमितानि मनीषिणो मनसः स्वामि
नः स्वाधीनमनस्का ब्राह्मणाः वाग्विषयस्य शब्दब्रह्मणः अधिगंतारो योगिनः परादीनि चत्वारि पदानि विदुः जानंति। तेषु मध्ये त्रीणि परा
दीनि गुहायां निहितानि हृदयांतर्वर्तित्वात् तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदंति॥ व्याकरणप्रातिशाख्यानामाख्यातादिपक्षे मनीषि
णो ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञा वाक्यार्थविदः स्तानि पदानि जानंति अर्वाक् योगविदः पामराः वाचो वाक्यस्य तुरीयं चतुर्थं
भागं वदंति व्यवहरंति अर्थप्रकाशनाय प्रयुंजते॥ अयं मंत्रो निरुक्ते व्याख्यातः सोऽप्यनुसंधेयः॥ अथापि ब्राह्मणं भवति सा वै वाक्
सृष्टा चतुर्धा व्यभवत् एष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथंतरे यांतरिक्षे सा वायौ सा वामदेव्ये या दिवि सादित्ये सा बृ
हति सा स्तनयित्नौ अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद्ब्राह्मणा उभयीं वाचं वदंति। या च देवानां या च मनु
ष्याणामित्यथेति॥ औचथ्यो दीर्घतमा ऋषिः सूर्यो देवता त्रिष्टुप् छंदः॥ ॥अथ षट्चत्वारिंशी॥ ॥
इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्॥ एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः॥ ॥ अमुमादित्यमेवैश्वर्यविशि
ष्टमिंद्रमाहुः तथा मित्रं प्रमीतेर्मरणात् त्रातारं अहरभिमानिनां मतं नामकं देवतामाहुः वरुणं पापस्य निवारकं रात्र्यभिमानिनं देवमाहुः तथा
ग्निं अंगनादिगुणविशिष्टं मतं नामकमाहुः अथो अपि चायमेवादित्यो दिव्यः सुपर्णः सुपतनो गरुत्मान् गरणवान् पक्षवान् येन ते यन नामको
यः पक्ष्यस्ति सोऽप्ययमेव॥ कथमेकस्य नानात्वमिति उच्यते अमुमेवादित्यमेकमेव संतं सतां विप्रा मेधाविनः देवतातत्त्वविदो बहुधा वदंति तत्त
त्कार्यकरणे नैश्वर्यात्मानं वदंति। एकैव वा महानात्मा देवता सः सूर्य इत्याचक्षते उक्तत्वात्। किं च यममेव रश्म्यादिकारणं वैद्युताग्निं। यमं नियं
तारं मातरिश्वानं अंतरिक्षे श्वसंतं वायुमाहुः स यं इत्याचक्षते उक्तत्वात् यस्य ब्राह्मणेनान्यत्वेन तत्सर्वात्म्यमुक्तं भवति। अत्र केचिदग्निः स
र्वदेवतात्मा इत्यादिश्रुतिः अयमेवाग्निरजरोऽपि ज्योतिषी इति मत्वाग्नेरेव सर्वात्मप्रतिपादकोऽयं मंत्र इति वदंति॥ तत्पक्षे प्रथमाग्निशब्दः इंद्र
श्यमानमग्निं उद्दिश्य द्वाभ्यामेकत्वकथनं भयं मंत्रो विज्ञेयः एवं व्याख्यातः इयमेवाग्निं महांतमात्मानमेकमात्मानं बहुधा मेधाविनो वदंति इंद्र
मित्रं वरुणमग्निं दिव्यं च गरुत्मंतं दिव्योऽग्निः गरुत्मान् गरणवान् गुर्वात्मा महात्मेति॥ ॥इति द्वितीयस्य तृतीये द्वाविंशो वर्गः॥ ॥ व
र्षकामेष्ट्यां तिस्रः पित्र्यो ह्यातव्याः॥ तत्र कृष्णं नियानमिति तृतीयस्यानुवाक्या॥ कृष्णं नियानं हरयः सुपर्णा नियुत्वंतो ग्रामजितो यथा नर इ
ति॥ ॥सप्तचत्वारिंशी॥ ॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतंति॥ त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्य ६५
ते॥ कृष्णं कृष्णवर्णं नियानं नियमेन गच्छंतं मेघं हरयः उदकस्य हर्तारः सुपर्णाः शोभनपतना रश्मयः अपो वसानाः उदकान्याच्छादयंतः
मेघेषु आदीप्यमानं पूरयंत इत्यर्थः॥ अंतर्भावितण्यर्थाद्धि कर्मकत्वं यद्वा कृष्णं नियानं नियमनं रात्रिः देवानां हि रात्रिर्दक्षिणायनं तत्प्रति

स्मिन् वर्षकाले इत्यर्थः॥ एवं कुर्वंतो दिव्यं द्युलोकं तदाश्रितमादित्यं वा उद्दिश्य उत्पतंति ऊर्ध्वं गच्छंति। ते रश्मयः ऋतस्य सदनात् उदकस्य स्थानादादित्य 123/1914
मंडलाद् आवावृत्रन् आवर्तंते अर्वाञ्च आगच्छंति। आदित्। अनंतरमेव यदा आगच्छंति तदानीमेव घृतेनोदकेन पृथिवी व्युद्यते विविधं क्लिद्य
ते॥ कृष्णं निरयणं रात्रिं आदित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मय इत्यादिनिरुक्तं द्रष्टव्यं॥ ॥अथाष्टाचत्वारिंशी॥ ॥ द्वादश प्रधय
श्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत॥ तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः॥ द्वादशसंख्याकाः प्रधयः परिधयः
प्रतिष्ठानावर्तनलक्षणायाः द्वादश मासाः एकं अद्वितीयं चक्रं चक्रमणस्वभावं संवत्सराख्यं चक्रं आश्रिताः तथा त्रीणि त्रिसंख्याकानि नभ्यानि ना
भ्याश्रयाणि फलकानि तत्स्थानीयानि ग्रीष्मवर्षाहेमंताख्यानि आश्रितानि यथा सूर्यरथस्य चक्रस्य द्वादश परिधयो नभ्यानि नाभ्यादिस्था
नि त्रीणि फलकानि संति तद्वत् कालचक्रस्यापि क उ कोपि महान् तत् चक्रं चिकेत जानाति तस्मिन् चक्रे साकं सह शंकव अत्र पुरस्तात् उपचारोऽपि
न शब्दः सामर्थ्यादुपमार्थीयः यस्मिन्नपि संवत्सरचक्रे त्रिशताः एतत्संख्याकाः षष्टिर्न शब्दस्यार्थे षष्टिश्च अरस्थानीयानि अहानि अर्पिताः
अर्पितानि काष्ठानि तानि चलाचलासः चलनस्वभावानीत्यर्थः वरचालिपदिवसानामव्ययत्वायासस्येति द्विर्वचनमागमश्च ततो ऋतुकृत्षष्टि
श्च द्वायेवाणि चत्वारि संवत्सरस्याहानीति ब्राह्मणं॥ द्वादश प्रधयश्चक्रमेकमिति मीमांसा मासमानादिविरुक्तं॥ प्रवर्ग्येऽभिष्टवये यस्ते
स्तन इत्यृक्सामभिष्टवं च॥ यस्ते स्तनः शशय इत्यनया मयोभूरिति भूमिर्यन्मिति एषैव सारस्वते पशौ हविषो याज्या सूत्रितं च यस्ते स्तनः
शशयो मयोभूस्त्वं साम प्रचेतितो मनीषये इति॥ ॥एकोनपंचाशी॥ ॥ यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि॥
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः॥ ॥हे सरस्वति ते तव संबंधी यः स्तनः वक्षःस्थानीयानां प्राणिनामाप्यायनकारी
त्वादिकं वैदिकाः शब्दरूपस्तनः शशयः शयानः तवोदरे वर्तमानः यश्च मयोभूः रसास्वादिनां सुखस्य भावयिता येन स्तनेन विश्वा सर्वा
णि वार्याणि कर्माणि वरणीयानि अभिमतरूपाणि धनानि दास्यसि पुष्यसि भक्तेभ्यः यश्च रत्नधाः बहुविधरमणीयरसानां धारयि
ता न सविता। वसूनां वासयितॄणां धनानां वेत्ता लब्धा च इयिता विंदयः स्तनः सुदत्रः शोभनदानः सुदत्रः कल्याणदान इति निरुक्तं॥ अत्रा
सकृद्धानस्य श्रवणं स्तनस्येति प्रशस्तत्वज्ञापनार्थं हे देवि तं तादृशं सर्वप्राण्युपकारकं स्तनं इहास्मिन् कर्मणि इदानीं वा धातवे
अस्माभिर्धातुं पातुं पानाय कः कुरु॥ अग्निमंथनयतनयज्ञमित्येषा परिधानीया यज्ञेन यज्ञमयजंत देवा इति परिदध्यादिति सूत्रितत्वात्॥
॥ ॥पंचाशी॥ ॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥ ॥
देवाः यज्ञकर्मकर्तारः यजमानाः यज्ञेन मानसेन अग्निना यज्ञं होमसाधनं आहवनीयं अयजंत पूजितवंतः॥ अनुष्ठानाय संयोजितवंत इत्य
र्थः॥ अग्निं मथित्वा प्रहरति तेन वा अग्निना आतिथ्यं कृतवंत इति हितार्थं इति यकं॥ तानि धर्माणि अग्नीधनानि कर्माणि प्रथमानि प्रथम इति
मुख्यनाम प्रथमानि प्रकृष्टतमान्यासन्॥ फलप्रसवसमर्थान्यभवन्नित्यर्थः॥ ते हनेन यजमानाः नाकं नास्मिन् कमस्तीति नाकः ते संतीति
वसंति ते च महिमानः स्वर्गोपासकाः यज्ञकर्तारः महात्मानः सचंत सचंते प्राप्नुवंति स्वर्गमोक्षस्वर्गयुक्ता भवंति॥ सचंत तस्मादिदानी
मपि मनुष्यैरेवं कर्तव्यमित्यर्थः॥ यद्वा देवा इदानीं हविर्भागमापन्नाः पूर्वं यज्ञेन अग्निना पशुभूतेन यज्ञं यज्ञस्वरूपमग्निं अयजंत पूजितवंतः

भा॰अ॰२ अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यं ॥ अग्निः पशुरासीत्तमालभंत तेनायजंतेति श्रुतेः ॥ शिष्टं पूर्ववत् ॥ यत्र स्मिन्स्वर्गनिमित्ते भूते सति पू अ॰३
र्वे पूर्वे जनाः साध्यदेवाः साधनाः छंदोभिमानिनः आदित्या आंगिरसश्च साध्या देवा उच्यंते ॥ छंदांसि वै साध्या देवास्तेग्रेग्निनाग्निमयजंत
६६ ते स्वर्गं लोकमायन्नादित्याश्चैवेहासन्नंगिरसश्च तेग्रेग्निमयजंत ते स्वर्गं लोकमायन्निति ब्राह्मणं ॥ ते देवाः स्वर्गं सचंते ॥ स्वर्गं प्राप्नुवंतीत्यर्थः ॥
यद्वा यज्ञेन यज्ञं आदिशब्देन योगादियज्ञो वा विष्णुः विष्णुं प्राप्य यजंत पूजयंति तेनाकं विष्णुलोकं महायज्ञकर्तारः महानुभावाः सचंत संगच्छं
ते ॥ यत्र पूर्वे साध्यादयो देवाः संति तत्स्थानं अग्निनाग्निमयजंत देवा इत्याद्या श्रुतिरत्र अनुसंधेयं ॥ ॥ अथ एकपंचाशी ॥ ॥ समानमेत
दुदकमुच्चैत्यव चाहभिः ॥ भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नयः ॥ एतन्नामसिद्धमुदकं समानं एकरूपमित्यर्थः ॥ अहभिः केश्चिदहोभिः
ग्रीष्मकालीनैरुदकमुच्चैति ऊर्ध्वं गच्छति । तथा अहभिः वर्षकालीनैरेवेन उदकं अव चैति अवाङ्मुखं च गच्छति ॥ चवा योगे प्रथमेति प्रथमा विभ
क्तिर्न निहन्यत इत्यनिघातः ॥ भूमिं प्राप्नोति तदेवोच्यते पर्जन्याः प्रीणयितारो मेघाः भूमिं जिन्वंति उदकत्यागेन सस्याद्युत्पादनद्वारा भू
मिष्ठान् लोकान् प्रीणयंति ॥ तथा अग्नयः आहवनीयाद्याः स्वेद्दत्तहविः आदित्यादि द्युलोकस्थानान् जिन्वंति प्रीणयंति ॥ सरस्वद्देवताके पशौ दिव्यं
सुपर्णमिति वपाया याज्या दिव्यं सुपर्णं वायसं बृहंतं सरस्वद्धेन यो योपणाख्यिति सूत्रितत्वात् ॥ अन्वारंभणीयायां सरस्वद्भागे एषैव याज्या ॥ सू
त्रितं च ॥ दिव्यं सुपर्णं वायसं बृहंतमासमस्मविर्तुर्ययोति ॥ ॥ सैषा सप्तविंशपंचाशी ॥ ॥ दिव्यं सुपर्णं वायसं बृहंतमपां गर्भं दर्शतमोष
धीनां ॥ अभीपतो वृष्टिभिस्तर्पयंतं सरस्वंतमवसे जोहवीमि ॥ ॥ दिव्यं दिवि भवं सुपर्णं शोभनगमनं वायसं गमनशीलं बृहंतं महांतं
अपां गर्भं रस्युदकानां गर्भवदुत्पादकं तोषधीनां ओषधीः दर्शनाय दर्शयंतमित्यर्थः ॥ यद्वा ओषधीनां गर्भं दर्शयतमिति पृथग्विशे
षणं वा अभीपतः आनुकूल्येन वृष्टिभिस्तर्पयंतं जगत्प्रीणयंतं ॥ यद्वा अभीपतः अभिगमनवतः सलिलाधारान् तटाकादीन् तर्पयंतं
अथवा अभिगंता हंसरश्च तं उदकवंतं समुद्रं उत्पन्नं वंसूर्यं वा अवसे रक्षणाय जोहवीमि पुनः पुनराह्वयामि ॥ ॥ इति द्वितीयस्य तृतीये
त्रयोविंशो वर्गः ॥ ॥ ७ ॥ इति प्रथमे मंडले द्वाविंशोनुवाकः ॥ त्रयोदशोनुवाके पंचदश सूक्तानि तत्र कयाशुभेति पंचदशर्चं प्रथमं सूक्तं
ते घुभं ॥ अनुक्रमणिका ॥ कया पंचोना संवादस्त्वतीयाद्युत्क्वो मरुतां वाक्यं अंत्यस्तृचो गस्त्यस्य चाद्विष्ठाद्वृषियेकादशीच मरुतां स्विंद्र
देवत्वेति अत्र अगस्त्यमरुतां संवादः प्रतिपाद्यते तत्र तृतीया पंचमी सप्तमी नवमीनां मरुद्वाक्यरूपत्वात् त एव च अर्थ्य स्ववाक्यं स एव ऋषि
रितिन्यायात् ॥ अपंत चस्यागस्त्यवाक्यत्वात् एव ऋषिः शिष्टा युक्ता आद्यत्रिकादशी चेंद्रस्य वाक्यं अतः स एव ऋषिः यत्र यातेनोच्यते सा देवने
ति सामान्यात् एवाद इंद्रस्य मरुत्वदुक्तं इंद्रो देवता ॥ मरुत्वतात्तुर्विंशकायां मरुत्वतीयशस्त्रे निविधानीयात् पूर्वे एतत्सूक्तं यदि पर्या
यान मरुत्वतीय इति खंडे आः सूत्रितं कयाशुभेतिच मरुत्वतीये पुरस्तात् सूक्तस्य शंसेदिति ॥ अभिप्लवे षष्ठपंचमेहनि मरुत्वतीये एतदे
व सूक्तं ॥ पंचमस्य कयाशुभाय त्तिग्मशृंग इति माध्यंदिन इति सूत्रितत्वात् ॥ महाव्रतेपि मरुत्वतीयशस्त्र एतत्सूक्तं ॥ पंचमारण्यके कयाशु
भा सवयसः सनीळा मरुत्वां इंद्र वृषभो रणायेत्युक्तत्वात् ॥ विषुवति मरुत्वतीये एतदेव निविद्धानीयं यत्कमेपं कयाशुभेति च मरुत्वतीय ६६
मिति सूत्रितत्वात् ॥ अस्या विनियोगं शौनक आह ॥ ज्ञातिपुत्रसुहृन्मित्रैश्वर्यराज्यं चिरार्पितानि त्यं स नियतो भूत्वा सूक्तं तु मनसा जपे
त् ॥

कयाशुभेति येशश्वं श्रुत्वा चैव न पठितां ॥ श्रुत्वा परस्परं त्वं तु गुरोरथ्याद्यौनकरति ॥ ॥ तत्र प्रथमा ॥ ॥ कया शुभा सवयसः सनीळाः समा
न्या मरुतः संमिमिक्षुः ॥ कया मती कुत एतास एतेऽर्चंति शुष्मं वृषणो वसूया ॥ ॥ इंद्रवाक्यं मरुतः सवयसः समानवयस्काः समानस्थना एते मरुतो
कया शुभा केनापि दुर्नयया शोभयाम सामान्यालेपांए करूपया महत्त्वायुक्ताः ॥ यद्वा शुचील्कंदकनाम उरूपया शुभा उदकेन संमिमिक्षुः लोकं
सम्यक् सिंचंति मिहि सेचनार्थे मिमिक्षतिधातुः ॥ यद्वा मां युद्धादिषु प्रवर्तमानं संमिमिक्षुः दर्थ एते मरुतः कया अतिश्रेयया मती मत्या
कुतः देशात् एतासः आगत्य चैते वृषणः वर्षितारः वसूया वसूयया सुपां सुलुगिति पूर्वसवर्णदीर्घः ॥ धनेच्छया यद्वा वसवा वासयितारो
यां तेन वजसया आदेशः ॥ शुष्मं बलं वृष्टिप्रदानजनितलोके अर्चंति पूजयंति जगत् विकुर्वंति ॥ यद्वा ममबलं वर्धयंतीत्यर्थः ॥ मरुतो हैनं ना
जहुरिति श्रुतेः ॥ अत्र इंद्रमरुत्संवादरूपमर्थं प्राणजीवात्मपरतया पिद्योजनीयां अत्रार्पी द्वोच्यते ॥ ॥ अथ द्वितीया ॥ ॥ कस्य ब्रह्माणि
जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ॥ श्येनाँ इव ध्रजतो अंतरिक्षे केन महा मनसा रीरमाम ॥ ॥ युवानो नित्यतरुणाः महानुभावा म
रुतः कस्य महानुभावस्य ब्रह्माणि परिवृढानि हवींषि जुजुषुः सेवंते ॥ कश्च महानध्वरे स्वकीये यागे मरुत एतान् आववर्त आवर्तयत् अंतरिक्षान्निव
र्तयति । दुर्निग्रहत्वं दर्शितमाह ॥ अंतरिक्षे ध्रजतो गच्छतः श्येनानिव शंसनीयगमनांस्तान् केन महता प्रशिक्षणादिकेन तत्प्रीतिसाधनेन महा
मनसा तान् मनसा मननवता स्तोत्रेण रीरमाम रमयामहि ॥ अथ मरुत इंद्रेणोक्ताः तृतीययाऽनया प्रतिब्रुवते ॥ ॥ अथ तृतीया ॥ ॥ कुतस्त्व
मिंद्र माहिनः सन्नेको यासि सत्पते किं त इत्था ॥ संपृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥ ॥ हे इंद्र सत्पते सतां पालक त्वं मा
हिनः महनीयः पूजनीयः अनुचरैरनुगंतव्य इत्यर्थः ॥ तथाभूतः सन्नपि एकोऽसहायः सन् कुतो यासि कुतः कारणाद्यासि यद्वा कुत्र यासि
ते तव इत्था इत्थं किं एवमेव किं न त्वा ऋष्यनुचरो गच्छति किं च त्वं समराणः अस्माभिः संगच्छमानः संपृच्छसे समीचीनं पृच्छसि ॥ हे हरिवः हरि
भ्यां तद्वन् मिंद्र तत् तव अस्मे अस्मासु यत् कुमिष्टं ममत्वं तिनो ... शुभानैः शोभमानैर्वचनैः वाचः ब्रूहि ॥ ॥ अथ चतुर्थी ॥ ॥
ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ॥ आ शासते प्रति हर्यंत्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ॥ अथैवं तैः पृष्टः अ
नया चतुर्थ्या इंद्रः प्रत्याह हे मरुतः ब्रह्माणि सर्वाणि कर्माणि हवींषि नाम मम सुखभूतानि तथा मतयः स्तुतयश्च मननयुक्तास्तु तयश्च मम सुख
कार्याः ॥ यद्वा मे मती या बुद्धयः तं घं वर्तंत इति शेषः ॥ तथा सुता साभिषुताः सोमाः मे मदीयाः मद्दर्थाः इव अतो यज्ञं प्रतिगंतव्यमित्य
र्थः ॥ किं च मध्ये राक्षसादिबाधपरिहाराय शुष्मः बलनामैतत् बलवान् मदीयोद्रिः ... प्रभृतः संनियर्ति गच्छ
त्यबलत्वं प्रति यच्छन् वर्तते ॥ न केवलं ... मदीयमेव अपितु यजमाना आ शासते मामेव प्रार्थयंते ॥ किं चोक्थानि शस्त्रा
णि मां प्रति हर्यंति कामयंते मामेव प्राप्नुवंतीत्यर्थः ॥ किंच नास्मदीयानि इमा हरी इमौ वश्यावाताता नि गंतव्यानि ... अच्छ
अभिप्राप्नुमां वहतः अभिमतदेशं प्रापयतः ॥ अत एव वयं तत्मभिर्युज्ञानाः स्वक्षत्रेभिस्तन्वः शुंभमाना ॥ महोभिरेताँ उप यु
ज्महे न्विंद्र स्वधामनु हि नो बभूथ ॥ ५ ॥ पंचमी ॥ ॥ एवमुक्ता मरुतस्तमेव ब्रुवत ॥ हे इंद्र त्वं यस्मा देवं करोषि अतः कारणाद्वय
मपि अंतमभिः अंतिकतमैः अश्वैर्युज्ञानाः युक्ताः संतः ... स्वक्षत्रेभिः स्वायत्तबलैः ॥ किं च महोभिः स्वतेजोभिः तन्वः आत्म

अ॰ अ॰ २ शरीराणि शुंभमानाः दीपयंतः इंद्रं प्राप्नुवान इत्यर्थः॥ यद्वा महोभिः स्वमहत्वेन युक्ताय यं एतान् गंतॄन् नु क्षिप्रमुपयुञ्महे॥ तवसा कं दद्विरादि अ॰ ३
६७ स्मी कुर्महे इत्यर्थः॥ हे इंद्र त्वमपि नो स्माकं यं धिस्व धा उदकं बलं वा अनु अनुभवथेहि॥ अस्मत्त उदकं भजन्त्यं द्वाविरनुभवसि॥ स खलु अहं इंद्रः परः
स्परापकार्योपकारभावप्रसिद्धिद्योतनार्थः॥ ॥इति द्वितीयस्य तृतीये चतुर्विंशो वर्गः॥ ॥अथ पंचमी॥ ॥क्व स्या वो मरुतः स्वधासीद्य
न्मामेकं समधत्ताहिहत्ये॥ अहं ह्युग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः॥ स्यासा स्वधा तदुदकं बलं वा युष्माकं संबंधि क्वासी
त॥ नैवासीदित्यर्थः॥ अस्माकमुदकं त्वमनुभवसीति कथयन तास्वधा एकं मम सहायं मां अहिहत्ये इत्यर्थं मेघहननकर्मणि शत्रवधे
वा मम धत्त सहितमकुरुत मामासीदिति संबंधः॥ असहायस्य कथमिति मतं सत्यमित्यत आह॥ अहं हि अहं खलु उग्रः उद्गूर्णबलस्तविषो ब
लवान् तुविष्मान् महत्वोपेतोस्मि॥ यस्मादतिबलो हं तस्माद्विश्वस्य कृत्स्नस्य शत्रोर्मेघस्य शत्रोरिवायं कर्मणि षष्ठी सर्वं शत्रुसमूहं वधस्नैः
वधरूपैः शोधनैः वधकुठारैरित्यर्थः॥ ॥अथ सप्तमी॥ ॥भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः॥ भूरीणि हि कृणवामा
शविष्ठेंद्र क्रत्वा मरुतो यद्वशाम॥ ॥अथैवमसकामिंद्रं पुनरा हहे इंद्र वृषभ वर्षितस्त्वं भूरि चकर्थ प्रभूतं कृतवानसि॥ सत्यमेव तथापि
अस्मे समानेभिः समानैः युज्येभिः अस्माभिर्युक्तैः पौंस्येभिः पुंसः कर्मभिः सामर्थ्यैः स्वचकर्थ न त्वेक एवेत्यर्थः॥ हे शविष्ठ शव इति बल
नाम हे इंद्र बलवत्तम वयं भूरीणि हि बहूनि इतान्यपि प्रभूतानि कर्माणि कृणवाम कृतवंतः स्मो हे इंद्र क्रत्वा कृतेन कर्मणा यत् यद्युष्माद्विकं वशा
म कामयामहे तानि तत्ताप्यधिकानीत्यर्थः॥ यतो वयं मरुतः॥ छांदसमनुदात्तत्वं एतेन स्वमहत्वं ख्यापितं भवति स्वरो व्यस्तः अथवा इंद्रस्ये
दं वाक्यं हे मरुतो अघृष्विवत् नु यद्युत पूर्वं च संहैव कृत्वा कर्मणि यद्वशाम यद्धि कर्म कामयामहे॥ तस्मादुदकं समानमेवेत्यर्थः॥ एवं म
रुत इति निघातस्वरस्य न व्याख्यातं॥ ॥अथाष्टमी॥ ॥वधीं वृत्रं मरुत इंद्रियेण स्वेन भामेन तविषो बभूवान्॥ अहमेता मनवे विश्वश्चंद्राः
सुगा अपश्चकर वज्रबाहुः॥ ॥इदानीमिंद्रः आह हे मरुतः अहमिंद्रः इंद्रियेण स्वेन भामेन कोपेन तविषो बभूवान् भूतः संपन्नः॥ वृ
त्रमवधिमिति॥ तदुच्यते मनवे मनोरर्थाय ताविश्वश्चंद्राः सर्वाल्हादकाः सुगाः सुगमनाः सर्वेषां सुखादिगमनशीलाः अपो वृष्टयुदकानि च
कृत्स्नकारं कृतवानस्मि यतो हं वज्रबाहुः अनेन सहायेन रूपस्य मुक्तं भवति॥ ॥अथ नवमी॥ ॥अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अ
स्ति देवता विदानः॥ न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध॥ ॥इदानीं तं मरुतो हर्षेण प्रत्याहुः॥ आ इति स्मरणे स्मृतवंतो व
यमिदानीं हे मघवन् तत्त्वया अनुत्तं अप्रेरितं नकिर्नु नैवास्ति॥ नु निश्चये त्वया यदुक्तं तत्सत्यमित्यर्थः॥ हे इंद्र त्वावान् त्वत्सदृशो विदानः वि
द्वान् स्वसंयेन ज्ञानेन च॥ प्रयोपायविशिष्टा देवता देवो नास्ति॥ किंच हे प्रवृद्ध अतिबल जायमानो जातो वा कश्चिद्देवो मर्त्यो वा त्वं यानि वृत्रव
धादीनि करिष्या कर्तव्यानि कृणुहि करोषि तानि न नशते न व्याप्नोति न करोति व्याप्नि कर्मा नान्यस्त्वत्कृतानुकारीनैवेत्यर्थः॥ ॥अथ दश ६७
मी॥ ॥एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान्कृणवै मनीषा॥ अहं ह्युग्रो मरुतो विदानो यानि च्यवमिंद्र इदीश एषां॥ इदानीमिंद्र आह
मम मे एकस्य चित् एकस्यैव विभु सर्वव्यापकं बलं शील मोजो बलमस्तु॥ यद्बलमेकस्यैवास्तु॥ किमर्थमिति चेत॥ उच्यते यानि कर्माणि मनी

षया मनीषया मनसा बुद्ध्या दधृष्वान् धर्षितवान् हंतुं क्षिप्रं कृणवै कर्तुं शक्नुवानि हे मरुतः अहं हि अहं खलु उग्रः उद्गूर्णबलः विदानः वेदान् यानि वा 125/1914
नियाविवस्मिनि च्यवं अवगच्छामि॥ एषां मम इंद्र इत् ईश्वर एव सन् ईश ईश्वरो भवामि अथवा विदानाहं यानि च्यवं मान्युद्दिश्य गच्छेयं ए
षीमीशे एता हमिंद्रः अनः श्रान इत्यर्थः॥ ॥इति द्वितीयस्य तृतीये पंचविंशो वर्गः॥ ॥अथैकादशी॥ अमंदन्मा मरुतः स्तोमो अत्र यन्मे न
रः श्रुत्यं ब्रह्म चक्र॥ इंद्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः॥ ॥इदमपीदं वाक्यं हे मरुतः मामां अत्रास्मिन् इदकाल्या इत्वि
षये स्तोमं स्तोत्रं अमंदत् मादयति मोदयति वा हे नरः सखायो यूयं मे मम यत् श्रुत्यं सर्वैः श्रोतव्यं ब्रह्म स्तोत्रं परिदृढमेघधारणादिरूपं कर्म च
क्र॥ कृतवंतः स्व प्रभूतं स्तोत्रं वा॥ अनुत्तमा त इत्यादिकं इंद्राय परमैश्वर्यगुणकाय वृष्णे अभिमतवर्षित्रे सुमखाय शोभनयागाय स
ख्ये युष्माभिः समानख्यानाय तनूभिः तेकृताः रिरूपतायमह्यं ममतन्वे मदीयशरीरपोषाय भवतु॥ यथा तनूभिः॥ अस्मच्छरीरभूतैः
युष्माभिः स्तनं मत्स्यमेवास्तित्यर्थः॥ ॥अथ द्वादशी॥ ॥एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः॥ संचक्ष्या मरुतश्चंद्रवर्णा
अच्छांत मे छदयाथा च नूनं॥ हे मरुतः एवेत् एवमेव एते यूयं मामां प्रतिरोचमानाः मद्विषये संप्रीयमानाः मां ख्यापयंतो वा अने
द्यः अनंतिकृष्टं श्रवः कीर्तिं इषं च अन्नं दधानाः आ इति चार्थे यद्वा अनेद्य इति प्रशस्यनाम प्रशस्यं यशोन्नं दधानाः अस्माभिर्वा धारयमा
णाः चंद्रमिवाहिरण्यनाम स्ववर्णवर्णाः यूयं मे मां संचक्ष्य सम्यक् प्रकाश्य नूनं निश्चयं अच्छांत यशोभिराच्छादितवंतः छदयाथ अच्छादय
थ च मां प्रतिरोचमानाः मय्यथ कीर्तिं अन्नं च दधानाः स्वकृतं कर्मभिर्मामवस्कृतेत्यर्थः॥ ॥अथ त्रयोदशी॥ ॥को न्वत्र मरुतो मामहे वः प्र
(इयाथ अच्छादयथ च मां) प्रयातन सखीरच्छा सखायः॥ मन्मानि चित्रा अपिवातयंत एषां भूत नवेदा म ऋतानां॥ हे मरुतो युष्मानवलोकि
को नु खलु मर्त्यः मामहे पूजयति॥ यत् सखायः सर्वस्य सखिवत्प्रणयकारिणः सतः सखीन हविःप्रदानेन सखिभूतान् यजमानान्प्रति प्र
यातन गच्छत हे चित्रा चायनीयाः यूयं मन्मानि मननीयानि स्तवनानि अच्छ आभिमुख्येन प्राप्तुं अपिवातयंतः संपूर्णं प्रपयंतो भूत भवत
किंच मदीयानां एषां कृतानां अविमथानां नवेदाः भवतज्ञातारो भवतं॥ ॥अथ चतुर्दशी॥ ॥आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य
मेधा॥ ओषु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत॥ ॥ये मरुतो दुवसे मेधावृद्धिः अस्माननतिसप्रत्यर्थः॥ इदानीं तन्नाचक्रे
आभिमुख्येन कृतति प्राप्तानीत्यर्थः॥ यद्वा पक्षीव दुवसे न दुवस्याकं॥ दुवस्यानां परिचरणार्हाणां दुवसे परिचरणायेत्यर्थः॥ अतो हे मरुतो
यूयं विप्रं मेधाविनं यजमानं मामा गच्छ आ स्य मच्छ आभिमुख्येन प्राप्तुं सुष्ठु वर्तेति पात इत्यसमुदयरूपेण का निपातः॥ आ इत्याभिमुख्येन
उकारोवधारणे। आवर्तध्वमेव॥ किमर्थमवमिति इत्युच्यते॥ इमा ब्रह्माणि इमानि परिदानिकर्माण्युद्दिश्य जरिता स्तोता वो युष्मानर्च
त अर्चति॥ अथ पंचदश्यां सूक्तोपक्रममारभ्य कृतां स्तुतिं मरुतो न वेधाभिमतमाशास्ते॥ यस्मादेवं तस्मादावर्तध्वमित्यर्थः॥ ॥
अथ पंचदशी॥ ॥एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः॥ एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं॥ ॥हे मरुतः
एष स्तोमः इदानीं क्रियमाणप्रकारं स्तोत्रं वा युष्मदर्थं युष्मत्प्रीणनाय भवतीत्यर्थः॥ यद्वेयं गीः स्तुतिरूपा वाक् अपि वो युष्मदर्था
यया स्मादेवं तस्मात् मांदार्यस्य स्तुतिविशेषमंदयितुः स्तोतृभिर्मदस्य प्रेरयितुर्वा मान्यस्य वरप्रदानादिना माननीयस्य कारोः स्तो

भा॰अ॰२ नुः प्यारुच्या अथासीद आगच्छत किमर्थं तस्मै त्वराशायतत्योपायेत्यर्थः॥ वयांचयमपि इषं अस्यं रुजनं बलं तीरदानुं तय जीरदानं गत अ॰४
सर्वंचि धाम युष्मात्स्वागते पुयतसंपूर्व्ये इत्यादि द्राराकर्मेमहि॥ ॥ इति द्वितीयस्य तृतीये षड्विंशो वर्गः॥ ॥७॥ यस्यानिःश्वसितं वेदा यो वेदे
६८ भ्योऽखिलं जगत। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसा
म्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके तृतीयोऽध्यायः समाप्तः॥ श्रीकृष्णार्पण
मस्तु॥ ७॥७॥ ॥ ॥७॥ ॥ इत्थं द्वितीयाष्टके गतस्तृतीयोऽध्याय आदरात॥ व्याख्यातः सायणाचार्येण पुरुषार्थप्रदर्शकः
॥ श्रीगणेशाय नमः॥ ॥ ७ ७ ७ ७ ७ ॥ अथ चतुर्थोऽध्याय आरभ्यते॥ कयाशुभेत्यस्मिंस्त्रयोविंशेऽनुवाके पंच
दश सूक्तानि तत्र तन्नुवोचामेति पंचदशर्चं द्वितीयं सूक्तं पंचदशर्चं॥ अत्रानुक्रमणिका॥ तन्नु अगस्त्यो मारुतं हि द्विस्त्रिष्टुबंतं मित्रावरुणयोर्दीक्षितयोर
र्वशीमप्सरसं दृष्ट्वा वासतीवरे कुंभे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेतामिति॥ सूक्तसंख्यानुवर्तते आन्यस्याः सूक्तसंख्याया इतिपरि
भाषितत्वात् पंचदशर्चं उक्तलक्षणमागस्त्येन दृष्टं तान्त्यस्य मारुतं हीत्युक्तत्वात्॥ तुह्यादिपरिभाषया इदमादि सूक्तत्रयं मरुद्देवताकं
अंत्ये द्वे त्रिष्टुभौ हि इत्यस्मिंत्रिष्टुबंतमिति परिभाषया जगत्यः विनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ तन्नुवोचाम रभसाय जन्मने पूर्वं महित्वं
वृषभस्य केतवे॥ एधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन॥ ॥ हे मरुतो वयं युष्मदीयं तत्तादृशं प्रसिद्धं पूर्वं पूरकं पूर्व
तनं वा महत्वं महात्म्यं नु क्षिप्रं प्रवोचाम॥ किमर्थं रभसाय रभस्य युक्ताय जन्मने वेगप्रादुर्भावाय च युष्मत्संनिधानायेत्यर्थः॥ तदपि
किमर्थमित्यत आह॥ वृषभस्य फलस्य वर्षितुर्यज्ञस्य केतवे प्रज्ञानाय वा वायुप्रेरणेन मेघागमनं प्रसिद्धं॥ हे तुविष्वणः गमनसंरंभेण प्र
भूतध्वनियुक्ताः हे शक्राः सर्वमपि कर्तुं शक्ता यूयं यामन् यामनि यागगमने प्रस्तुते सति एधेव एधांसि एधः संवंधीनि तेजांसीव प्रथनम
हांतं न तविषाणि बलानि सामर्थ्यानि कर्तन कुरुथ तत्तस्मै इत्यर्थः॥ तत्र दृष्टांतः॥ युधेव युद्धेन तन्नत युद्धनिमित्तं तथा तविषाणि कुरुथ तद्वत्
॥ ॥ अथ द्वितीया॥ ॥ नित्यं न सूनुं मधु बिभ्रत उप क्रीळंति क्रीळा विदथेषु घृष्वयः॥ नक्षंति रुद्रा अवसा नमस्विनं न मर्धंति स्वतवसो ह
विष्कृतं॥ ॥ नित्यं न सूनुं औरसं प्रियं पुत्रमिव मधु मधुरं हविर्बिभ्रतो धारयंतो मरुतः विदथेषु यागेषु घृष्वयः रक्षः प्रभृतीनां घर्षकाः
संतः क्रीळाः क्रीडनशीलाः उपउपेत्य क्रीळंति विहरंति किंच रुद्रपुत्राः मरुतोपि रुद्रा उच्यंते॥ अन्यत्र न कयारभेदात् मरुतो रुद्रपुत्रत्वं पुराणे
पुत्रपसोतु शेषपार्वतीपरमेश्वरो मरुतः पुत्रत्वेन स्वीचक्रतुरिति प्रसिद्धं॥ नमस्विनं नमस्कारोपलक्षितस्तोत्रोपेतं हविष्कृतं हविषः कर्तारं
प्रदातारं यजमानं अवसा रक्षणेन तर्पणेन वा निमित्तभूतेन नक्षंति व्याप्नुवंति॥ किंच स्वतवसः स्वायत्तबला मरुतः यजमानं न मर्धंति
न संग्रामयंति न क्लेशयंतीत्यर्थः॥ ॥ अथ तृतीया॥ ॥ यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे॥ उक्षंत्यस्मै म ६८
रुतो हिता इव पुरू रजांसि पयसा मयोभुवः॥ ॥ यस्मै यजमानाय हविषा ददाशुषे सोमाय हविर्दत्तवते हविषा प्रीता ऊमासः अवितारः
अमृताः अमरणधर्माणो मरुतो रायस्पोषं धनस्य पुष्टिं च अरासत प्रयच्छन् रासतिर्दानार्थः॥ अस्मै यजमा
नाय हिता इव हितावरणाः मरुतः प्रवृद्ध इति संतो मयोभुवः सुखस्य भावयितारो मरुतो रजांसि लोकान् पुरु प्रभूतं यथा भवति तथा

पयसा उदकेन सस्याद्युत्पत्त्यर्थं उक्षंति सिंचंति॥ ॥ अथ चतुर्थी॥ ॥ आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन्॥ भ 127/1914
यंते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु॥ ॥ हे मरुतो युष्मत्संबंधिन एवासः अश्वविशेषः तविषीभिः स्वकीयैर्बलैः ऋ
ष्टिप्रदानादिरूपैः रजांसि लोकान् आ अव्यत सर्वतः आवृण्वंति ते यां वो युष्माकं एवासोऽश्वाः स्वयतासः स्वयमेव सारथिना विनैव युक्ताः
अध्रजन् प्रकर्षेण गच्छंति व्याप्नुवंति किंच युष्मदागमनात् यस्माद्वंतः स्वाध्यायामः चित्रो यामः आश्चर्यभूत इत्यर्थः॥ सितः का
रणमाह॥ ऋष्टिषु युध्यास्वायुधेषु प्रयतासु प्रकर्षेण यतासु सतीषु॥ अथवा भीता दृष्टांतः ऋष्टिषु प्रयतासु सतीषु तापमयं॥ आ
युधेषु यतेषु यथा लूनानि भवंति तद्वत्॥ युष्मदागमनाद्बिभ्यतीत्यर्थः॥ ॥ अथ पंचमी॥ ॥ यत्त्वेषयामा नदयंत पर्वतान्दिवो वा पृष्ठं न
र्या अचुच्यवुः॥ विश्वो वो अज्मन्भयते वनस्पती रथीयंतीव प्रजिहीत ओषधिः॥ ॥ मरुतस्त्वेषयामाः प्रदीप्तगमनाः यत् यदा पर्वता
न पर्वतानगिरीन् वा शाणिपूरकान्मेघान्वा नदयंतः नादयंति वा अथवा यथा विद्योतनात्मकस्यांतरिक्षस्य पृष्ठं उपरिभागं नर्या नरेभ्यो हिताः
विश्वा भुवनानि सर्वाणि भूतजातानि विश्वा हर्म्याणि सर्वाणि हर्म्याणि च भयंते बिभ्यति पतनात् अचुच्यवुः गच्छंति। तदाहे यजमानाः वायु
युष्मत्संबंधिनि अज्मन् निमित्तभूते सति विश्वो वनस्पतिः वनस्य पालयिता वृक्षसमूहो भयते बिभेति तथा ओषधी प्रियंगुव्रीह्यादि प्रजि
हीते प्रकर्षेण गतिः स्वयंस्थानात् इतस्ततश्चलतीत्यर्थः॥ तत्र दृष्टांतः॥ रथीयंतीव रथमात्मन इच्छंती स्त्री रथारूढेत्यर्थः॥ तादृशी स्त्री
व सा यथा चलति तद्वत्॥ ॥ इति द्वितीयस्य चतुर्थे प्रथमो वर्गः॥ ॥ अथ षष्ठी॥ ॥ यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं
पिपर्तन॥ यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा॥ हे उग्रा उद्गूर्णबला मरुतो यूयं सुचेतुना शोभनचेतसा
अरिष्टग्रामाः अहिंसितसंघाः संतो नास्माकं सुमतिं शोभनबुद्धिं पिपर्तन पूरयत॥ कस्मिन्काल इति तदुच्यते॥ यत्र यस्मिन्काले वायु
युष्मत्संबंधिनी क्रिविर्दती विक्षेपणशीलदंताद्युपेत दिद्युत् रदति विलिखति मेघसंघातं पश्वः पशून् अश्व रिणाति रेषति हिनस्ति वा योऽयाति।
अमिति पक्षय शाप्यंत इति प्रसिद्धं॥ हिंसायां तत्र दृष्टांतः॥ सुधिता सुहिता सुप्रेरिता बर्हणा इति हारतत्साधना हेतिर्वा यथा रिणा
ति तद्वत्॥ ॥ अथ सप्तमी॥ ॥ प्र स्कंभदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः॥ अर्चंत्यर्कं मदिरस्य पीतये विदुर्वीरस्य
प्रथमानि पौंस्या॥ प्रस्कंभदेष्णाः प्रकर्षेण स्तंभितदानाः अविरतदाना इत्यर्थः॥ अनवभ्रराधसः अभ्रष्टहविरादिधानाः राध इति
धननाम॥ अलातृणासः नकारस्य स्थाने लकारः अलातृणासः अंतर्हिन रहिताः अथवा अलं पर्याप्तिं अतर्दिनाः शत्रूणां यद्वा
अलमत्यर्थं दातारः फलानां एवंरूपा मरुतः विदथेषु यागेषु अर्कं अर्चनीयमिंद्रं स्वसखीभूतं अर्चंति पूजयंति स्तुत्यादिना संभा
वयंतीत्यर्थः॥ किमर्थं मदिरस्य मोदनसाधनस्य सोमस्य पीतये पानाय तत्स्वीं द्रस्य महत्वं कथं जानंतीत्यत आह॥ ते मरुतः वीरस्य वि
विधं शत्रूणां भीरक सुखं इंद्रस्य प्रथमानि प्रतिमानि मुख्यानि पौंस्या पुंस्त्वानि वृत्रवधादिरूपाणि विदुर्जानंति॥ ॥ अथाष्टमी॥ ॥ श
तभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत॥ जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु॥ ॥ हे
मरुतः पूयं शतभुजिभिः शतमित्यपरिमितनाम असंख्यातभागवद्भिः पूर्भिः पालनैर्जितव्यैः शत्रूणां नगरैर्वा अयत्नरक्षतं

पालयतेत मित्युक्तं कमित्याह॥ पर्वतं अभिह्रुते॥ अभिभवकारणात् कुटिलस्वभावाद्घातपातात् आवतरक्षतिपालयतेत मित्युक्तं कमित्याह। पर्वतं अभिह्रुतेः अभिभवकारणात् कुटिलस्वभावाद्घातपातात् आयतरक्षतिकिंच हेउग्राः उद्गूर्णतेजस्काः हे तवसः ब
६९ लवंतो वेगवंतोवा हेविरप्शिनः महन्नामैतत् महांतः रपणीयाः शब्दारंभस्य लये येषां ते विरप्शिनः विविधारप्शिनः स्तोतारो येषां ते तथो
काः॥ हेताहृशाय्यूयं पंचजनं पाथनपायरक्षथ॥ कस्मात्तिमित्वाहितिउच्यते॥ ततयस्य उपलक्षणमेतत् पुत्रादीनां पुष्टिषु पोषणकतिभि
नभृतेषु श्रीसाद्भिरंसनात यमेवं कुरुथ तंरक्षतेतित्यर्थः॥ पापक्षया धनिस्तपरिहारेण पुत्रादिपोषरूपेण प्राप्त्याचरक्षथेत्यर्थः॥ ॥
अथनवमी॥ ॥विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता॥ अंसेष्वा वः प्रपथेषु खादयो ऽक्षो वश्चक्रा समया वि वा
वृते॥ हे मरुतो वो रथेषु रंहणसाधनेषु विश्वानि भद्रा सर्वाणि कल्याणानि भोगयोग्यानि द्रव्याणि अस्मभ्यं प्रदेयानि कलानि वा आहि
तानि तथा वः अंसेषु तदुपलक्षितभुजेष्वपि॥ अकारोप्यर्थे मिथस्पृध्येव बलाधिक्यात् परस्परस्पर्धाविषयाणि तविषाणि बलानि
अंसेषु तल्लक्षणान्यायुधानि वा आयुधानि किंच वः प्रपथेषु प्रगताः पंथानो येषु विश्रामस्थानेषु तानि प्रपथानि तेषु खादयः खाद्यानि
भक्ष्याणि आहितानि। यद्वा प्रगतः पंथा येषु पादात्रेषु खादयः॥ स्थिता आरंभणविशेषा आहिताः किंच वोल्मसः वो युष्माकं संबंधी रथो
स्वश्व कातचोपानिवक्षानिचक्राणि समया समीपे तयो परिसरे विवृते विशेषणवर्तते॥ नकदाचिदपि चक्रेषु संलग्नो भवतीत्यर्थः॥ य
स्माद्देवं देवयजनगमनसाधनानि संतितस्मात्तद्विप्रमागच्छथमित्यभिप्रायः॥ ॥अथदशमी॥ ॥भूरीणि भद्रा नर्येषु बाहुषु व
क्षःसु रुक्मा रभसासो अंजयः॥ अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे॥ ॥हेमरुतः नर्येषु नरेभ्यो हितेषु बाहुषु भु
जेषु भूरीणि प्रभूतानि भद्राणि कल्याणानि धनानि स्तोतृभ्यो दातुं धिरे दधिरे धारयंति चकंति तथा अंजय व्यक्तानि कीदृशानि रभ
सासः रंहस्ययुक्तानि तथा वक्षस्तु रस्तलेषु रुक्माः सुवर्णरजतादिनिर्मितान्याभरणानि धारयंति कांतिमंति वा अंसेषु भुजमूलेषु एताः
शुक्लवर्णाः मालाः पविषु वज्रेषु तदृशेष्वायुधेषु क्षुराः क्षुरधाराः अधिः सप्तम्यर्थानुवादी॥ एवमेते मरुतः सर्वांगेषु श्रियो लक्ष्मीः अनुः
क्रमेण विधिरे विविधं धारयंति। तत्र दृष्टांतः॥ वयो न पक्षान् पक्षिणः पक्षानिव॥ ॥इति द्वितीयस्य चतुर्थे द्वितीयो वर्गः॥ ॥अथैकाद
शी॥ ॥महांतो मह्ना विभ्वो विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः॥ मंद्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इंद्रे मरुतः परिष्टुभः॥ ॥
ये मरुतो महांतः महत्त्वोपेताः केन मह्ना महत्त्वेन प्रभावातिशयेन तथा विभ्वः विभवः व्याप्ताः तथा विभूतयः विविधैश्वर्यवंतः दूरेदृशः
दूरे दृश्यमानाः प्रकाशमानाः दूरदर्शने दृष्टांतः दिव्याः स्तृभिरिव स्तृ इति नक्षत्रनामसु पाठात् स्तृभिरिति नक्षत्राणामिति निरुक्तत्वात्॥ दिविभ
वाः दिव्याः स्तृभिः स्वपुण्यकर्मभिः स्तीर्णैः पुरुषैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवंति॥ तद्वत्॥ किंच मंद्राः मादनाः सुजिह्वाः शोभनजिह्वाः आस
भिरास्यैः स्वरितारः शब्दयितारः प्रियवचना इत्यर्थः॥ अत एव सुजिह्वा इत्युक्तं किंच इंद्रे संमिश्लाः सम्यक् मिश्रयितारः इंद्रसहायिन ६०
इत्यर्थः॥ मरुतो हि इंद्रेणानुस्मर्यंत इतिश्रुतेः॥ तथा परिष्टुभः परितः शोभयुक्ताः कांतिभिर्युक्ताः एवं महाभागा ये मरुतः संति ते स्मद्यज्ञमाग
च्छंतीति शेषः॥ ॥अथद्वादशी॥ ॥तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतं॥ इंद्रश्चन त्यजसा वि ह्रुणाति तज्जना

य यस्मै सुकृते अराध्वं॥ ॥हे सुजाताः शोभनजननाः हे मरुतो वो युष्मदीयं महित्वनं महत्वं तत्तादृक् खलु इति स्तुकं कमित्याह॥ वो युष्माकं दात्रं 129
दानं रश्म्यादिरूपं दीर्घं अत्यायतं अविच्छिन्नं प्रकृष्टोपकारीत्यर्थः॥ दीर्घत्वे दृष्टांतः॥ अदितेर्व्रतमिव॥ अदीनाया देवमातुर्भूम्या वा व्रतमि
व व्रतमिति कर्मनाम तद्यथा दीर्घं अतिविस्तृतं तद्वत्॥ अदिति द्यौरदितिरंतरिक्षमित्यादिमंत्रवर्णात्॥ किंच हे मरुतो यूयं यस्मै सुकृते शोभना
यागादिकर्त्रे यजमानाय यदभिमतं धनमराध्वं तदिंद्रश्च इंद्रोपि त्यजसा त्यागेन न विह्रुणाति न विकरोति॥ कौटिल्यं न करोति चनेत्ययं
पादपूरणः अवधारणे वा निपातितः॥ तथाप्ययमर्थविभागेन चशब्दः समुच्चये नशब्दो निषेधे धिगंतव्यः युष्मद्दानादित्या
यामिंद्र इत्यागोपि नातिक्रामतीत्यर्थः॥ यद्वा यस्मिन्धनमराध्वं तमिंद्रोपि न कुटिलयति॥ न निषेधयति किं तु अनुमोदयतीत्यर्थः॥ ॥अथत्रयो
दशी॥ ॥तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत॥ अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे॥ ॥हे मर
तो वो जामित्वं बंधुत्वम् अस्माद्विषये प्रमाधिक्यं ततः खलु प्रसिद्धमित्यर्थः॥ कियत् पर्यंतमिति तदुच्यते॥ परे युगे युगशब्दः कालोपलक्षकः उ
त्कृष्टो महति काले तीतेपि वर्तते इति शेषः॥ तत्कथमधिगतमित्यत आह॥ अमृताः अमरणधर्माणो हे मरुतो यूयं यद्यस्मात् शंसमस्माभिः क्रि
यमाणं स्तुतिं पुरु प्रभूतं यथा भवति तथा आवत रक्षथ॥ तस्माद्युष्मत् तज्जामित्वमविनाशीत्यर्थः॥ किंच यूयं अया धिया अनया अनुग्रहात्मि
कया बुद्ध्या मनवे मनुष्याय स्तोत्रे यद्वा अस्मादृशाय श्रुष्टिमाव्य सुखं क्षिप्रं वा रक्षित्वा साकं संभूय नरः नेतारः मंतारः दंसनैः कर्मभिः
कृता आचिकित्रिरे सर्वे ता जाननाया॥ ॥अथचतुर्दशी॥ ॥येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः॥ आ यत्ततनन्वृजने जना
स एभिर्यज्ञेभिस्तदभीष्टिमश्यां॥ ॥हे तुरासः वेगवंतो मरुतो युष्माकेन युष्मत्संबंधिना येन परिणसाय धर्मेभिस्तदभीष्टिमश्याम॥ हे तु
रासः वेगवंतो मरुतो युष्माकेन युष्मत्संबंधिना येन परीणसा परिघ्नेन इति हि नाम सुपठितं॥ तथापि यद्बहुलं महदपि भवतीत्यत्र महदीत्य
र्थोपि घते॥ महता युष्मदक्षिगमनेन प्रणनवा दीर्घमायतमत्रादिरूपं कर्मश्रुवाम प्रवर्धयामः किंच यत येन चाभिगमनेन प्रणेनवा
जनासो जनाः अस्मदीयाः वृजने संग्रामे आततनन् सर्वतो विस्तारयंति स्वसामर्थ्यैः संग्रामं जयंतीत्यर्थः॥ तदिदिदं प्रपणगमनं एभि
र्यज्ञेभिः इदानीं क्रियमाणैः स्तोत्रादिरूपैः यज्ञैः अभि आभिमुख्येन अश्यां व्याप्नुयां॥ ॥अथपंचदशी॥ ॥एष वः स्तोमो॥ अयं
मंत्र स्तृतीयाध्यायांते व्याख्यातः॥ स्तोमप्रथम प्रभृतीनि ह्यमाणं स्तौति मरुतः समर्प्यस्वाभीष्टमाशास्ते॥ हे मरुतः एषः स्तोमः इदा
नीं कृतं स्तोत्रं वो युष्माकं युष्मदर्थमित्यर्थः॥ तथेयं गीः स्तुतिरूपा वागपि वो युष्माकं कस्य संबंधीदमपि॥ तदुच्यते॥ मांदार्यस्य मंदतेरी
यतेश्च मांदार्यस्तुतिप्रेरयंतः मान्यस्य माननार्हस्य कारोः स्तोतृनामैतत् स्तोतुः संबंधिय इत्यस्य द्वयमुत्तरत्र संबध्यते॥ उक्तलक्षणः
स्तोतुः इषा इच्छया कामनया वा तन्वे युष्मच्छरीराय वृध्यः स्तुत्याद्विशरीरं वर्धते॥ अयासीष्ट अभिगच्छतु स्तुतिः वयं च वयं चेष मन्नं वृजनं ब
लं जीरदानुं चिरकालजीवनं च विद्यामलभमहि॥ ॥इति द्वितीयस्य चतुर्थे तृतीयो वर्गः॥ ॥सहस्रं त इत्यैकादशर्चं तृतीयं सूक्तं आ
गस्त्यं त्रैष्टुभं आद्यं द्विपदाष्टाम रुद्देवताकाः पूर्वसूक्तविनियोगात्। सहस्रमेकादशागस्त्यीत्यनुक्रमणिका विशेषविनियोगाः लैंगिकाः॥ ॥
तत्र प्रथमा॥ ॥सहस्रं त इंद्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः॥ हे इंद्र ते तव इतयः सप्तकाशः सहस्रं अपरिमिता

इत्यर्थः॥ नोस्मभ्यं उप यंतीति सर्वत्र योज्यं॥ तथा हे हरिवः हरी इंद्रस्याश्वौ ताभ्यां तद्वन् इंद्र गूर्ततमा अत्यंतं गूर्णाति उद्यच्छंति ईषण्वाः अन्नानि सह
स्रं बहूनि तदीयानि॥ तथा सहस्रं राय अपरिमितानि धनानि मणिमुक्तादीनि मादयध्यै अस्मान् मादयितुं संति तान्यस्मानुपयंतु॥ तथा सह
स्रिणः वाजाः गमनवंतश्च मनुष्यादिरूपाः पशवो वाजिनोस्मानुपयंतु समीपं प्राप्नुवंतु॥ ॥ अथ द्वितीया॥ ॥ आ नोवोभिर्मरुतो यांत्वच्छाः
ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः॥ अधयदेषां नियुतः परमाः समुद्रस्य चिद्धनयंत पारे॥ ॥ एते मरुतः अवोभी रक्षणैः सहिता नोस्मान्
आभिमुख्येनायांतु आगच्छंतु सुमायाः मायेति प्रज्ञानाम शोभनप्रज्ञाः एवं मरुतो ज्येष्ठेभिर्वृहद्दिवैर्वा ज्येष्ठैः प्रशस्यतमैर्मणिमुक्तादि
धनैश्च सहिता आयांतु॥ वाशब्दः समुच्चये॥ आगमने कृत्यमेषां तामर्थमित्यत आह॥ अध अथ एषां मरुतां यद्यस्मान्नियुतः एतन्नामकाः
परमाः उत्कृष्टा अश्वाः समुद्रस्यापि तावद्दूरेप्यर्थे समुद्रस्यापि पारे परस्मिन् तीरे धनयंत धनधारणं वहनं कुर्वंति॥ तस्मादश्वैर्धनेन
श्चायांत्वित्यर्थः॥ ॥ अथ तृतीया॥ ॥ मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः। गुहा चरंती मनुषो न योषा सभावती विदथ्येव सं वाक्॥ ॥ येषु मरुत्सु सुधिता सुष्ठु निहिता घृताची घृतं क्षरणशीलमुदकमंचती हिरण्यनिर्णिक् हिरण्मयी उज्ज्वलरमणीयरूपा
णिर्निगिति रूपनाम॥ एवंरूपा ऋष्टिः विद्युदाख्यायुधविशेषः पाचा उपरा न मेघमालेव येषु मरुत्सु मिम्यक्ष मिम्यक्षस्य क्षतिर्गतिकर्मा॥ संगता
भूत मेघपंक्तिर्विद्युता विमिश्रा संगत इत्यर्थः॥ मेघपंक्तिर्विद्युता अभिहन्यंते न विशेष्यते॥ गुहा निगूढा गुहायां अंतरिक्षे चरंती तत्र
दृष्टांतः॥ मनुषो नयोषा मनुष्यस्य परिरक्षकं दर्म हिर्षावती यथा सभेषांतः पुरएव मध्ये चरति तद्वत्॥ किं सर्वदैवमिति नेत्याह॥ सभा
वती सभा तन संघसत्तु तृतीय वर्षकाल आविर्भवतीत्यर्थः॥ तत्र दृष्टांतः॥ विदथ्या वेदनाही विवदमानयोर्वाक् सा यथा कुसायथा यज्ञस
भां प्राप्याविर्भवति तद्वत्॥ यद्वा विदथ्या वेदनार्हा विवदमानयोर्वाक् सायथा सभावती तद्वत्॥ एवं रूपायेषु मिम्यक्ष ते मरुतो देवयजनः
मागच्छंत्वित्यर्थः॥ ॥ अथ चतुर्थी॥ ॥ पराशुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः॥ न रोदसी अप नुदंत घोरा जुषंत वृधं
सख्याय देवाः॥ ॥ शुभ्राः शोभनालंकारा ईदृशा अभिगंतारो मरुतः यव्या मिश्रणशीलया विद्युता परा मिमिक्षुः॥ प्रकर्षेण सिंचति
उदकं संस्त्यायं साधारण्येव यथा लोके साधारण्या स्त्रिया संगता युवानो रेतो मुंचंति॥ तद्वत्॥ एवं कुर्वता घोराः अतिरश्मिप्रदानेन भय
कराः॥ ते रोदसीं द्यावापृथिव्यौ नापनुदंत अपनोदनस्वभावो रुद्रः तस्य पत्नी रोदसीति केचिदाहुः॥ अपरे तु मरुतां स्त्रियो रोदसीति ना
मधेयमित्याहुः॥ अयमेव पक्षो युक्तः॥ असत्रे वैव्यवहारात्॥ तस्य क्षेरो रुसीरोदस्यां अस्यंतात समस्या ईकारा लुप्ता उद्गतोच समस्य
र्थ इति प्रगृह्यसंज्ञा॥ तस्यां प्रियं धनं मुंचंति॥ किं तु देवाः मादयितारो वा मरुतः सख्याय सखित्वाय वृधं वृद्धिं जुषंत सेवंते द्यावापृथिवीपक्षे
सख्याय नुगतां सखिभावाय तयोर्वृद्धिं कुर्वंतीत्यर्थः॥ ॥ अथ पंचमी॥ ॥ जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः। आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या॥ ॥ रोदसी मरुत्पत्नी विद्युद्रूपा एतन्नामकयमपि असुर्यं मरुत्संघं नाषत सवते जुषे
लौकिकरागमः॥ किमर्थं सचध्यै संगमनार्थं कीदृशी सा अक्रय्या अक्रान्ते सारा मरुतः नेषां स्वभूता विषितस्तुका विशिष्ठकेशसं
घा विप्रकीर्णकेशा संघा वा संभोगवशेन तथाभूत नृमणाः॥ नृषु नेतृषु मरुत्सु मनयती मनुष्येषु वा रश्मिप्रदानमनो युक्ता त्वेषप्रती
का दीप्तोपक्रमा दीप्तावयवा वा ईदृशी देवी विधतः परिचरतो मरुतः सूर्येव रथमागात्॥ आगच्छति या प्राप्नोति या गादेवांगं तुरथमा

रुह्याय तं मागच्छति। विधतः सूर्यस्य रथं तां यथा प्रतीका सूर्येव सूर्यपत्नी यथा॥ यद्वा सूर्यस्य दुहिताश्विनो रथमिव सा यथारोहति तद्वत् आगम
नदृष्टांतः॥ नभसः इत्यनेन अंतरिक्षादित्ययोः साधारणीयं नभः एवं॥ नभ इति षड्साधारणीत्युक्तत्वात्॥ अत्रादित्यवचनः॥ तस्य ग
तिरिव सायथा शीघ्रा तद्वत्॥ ॥ इति द्वितीयस्य चतुर्थे चतुर्थो वर्गः॥ ॥ ४॥ अथ षष्ठी॥ ॥ आस्थापयंत युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम्। अर्को यद्वो मरुतो हविष्मान् गायद्गाथं सुतसोमो दुवस्यन्॥ ॥ युवानो विश्रयंतो नित्यतरुणा वा मरुतो युवतिं मिश्रयंतीं नित्यतरुणीं वा वि
द्युद्रूपां रोदस्यां स्त्रियमास्थापयंत आस्थापयंति॥ देवतात्वेन रथे धारयंति कीदृशीं तां निमिश्लां नियमेन विश्रयंती पज्रां पज्रोबलं तद्वतीं शुभे शोभने
दीप्यत इति शुभ उदकं रस्युदकार्थं शुभ रथ इति वा योज्यं॥ किं निमित्तं विदथेषु यागेषु यज्ञनिमित्तभूतेषु कृ शायत यद्वा हे मरुतो वो युष्मान् अर्कः मंत्र
र्थो रुच्यते अर्चनसाधनमंत्रो यतः स्तोता वा हविष्मान् प्रदयया स्याहविर्युक्तः सुतसोमः होमायाभिषुतसोमो यजमानो दुवस्यन् प
रिचरन्॥ गाथं गातव्यं स्तोत्रं गायत गायति तदेत्यर्थः॥ ॥ अथ सप्तमी॥ ॥ प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति। सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः॥ ॥ एषां मरुतां यो महिमा महत्वातिशयः वक्वः संयस्तुत्यः स्तुत्यः अबाध्यः अमोघोस्ति तं प्रवि
वक्मि प्रवग्नि वर्णयामि कः पुनरेषां महिमा प्रास इत्यत इत्युच्यते॥ यद्यस्मात् ईं एतेषां संबंधिनी रोदसी वृषमणा वृषमणाः इत्याद्विवक्षमाणानमस्कारा॥ अ
हंयुः अहंकारवती जगदुपकारकत्वेन कदाचिदस्तीत्यहंकारः॥ स्थिरा चिन्न चिदिति पूजायां अत्यंतमविनश्वरा ईदृशी। देवी सुभागाः शोभ
नभाग्या पेताः जनन शीलाः प्रजाः रसस्युत्पत्तीर्वा वहते धारयति रसोत्पत्त्यां सर्वप्राणिन उत्पद्यंते॥ यस्मादेवं तस्मान्महिमास्ति॥ तं महिमानं
स्तौमीत्यर्थः॥ ॥ अथाष्टमी॥ ॥ पांति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान्। उत च्यवंते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः॥
हे मरुतो युष्मत्संबंधिनौ देवाः मित्रावरुणो अहोरात्राभिमानिदेवौ अर्यमा अर्यमानुदृतिनिपातसमुदायात्मकमेकं पदं॥ इत्याद्यापि तद्व्यार्थो
अर्यमा पिपर्ति यापितुं भ मुंजीकं यतं वा अव घात गच्छति अयथानुवात जगत्यक्षय्य व हारपतिबंधरूपात् पांति रक्षंति। तथा एतेषां अ
अविचलानि मेघस्थादकानि च्यवंते॥ च्यावयंति वा एते॥ अहोरात्रे वै मित्रावरुणाव हो रात्राभ्यां खलु वै पर्जन्यो वर्षतीति श्रुते यद्वा अच्युतानि
ध्रुवाणि धनानि च्यवंते कुदाति इत्युच्यते॥ हे मरुतो युष्मदीयं ईमयं काला दातिवारः प्रदेयजलः खंडितमेघो वायस्य पवर्धततदामित्रादयो
वर्धयति यदात इत्यर्थः॥ ॥ अथ नवमी॥ ॥ नही नु वो मरुतो अंत्यस्मे आराच्चिच्छवसो अंतमापुः। ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः॥ ॥ हे मरुतो वाः शवसो युष्माकं तं बंधिनो बलस्य अंतमवसानं अंति अंतिके आरात्॥ दूरादपि यद्वा चिदिति कु
त्र मा भूः॥ ते खलु मरुतो धृष्णुना धर्षकेण शवसा बलेन शूशुवांसो वर्धमानाः अतएव धृषता परिभावकेन सामर्थ्येनाद्वेषो द्वेष्टन् परिष्ठुः
परिभवंति वशी कुर्वंति॥ तत्र दृष्टांतः॥ अर्णो न उदकमिव यथा उदकं स्वविरोधिरजसां आरिकमभिभवति तद्वत्॥ यस्मादेवं तस्मात् शवसा अं

तेमापुः॥ वयमसि सेनं दशमी अजामिन आक्षिपत पेन॥ तथा च मन्त्रं॥ वायमं पंद्रस्य प्रेष्ठा वयं इत्यस्यां त्यादित्य इति पाठस्तु॥ ॥अथ दशमी॥
वयमद्येंद्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये॥ वयं पुरा महि च नो अनु द्यून्तन्न ऋभुक्षा नरामनुष्यात्॥ अद्यास्मिन्दिने वयं यष्टारः इंद्रस्य देवस्य
७१ प्रेष्ठाः प्रियतमाः भवेम यद्वा प्रियतमा वयमिंद्रस्य महत्त्वं वोचेमहि तेन तं समर्था भूयास्म॥ किंच वयं श्वः परस्मिन्नपि दिने समर्ये सहमर्या म
र्त्या ऋत्विजो यस्मिन्स समर्यो यज्ञः तस्मिन्संग्रामे वा इंद्रस्य महत्त्वं वोचेमहि॥ किंच वयं पुरा पूर्वस्मिन्नतीतेपि काले महि महत्त्वं बलं नो अस्मदर्थं
वोचेमहि॥ तथा घ नो दिवसाननु प्रतिदिवसमित्यर्थः॥ अतीते आगामिनि च दिवसे सर्वदा वोचेमहि॥ तत्तस्माद्ध्रुभुक्षाः॥ महन्नामैतत् ऋभु
क्षा इत्येतत् नाम सकपालं तथा॥ महतां नराणां मनुष्याणां मध्ये नोस्माननुष्यात् अनुभवतु अनुकूलमभिमतं प्रदायाभयतु। एष इत्येका
दशी व्याख्याता॥ ॥इति द्वितीयस्य चतुर्थे पंचमो वर्गः॥ ॥यज्ञायज्ञेति दशर्चं चतुर्थं सूक्तं आगस्त्यमारुतं अंत्यास्तिस्रस्त्रिष्टुभः शिष्टाः स
प्तापि पूर्वं तत्परिभाषया जगत्यः॥ यज्ञायज्ञा दश त्रिष्टुबंतमित्यनुक्रांतं॥ विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥यज्ञायज्ञा वः सम
ना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे॥ आ वोर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः॥ ॥हे मरुतो वः समनी समीहृति
र्यूनाधिका भावलक्षणाय यज्ञायज्ञा सर्वेष्वपि यज्ञेषु तुतुर्वणिः तूर्णवनिः त्वरमाणसंभजमाना भवति तुर्वणिस्तूर्णवनिरिति यास्कः॥ तत्र घा
गाय सर आगात्य हविः स्वीकृत्यावेकल्यपरिहारेण सम्यक् कुरथेत्यर्थः॥ किंच वायूयं धियंधियं युष्मत्संबंधि यद्यत्कर्म हीनादिरूपं सर्वं कर्म देवयाः
देवान्प्रापयितारः एवं संतो दधिध्वे धारयथ धारयध्वे वा इत्यर्थः हविरादि धुत्वा इनाय रक्षितुं कुरुथेत्यर्थः॥ यस्मादेवं कुरुथ तस्माद्धो युष्मानर्वाचो
स्मदभिमुखान् वववृत्यां आवर्तयामि किमर्थं रोदस्योर्द्यावापृथिव्योर्महे महते अवसे रक्षणाय प्रीणनाय वा॥ तदपि किमर्थमिति सुविता
य सुख्याय सुखाय किं साधनैः सुवृक्तिभिः शोभनावर्जनैः स्तोत्रैः॥ ॥अथ द्वितीया॥ ॥वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायंत धूतयः
॥सहस्रियासो अपां नोर्मय आसा गावो वंद्यासो नोक्षणः॥ ॥ये मरुतो वव्रासो न वव्रिरिति रूपनाम रूपवंत इव तत्र यथा प्रकाशलक्ष्यंते तद्वत्॥
यद्वा अरूपा अपि सरूपा इव स्वजाः स्वयमेव स्वस्मात् जायमाना अनन्यहेतुका इत्यर्थः॥ धूतयः कंपनशीलाः संतः इषमन्नं हविर्लक्षणं अं
नसाधनं यस्याः स्वरिति वा स्वः स्वर्गं वाभिजायंत अभिलक्ष्य प्रादुर्भवंतीति दृष्टांतमुखेन श्रूयते॥ अपां नोर्मयः उदकानाम् ऊर्मय इव सहस्रिया
सः सहस्रसंमिताः तथा वंद्यासः बहुक्षीरादिप्रदत्वेन स्तुत्या गावो न गाव इव आसा आसन्ने समीप एव उक्षणः उक्षकस्य सत्कारः तादृशा मरुतः
तादृशा मरुतः प्रादुर्भवंतीत्यन्वयः॥ ॥अथ तृतीया॥ ॥सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते॥ ऐषामंसेषु रंभिणी
व रारभे हस्तेषु खादिश्च कृतिश्च सं दधे॥ ॥ये मरुतः सुताः अभिषुताः तृप्तांशवः तर्पितावयवाः सोमासो न सोमा इव यथा वल्लीरूपाः
सोमाः अभिषवात्पूर्वं आप्यायनेन तृप्तावयवाः संतः पश्चात्सुता अभिषुताः रसभूताः रसभूताः पीतासः पीताः संतो हृत्सु पातॄणां
हृदयेषु दुवसो नासते॥ परिचरंत इवासते तद्वत् ये मरुतः यज्ञे आहूताः स्तुता वा यजमानेन ध्यायमानाः संतो हृत्सु हृदयेषु दुवासो न प ७१
रिचरंत इवासते॥ यद्वा प्राणादिरूपेण शरीरे स्थिता दुवसः परिचरंत इव गमनादि चेष्टाः कुर्वंत आसते एषामंसेषु रंभिणीव युवतमां
सालंबिनि यो विद्वि वरारभे आरभे आश्रिष्यति अवलंबने सामर्थ्यात् शक्त्याख्यायुधविशेषो भुजलक्ष्मीर्वा॥ किंच हस्तेषु खादिः ह

133 / 1774

स्तत्राण कटकादिः कृतिर्नीच सर्वतुल्यता च संदधे संधीयते सम्यक् धृता भवति॥ परस्परसमुच्चयार्थाश्चकाराः ये मरुत उक्तरूपा पास्ते आ
विर्भवंतीत्यर्थः॥ ॥अथ चतुर्थी॥ ॥अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना॥ अरेणवस्तुविजाता अचुच्यवुर्दृळ्हा
नि चिन्मरुतो भ्राजदृष्टयः॥ ॥एते मरुतः स्वयुक्ताः स्वैर्युक्ताः परस्परसंयुक्ताः स्वेन धनेन वा युक्ताः संतो दिवो द्युलोकात् वृथा अनायासेना
यासतः अवाङ्मुखमागच्छंति इह अमर्त्या मरुतो यूयं त्मना आत्मनात्स्वयमेव कशया वाङ्नामैतत् वाचा स्तुतिरूपया चोदत प्रेरयत स्तो
तुः मिति शेषः॥ तच मरुतः अरेणवः अपापाः तुविजाताः बहुयज्ञेषु प्रादुर्भूताः भ्राजदृष्टयः दीप्तायुधाः एवंभूताः संतः दृळ्हानि चिद्दृढान्य
पि पर्वतानि अचुच्युवुः च्यावयंति चालयंति॥ ॥अथ पंचमी॥ ॥को वोंतर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया॥ धन्वच्युत इषां न
यामनि पुरुप्रैषा अहन्यो नैतशः॥ ॥हे मरुतः हे ऋष्टिविद्युतः मेघभेदनायुधविशेषेण विद्योतमाना युष्माकमंतः युष्माकं मध्ये स्थि
ता कः पुमान् रजति चालयति प्रेरयतीति तर्हि कथं चालनमिति॥ उच्यते त्मना आत्मनैव चालनं दृष्टांतः जिह्वया हन्वेव हन्वेति वचनस्य आकारः
हनू इव ता यथा रसनया चाल्यते तद्वत्॥ यद्यप्येवं तथापि इषां अन्नानां सस्यानां यामनि प्राप्तिसमर्थ्यार्थं धन्वच्युतो न धन्वनः अंतं
रिक्षस्य वचनस्तेन तत्समुद्रं लक्ष्यते॥ उदकस्राविणो मेघा इव तथा आकांक्षंते॥ तथा युष्मत्सामये पुरुप्रैषाः॥ बहुविधं फलमिच्छंत य
जमानाः स्तोत्रैर्बहुप्रकारमाकारयंतीत्यर्थः॥ तत्र दृष्टांतः॥ अहन्यः अश्विभवः एतशो न अश्व इव सत्यवाशिक्षंकृणनानाप्रकारं प्राप्य
ते तद्वत्॥ ॥इति द्वितीयस्य चतुर्थे षष्ठो वर्गः॥ ॥अथ षष्ठी॥ ॥क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय॥ यच्च्यावयथ विथुरे
व संहितं व्यद्रिणा पतथ त्वेषमर्णवं॥ ॥हे मरुतो यूयं यस्मिन् दकनिमित्तभूते सति आयय आगच्छत अस्य रजसो दृश्यस्य लोकस्य वा
महो महतः परं पारं अंतं क्व स्वित् कुत्रास्तीति नास्तीत्यर्थः॥ तथा अवरं अवरभागं आदिश्च क्व स्वित् कुत्रास्ति आद्यंतं न कोपि जानातीत्य
र्थः॥ यद्यदा यूयं विथुरे व विथुराणि शिथिलानि तृणानीव संहितं एकीभूतं उदकं च्यावयथ स्वस्थानाच्चालयथ तदा अद्रिणा वज्रेण त्वेषं
दीप्तं अर्णवं उदकवंतं मेघं विपतथ विशीर्णं पातयथ॥ ॥अथ सप्तमी॥ ॥सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती
॥भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती॥ ॥हे मरुतो वो युष्माकं संबंधिनी सातिर्न संभक्तिरिव युष्मात्संभजनं य
था प्रशस्तगुणं तद्द्रातिः दत्त्या हविष्यान्नवती अमात्यवती इंद्रादिसहायवती॥ यथा गजे वा मवा नित्यत्र मशब्दो मात्सवचनः तद्व
त्॥ यद्वा सातिः संविभक्ति नाम वती अरोगवती भवति किंतु स्वर्वती स्तुत्यवती त्वेषा दीप्ता विपाका परिपक्वफला पिपिष्वती पिषणवती
कृषीवलः कर्षणवतीव सा सत्यां कुर्वंतीति प्रसिद्धं। स्वविरोधिपेषणवती या भद्रा भंदनीया स्तुत्या किंच पृणतो दातुर्धनिकस्य दक्षिणा
न दक्षिणेव तद्वत्सत्यस्करी पृथुज्रयी पृथुगवाश्रूप्रगामिनी किंच असुर्येव असुरस्य स्वभूता जंजती सर्वानभिभवंती शक्तिरिव मा
यथान्येभ्यो पहत्यान्यस्मदातुं समर्था तद्वदियमपि मेघादि सुरकमपहत्य जगतां दातुं शक्तेत्यर्थः॥ इदृशी रातिरस्मभ्यमास्त्विति भावः
॥ ॥अथाष्टमी॥ ॥प्रति ष्टोभंति सिंधवः पविभ्यो यदभ्रियां वाचमुदीरयंति॥ अव स्मयंत विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णु
वंति॥ पविभ्यो मरुतां वधिर्धियत्रेभ्यः सिंधवः स्यंदनशीला आपः प्रतिष्टोभंति प्रतिचलंति करे॥ यतयानरा अभ्रियां अभ्रभवां वा

चं ग्लत्नं ल्लनि वलक्षणां दृशीरयं त्कच्चारयंति वस्त्राणि। किंच विद्युतः विद्योतमानाः ताडितः पृथिव्या अंतरिक्षे पृथिवीत्यंतरिक्षनाम॥ पृथिवी
भरिति तं नामसु पठितत्वात्॥ तत्राय स्मयंत स्मयंते अवाञ्मुखं प्रकाशंते॥ पृथिव्यामित्येतदुत्तरत्रवायोज्यं॥ यदि यदा पृथिव्यां भूम्यां घृतं श
रादुदकं मरुतः प्रस्नुवंति सिंचंति मुधेः के यादिकृत्यत्यवन॥ यदेवंतदेत्यर्थः॥ ॥अथनवमी॥ ॥ प्रसूत पृश्निर्महतेरणायत्वेषमया
सां मरुतामनीकं॥ ते सप्सरासोजनयंतीभ्वमादित्स्वधामिषिरांपर्यपश्यन॥ ॥ पृश्निर्मरुतां मातानानावर्णा पृश्निर्ये वेपय सो मरुतो जाताः
पृश्नेः पुत्रा उप मास इत्याश्रुते:॥ तामेवांतरिक्ष देवता केचिदाहुः सा त्वेषं दीप्तं अयासां गंतृणां मरुतामनीकं समूहं एकोनपंचाशत्सं
ख्याकं मसूत उत्पादितवती॥ किमर्थं महतेरणाय संग्रामाय मघवत्यायेत्यर्थः॥ ते च मरुतः सप्सरासः समानरूपाः हिंसका वा मेघानां अ
भ्वं मेघं जनयंति। इत्यादितवंतः आदित् अनंतरमेव इषिरा सर्वैरेष्टव्यां स्वधामन्नं सस्यादिसमृद्धिलक्षणां पर्यपश्यन् परिपश्यंति स
र्वे जनाः॥ उ एव इति दशमी व्याख्याता॥ ॥ इति द्वितीयस्य चतुर्थे सप्तमो वर्गः॥ ॥ महश्चित्वमित्यष्टर्चं पंचमं सूक्तं ऐंद्रमागस्त्यं त्रैष्टु
भं द्वितीया चतुष्पदा विराट् अथ चतुष्पदा विराड् उशंकरिति कृतत्वात्। विराड्भिरिष्ठ इति पिंगलनागेन स्मृतितत्वाच्च॥ महो द्वितीया विराडित्य
नुक्रमणिका॥ समूढे दशरात्रे द्वितीये छंदोमे मरुत्वतीये इदं विश्वजितोग्निमरुतीयं उसूक्तं॥ द्वितीयस्य त्र्यह सामहोम महश्चित्वमिंद्रेति॥ ०
॥ ॥ तत्र प्रथमा॥ ॥ महश्चित्वमिंद्र यत एतान् महश्चिदसि त्यजसो वरूता॥ स नो वेधो मरुतां चिकित्वान् सुम्ना वनुष्व तव हि प्रेष्ठा॥ ॥ हे इंद्र
त्वं यतः कारणात् एतान् मरुतो महश्चित् महतोपि सामर्थ्यातिशयबलात् निरपेक्षेणापि त्वं दानत्यजतीति शेषः॥ अतः कारणात् महश्चि
दसि चिदिति पदपूरणः॥ महतोपि त्यजसः त्यागात् यद्वा तत्कोधनामक्रोधाद्वा वरूता वरितारक्षिता सि भवसि॥ यद्वा मरुतोपि त्यागात् त्यक्ता
द्वि विषयात् वारयिता सि यस्मादेवं तस्मात् हे मरुतां वेधः विधातः स ताद्दृशस्त्वं चिकित्वान् चेतनावान् अस्मदनुग्रह विषयज्ञानोपेतः सन् नोस्म
भ्यं सुम्ना सुखानि मरुदायत्तानि रक्षादिरूपाणि वनुष्व देहि तानि सुम्नानि यद्धि प्रेष्ठाः तव खलु प्रियतमानि हि शब्दोऽयमिंद्राम रुतस्त्वत्यादिश्र
तिषु प्रसिद्ध्यर्थः॥ ॥ अथ द्वितीया॥ ॥ अयुज्रन्त इंद्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा॥ मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य
साता॥ पूर्वमंत्रे मरुतामिंद्र साहाय्यमुक्तं॥ अत्र इंद्रस्य मरुत्साहाय्यमुच्यते॥ हे इंद्र ते मरुतो युज्रन युज्यंते त्वया युक्ता भवंतीत्यर्थः॥ कीदृशास्ते विश्वकृ
ष्टीः विश्वकृष्टयः राजत्वेन सर्वे जनयंत॥ किंच मर्त्यत्रा मर्त्येषु मर्त्यार्थं निःषिधो निः शेषेण दक्षस्य सस्य नमेधान् विदानासः जनासानाः किंचये
षां मरुतां पृत्सुतिः सेनास्वर्मीळ्हस्य प्रधनस्य सुखे सेकुः प्रकृष्टधनवतो शत्र्वादिसंग्रामस्य मतौ लाभे जयेनिमित्तभूते सति सेना हासमानाहा
सं कुर्वती हर्षयुक्ता भवती॥ यद्वा सुखेन मि घ्नते जलं यस्मिन्ना दृशस्य प्रधनस्य प्रकृष्टोदकस्य धनसाधनस्य संग्रामस्य सातौ मेघभेदना
यतियावन॥ येषामीदृशी सेनास्ति ते मरुतो युज्रन्निति संबंधः॥ ॥ अथ तृतीया॥ ॥ अम्यक्सात इंद्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनंति
॥ अग्निश्चिद्धिष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि॥ हे इंद्र ते तव सा प्रसिद्धा ऋष्टिः यत्रायुधविशेषोस्मे अस्मदर्थं अम्यक्सा
त्राति। मेघसमीपो एवं च सति मरुतोपि सनेमि अन्यान्येषितद्दूपुराणानामानीत्युक्तत्वात्॥ सनेमीति पुराणनाम पुराणांचिरकालसंगृहीतं
अभ्वं उदकं जुनंतिक्षिपंति च यंतीत्यर्थः॥ इत्यासस्यादिस मृद्ध्यो स्यामग्निश्चिद्धिष्मा हि स्मेति पूरणे अग्निरपि अतसे संततेकर्मणान

मितभूते सति शुशुक्वान् दीप्यमानो वर्तते पश्चात् प्रयांसि च पुरोडाशादिहवींषि दधति धारयंति दद्गतिवा॥ यजमानाः किमिव आपो न द्वीपं
द्विपार्श्वं स्थोद्गतान् पर्वतादिद्वीपः तं यथा आपो धारयंति तद्वत्॥ यद्वा आयुधमेवोच्यते व्याख्याः युधविशेषः। अतसे काष्ठसमूहे शुशु
क्वान् दीपयं। अग्निश्चित् विपुलरूप उपमार्थे दधि चिदित्युपमार्थ इतियास्केनोपमार्थस्योक्तत्वात्॥ काष्ठे ज्वलन्नग्निरिव तद्वदीतो वर्त
ते एतद्वद् दीप्तो वर्तत एतद्वदीप्त्वमपेक्ष्य मेत्युक्तं॥ एवं च सत्यापो द्वीपमिव रक्षदकानि प्रयांसि सस्यादीन्यानि दधति धारयंति॥
एतत्सर्वं मरुदनुभावस्य इंद्रस्य रुचिः सामर्थ्यमिति ऋष्टिरस्य कातिः॥ ॥ अथ चतुर्थी॥ ॥ त्वं तू न इंद्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिं॥ स्तुत
श्च याते चकनंत वायोः स्तनं न मध्वः पीपयंत वाजैः॥ ॥ हे इंद्र त्वं तु तू खधारणत्वमेव तं रयिं त्वद्दानयोग्यं गवादिधनं दाः देहि यस्मादितर
व्यापित्वमेव बहुप्रदः अतोतिमहदुनं देहीत्यर्थः॥ वायु तं आ जिष्ठया ओजस्वितमया परिक्रमणाई दक्षिणयासमृद्धिसाधन यागवादिल
क्षणया कल्पितमिव रातिं दातारं त्वां प्रीणयाम इति शेषः॥ यद्वा दक्षिणा शब्दो दृ यद्रव्यसामान्यवचनः रातिशब्दो बंधुवचनः हिरण्यादि
सारवद्द्रव्य प्रदानेन बंधुं यथा वशी कुर्वंति तद्वत् त्वां वशीकुर्म इत्यर्थः॥ किंच वायोः धीत युवक्ष्यापि पृष्ठस्य वृषीघ्रवर प्रदस्य ते कर्माणि
पश्यी। वा युत्वां स्तुतः यस्मदीयाः स्तोतारश्च कनंत काय मंत स्तवनं यास्कृतः यस्ता मेव कामयंतेति वायो ज्ञनस्वन तं ण्यंतालुङि चाडि रूपं॥
च इः यन्पतरस्य मितिचः पूर्वमक्षरमुदात्तं॥ हा वाहया वाजैर्हविर्लक्षणैरन्नैः पीपयंत आप्यायंयंति तत्र दृष्टांतः॥ मध्वा मधुरस्य स्तन्य
स्य लाभाय वाजैः सारवद्भिरन्नविशेषैः स्तनं न तं यथा आप्याययंति तद्वत् वर्षतां वहुक तमदानाय स्तुत्या हविषा प्याययामः त्वं तुरा
तव्यत्वेन प्रसिद्धं नं धनं सर्वदा देहीत्यर्थः॥ ॥ अथ पंचमी॥ ॥ त्वे राय इंद्र तोशतमाः प्रणेतारः कस्य चिद् ऋतायोः॥ ते षु णो मरुतो मृळयंतु ये स्मा
पुरा गातूयंतीव देवाः॥ ॥ हे इंद्र त्वे तव रायो धनविशेषा तोशतमाः अतिशयेन प्रीणयितारः तुष्यंते तोषः अंदसंज्ञात्वं॥ यद्वा तरयारातया
बंधवा बंधुभूताः सर्विभताः मरुतस्तोत्रं तोशतमास्ता शातिवर्धकर्माणि तोशयतीनि वर्ष यतीति तं नाम स्कृपाठात॥ तोशतमाः हिंसितृतमाः
अवर्षकाणां मेघानां कस्यचिद् ऋतायोः ऋतमिति यज्ञनाम कस्यापि यज्ञमिच्छतो यजमानस्य प्रणेतारः प्रकर्षेण निर्वोढारः ते मरुतो नोस्मान् सुमृळ
यंतु॥ केते स्मये खलु देवा द्योतमाना मरुतः पुरापूर्वं गातूयंती वयज्ञगमनमिच्छंतीव भवति॥ ते आगत्य मृळयंतु॥ केते स्मये खलु देवा द्यो
तमाना मरुतः पुरापूर्वं गातूयंती वयज्ञगमनमिच्छंतीव भवति॥ ते आगत्य मृळयंतु॥ ॥ इति द्वितीयस्य चतुर्थे ऽष्टमो वर्गः॥ ॥ अथ षष्ठी
॥ ॥ प्रति प्रयाहींद्र मीळ्हुषो नृन्महः पार्थिवे सदने यतस्व॥ अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः॥ ॥ हे इंद्र त्वं मीळ्हुषः
उदकस्य सेक्तृन् नृन् नेतृन् नयकारान्महो महतः मेघान् प्रतिप्रयाहि अभिगच्छ मेघानां पृतनमेव नरकारत्वं युक्तं गत्वा च पार्थिवे सद
ने पृथिव्यांतरिक्षसंबंधिनी स्थाने यतः स्वप्रयत्नं कुरुतः मरुद्भ्यो युध्यस्वेत्यर्थः॥ यद्वा हविः प्रदातृन् कर्मनिर्वाहकान् महतो यजमानान् प्रति
गच्छ गत्वा च पार्थिवे सदने देवयजनयतस्व यत्नं कुरु हविर्भोजनाय अध अपि यदा एषां पात्रत्वमा साहाय्यकारिणां मरुतां संबंधिनः पृथुबु
ध्ना सा विस्तीर्णमूलाः एता गंतारः अश्वाः अर्थाः अरेः पत्राः पौंस्यानि वीर्याणि तीर्थेन युद्धमार्गे इव तस्थुः तिष्ठंति मेघानां क्रमंतेय
द्वा मरुतां पृथुबुध्नासः बृहन्मूलाः एताः एतवर्णा मेघाः तिष्ठंति। तत्र दृष्टांतः॥ अर्थं अरणीय स्व स्वामिनः पौंस्यानि बलानि तीर्थे च

135
1914

का॰अ॰२ राजवीर्थ्यां यथाविधिं तिन इत॥ ॥अथसप्तमी॥ ॥प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः॥ ये मर्त्यं पृतनायंतमूमैर्ऋ अ॰४
णावानं न पतयंत सर्गैः॥ ॥हे इंद्र त्वत्संबंधिनां घोराणां भयावकानां शत्रूणामभिमानानां वा एतानां एतद्वर्णानां अयासां अयमानानां गमनशी
२३ लानां मरुतां आयतां आगंतॄणां मरुतां उपब्दिः उपशब्दो निःसमीपे गम्यते ज्ञायते उपपद्यत इति वा उपब्दिः वाक् शृण्व एव विश्रूयते॥ कर्मणि प
र्प्रत्ययः॥ तन्यव विशिष्यते ये मरुतो मर्त्यं मरणधर्माणां ओर्डमेः स्वरक्षणैः उदकानि गमनसाधनैर्वा पृतनायंतं पृतनां आत्मन इच्छं
तं वैरिणं मर्ष्यवा सर्गैः सृष्टैः स्वकीयप्रहारविशेषैः पतयंत पातयंति। तेषामेव ध्वनिः श्रूयत इत्यर्थः॥ पातने दृष्टांतः॥ सर्गैः ऋणावानं
न॥ छंदसीवनिपौ इति वनिप ऋणवंतं अधमर्णं वैरिणमिव॥ तं यथा पीड्यंत्याद दीयं धनमपहरंति तद्वत्॥ एवं महानुभावा मरुतस्त्वा
नुगाइतीं इत्यस्य स्तुतिः॥ ॥अथाष्टमी॥ ॥त्वं मानेभ्य इंद्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः॥ स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं॥
हे इंद्र त्वं मानेभ्यो मानार्थं विनेवेत्यर्थं॥ तादर्थ्ये चतुर्थी॥ विश्वजन्या विश्वजन्यः सोऽकारः विश्वे प्राणिनः उत्पादनीया यस्य ता दृशस्त्वं सर्व
जनेभ्यो हिता आश्या वा मरुद्भिः सह शुरुधः शोकस्य रोधयित्रीः॥ ओषधः गोअग्राः गावि मुदकं वा अग्रे पुरतो यासां तामेषपंक्तीः रद विलिख
विदारय हे देव द्योतमान स्तवानेभिः स्तूयमानैः देवैः स्वैर्मरुद्भिर्ऋत्विग्भिर्वा स्तवसे स्तूयसे उभयत्र कर्मणि कर्तृप्रत्ययः॥ विद्यामेत्य
यं व्याख्यातः॥ ॥इति द्वितीयस्य चतुर्थे नवमो वर्गः॥ ॥न नूनमस्ति नो श्व इति पंचर्चं पंचमं सूक्तं आगस्त्यमैंद्रं॥ अत्रानुक्रमणिका॥ न नूनं पं
चागस्त्यं इंद्र हविर्विमरुतामुपेत इंद्रागस्त्ययोः संवादं द्वितीया चाद्या तृतीया चेंद्रवाक्यं चतुर्थी चाद्या हती इतीतिस्त्रोनुष्टुभ इति सक्तस्यं अग
स्त्यस्य वाक्यं अतस्तेपोसण्वर्षिः॥ आद्या च हती अतस्तिस्रोनुष्टुभः॥ अंत्या विराट् पातविष्टुप् विशेष विनियोगो लैंगिकः॥ अत्र यास्कः॥
अगस्त्य इंद्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सां चकार स इंद्र एत्य परिदेवयांचक्रे इति॥ ॥तत्र प्रथमा॥ ॥न नूनमस्ति नो श्वः कस्तद्वेद यद
द्भुतं॥ अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति॥ ॥परिदेवन प्रकारः प्रतिपाद्यते इंद्र आह॥ अथैतनं यदस्ति तं नूनमद्य नास्ति॥
नूनमत्र विविचितार्थे अद्यार्थे अद्यापि नास्ति तथा श्वः परश्वः इति दृष्टांतश्रवणघातिगम्यते॥ तथा श्वोपि नूनं नो इत्याद्यपि धारणेष्वा
स्तनमपि नैव नास्ति अद्य यथास्मदर्थं निरुप्यमस्मभ्यं नास्ति किल श्वः कथं लप्स्यत इति भावः॥ यदद्भुतं अन्यस्मै निरुप्यान्यस्मै दत्तमिति य
दस्ति विपरीतं तत्कोवेद॥ यद्वा यदद्भुतं भावि कार्यं यदस्ति तत्कोवेद॥ अपश्वो वा लभ्यत इति आशानकार्येत्कंभयातितदेवाह॥ अभिसंचरेण्यः
सर्वतः संचारि अन्यस्य चित्तं माभसन्तानातीतिभावः॥ उत अपि च आधीतं आध्यातं चिंतितमपि न दृश्यं किमुक्तं तन्नश्यतीति॥ ॥अथद्वितीया
॥ ॥किं न इंद्र जिघांससि भ्रातरो मरुतस्तव॥ तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥ इदमगस्त्यवाक्यं॥ हे इंद्र नोस्मान न पराधिनः किं जि
घांससि हंतुमिच्छसि कथमवध्यत्वमिति॥ अत आह मरुतस्तव भ्रातरस्त्वया भोगप्रदानेन भरणीया इत्यर्थः॥ आतो वयमवध्या इत्येकं भवति
मरुतामिंद्र भ्रातृत्वमेकस्मिन्ने वादितिगर्भे उत्पन्नत्वात्॥ सायाणिः पुराणेषु प्रसिद्धा॥ संतु भ्रातरस्ततश्च किमित्यत आह॥ तेभिस्तैर्मरुद्भिः २३
सह साधुयासाधु त्वं कल्पस्व कल्पय हविर्भागं तैः सह युंक्ष्व वामोस्मान समरणे संग्रामे मा वधीः मा हिंसीः॥ यद्वा कुत्से दृष्टांतः॥ संग्रामे यथा
विरोधिनं हंसि न तथास्मानिति॥ ॥अथतृतीया॥ ॥किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे॥ विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि॥

॥इदमिंद्रवाक्यं॥ हे भ्रातः हे अगस्त्य हविः प्रदानाभ्यां परस्परोपकारत्वाद्भ्रातृत्वं तादृशस्त्वं सखा सन् अस्माभिन कार्यमाविसन् सोमानकिमतिमन्य 137
से कस्माद्परा धादतिक्रम्य मनुष्य भवत्यपि। नायमपलापः किंतु तथ्यमेवेति॥ वेद इच्यते। तं तव तेन मनो मानसंयथायथा वसन्विमज्ञा 1914
नीमः॥ कथं तानीयेति। उच्यते॥ अस्मभ्यमिन्नदित्ससि॥ अस्मदर्थं निरुप्तमस्मभ्यं दातुं न घस्यति॥ इदं वार्थे॥ ॥अथचतुर्थी॥ ॥अरं कृण्वं
तु वेदिं समग्निमिंधतां पुरः॥ तत्रामृतस्य चेतनं यज्ञं ते तनवावहै॥ इदमिंद्रवाक्य॥ अपरे गस्त्यवाक्यमाहुः॥ हे ऋत्विजो यूयं अगस्त्यो गीकृतवान्
। तस्माद्देवम् अरं कृण्वं तु समार्जनपर्युक्षणादिना अलं कुर्वंतु तथा पुरः पुरस्तात्॥ अग्निमाहवनीयादिकं समिंधतां इध्मप्रक्षेपेण प्रज्वालयंतु॥ त
वाग्ना वमृतस्यामरणलक्षणस्य वेदनस्य चेतनं ज्ञापकं यज्ञं हे अगस्त्य ते त्वदीयं त्वं चाहं च तनवावहै॥ अगस्त्यवाक्यपक्षेऽग्निः समवाङ्गिः॥
तत्र वेधामसमृतस्य तत्साधनस्य हविषो वाचेतनं प्रज्ञापनमामोदनं कुरुत॥ च आर्य्यं पत्नीयजमानो अध्वर्युयजमानो वाहं इंद्र तेत्वदर्थं
यज्ञं तनवावहै॥ ॥अथपंचमी॥ ॥त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः॥ इंद्र त्वं मरुद्भिः संवदस्वाध प्राशान ऋतुथा ह
वींषि॥ इदमगस्त्यवाक्यं॥ हे वसूनां वसुपते अतिप्रभूतानां सुराज्ञ्यादि धनानां स्वामिन हे इंद्र त्वमीशिषे ईश्वरो भवसि। सर्वस्य रक्षि
त्वां वक्तुं नित्यं संबंधश्च प्रतिपद्यते॥ तद्वा हे वसुपते वसूनामीशिषे इति योजना॥ द्वितीयो वसुशब्दो नुवादो वा॥ तथा हे मित्राणां मित्रप
ते अस्मदादिमित्रस्य नित्यं पालक त्वं धेष्ठः सर्वस्याति शयेन धारकोसि॥ हे इंद्र त्वं उक्तमहिमस्त्वं मरुद्भिः संवदस्व तैः साकं सम्यक् तमि
तिवदस्व॥ अध अपि च त्वं कतुथा कतावृतौ॥ उपलक्षणमेतत्कालस्य॥ तत्तत्ते यागकाले हवींषि आज्यचरुवादीनि तु प्राशान प्रकर्षेण भु
क्ष्व॥ ॥इति द्वितीयस्य चतुर्थे दशमो वर्गः॥ ॥प्रति व इति षडृचं सप्तमं सूक्तं आगस्त्यं त्रिष्टुभं मारुतं आद्येद्वे केवलमारुतेऽिंद्राश्चेतस्ता
मरुत्वदिंद्रदेवताकाः॥ प्रतिवः षण्मारुतं तु वतस्तोत्या मरुत्वतीया इत्यनुक्रमणिका॥ विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥प्रति व एना
नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणां॥ रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान्॥ ॥हे मरुतः वो युष्मान् अहं प्रत्येमि अभि
गच्छामि। केन साधनेन नमसा नमस्कारेण हविषा वानमइत्यन्ननामा॥ तथा सूक्तेन शोभनवचनेन स्तुतिरूपेण तुराणां त्वरमाणानां शत्रूणां
हिंसकानां वा युष्माकं सुमतिं शोभनमतिं अनुग्रहबुद्धिं भिक्षे याचे इंद्रस्य वपुनर्हविः प्रदानादिदं याच्यते॥ किंच हे मरुतो यूयं वेद्याभिर्वे
दितव्याभिः स्तुतिभी रराणता रममाणेन मनसा इत्थंभूताः संतो हेळः क्रोधनामैतत् क्रोधः युष्मदस्मिकं मनितं तं निधत्त निरूढं धारयतत्यज
तेत्यर्थः॥ तथाश्वान् विमुचध्वं रथेभ्यो वियुक्ता यथा तथा धाम्नुनर्गमनं मा कुरुतेत्यर्थः॥ ॥अथद्वितीया॥ ॥एष वः स्तोमो मरुतो नमस्वान्हृ
दा तष्टो मनसा धायि देवाः॥ उपेमायात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः॥ ॥हे मरुतः एष वः स्तोमः इदानीं क्रियमाणप्रकारो वो युः
ष्माकं युष्मदर्थो इत्यर्थः॥ कीदृशोयं नमस्वान्नमइत्यन्ननाम॥ हविर्लक्षणोनान्नवान्नकं वलं स्तुतिमंत्रं। भक्षणाय हविरपि युष्माकमित्यर्थः॥
किंच हृदा तष्टः युष्मान्निवेदन बुध्या संपादितः॥ तादृशः स्तोमो हे देवाः देवनशीलाः मनसा अस्मदनुग्रहवता चित्तेनाधायि धार्यतां॥ तदर्थं म
नसा आदरया बुध्या जुषाणाः ईमेनां स्तुतिं तस्य विश्वसेवमानाः उपयात उपागच्छत वमा विलंबं कुरुत॥ यूयं नमसोन्नस्य हविरूपस्य
धासः वृद्धयित्वा ध्वसथ स्खलु अतोगं तव्यमवद्यरण॥ ॥अथतृतीया॥ ॥स्तुतासो नो मरुतो मृळयंतूत स्तुतो मघवा शंभवि

भा॰ अ॰ २ ष्ठः॥ ॥ ऊर्ध्वा नः संतु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा॥ हे मरुतः स्तुतासः स्तुताः संतो नोस्मान मळयंतु सुखयंतु उत अपि च मघवाम अ॰ ४
घमिति धननाम॥ अस्य द्रातव्य बहुधनवंत इंद्रः स्तुतः शंभविष्ठः सुखस्य भावयितृतमः सन अस्मान मृळयंतु किंच हे मरुतो नोस्माकं जिगी
१४ षा जिगीषितानि कर्मणा जिगीषा जिगीषितव्यानि प्राप्तव्यानि ऊर्ध्वानि भूयमानानि विश्वा सर्वाण्यहानि दिवसानि ऊर्ध्वा उन्नतानि उपर्युपरि
श्रियायुक्तानि कोम्या कामा काम्यानि स्पृहणीयानि वनानि सर्वैः संभजनीयानि संतु जिगीषा जेतुमिष्टानि जेतव्यानि च संतितिथायो
ध्यं॥ एवं कृत्वा मरुत इंद्रस्य पूर्वप्रसन्नत्वं पातेत्यर्थः॥ ॥ अथ चतुर्थी॥ ॥ अस्मादहं तविषादीषमाण इंद्राद्भिया मरुतो रेजमानः॥ युष्मभ्यं ह
व्यानिशितान्यासंतान्यारे चकृमा मृळता नः॥ हे मरुतः शृणुत अहं अस्मात प्रसिद्धात्तविषात बलवत इंद्रात् तत्काशात् भिया भीत्या ईष
माणः पलायमानः पुरस्तादुद्गच्छन् तथा रेजमानः वेपमानश्च अभवं तत अत्र किं मा यातेत्यत आह॥ मां निरुष्य भ्यं हव्या। हवींषि निशि
तानि संस्कृतान्यासन तानि तान्येव आरे चकृम दूरे कृतवंतो वयं इंद्रभयात॥ अतो नोस्मान पराधिनाम कृपया सुखयत॥ ॥ अथ पंचमी
॥ ॥ येन मानासश्चितयंत उस्रा व्युष्टिषु शवसा शश्वतीनां॥ स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः॥ ॥ हे इंद्र शवसा
बलेन भवता येन त्वयानुगृहीता मानासो मान्याः अभिमानिता वा उस्रा रश्मयः शश्वतीनां नित्यानां बह्वीनां उषसो व्युष्टिषु सतीषु प्रकाशेषु स
मुच्छितवत्सु चेतयंते प्राणिनां स्वस्वव्यवहाराय प्रज्ञापयंति ऐंद्रांशिशितेनेवानुगृहीता उषसो रश्मय उद्गच्छंतीति प्रसिद्धं। हे वृषभ
वर्षितरिंद्र सत्तादृशस्त्वं मरुद्भिः सहितः श्रवो धाः सर्वैः श्रूयमाणमन्नं धाः ह्लिलापय देहीत्यर्थः॥ कीदृशस्त्वं उग्र उद्गूर्णबलः सहोदाः
परिभवसामर्थ्यं बलं सहः तस्य दाता स्थविरः पुरातनः कीदृशैर्मरुद्भिः उग्रेभिः क्रूरबलैः एवमग्रानुभावो भवतीति॥ ॥ अथ षष्ठी॥ ॥
त्वं पाहींद्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः॥ सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुं॥ हे इंद्र त्वं पाहि रक्ष सही
यसोतिशयेन हर्षितमान त्वदनुग्रहेणाति प्रवृद्धबलान नॄन मनुष्यानस्मान मरुतो वा किंच मरुद्भिः साकं अस्मासु अवयातहेळाः भव अप
गतमन्युर्भव मरुत्सु यात तथा भव॥ किंच सुप्रकेतेभिः शोभनप्रज्ञानैर्मरुद्भिः स सासहिः शत्रूणामभिभविता सन दधानः अस्मदभिमत
स्य धारयिता भवेति शेषः॥ शिष्टो व्याख्यातः॥ ॥ इति द्वितीयस्य चतुर्थे एकादशो वर्गः॥ ॥ चित्रो व इति त्र्यृचात्मकमष्टमं सूक्तमागस्त्यमा
रुतं गायत्रं॥ चित्र त्र्यृचं गायत्रमित्यनुक्रमणिका॥ लैंगिको विनियोगः॥ ॥ तत्र प्रथमा॥ ॥ चित्रो वोस्तु यामश्चित्र ऊती सुदा
नवः॥ मरुतो अहिभानवः॥ हे मरुतो वो युष्माकं यामो स्मासु आगमनश्च चित्रश्चायनीयः पूज्य आश्चर्यभूतो वास्तु भवतु॥ न केवलमाग
मनमेव चित्रं॥ किंतु हे सुदानवः शोभनदानाः हे अहिभानवः अहीयमानप्रकाशाः युष्माकं संबंधी चित्रः स आगमः ऊती ऊत्यै रक्षणा
य इष्टतर्पणाय वा युक्तश्च भवतु स्वागमनं शीघ्रमस्तु॥ अभिमतप्रदं चास्त्वित्यर्थः॥ ॥ अथ द्वितीया॥ ॥ आरे सा वः सुदानवो म
रुत ऋंजती शरुः॥ आरे अश्मा यमस्यथ॥ ॥ हे सुदानवः शोभनदाना मरुतो वो युष्माकं संबंधिनी ऋंजती प्रसाधयंती स्वतेजसा तमान ७४
मलं कुर्वती प्रसिद्धं प्राप्नुवाना वा सा प्रसिद्धा शरुः हिंसका कृष्टिः आरे दूरे भवतु॥ तथा यमस्यथ क्षिपथ॥ सो श्मा व्यापकः आयुधवि
शेषः आरे दूरे भवतु॥ मामं प्राप्नोतु॥ यद्वा आरे शब्द आराच्छब्दपर्यायः सन्दूरसमीपे च वर्तते॥ अत्र समीपवचनः॥ यमस्यथा

स्यमस्यथ॥ तं वैरिणमस्माकं उपलोपमः क्रोधिनं भायुधविशेषः आरे समीपं प्राप्नोतु॥ ॥ अथ तृतीया॥ ॥ तृणस्कंदस्य नु विशः परि वृंक्त सु
दानवः॥ ऊर्ध्वान्नः कर्त जीवसे॥ ॥ हे मरुतः सुदानवः शोभनदानाय तृणस्कंदस्य तृणवदवस्कंदमानस्य भावस्वभावस्य माणस्य वा ममविशः पुत्रभृ
त्यादिरूपाः प्रजाः नु क्षिप्रं परिवृंक्त परिवर्जयत बाधापरिहारेण रक्षत॥ यद्वा कल्कशण कालस्यासुरविशः पत्न्यां प्रजाः परिवर्जयत किंच ना
स्मान ऊर्ध्वान कर्त कुरुत जीवसे चिरं जीवनाय॥ ॥ इति द्वितीयस्य चतुर्थे द्वादशो वर्गः॥ ॥ गायत्सामेति त्रयोदशर्चं नवमं सूक्तं आगस्त्यं त्रैष्टुभ
मैंद्रं॥ गायत्साम नवैन्यनुक्रांतं। समूळ्हे दशरात्रे तृतीयेऽहनि मरुत्वतीयशस्त्र एतत्सूक्तं विश्वजिन्नोग्निनुर इति खंडे सूत्रितं॥ तृतीयस्येत्यत्र्वा
हा गायत्सामेति॥ ॥ तत्र प्रथमा॥ ॥ गायत्साम नभन्यं यथा वेरर्चाम तद्वावृधानं स्वर्वत्॥ गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं
विवासान॥ ॥ इदं इंद्र नभन्यं नभस्यं नभतिभवं भोग्यादिनं हिंसकं वा राक्षसादिकस्य नभतिर्वधकर्मा नभति अर्दतीति वधकर्मसु गण
नात् तादृशं साम हे इंद्र यथा वेः येन प्रकारेण वेत्सि॥ तथा गायत॥ गायति उद्गाता॥ तत स्मात यत सौति ततः कारणात वावृधानं वर्धमा
नं स्वर्वत फलभूतेन स्वर्गेण तद्वत॥ शस्त्रं यथा तथार्चाम पूजयाम शंसाम इत्यर्थः॥ स्तुतमनुशंसतीति न्यायात॥ धेनवः दोग्ध्र्यः अद
ब्धाः अहिंसिताः गावः किंच यद्यत्र उत्तमलक्षणं साम वावृधानं सर्वत्र यथा भवति तथार्चाम आविष्कारात॥ विवासतिः परिचरणक
र्मा आगत्य परिचरंति क्षीरं दुहंतीति तथार्चाम॥ ॥ अथ द्वितीया॥ ॥ अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात॥ प्र मंद
युर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः॥ ॥ वृषा हविषां वर्षिता यजमानः स्वेदुहव्यैः स्वायत्तैः सर्वैः॥ यद्वा स्वयं प्राप्तैः धनैः हव्य
यद्वा तादृशैर्वृषभिर्वर्षकैर्हविः प्रदातृभिः अध्वर्यादिभिर्विशिष्टः सन् अर्चत् अर्चयति इंद्रं। यद्वा स्वेदफलस्य वर्षितृ इंद्र उक्तलक्ष
णैरध्वर्यादिभिर्यजंत॥ यद्यस्माद अश्नो व्यापकः पानार्थं धावन मृगो न हरिणादिरिव अयमिंद्रो अश्नः असनशीलः सन अतिजुगु
र्यात अत्यर्थं मुद्युंक्ते हविर्भक्षणाय यथा मृगः स्वपिपासादिना शीघ्रमुद्युंक्ते तथायमिंद्रोपि च स्यादिदं तस्मादर्चयति यद्वा यमिंद्राय
तमध्वा अश्वो मृगः उग्रो अतिजुगुर्यात भक्षयतु तथा चलतीत्यर्थः॥ किंच हे गूर्त उद्गूर्ण द्रमनांम नंस्तोत्रमिच्छतां देवानां मंदयुः स्तुति
पुत्रो मर्यो होता मानुष एतन्नामकः ऋत्विक् यजत्रो यागातिमान सन मिथुनानि युग्मरूपाणि याज्यापुरोनुवाक्यादीनि मिथुनो
वाजायापति रूपः सन प्रभरते प्रकर्षेण संपादयति तस्मादर्चतीत्यर्थः॥ ॥ अथ तृतीया॥ ॥ नक्षद्धोता परि सद्म मिता यन
भरद्गर्भमा शरदः पृथिव्याः॥ क्रंददश्वो नयमानो रुवद्गौरंतर्दूतो न रोदसी चरद्वाक॥ ॥ होता होमनिष्पादकः परमग्निर्मिताप
रिमिता सद्म सदनानि गार्हपत्यादिस्थानानि परियन परियन परितो गच्छन नक्षत व्याप्नोति॥ व्याप्य च शरदः संवत्सर पर्यंतं व
र्धित भूम्या मुत्पन्नमित्यर्थः॥ यद्वा संवत्सर संबंधिनं वसंतादिकालं ज्योतिष्टोमादिषु दीयमानं पार्थिवं हविर्भरत वसंते यसंततः
ज्योतिषा यजेतेति श्रुतेः॥ तथा क्रंदन शब्दयन अश्वो लुप्तोपमैतत। अश्व इव क्रंदन इति हृषातिशयात। किं कुर्वन नयमानः नयन
इंद्राय हविर्भारं॥ किंच गौर्गतो रुवत गौरिव उरव यद्वा वार्ताहरो दूत इव रोदसी रोदस्यौ द्यावापृथिव्या
वंतर्मध्ये रोदस्यावंतरा वाचं स्तूयमानः स्तुवन यद्वा वाचं चरन चरति गच्छति॥ हविः स्वीकाराय पृथिवीत प्रापणाय द्युलोकं च

137/1914

भा॰ अ॰ २ परिभ्रमतीत्यर्थः॥ यंतेः कर्तरि कर्मणि वा क्विप् चीत्यादिना क्विपद्यार्घो संप्रसारणाभावश्च॥ ॥अथ चतुर्थी॥ ॥ताकर्माषतरास्मै प्रच्यो अ॰ ४
त्नानि देवयंतो भरंते॥ जुजोषदिंद्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः॥ ॥तानानि अर्षतरा अर्षतराणि वा हवींषि अस्मा इंद्रायत दर्थं
७५, मे कर्मः संपादयामः॥ रुरुः करोतेर्वर्तमानार्थे लुङि मंत्रे घसेति क्लेर्लुक्॥ छंदस्युभयथेत्यार्धधातुकत्वेनाङितो भावाद्गुणः॥ च्यौत्नानि च्या
वयितॄणि दृढानि स्तोत्राणि कर्माणि स्तवकाख्यानि सामर्थ्यानि वा देवयंतो देवानात्मन इच्छंतः यजमानाः प्रभरंते प्रकर्षेण संपादयंति तेन इंद्र
मपि संपादयाम इत्यर्थः॥ दस्मवर्चा दर्शनीयतेजाः शत्रुः अपक्षीणबलो वा नसत्येव नासत्याविवाश्विनाविव तौ हि द्यावापृथिव्यात्मानौ ताविव
नसत्याः सुखेन गंतुं शक्यः। रथेष्ठाः रथे वर्तमानः एवंभूतः सन् जुजोषत अस्मत्कृतं स्तोत्रादिकं सेवतां॥ ॥अथ पंचमी॥ ॥तमुष्टुही
द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः॥ प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहंता॥ ॥तमु तमेवेंद्रं स्तुहि हे स्तोतः स्तुतिं
कुरु किमस्याधिक्यमिति उच्यते॥ यो ह यः खलु सत्वा॥ अतिप्रभूतबलः यद्वा सत्वा सादकः॥ शत्रूणां यश्च शूरः शौर्योपेतः मघवा ब
लवान् धनवान्वा यश्च रथेष्ठाः रथे वर्तमानः किंच प्रतीचश्चित् प्रत्यभिमुखं। योधुरपि योधीयान् योद्धृतमः प्रतिपूर्वादंचतेः क्विन्नंता
त् सुपनकाराश्चसि भवत्यकारलोपश्चावितिदीर्घः॥ अंचेश्छंदस्यसर्वनामस्थानमिति विभक्तिरुदात्ता॥ वृषण्वान् वाणो वर्षितारो
बलवानस्य तदस्य वृषा तद्वत् उततत्वन्यत्र इति निगमः॥ तथा ववव्रुषश्चित्तमसः आवरकस्यापि तमसो मेघादेर्विहंता विशेषेण
घातकः यस्मादेवं महानुभावः तस्मात् स्तुहि॥ ॥इति द्वितीयस्य चतुर्थे त्रयोदशो वर्गः॥ ॥अथ षष्ठी॥ ॥प्रयदित्था महिना नृभ्यो अस्त्य
रं रोदसी कक्ष्ये नास्मै॥ सं विव्य इंद्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम्॥ ॥यत् य इंद्रो महिना महत्वेन॥ नृभ्यो नेतृभ्यो
न्यः कर्मनिर्वाहकेभ्यो यजमानेभ्यः प्रास्ति प्रभवति इत्थमर्गादिप्रदाने न रक्षितुं अस्मै रक्षकायेंद्राय रोदसी द्यावापृथिव्यौ कक्ष्ये क
क्ष्ययतेः सती संचारस्थानार्थं नालं न पर्याप्ते गताधिकास्यें इत्यसंचाराय ल्पत्वाद्यावापृथिव्यो न पर्याप्ते इत्यर्थः॥ सर्वस्मादपि महिमा
त्माधिकत्वादिति भावः॥ अयमिंद्रो वृजनं न भूमभूमिं। भूतानि वा वृजनं न वृजनमिव वृजनेः कर्तनार्थस्येदं रूपं॥ तद्वित यथा आवृ
णोति तथायमपि सर्वतजसासं विव्ये सम्यगावृणोति लोकत्रयं॥ किंचायं स्वधावान् बलवान् शृंगे लक्षणो दक्षवान्वा द्यामिव भर्ति बिभ
र्ति धारणे दृष्टांतः ओपशमिव ओपशस्त्रे इत्योपशं॥ शृंगं तद्यथा वृषभ इत्थं द्वापरस्य रं समीपवर्तमानं शिरस्यं न रिक्षारकं लोकद्वयमो
पशं तद्दिव द्यां बिभर्ति लोकत्रयमपि बिभर्ती इत्यर्थः॥ भृञोजुहोत्यादेरूपं॥ ॥अथ सप्तमी॥ ॥समत्सु त्वा शूर सतामुराणं प्रप
थिंतमं परितंसयध्यै॥ सजोषस इंद्रं मदे क्षोणीः सूरिं चिद्ये अनुमदंति वाजैः॥ ॥हे शूर शौर्योपेत इंद्र परिमत्सु संग्रामेषु सतां त्वाम
वाश्रित्य वर्तमानानां प्राणिनां मुराणं। उरूणि अतिप्रभूतानि बलादीनि कुर्वाणं प्रपथिंतमं प्रकृष्टमार्गतमं सर्वतिनामुत्तममार्गभूतं
इंद्रा वृत्राणां दारकं त्वा तां परितं सयध्यै॥ अवतंसयितुं भूषयितुं भूषयितेर्वाण्यात्ति अर्थमदोरुतत्समाहार्थं च सजोषसः सहसेवमानाः ७५
समानप्रीतयो वा क्षोणीः क्षोण्यादयः पत्नीनाः मरुतः प्रयंत इति हीदृशो लोयवानि वल्कैः अनुमदंति अनुकूलं मादयंति संग्रा
मे मरुतस्त्वमेव स्वामिनं कृत्वा मादयंति हर्षयंतीत्यर्थः॥ यद्वा ये यजमाना वाजैर्हविर्भिर्मादयंति ते समानप्रीतियुक्तास्त्व मनुष्यभू

141/1914
ताः ऋत्विजः यजमानभूताः प्रजाः समकस इमानि ना नानि युवा गो धनकलक्षणानि एतं तामेव प्रजायितुं नवमोदायद्य प्रयतंते॥ ॥अथाष्ट
मी॥ ॥एवा हि ते शं सवना समुद्र आपो यत्त आसु मदंति देवीः॥ विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान्॥ ॥हे इंद्र ए
वा हि एवं खलु सति तव संबंधीनि सवनानि सूयते सोमो अत्रेति सवनानि सोमयागाः ते शं सुखकराणि भवंति कथं सति यत यदि देवीर्द्योतमा
नमाना आपः समुद्रे उदकसमुद्रे वर्णपानेन भृतं तर्पिता आसु प्रजासु निमित्तभूतासु तेत्वां मदंति मादयंति। अंतर्भावितण्यर्थोयं
यदा प्राण्युपकारार्थं वर्षणाय त्वां प्रेरयंति तस्यदृकानि तदा वनुतवसोमयागाः सुखकरा भवंति। यज्ञसाधनवृष्टिप्रदानेन यागा
निवर्तयत्यर्थः॥ किंच हे इंद्र तवांविश्वा गोः सर्वापि स्तोत्ररूपावाक् तेत्वां अनुक्रमेण जोष्या जोषणार्हा प्रीणयित्री भूता भवति॥
धारयादि सूरींश्चित् स्तोत्रादि प्रेरयन् स्तोतृजनान् विधिषा धिषण्या प्रज्ञया वृष्टिप्रदानरूपेण कर्मणा वा वेषि कामयसे तदा सर्वापि
स्तुतिस्तदा भवति॥ ॥अथ नवमी॥ ॥असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः॥ असद्यथा न इंद्रो वंदनेष्ठास्तुरो न कर्म न
यमान उक्था॥ ॥हे एनं इंद्रमेवेंद्रं यथा सुसखायः शोभनत्वेन सहायवंतो सामभूयास्म किंच स्वभिष्टयः शोभनाभ्येषणाः शो
भना भीष्टाश्च सा मा किमिव नरां न शंसैः नराणां राजादीनां शंसैः शंसनैरिव स्तुतिभिर्यथा मनुष्याः शोभनाभीष्टा भवंति। तद्वत्॥ द्वा
नां परोक्षेणाह॥ नाम्ना अयमिंद्रो वंदनेष्ठाः अस्मत्स्तुतौ वर्तमानः सन् तुरो न त्वरमाणो न यथा न अस्माकं कर्म उक्था उक्थैः शस्त्रैर्नयमानः फलं प्राप
यन् स्यात् तुरः सन् अस्मदीयेन कर्मणा फलं प्रापयितात्त्वा सन् भवेत् हे कृतिज्ञस्तथा कुरुतेति शेषः॥ ॥अथ दशमी॥ ॥विष्पर्ध
सो नरां न शंसैरस्माकासदिंद्रो वज्रहस्तः॥ मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षंति यज्ञैः॥ ॥नरां न नृणां मध्ये स्पर्धमाना यथा
विष्पर्धसः कुर्वंति स्पर्धिनः तद्वदिंद्र मर्यादेंद्रं शंसैः स्तुतिभिः सखायो वयं तं तथा कुर्मः सन्वयज्ञ हस्तो विरोधिभक्षणाय सर्वदा वज्र
धारी इंद्रः अस्माकमसत् विस्पर्धमनुकूलो भवतु॥ किंच मिंद्रं नायुवा न मित्रयवः हितैषिण इव सुशिष्टौ शासने वर्तमानं पूर्पतिं पुरःस्वा
मिनं यथाभिमतदानेन प्रयतंति तथा मध्या युव अस्माकं श्रियाय शंसां च मध्ये वसितिं कामयमाना अध्वर्य्वादयो यज्ञैर्यज्ञसाधनैर्हविः
स्तोत्रादिभिरुपशिक्षंति उपेत्य यजंते। शिक्षतिर्दानकर्मा॥ ॥इति द्वितीयस्य चतुर्थे चतुर्दशो वर्गः॥ अथैकादशी॥ ॥यज्ञो हि ष्मेंद्रं कश्चिदृ
धंजुहुराणश्चिन्मनसा परियन्॥ तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा॥ ॥कश्चित् यज्ञो यज्ञवान् यज्ञानुष्ठायी ऋंधन व
र्धयन् भवति इंद्रं यज्ञेन वर्धयतीत्यर्थः॥ जुहुराणश्चित् कुटिलगतिस्तु कश्चित् मनसा केवलेन परियन् परितो गच्छन् लौकिकविषयादिकं ध्याय
न वर्तते॥ यद्वा परिवर्जनार्थः वा वर्जयित्वा गच्छन् न इंद्रं प्राप्नोति। तत्र दृष्टांतः॥ तीर्थे प्रसिद्धमार्गे अच्छ आभिमुख्येन समीपवर्तनं ओकः पानीया
दिकं ममनं तत् षाणं पिपासायुक्तं यथा अविलंबेन प्राप्नोति स यथा तत्स्थानं आगच्छतीत्यर्थः॥ तद्वद्यज्ञेन कश्चित् पुमानिंद्रमभिगच्छतीति कु
टिलस्य दृष्टांतः॥ दीर्घो न वक्रत्वेनाति दूरो मार्ग इव सद्यथा सिध्रं फलं पानीयादिकं दृष्टं फलार्थिनं वा पुरः पं आकृणोति॥ अर्वाक्करोति निर्वेः क
रोति वर्जयतीत्यर्थः॥ तस्माद्यज्ञमार्गे यजमानो वक्रो दूरे पतित्रमति। नैंद्रं तर्पयति तद्विलक्षणस्तु वर्तयत्येव॥ ॥अथ द्वादशी॥ ॥मो
षूण इंद्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः॥ महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वंदते गीः॥ ॥हे इंद्र अत्र एतस्मिन् पृ

भा०अ०२ तेषु संग्रामेषु रक्षस्वर्थं मेघहननेषु। देवैर्मरुद्भिः सहितोस्मान्मा पुमेक्षीशितिशेषः ॥ मरुत्सहितो युध्यस्वेत्यर्थः ॥ हे शक्मिन बलवन्निंद्रः अ०१
आभ्लिहिस्मत आभ्लिहिस्मत वक्त्वु। नवाक्रिमस्तीति इष्यते ॥ अनयाः अवयजनं अवयुत्य पृथक्कृत्य यजनं हविर्भागोस्ति मरुद्भ्यः पृथग
७६ व्यक्ति हविर्भागः वृकवृकेन रुद्राणं वदीयते नास्मभ्यं ॥ अतः कथं योत्स्यामीति न मंतव्यामेत्यर्थः ॥ यद्वा अनयाः शत्रूणां चार्जुनायगंतावज्ञा
स्तीति। किं च हविष्मतः ब्रह्मयज्ञविर्भुतमीळ्हुषो हविः प्रादातुं यष्टुं तस्य दद्रयं मरुतां विशेषणं ॥ यस्य ममयथ्याफलेन इंद्रेणं न स हभिश्रयंतीगीः
स्तुतिरस्मादिंकृपा पावकमस्थितम हतोपि मीळ्हुषः कामानसेक्तॄन हविष्मतो स्मदत्त हविषा न हुता मरुतो वदंतस्तीति ॥ ॥ अथ त्रयोदश्या
मृक्षाद्विमारभ्य कृतां स्तुतिं निगमय्य फलं प्रार्थयते ॥ एष स्तोम इंद्र तुभ्यमस्मे एतेन गातुं हरिवो विदानः ॥ आ नो ववृत्याः सुवितायदेव
विद्यामेषं वृजनं जीरदानुं ॥ हे इंद्र एष स्तोमः इदानीं कारितप्रकारः स्तोत्रविशेषः तुभ्यं त्वदर्थं हे हरिवः हरिभ्यां तद्वत् इंद्र एतेन स्तोमेन
स्तोत्रेण गमनं नयानोस्मदीयं गातुं इव यज्ञं मार्गं विदः विदस्व विदित्वा च हे देव सुविताय सुहिताय शोभनगमनाय वा नोस्मान् आववृ
त्याः आवर्तस्व अस्म यागं मत्वा गच्छ विद्यामेत्यादि व्याख्यातं ॥ ॥ इति द्वितीयस्य चतुर्थे पंचदशो वर्गः ॥ ॥ त्वं राजेति दशर्चं दशमं
सूक्तं। आगस्त्यमैंद्रं त्रैष्टुभं। त्वं राजा इत्यनुक्रांतं। एवं पक्षे सामरथ्यो स्तोमातिरात्रसनार्थे होत्रकेरत छंसस्यं ते शस्त्रेषु भान्यमरुड
च्छ्यावपेरन्नितिसूत्रं ॥ ॥ तत्र प्रथमा ॥ ॥ त्वं राजेंद्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान् ॥ त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवा
नः सहोदाः ॥ ॥ हे इंद्र त्वं राजा अधिपतिः सर्वस्य जगतः। किं च ये देवाः मरुदादयः संति तेषामपि विशेषेण त्वं राजा हे असुर शत्रूणां नि
रसितः त्वं नॄन् अस्मान् कर्मणां नेतॄन् यजमानान् रक्ष पालय विशेषतोस्मानपि रक्ष त्वं च सत्पतिः सतां सतः कर्मफलस्य वा पालकः मघवा ध
नवान् नोस्माकं तरुत्रः तारयिता पापात् ॥ किं च त्वं सत्यः आबाध्यः सत्यफलो वा वसवानः स्वेन स्वतेजसा सर्वं छादयन् वसति वा कुर्वन् स्तोत
भ्यः सहोदाः सहसो बलस्य दाता भवतीति शेषः ॥ ॥ अथ द्वितीया ॥ ॥ दनो विश इंद्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ॥ ऋणोरपो
अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रंधीः ॥ ॥ हे इंद्र त्वं वृत्रं संबध्य मरुतां पुरभेदनसमये मृध्रवाचः मर्षणवचना विशस्तदीयाः प्रजाः
शर्मन् सुखं यथा भवति तथा दनः अदमयः दमेरिदं रूपं ॥ यद्वा मर्षणवचना विशस्तदीयाः शर्मन् सुखं यथा भवति तथा दनः अदमयः
दमेरिदं रूपं ॥ यद्वा वर्षणवचना विशस्तदीयाः प्रजाः शर्मसुखं तथा भवति तथा दनः अदमयः दमेरिदं रूपं ॥ यद्वा वर्णव्यत्ययः ॥ नदः अ
दनः अखादयः ॥ असुरप्रजाः अतिभयंकराः अव्यक्तराः कदेस्त्याज्ञायत यत्ता शारदीः प्रत्यग्राः ॥ यद्वा संवत्सरलक्षकः संवत्सरपर्यंतं दृ
ढीकृता अपि सप्त पुरः एतत्संख्याकाः पुरीर्दर्त ॥ अदारयः पुरस्पर्ध्यः ॥ दृणातेर्लुङि छंदसो विकरणस्य लुक् ॥ तस्येति। नियमा
ततलोपाभावः। तथा कृत्वा हे अनवद्य कांतरयदानिंदावन हे इंद्र अर्णो अरणशीलाः अपः तदीयदुर्गस्थानां युद्धकाभयाणि नय
छकादीति ऋणोः अगमयः प्रावर्तयः अपान्यकारेः एवमुपद्रुत्य पुरुकुत्साय एतन्नाम्ने राजे यूने नित्यतरुणाय न दृष्टं वृत्रमेतन्नामक ७६
मसुरं रंधीः असाधयः अहन अयमैतिहासिकपक्षे निरुक्तस्त्वा तु हे इंद्र मृध्रवाचो विशः मर्षणध्वनियुक्ताः शरीरस्पाः प्रजार
नः अदमयः अशब्दो वा अवर्धयहत्यर्थः ॥ कदाचन यत्सप्त पुरः शारदीर्दर्त ॥ सर्पणस्वभावात् प्रत्यग्राः रुच्याजगत्पुरे

143 / 1914

कान मे पालुभदारयत् दत्यर्थः ॥ तथा कृत्वा हे अनवद्य अर्णाः अरणस्वभावाः अपः ऋणोः अपगमयः प्रावर्तयः कृत्यादिरूपेण ॥
अनंतरं यूने पुरुकुत्साय त्वं मुख्यं मघं रंधीः असाधयः अहन अयमर्थः तं हत्वा इंद्र सप्तयुध्यान्नित्यादि। मंत्रांतरेषु प्रसिद्धः या
स्कस्तु एवं व्याख्यात दनोदानमनसो वा मनुष्यानिंद्र मृध्रवाचः कुर्विति ॥ ॥ अथ तृतीया ॥ ॥ अत्सरंत इंद्र शूरपत्नीर्द्यां च येभिः पुरुहू
तबहुभिर्बहुधा आहूतेंद्र येभिर्मरुद्भिरनुगतोसि तैः सहितः सन् तथा कृत्वा अशुषं आरोपयितारं अशोलंबा तूर्वयाणं तूर्ण
गमनमग्निं वे पुतं होमधारं चाग्निं रक्षोरक्ष त्वं वक्रिमर्थे रक्षणमिति उच्यते ॥ इमे गृहे अपांसि कर्माणि कुर्वन् वस्तोवस्तुं यद्वा वा
सयितुं स्थापयितुं कारयितुमित्यर्थः ॥ यद्वा इंद्र कुरुत वस्तो वस्तुं सतिथागा धनुस्थान पुरस्थास्यामीत्यर्थः। रक्षणे दृष्टांतः सिंहर
व सयथास्वाश्रये भूतं वनं गजाद्युपद्रवपरिहारेण रक्षति तद्वत् ॥ अस्यपुरगमनं वा दृष्टः सिंहो यथा निर्भयो विरोधिमृगान् हंतुं
धावति तद्वत् ॥ ॥ अथ चतुर्थी ॥ ॥ शेषन्नु त इंद्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना ॥ सृजदर्णांस्यव यद्युधा गास्तिष्ठद्धरी
धृषता मृष्ट वाजान् ॥ ॥ हे इंद्र ते तव शत्रवः सस्मिन् सर्वस्मिन् समाने वा योनौ स्वकीयस्थाने अंतरिक्षे वा योनिं अंतरिक्षं तु क्षिप्रं द्यो
बंनुशेरतांशिङ्गो लङ्घ्य डागमः ॥ व्यत्ययेन परस्मैपदासि बहुलमितिलिप ॥ किमर्थं प्रशस्तये प्रशंसनाय त्वत्कृतये त्वन्महिम
ज्ञापनायेत्यर्थः ॥ किं तु नादिसाधनेनेत्याह पवीरवस्य कुलिशस्य कुलिशशब्दस्याबामन्त्यमहिम्ना ॥ त्वदस्त्रप्रहारेण हता मेघाः श
यवो वात्र वर्षरते निपातनपालयंत उत्पर्थः ॥ किं च यत यदा युधा प्रहरणसाधनेना युधेन युद्धेन वा गाः गच्छसि तदर्णांस्युदका
नि अवसृजत अवसृजः ॥ अवाङ्मुखमपातयः पुरुषव्यत्ययः ॥ तदर्थं हरी अश्वा तिष्ठत अध्यतिष्ठः अत्रापि पुरुषव्यत्ययः ॥ यद्वा
यदा हरी अधितिष्ठसि तदा अवसृजः अथ वं रक्ता वाजान् अन्नानि तस्यादिलक्षणानि धृषता धर्षकेण सामर्थ्येन मृष्ट शोधय प्रव
र्धयेत्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ वह कुत्समिंद्र यस्मिंचाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ॥ प्रसूरश्चक्रं वृहतादभीकेभिस्पृधो यासि
षद्वज्रबाहुः ॥ ॥ हे इंद्र कुत्सं एतं नामानमृषिं प्रातं स्यूमन्यू स्यूमं कामिति मस्वनामतहिंछं तौ सततगामिनौ वा ऋज्रा ऋजुगा
मिनौ वातस्य वायोः समानवेगौ अश्वा तदीयावश्वौ वह प्रस्थापय अस्मिन् हविषि निमित्तभूते सति कुत्सं चाकन कामयसे तत्पय
सि चाहद्विगाल्हिकं तदर्थं सूरः प्रेरकः सूर्यश्चक्रं स्वमंडलं स्वरथचक्रं वा अभीके आसन्ने देशे वृहतात् ऊर्ध्वं गमयतु प्रकाशयतु
अश्वपराक्षणाद्ध ॥ वज्रबाहुरयमिंद्रः स्पृधः संग्रामं कुर्वतः शत्रूनभियासिषत ॥ ॥ इति द्वितीयस्य चतुर्थे षोडशो वर्गः ॥
॥ ॥ अथ षष्ठी ॥ ॥ जघन्वाँ इंद्र मित्रेरूंचोदप्रवृद्धो हरिवो अदाशून् ॥ प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अ
पत्यं ॥ ॥ हे इंद्र हरिवः हरिभ्यां तद्वत् त्वं चोदप्रवृद्धः श्वोदनस्तोत्रैः प्रवृद्धः सन् अदाशून् अदातॄन् मित्रेरून् मित्राणां यज
मानानां दुःखयितॄन् बाधकान् ते हरिणां मित्रत्वं गच्छतो वा जघन्वान् हतवानसि ॥ किं च ॥ ये अर्यमणं दातारं त्वां प्रपश्यन्
श्यंति ते नराः आयोर्मनुष्यस्याध्वर्यादेः हविर्लक्षणान्नस्य वासः वासं हृश्रुताः क्षिप्राहवेः प्रदानेन त्वया अपत्यकुलस्याया
त पितारं पुत्रं च हमानाय संति तं प्रपश्यन्न पद्मा ये अर्यमणं त्वां पश्यंति ते एवं भवंति ॥ यद्वा ये नरा अर्यमाणां यं किंचिद

भा० अ०२ तारं पश्यन्पश्यंतः त्वामयजंतः आयोर्मनुष्यस्य सचा सहायभूतास्त्वयाभर्ताः क्षिप्रावर्जिता अपत्यं पुत्रं बहुमानाये संततानन्नं घनवान्। अ०४
भवेस्यर्थः।। ।।अथ सप्तमी।। ।।रपत्कविरिंद्रार्कसातौ क्षां दासायोपबर्हणीं कः।। करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत्
७७ ।। ।।हे इंद्र त्वां कविः क्रांतदर्शी नृषाणो वा ह्वाताऽर्कसातौ अर्चनीयस्यान्नस्य लाभनिमित्तभूते सति रपत् स्तौति। यद्वा एतन्नामकऋषिः रप
त् अस्तौत् अन्नार्थं तस्यातिप्रभूतमन्नं प्रादा इत्यर्थः।। तथा च दासाय प्राण्युपक्षपयित्रे असुराय क्षां भूमिं उपबर्हणीं शय्यां कः अकरोः ह
त्वा भूमौ पातय इत्यर्थः। करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्।। अपरांश्च कृतः मघवा धनवानयमिंद्रः तिस्रो भूमीः दानूर्कपाशुकसोमिक
त्वा भूमीः क्षित्यंतरिक्षद्युरूपा वा भूमीर्दानुचित्राः दानेन देयैर्धनैर्वा चायनीयाः करत् करोति।। यद्वा तिस्रः अयोरजतहिरण्मयाः पुरीः
र्दानुचित्राः।। त्वं इनेन चित्राः अकरोः तत्था दुर्योणे दुष्टयोनौ स्थाने एतन्नामकस्य राज्ञः प्रीत्यर्थं वा कुयवाचं कुत्सितं ब्रुवंतं एतन्नामानम
सुरं मृधि संग्रामे नि श्रेत् हिंसितवान्।। ।।अथाष्टमी।। ।।सना ता त इंद्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः।। भिनत्पुरो न भिदो अदेवी
र्ननमो वधरदेवस्य पीयोः।। ।।हे इंद्र ते तव संबंधीनि सना सनातनानि नित्यानि तानि वीर्याणि नव्याः नवतराः इदानींतनाः ऋषयः
आगुः आगच्छंति स्तुतिव्याजेन प्राप्नुवंतीत्यर्थः।। कानि तानीति उच्यते।। पूर्वीः बह्वीर्नभो हिंसाः नभ इति हिंसार्थात् क्विप्। तदंतस्येदं रूपं। ताः हिंसाः
अविरणाय अविगतरणाय संग्रामनाशनाय सहः अभ्यभवं तदर्थं भेदः भेतृघातिका अदेवीः आसुरीः पुरो न पुरीः अपिभिनत्वि
दारितवानसि पुरुषव्यत्ययः।। नशब्दश्चार्थे। तथा अदेवस्य असुरस्य पीयोः हिंसकस्यासुरस्य वधः वज्रं ननमः अनमयः अनुकूलम
करोः।। यद्वा हे इंद्र सना नित्यं तत्तत्काले तव संबंधिन्यः ता ता निर्लिंगव्यत्ययः।। ताः पूर्वीः पुरातन्य आपः नद्याः नूत्नाः स्तुत्याः सत्यं आ
गुः पुरा गच्छंति। किमर्थं अरणाय प्राणिनाम विनाशाय तदर्थं ततः हिंसकान् बाधकान् वा मेघान् सहः मर्षणं अकरोः किंच अदेवीः पु
रः अवर्षणेनादेवनशीलान उदकपुरबंधानमिवानकारोः तथा अदेवस्य अदेवनशीलस्य पीयोः प्रतिकूलस्य रक्षस्य वधर्वज्रं नन
मः अनमयः।। ।।अथ नवमी।। ।।त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः।। प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं
स्वस्ति।। ।।हे इंद्र त्वं धुनिः कंपयिता शत्रूणामसि।। अतो धुनिमतीः कंपनोपेताः तरंगवतीः अथवा धुनिर्नाम जलप्रतिरोधकार्यसुरः
स एव प्रतिबंधकत्वयायासां ताः तादृशीरपः ऋणोः अगमयः भूमावपातयः तत्र दृष्टांतः।। स्रवंतीः प्रवहंतीः सीरा न नदीनामेतत्।।
सरणवतीर्नदीरिव तद्वत्संमता इत्यर्थः।। एवं कृत्वा हे शूर यत् यदा समुद्रं प्रतिपर्षि अतिक्रम्य पूरयसि इदं कृतं तदानीं तुर्वशं यदुं उभावपि रा
जर्षी स्वस्ति अविनाशं पारय अपालयः संपूर्णजलत्वर्णनेन तथा च मंत्रांतरं। त्वमपाय इंद्र तुर्वशायारमय इति।। ।।अथ दशमी।।
।। ।।त्वमस्माकमिंद्र विश्वध स्या अवृकतमो नरां नृपाता।। स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुं।। ।।हे इंद्र त्वमस्मा ७७
कं विश्वध विश्वस्मिन्नपि काले विश्वप्रकारैर्वा अवृकतमः।। यद्वा दातृतम इत्यर्थः। स्याः भव।। तथा नरां नृपाता अस्मदीयानां पुत्रभृत्या
दिरूपाणां बहूनां मनुष्याणां सर्वदा रक्षको भव।। अपरो वशब्दोऽनुवादः। किंच स त्वं विश्वासां स्पृधां सर्वासां स्पर्धानिमित्तानां अस्मत्से
नानां सहोदाः।। तासामर्थाय बलस्य दाता भव।। विद्यामेतिगतं।। ।।इति द्वितीयस्य चतुर्थे सप्तदशो वर्गः।। ।।मत्स्यपायीति पंच

र्चं एकादशं सूक्तं।। आगस्त्यमैंद्रं आद्या ककुप् धात्री विरूढ्ती। द्वितीयपादस्य द्वादशाक्षरत्वात्।। इतरेषां त्रयाणां अष्टाक्षरत्वाच्च द्वितीय 145/1914
श्चेत्यं कुमारिण्युपरिष्टाद्बृहती। यास्क धात्री वा बेल्लकलक्षणसद्भावात्। अंत्यास्त्रिष्टुभ् शिष्टाः त्रिष्टुबंत परिभाषया अनुष्टुभ इति विशेष
वचनादपीति त्वानुष्टुभः।। मत्स्यपाद्यानुष्टुभं तु त्रिष्टुबंत्वा याग्यं धात्री वेत्यनुक्रांतं।। द्वितीयस्य रसात्मिकायस्तृचः सात्मियः अभिज्ञ
त इदमुत्पद्य इति खंडे सूत्रितं।। मत्स्यपायि ते मह एमन्नं प्रत्येतन्नेति।। ।।तत्र प्रथमा।। ।।मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः
।।वृषा ते वृष्ण इंदुर्वाजी सहस्रसातमः।। हे हरिवः हरिभ्यां तद्वन्निंद्र महोमहान् पूज्योयं सोमः पात्रस्येव तत्पात्रेणेव सोमपात्रेण
यथाधार्यते।। सोमः तत्सदृशेन तेन त्वया तृतीयार्थे षष्ठी।। यद्वा पात्रस्येव तेन तव स्वभूतो महोमहान् सोम इति वाक्ययोजना।। अया
यि पीयत आशंसाया विवक्षितत्वात् भूतवत्प्रयोगः।। यतः पिबसि अतो मत्सि माद्यसि मादयस्व वा पात्रे यथा सोमः पूर्यते त
थात्यधिकं पिब पीत्वा च मादयस्वेत्यर्थः।। किंच वृष्णे ते अभिमतवर्षित्रे तुभ्यं च तुर्थ्यर्थे षष्ठी।। मत्सरो मदसाधनः मदस्तर्पयिता
वृषा वर्षिता इंदुः क्लेदयिता आह्लादकारीत्यर्थः।। वाजी अन्नवान् अन्नवाक्यत्वात् सद्भावादन्नवानित्युच्यते। सहस्रसातमः अपरिमि
तदाततमः सहस्रपुरुषसंभजनपर्याप्तः शत्रुयतिनाम्नोवाएवं महानुभावः सोमः संपादितः तं पिबेत्यर्थः।। ।।अथ द्वितीया।। ।।
आ नस्ते गंतु मत्सरो वृषा मदो वरेण्यः।। सहावां इंद्र सानसिः पृतनाषाळमर्त्यः।। ।।हे इंद्र ते त्वां नोऽस्मदीयः मत्सरो मर्षणसाध
नः सोम आगंतु आगच्छतु कीदृशो वृषा वर्षकः मदस्तर्पयिता वरेण्यो वरणीयः सहावान् सहायवान्।। सहसा बलेन तद्वान्स
त्वा सानसिः संभजनीयः पृतनाषाट् शत्रुसेनाया अभिभविता अमर्त्यः अविनाशी।। ईदृशः सोमस्त्वामागच्छतु।। यद्वा उत्तरार्ध
इंद्रपरतया व्याख्येयः।। हे इंद्र सहावान् अस्मदन्नसोमसहायवान् बलवान्वा सानसिः अस्माभिः संभजनीयः पृतनाषाट् अम
र्त्यश्च भवति।। ।।अथ तृतीया।। ।।त्वं हि शूरः सनिता चोदयो मनुषो रथं।। सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा।। ।।हे इं
द्र त्वं खलु शूरः शौर्योपेतः सनिता दाता असि आत मनुषो मनुष्यस्य मरथं रहणं स्यंदनं मनोरथं वा स्वर्गगमनसाधनं यज्ञाख्यं रथं
वा चोदयः प्रेरय।। किंच त्वं सहावान् सोमसहायवान् बलवान् वा भूत्वा दस्युमुपक्षपयितारमव्रतं अकर्माणं अनुष्ठानरहितं ओषः दह
।। किमिव शोचिषा दीप्त्या ज्वालया अग्निः पात्रं न स्वाधारं पात्रविशेषमिव यागाधिकाररहितं यज्ञं तत्तं दहेत्यर्थः।। ।।अथ चतुर्थी
।। ।।मुषाय सूर्यं कवे चक्रमीशान ओजसा।। वह शुष्णाय वधं कुत्सं वातस्याश्वैः।। ।।हे कवे क्रांतदर्शिन्निंद्र ईशानः समर्थः स
न् त्वं सूर्यं सूर्यस्य एकपांसुषां भवंतीति षष्ठ्यर्थे कर्मवचनस्य द्वितीयैकवचनादेशात् संबंधि चक्रमेकं ओजसा बलेन सामर्थ्यातिशये
न मुषाय अमुष्णाः छंदसि शायजपीति शायजादेशः।। पूर्वं सूर्यस्य रथस्य चक्रद्वयमस्ति एकमिंद्रो मुमुषतीति ह्यासः।। तथा च मं
त्रांतरं।। प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिति।। किंच शुष्णाय एतन्नामकायासुराय तदुधार्थं द्वितीयार्थे वा चतुर्थी।। शुष्णं
हंतुमित्यर्थः।। कुत्सं कर्तनसाधनं वधं वज्रं वातस्य वायोरश्वैर्वायुवेगैर्वाश्वैर्युक्तः सन् वह अवहः शुष्णं हंतुं वज्रमधारयः।। य
द्वा शुष्णवधाय वज्रमवहः तं वहत्वात दीर्घवायुवेगैर्वाश्वैर्युक्तः सन् वह शुष्णं हंतुं वज्रमधारयः।। यद्वा शुष्णवधाय वज्रम

भा० अ०२ मवहः तंच हत्वा तदीयैर्वायुवेगैर्वाश्वैर्युक्तः सन्नवहः शुष्णं हंतुं वज्रमधारयः॥ यद्वा शुष्णमवधाय वज्रमवहत्त्वं हत्वा तदीयैर्वा कवे अ०४
गोरश्वैः तदुपलक्षितैस्तदीयैर्धनैः कुत्सं महर्षिं अगमः शुष्णमगमः धनं कुत्सायादा इत्यर्थः॥ तथा चान्यत्र॥ त्वं कुत्सं शुष्णहत्ये
१८ ष्वाविथ कुत्साय शुष्णमशुषमित्यादि॥ ॥अथ पंचमी॥ ॥शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः॥ वृत्रघ्ना वरिवोविदा
मंसीष्ठा अश्वसातमः॥ ॥हे इंद्र ते तव मदः सोमपानजनितः शुष्मिंतमः बलवत्तमः उत अपि च तव क्रतुः कर्मव्यापारोस्मदर्थे
द्युम्निंतमः अतिशयेनान्नवान् यशोवान्वा॥ उभयत्रायस्मदीयादानिछंदसीति भसंज्ञाया बाधितत्वान्नलोपः॥ हे इंद्र अश्वसात
मः अश्वोपलक्षितं बहुधनं दातारौ वृत्स्यातामित्यनुग्रहं मकुरुतामित्यर्थः॥ ॥अथ षष्ठी॥ ॥यथा पूर्वेभ्यो जरितृभ्य इंद्र मय इवा
पो न तृष्यते बभूथ॥ तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुं॥ हे इंद्र पूर्वेभ्यो जरितृभ्यः पुरातनेभ्यो जरितृभ्यः स्तोतृभ्यो
मय इव मयः सुखमिव सुखरूपमिवाभवः॥ तद्दृष्टांतः आपो तृष्यते यथा आपो न तृष्यते पिपासितायेति तथा आपो नलपोत्तस्यो दकानि
यथा सुखरूपाणि भवंति तद्वत॥ तस्मात तां निविदं त्वत्प्रीतिकरीं प्रसिद्धां स्तुतिं त्वां तुभ्यं अनु जोहवीमि पुनःपुनः करोमि॥ यद्वा तां निविदं
अनुनतां यार्थे इत्यनेन मंत्रवचनीयत्वं। तमा स्तुत्या त्वां जोहवीमि पुनःपुनराह्वयामि॥ विद्यामेषमिति व्याख्यातं॥ ॥इति द्वितीयस्य च
तुर्थे द्वादशो वर्गः॥ ॥मत्सि न इति षडृचं द्वादशं सूक्तं। आगस्त्यमैंद्रं आनुष्टुभं पूर्ववदनुशब्दात्॥ त्रिष्टुबंतेति त्रिष्टुबंतत्वात् अंत्या त्रिष्टुप्
मत्सि न इत्यनुक्रांतं॥ विशेषविनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥मत्सि नो वस्य इष्टय इंद्रमिंदो वृषा विश॥ ऋघायमाण इन्वसि श
त्रुमंति न विंदसि॥ ॥हे इंदो हे सोम त्वं नो वस्य इष्टये वसीयसो धनस्य प्राप्तये उत्कृष्टेन यथा गोयवाइंद्र मत्सि मादयस्व
तदर्थं त्वमेवेंद्र कामानां वर्षिता विश॥ अथ तथा पीतः सन् ऋघायमाणः शत्रून् हिंसयन् इन्वसि व्याप्नोषि अतः अंतिअंति
कं शत्रुं न विंदसि न लभसे॥ यत्र शत्रुवत्सामर्थ्येन पलायिताः अतः न विंदसि॥ यद्वा त्वरार्धं इंद्र परतया व्याख्येयः हे इंद्र त्वं तं सोमं
पीत्वा ऋघायमाणः सन् इन्वसि अंतिकं शत्रुं न विंदसि॥ ॥अथ द्वितीया॥ ॥तस्मिन्ना वेशया गिरो य एकश्चर्षणीनां॥ अनु स्वधा यमुप्यते
यवं न चर्कृषद्वृषा॥ ॥हे अंतरात्मन् स्तोतर्वा अस्मिन् प्रसिद्धे इंद्रे गिरः स्तुतिरूपा वाचः आवेशय आस्थापयेत्यर्थः॥ य इंद्रश्चर्षणीनां
तां मनुष्याणां एकः एव स्वामी यः मनुष्यमेवेंद्र मनु स्वधा हविर्लक्षणमन्नमुप्यते दीयत इत्यर्थः॥ स चेंद्रो वृषा वर्षकः सन् यवं न यवं
मिव पक्वं यवं यथा वर्षुकं क्रमेणाददते कृषकाः तद्वत्॥ इत्येतद्वा अनु स्वधा अंनसाधनं वा स्यादिकं उप्यते भूमौ यस्मिंद्रस्य वृष्टिरूपम
नुग्रहमपेक्ष्यत इत्यर्थः॥ स च वृषा वर्षिता सन् इंद्रो यवं न यमिव सर्वबीजमापि वर्षूपं तत् पुनःपुनः करोति अंकुरयति॥ द्विःसा
तीनां च स॥ स्थाशायस्वया अस्मद्भिध्य वा ज्ञानित्रेहि॥ यस्येंद्रस्य हस्तयोः पंचक्षि
पंचानां मनुष्याणां प्रीणयितॄणि विश्वा सर्वाणि वसूनि धनानि भवंति देवा मनुष्याः पितरः पशवः पक्षिणश्चेति पंचजनाश्चत्वारो वर्णा १८
निषादः पंचम इति पंचजना इत्यन्ये। स त्वा दृशो इंद्रं स्थान्य स्वबाधस्वयोस्माकं अस्मभ्यं द्युम्नेतिनं। केन प्रकारेणेति स उच्यते॥ दिवादिविभवा

अशनिरिव अशनिर्भूत्वा जहि॥ ॥अथ चतुर्थी॥ ॥असुन्वंतं समं जहि दूणाशं यो न ते मयः॥ अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते॥ 147/1914
॥ ॥हे इंद्र असुन्वंतं त्वामभिषवकुर्वाणं त्वामयाजमानमित्यर्थः॥ दूणाशं दुःखेन नाशनीयं समं अपसर्वानुदानः सर्वशब्दपर्यायः॥ यद्वा सर्वो
यद्वा समं एकाकिनं अविशेषेण वा जहि॥ तेन किमपराद्धमित्यत आह॥ यस्ते तव मयः मय इति सुखनाम तव सुख हेतुर्न भवति योहोम
न स्तुत्या वा न प्रीणाति तं जहि तेन किं चास्य वेदनं धनमस्मभ्यं दद्धि देहि॥ दद इत्यस्मा छत्यये न परस्मै पदं॥ छांदसः शपो लुक्॥ सूरिश्चि
दोहते चिदर्थ॥ सूरिस्तव स्तोतेर्चे इत्येव इति प्राप्नोति धनं॥ ॥अथ पंचमी॥ ॥आवो यस्य द्विबर्हसोर्केषु सानुषगसत्॥ आजाविंद्रस्ये
दो प्रावो वाजेषु वाजिनं॥ ॥हे इंद्र सोम तत्स्याद्विबर्हसः स्तोत्रहविरूपद्विविधपरिदृढकर्मवतो यजमानस्य अर्केषु मंत्रेषु सानुषक् असङ्ग्वेः न दा
भावः आरक्षः अत एवायं वा तस्यै॥ वेंद्रस्य आजौ संग्रामे॥ हे सोम वाजिनं तथा वेतं तमिंद्र वाजेषु मंत्रेषु सानुषक् सानुषंगः सातत्यम
सतत भवत नमावः तं यजमानं रक्षितवेपयस्थिवायद्वा कर्मणि पक्षीयद्वयोः स्थानयोः परिवृढं यमिंद्रं हे सोम दा अर्के बु सानुषक् असङ्
वेः तदा भावः आरक्षः अत एवायं वा तस्यै वेंद्रस्य आजौ संग्रामे॥ हे सोम वाजिनं तथा वेतं तमिंद्र वाजेषु बलेषु स्तोत्रेषु वा निमित्तभूतेषु प्रा
वः प्रकर्षेणा रक्षयः॥ वा न समयेत एवायं वा संग्राम समये बलवत्तेन यज्ञप्राप्त शत्रुधन तर्पणनवा अरक्ष इत्यर्थः॥ ॥अथ षष्ठी॥ ॥
यथा पूर्वेभ्य इति॥ ॥इति द्वितीयस्य चतुर्थे त्रयोदशो वर्गः॥ ॥आ चर्षणिप्रेति पंचर्चं त्रयोदशं सूक्तं॥ आगस्त्यमैंद्रं त्रैष्टुभं आ चर्ष
णिप्रा पंच इत्यनुक्रमणिका॥ हौन केआत्पेषु स्तोमे रथ्या वस्यि विशेषविनियोगः॥ ऐंद्राणि त्रैष्टुभान्यमरुत्वतीयान्यावपेरन्निति सूत्रितत्वात्॥
॥ ॥तत्र प्रथमा॥ ॥आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इंद्रः॥ स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ्॥ ॥अ
यमिंद्रः चर्षणिप्राः चर्षणयो मनुष्यास्तेषां धनादिना प्राणयिता जनानां सर्वेषां वृषभः कामानां वर्षिता तथा कृष्टीनां मनुष्याणामेतत्॥
मनुष्याणां राजा स्वामी पुरुहूतः बहुभिराहूत इदृश इंद्रोस्माभिराजानातागच्छतु वा॥ उत्तरार्धः परोक्षवादः॥ हे इंद्र स्तुतोस्माभिः श्रवस्यन्
हविर्लक्षणान्नमिच्छन् अवसा अस्मद्रक्षणेन तर्पणेन वा युक्तः सन् मद्रिक् मदभिमुखमंचन्॥ वृषणा वर्षकौ युवानौ हरी अश्वौ युक्त्वा
रथे योजयित्वा अर्वाङ् अभिमुखमभिमुखमायाहि आगच्छ॥ ॥अथ द्वितीया॥ ॥ये ते वृषणो वृषभास इंद्र ब्रह्मयुजो वृषरथासो अ
त्याः॥ ताँ आतिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इंद्र सोमे॥ ॥हे इंद्र ते तव संबंधिनो वृषणो वर्षकाः युवानः वर्षणवंतो वा वृषभासः श्रे
ष्ठाः ब्रह्मयुजः परिमलतः ब्रह्मणा मंत्रेण युज्यमानाः वृषरथासः वर्षणरथवंतः तत्र नियुक्ता इत्यर्थः॥ ईदृशा अत्याः अश्वा ये संति तावाति
ष्ठ आश्रय आरोहतेभिस्तैः अर्वाङ् अस्मदभिमुखमायाहि आगच्छ कं च हे इंद्र सोमे सुते सति त्वां हवामहे आह्वयामः॥ ॥अथ तृ
तीया॥ ॥आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि॥ युक्त्वा वृषभ्यां वृषभक्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक्॥ ॥हे इंद्र त्वं
रथमातिष्ठ आश्रय यज्ञगमनार्थं कीदृशं रथं वृषणं वर्षकं कामानां किमर्थमिति चेत्॥ उच्यते॥ ते तदर्थं वृषा वर्षकः सोमः सुताभिषु
तस्तथा मधूनि मधुराणि घृतक्षीरादीनि परिषिक्तापरितः सिक्तानि संपादितानि यद्वा मधूनि मधुराः सोमरसाः चमसेषु पूरिताः आग
मनप्रकार उच्यते॥ हे वृषभ वर्षक इंद्र वृषभ्यां वर्षकाभ्यां हरिभ्यां युक्त्वा रथं योजयित्वा क्षितीनां कर्मकर्तॄन् वसतां यजमानानामस्माकमनु

भा० अ० २ वहायासितीनां स्वभ्भेतिवाचोत्यं प्रयता वेगवता रथेन मद्रिक् मदभिमुखम् अवनमदाभिमुख्येनोपयाहि॥ ॥अथ चतुर्थी॥ ॥अयं यज्ञो अ० ४
देवया अयं मियेध इमा ब्रह्माण्ययमिंद्र सोमः॥ स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह॥ ॥अहर्गणे पुरस्थे वक्तव्यारिया
१० ज्ञानयज्ञस्थ्ययाज्या॥ अग्निष्टोमात्यग्निष्टोम इति खंडे सूत्रितं॥ अयं यज्ञो देवया अयं मियेध इत्यत्र विस्तरेण चिंतितं हे इंद्र अयं यज्ञो देवयाः देवान्ग
च्छन् वर्तते तथा अयं मियेधः मेधः पशुः पशुवानयं मियेध इति दिश्कतः इमा इमानि ब्रह्माणि मंत्रात्मकानि अयं स्तुतः सोमः स्तीर्णं बर्हिः आसनाथा
स्तृतं दर्भाः एतत्पदार्थाः त्वं दुविना एवं संपादिताः हे शक्र इंद्र तु पुनः क्षिप्रमिह आप्रयाहि प्रकर्षेण शीघ्रमागच्छ आगत्य च निषद्य बर्हिषु
उपविश्यापिब सोमं तदर्थं इहास्मिन्देवयजने हरी अश्वावि मुंच वियोजय छांदसो नुभावः॥ ॥अथ पंचमी॥ ॥ओ सुष्टुत इंद्र याह्यर्वाङुप
ब्रह्माणि मान्यस्य कारोः॥ विद्यामेषं वृजनं जीरदानुं॥ ॥हे इंद्र सुष्टुतः अस्माभिः सम्यक् स्तुतः सन् अर्वाङ्
अस्मदभिमुखम् आयाहि आगच्छ आ विलंबय॥ किमुद्दिश्य मान्यस्य माननीयस्य कारोः स्तोतुः होतुः कर्तुर्यजमानस्य वा ब्रह्माणि मंत्रा
न् उप उपलक्ष्यमाणान् तेः स्तवं तः अभिमंत्रं यंता वाच यंत्रं भवस्य त्वप्रसणेन रक्षिता संतो वस्तोः स्तु त्वेन संस्तुतं अहनि वा स्वर्
बृहतः सं अंताद्भिः विद्याम लभमहि विद्यामेत्यादि व्याख्यातं॥ ॥इति द्वितीयस्य चतुर्थे विंशो वर्गः॥ ॥यद्धस्येति पंचर्चं चतुर्दशं सूक्तं
आगस्त्यमैंद्रं त्रैष्टुभं यद्धस्येत्यनुक्रमणिका॥ विनियोगः पूर्ववत्॥ ॥तत्र प्रथमा॥ ॥यद्ध स्या त इंद्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य
ऊती॥ मा नः कामं महयंतमा धग्विश्वा ते अश्यां पर्याप आयोः॥ ॥हे इंद्र ते तव स्या सो प्रसिद्धा श्रुष्टिः सर्वत्र श्रूयमाणा समृद्धिरस्ति यया
स्ति॥ यया जरितृभ्यः स्तोतृभ्यः ऊती ऊत्यै रक्षणाय बभूथ॥ समर्थो भवसि॥ सा अस्माकं महयंतं अस्मान्महतः कुर्वाणं कामं अभीष्टं मा
धक् मा धाक्षीः तत् तव सर्वाणि विश्वा सर्वाणि भोगजातानि आपः आसक्त्यानि यद्वा विश्वा सर्वा आपः आप्ताः तयः आयोः मनुष्यस्याः
चिताः पर्यस्या परितो व्याप्नुवां॥ ॥अथ द्वितीया॥ ॥न घा राजेंद्र आ दभन्नो या नु स्वसारा कृणवंत योनौ॥ आपश्चिदस्मै सुतुका अवेष
न्गमन्न इंद्रः सख्या वयश्च॥ ॥अयं राजा राजमानः ईश्वरो वा इंद्रः नोऽस्मदीयानि कर्माणि न आ दभत् सर्वतो न हिंस्यात् कानीति उच्यते॥ या
नि कर्माणि परस्परं दिवापाणिश्च सारा परस्य रं स्वसृभूतान्येकस्मिन् संस्पृतौ कुर्वते योनौ स्वकीये स्थाने कृणवंत॥ द्विवचनस्थाने
बहुवचनं कुरुतः॥ दभिर्हिंसाकरणयोश्च॥ लिङि कृण्वतेश्च कप्रत्ययः॥ बहुलं छंदसीति णत्वम्॥ तानि द्रौप्य मुजानातीत्यर्थः॥ स्वसृभूता व
ध्वर्युयजमाना वा कुरुतः॥ यद्वा स्वसारौ गुरुत्वो नानाफलात्पादनस्थाने यत्ते यानि कृण्वंत स्तानीति योज्यं॥ किं च अस्मा इंद्राय सुतुकाः शो
भनबलहेतुन्यायः॥ अप का यानि इदंपि अवेषन् आनुयंति नोस्मभ्यमिंद्रः सख्या सख्यानि वयश्च प्रभूतमन्नं च गमत् गमयतु॥ ॥
अथ तृतीया॥ ॥जेता नृभिरिंद्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः॥ प्रभर्ता रथं दाशुष उपाक उद्यंता गिरो यदि च त्मना भूत्॥
अयमिंद्रः शूरो विक्रांतः सन् नृभिः संग्रामनेतृभिर्मरुद्भिः सहितः सन् पृत्सु संग्रामेषु जेता जयशीलः शत्रूणां तथा नाधमानस्य स्तु ७९
तिं याचमानस्य कारोः स्तोतुर्हवमाह्वानं श्रोता भवति किं च यदि च यदा च त्मना आत्मना अनन्यप्रेरितः एवं गिरः स्तुतिरूपाणि वचां
सि स्तोतृत्वा उद्यंता उद्गमयिता भूत् भवेत् तत् तदा दाशुषो हविर्दत्तवतो यजमानस्य उपाके समीपे नामेनत॥ समीप एव यागदेशं रथं प्र

भर्ता सम्यक् प्रभरनभवति॥ जेता नृभ्यादि तृन्नंतं न लोकाव्ययेत्यादिना सकर्मणि षष्ठीप्रतिषेधः॥ यदा स्तोतृभिः स्तोतुमिच्छति तदा स्वयमेव 149/1914
शीघ्रं रथं धावयिता यागं प्राप्नोतीत्यर्थः॥ ॥अथ चतुर्थी॥ ॥एवा नृभिरिंद्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत्॥ समर्य इष स्त
वते विवाचि सत्राकरो यजमानस्य शंसः॥ ॥अयमिंद्रः नृभिः कर्मनेतृभिः हविर्दत्तैः यजमानैर्दत्तं पृक्षो हविर्लक्षणमन्नं सुश्रवस्या शोभनान्न
म्या अन्ने पूर्वत्रस्वादः प्रकर्षेण स्वादिता एवं एवमेव पूर्वं यथा यथैव मित्रिणः सहाय वतो पि यजमानस्य शत्रून् अभिभूत अभिभवति
यद्वा नृभिर्वृत्रघ्ने नृभिर्मरुद्भिः सहितोऽयमिंद्रः सुश्रवस्या प्रखादः सन्नेव मित्रिणः मित्रवतोऽयजमानस्यार्थे तदभिमनाय अ
भिभूत अभीत्यनर्थकः भवति॥ आभिमुख्येन वा भवति॥ तस्य हविः स्वीकृत्य तदभिमताय भवतीत्यर्थः॥ अथ तथाभूतः सन्निद्राश्च वि
विधवरं स्वरात्मकध्वनियुक्ते समर्ये संग्रामे विविधस्तोत्रवाचस्वध्वनियुक्ते समर्ये मर्त्ययुक्ते यज्ञे वा॥ तन्निमित्तं यजमानस्य शंसः शंसकः स
न् सत्राकरः फलानां सत्यकार्यं यमिंद्र इषो हविर्लक्षणमन्नं स्तवते स्तौति॥ ॥अथ पंचमी॥ ॥त्वया वयं मघवन्निंद्र शत्रूनभि ष्याम म
हतो मन्यमानान्॥ त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुं॥ ॥हे मघवन् धनवन्निंद्र त्वया सहायेन वयं यजमानाः महतो मन्यमा
नान् अतिबलवान्वयं स्थानमन्यमानान् शत्रून् अभिष्याम॥ अभिभविता अभवाम॥ हे इंद्र त्वं त्राता त्वमेवास्माकं रक्षकः॥ अतस्त्वमु त्वमेव
नोऽस्माकं वृधे धनादिवर्धनाय भूर्भव विद्यामेत्यादि गतं॥ ॥इति द्वितीयस्य चतुर्थे एकविंशो वर्गः॥ ॥पूर्वीरहमिति षडृचं पंचदशं सू
क्तं त्रैष्टुभं द्वे पंचम्याद्यबृहती॥ अत्र द्वयोर्लोपामुद्रागस्त्ययोस्तच्छिष्यस्य च ऋषयः सृक्प्रतिपाद्यार्थो रतिर्देवता॥ अत्रानुक्रम
णिका॥ पूर्वीः षड् लोपामुद्रा आगस्त्यं च ह्वाभ्यां रत्यर्थं संवादं स्वं तथा शिष्यस्त्वंते बृहत्यादी अपश्यदिति॥ विनियोग
विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥लोपामुद्रा आह॥ पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयंतीः॥ मिनाति श्रियं जरिमा
तनूनामप्यू नु पत्नीर्वृषणो जगम्युः॥ हे अगस्त्य अहं लोपामुद्रा पूर्वीः शरदः पुरातनान् संख्यातान् संवत्सरान् दोषा रात्रीः वस्तोरहानि तथा
दे हं जरयंतीरुषसः उषः कालांश्च सर्वेषां त्वं तत्कालसंयोग द्वितीया॥ अद्यतनकालपर्यंतं बहुसंवत्सरं कालेन मत्स्य शुश्रूषया श्रमाणाः
ताभूवं॥ इदानीं तु जरिमा जरा तनूनाम् गतानां श्रियं शोभां दर्यमिताता तिष्ठिनस्ति॥ एवमपि नानुगृह्णातीत्यर्थः॥ अथ नु अपि संभावनायां
उ इत्यवधारणे नु इति वितर्के इदानीमपि किं संभवतीयं॥ का कश्चित्पत्नीस्त्रियः॥ वृषणः सेक्तारः पुरुषाः जगम्युः गच्छेयुः संभोगं कुर्युः॥
अतो मां किमित्यवमन्यसे इत्यनीमपि वा संभावयत्यर्थः॥ ॥अथ द्वितीया॥ ॥सा तमथाह॥ ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिर
वदन्नृतानि॥ ते चिदवासुर्नह्यंतमापुः समू नु पत्नीर्वृषभिर्जगम्युः॥ हे पते अगस्त्य ये चिद्धि येऽपि तु पूर्वं पुरातनाः ऋतसापः सत्यस्याप
यितारः स्पानुवाना महर्षयः आसन् ते देवेभिर्देवैः साकं सह ऋतानि सत्यवाक्यान्यवदन् वदंति॥ ये महत्तपो यज्ञं वा अनुविदंति ये च दे
व वा क्यानि वदस्मात फलानि वदंति तच्चिता चिदर्थे ते चिदवासुः अवक्षिपंति रतः स्याति फलस्तोविमोचनेवर्तते॥ तेन ह्यंतमापुः नाहि
अस्य च यादरं तं प्राप्नुवन् अस्य वयं मन्निपि ऋतुकालगमनमपि कुर्वंतीत्यर्थः॥ तथा पत्नीः पत्न्यश्च तपस्यमानाः वृषभिर्भोगवर्षे
के र्वषिभिः सहसमू नु जगम्युः इति पूर्णो संगच्छेरन् अतस्त्वं कथं मां नानुभवसीत्यर्थः॥ ॥अथ तृतीया॥ ॥अगस्त्यस्तामाह॥

८० न मृषा श्रांतं यदवंति देवा विश्वा इत्स्पृधो अभ्यश्नवाव ॥ जयावेदत्र शतनीथमाजिं यत्सम्यंचा मिथुनावभ्यजाव ॥ भोः पत्नि त्वया न मृ
षाश्रांतं व्यर्थं न भवति नावाभ्यां यत यस्मात् देवा अवंति रक्षंति तपोभिः प्रीता देवाः विश्वाः सर्वाः स्पृधः अभ्यश्नवाव अभितो व्याप्नुयावां
। अत्र अस्मिंल्लोके शतनीथं। अपरिमितभोगप्राप्तिसाधनमाजिं प्राप्तिं परस्परं जयाव जयलक्षणं कृतसंग्रामं वा जयाव यत् यस्मा
त् सम्यंचौ परस्परं गच्छंतौ प्रजयंतौ वा मिथुना मिथुनौ पत्नीपुरुषरूपौ संतौ अभ्यजाव संभावहमपि परस्परमभिजयावेत्येवं तयोः संभो
गं संभावयामास। ॥ अथ चतुर्थीमाह॥ ॥ नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्॥ लोपामुद्रा वृषणं नी
रिणाति धीरमधीरा धयति श्वसंतं॥ ॥ हे त्वायेन नदस्य नदनस्य जपनस्य ध्यायितुः जपाध्ययनकर्तुः रुधतो रतानि रोद्धुः ब्रह्मचर्यमास्थितस्य
॥ उभे कर्मणि पश्यतो उक्तलक्षणं मां काम आगन्॥ अगमत्। नदनस्य मा रुधतः काम आगमदिति निरुक्तं॥ कस्य हेतुरिति। उच्यते। इतस्तं
संगमनिमित्तान् तथा आमुतो वसंतादिकालान् कुतश्चित्कारणादाजातः सर्वतः उत्पन्नः॥ यद्वा इत एतल्लोकजनिताद् अमुतो लोकांतरज
निताद्वा कुतश्चित्त निमित्तात् संतः कामा कथमिति उच्यते। इयं लोपामुद्रा वृषणं रेतसः प्रवर्तितं मां नीरिणाति नितरां गच्छतु॥ किंच धी
रं धीमंतं नियमादविचालितं श्वसंतं महाप्राणं महाबलं अधीरा कालेरपा योषित् धयति उपभुंक्तां॥ अथानयोर्दंपत्योः संभोग
सत्यापं श्रुत्वा तत्प्रायश्चित्तं चिकीर्षुरुत्तराभ्यामाह॥ अनयोर्विनियोगः शौनकेनोक्तः॥ इमं नु सोममित्येतं दृचं प्रपत्तौ जपन्सर्वान्
कामानवाप्नोति भयेभ्यश्च प्रमुच्यत इति॥ ॥ तयोर्मध्ये प्रथमा सूक्ते पंचमी॥ इमं नु सोममंतितो हृत्सु पीतमुप ब्रुवे॥ यत्सीमागश्च
कृमा तत्सु मृळतु पुलुकामो हि मर्त्यः॥ उपेत्य मनसा प्राप्य प्रार्थये किं ब्रवीमीति। उच्यते। यद्धागः गुर्वोः कामप्रलापश्रवणविषयं पा
पं चकृम कृतवंतो वयं तस्मादागमः सः सोमः सुसम्यक् मृळयतु॥ पापजनितदुःखं माकरोदित्यर्थः॥ महत्पापमनु मुच्यमानं प्रार्थन
या कथं लुप्यत इत्यत आह॥ हि यस्मात् मर्त्यो मनुष्यः पुलुकामो बहुकामनावान् अल्पेनैव कर्मणा बहुकामानाकांक्षति तस्मादेवं त
स्मात्पापविहरत्यर्थः॥ यद्वायमपवर्जनीयितया प्राप्य तदुच्यते त्याह॥ पुरुकामो हि खलु मर्त्यः कामहतः सन् कामिनं निरुध्य एव वर्तते॥
अतत्तयोरसीको युक्तः॥ तच्छ्रवणदोषोपि प्रमादिकोस्माकं प्रातेन सोमेन परिहर्तव्य इत्यर्थः॥ यद्वायं मंत्रः चंद्रपरो व्याख्येयः
मनसोभिमानित्वात् अतस्य पापस्यापि मनस्येव संभावितत्वात् अस्मिन्पक्षे हृदरूपीतं हृदिस्थितमित्यर्थः॥ शिष्टं स्पष्टं॥ अथ विनि
युक्तयोर्मध्ये द्वितीया यया मृत्जपश्च्यां ते वास्ये वाह॥ ॥ अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः॥ उभौ वर्णावृषिरुग्रः
पुपोष सत्या देवेष्वाशिषो जगाम॥ अयमगस्त्यो मरुः खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः खनमानः फलमभिमत
मुत्पादयन्। प्रजां प्रकर्षेण पुनः पुनर्जायमानमपत्यं कुलस्यायतनसाधनं पुत्रादिकं बलं चेच्छमानः सन्॥ यद्वा प्रजां भृत्यादिरूपां
बलं च कृक्षिरतींद्रियद्रष्टा महानुभाव उग्रः उद्गूर्णः संसारे संचरन्नप्यबाधः सन्नुभौ वर्णौ वर्णौ वर्णनीयौ कामं तपश्च पुपोष स ८०
त्या आशिषो देवेषु देवत्वोत्तगाम प्राप्तवान् यतो यं महानुभावः तस्मादस्मान्पातीत्यर्थः॥ ॥ इति द्वितीयस्य चतुर्थे द्वाविंशो वर्गः॥ ०
इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथममंडले त्रयोविंशोनुवाकः॥ ॥०॥ अथ चतुर्विंशेनु

1914

वाके द्वादश सूक्तानि॥ ॥ तत्र युवो रजांसीति दशर्चं प्रथमं सूक्तं आगस्त्यं त्रैष्टुभं तु ह्यादिपरिभाषये इमादिसूक्तपंचकमाश्विनं युवो
दशाश्विनं वा इत्यनुक्रमणिका॥ एतत् ह्यादीनि तृतीयवर्जितानि पंच सूक्तानि प्रातरनुवाक आश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियुक्तानि आश्वि
नेतत्रीयमुद्दूरेहि इति॥ ॥ तत्र प्रथमा॥ ॥ युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत्॥ हिरण्यया वां पवयः प्रुषायन्मध्वः
पिबंता उषसः सचेथे॥ ॥ हे अश्विनौ युवोर्युवयो रश्वाः रथवोढारो रजांसि रंजकान् लोकान् सुयमासः शोभननियमनालोकत्र
यसंचारिण इत्यर्थः॥ कदेत्याह॥ यत् यदा वां रथः अर्णांसि अरणीयान्भीमंतदेवान् परि दीयत परिगत परितो गच्छति वा॥ तदेत्य
र्थः॥ दीयति गतिकर्मा दीयतिनपूर्वातिन लक्मर्कपानात॥ किंच तदा गमनकाले युवां युवयोः पवयः वज्राः रथनेमयो हिरण्मय्यः
रथः हिरण्मयाः प्रुषायन् प्रुष्णंति अभिमत। यद्वा हिरण्यं यानि यव योम धुपात्राणि वां युवाभ्यामर्थायास्माद्देवं तस्मात्॥ युवां मध्वो
मधुनो मधुमद्रसस्य सारस्य कर्मणि षष्ठी॥ सोमरसं पिबंतमित्यर्थः॥ ॥ अथ द्वितीया॥ ॥ युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्र
युत्योः॥ स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च॥ ॥ हे अश्विनौ युवं युवां यत् अत्यस्य अतनशीलस्य सततसंचारिणो विपत्मनो
विविधगमनस्य विविधगमनस्य वानर्थस्य मनुष्याणां हितस्य प्रयज्योः प्रकर्षेण पूज्यस्य एतानि कर्माणि षष्ठ्यंतानि॥ उक्तरूपस्य अव
स्तान॥ नक्षथः व्याप्नुथः। देवयजनं गंतुं॥ किंच यत् यदा हे विश्वगूर्ती सर्वैः स्तुत्यौ सर्वेद्योद्गूर्णौ वा युवयोः स्वसा॥ स्वस
ठानीया स्वयं सारिणी वा उषाः भराति योषत् तद्दागमनाय प्रभातं करोति॥ यदा हे मधुपौ मधुरस्य सोमस्य पातारौ युवां यजमानो वा
जाय बलाय गमनाय वा॥ इषे प्रभूतान्नाय ईट्टे स्तौति तत्र रथं वा श्रयत इत्यर्थः॥ ॥ अथ तृतीया॥ ॥ युवं पय उस्रियायामधत्तं पक्व
मामायामव पूर्व्यं गोः॥ अंतर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान्॥ ॥ हे अश्विनौ वां युवां उस्रियायां गोनामैतत्॥ भो
गास्रावित्वां गवि पयो अधत्तं अधारयतं स्थापितवंतौ तथा आमायां अपक्वायां पक्वं परिपक्वं भोगयोग्यं गोसंबंधि दुग्धं पूर्व्यं पू
र्वभवं तन्नेवास्तु लं भव अनल्पादधारयतं गवि क्षीरमुत्पाद्य पुनर्भोगाय पृथक्कृतवंताविस्यर्थः॥ यत् यस्मात् हे ऋतप्सू सत्यस्वरूपौ
यज्ञहविर्भोक्तृस्थितां गवां हे अश्विनौ वां वनिन उदकवंतः उदकोपलक्षित हविष्मतोयज्ञस्य अंतर्मध्ये हविष्मान् प्रदेयहविषा
द्वानशुचिः शुध्धो यजमानो यज्ञे तत्र यजति युवां तस्मादेवं मकुरतां॥ यद्वा यदेव यजमानः करोति तदित्यर्थः॥ तत्र दृष्टांतः॥ वनि
नो वन संबंधिनः श्वसमहस्यांतर्मध्ये ह्वारो न चोर इव सायथा गाकृक्ता वर्तेत॥ तथा यजमानो पीत्यर्थः॥ ॥ अथ चतुर्थी॥ ॥ यु
वं ह घर्मं मधुमंतमत्रयेपो न क्षोदोवृणीतमेषे॥ तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यंति मध्वः॥ अत्रेति हास माहुः॥ प्र
वर्ग्येण प्रचरंतमत्रिं राक्षसा तप्ते घर्मे पातयन् सचातप्यमानोश्विनौ॥ तुष्टाव तौ च स्तुत्याहृष्टमनसा वरं श्रेतामिति। अपरस्तो
श्चित्तमपीलयतामित्याहुरिति॥ हे अश्विनौ युवं युवां मधुमंतं पयोघृतरूपाभ्यां तद्वंतं घर्मं दीप्तं प्रवर्ग्यहते सोल्यमिक्षत अत्र
येणतं नाम सामहर्षपश्रोदः क्षोदं मिश्रो घमाना भिक्षपोनउदकानि न॥ आवृणीतं॥ अवारयतं औष्ण्यंते यसकसत्संकृतवंतौन

अ॰ ३ अ॰ २ घर्मं घर्मसकाशात् दुग्धितवानित्यर्थः। यद्वा अत्र येषोर वृदो दासि घोषमानाविति इदकं नामैतत्। रुदंते इत्यस्यते। अपः क्षोणीन अपइति अ॰ ४
षष्ठ्यर्थे द्वितीया। इदं काले ऽग्निं त्वं यथा भवति तद्वत्पश्चान्तरेतु घर्मं दीप्तमग्निं मधुमंतं कृत्वा वृणीतं स्वयत्तमित्यर्थः। तथा च मंत्रांतरं। तमं
८१ घर्मं माण्वां वं तमं च यइति। तत्तस्मात् यस्मादेवं तस्मात् हे नरो नेतारो नरकारो वा अश्विना अश्विनौ वां युवाभ्यां पश्वइष्टिः पश्वुरित्यन्नेनामः
अग्निः पश्वरसीदिति पश्वसाध्यो यागो युवाभ्यां प्रवर्तते इति शेषः। आश्विनं अग्निः पश्वरसीदिति पश्वसाध्यो यागो युवाभ्यां प्रवर्तत
इति शेषः। आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेदित्यादिना पश्विभ्यां पशुर्विहितः। तथा मध्वो मधुसदृशाः सोमर
सा अपि युवाभ्यां प्रति अभिगच्छंति। तत्र दृष्टांतः। रथ्येव चक्रा रथस्य संबंधीनि चक्राणि रथस्य संबंधीनि चक्राणीव तानि यथा प्रवणं देश
मभिगच्छंति तद्वत्॥ ॥अथ पंचमी॥ ॥आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः॥ अपः क्षोणी सचते माहिना वां जूर्णो वामक्षु
रंहसो यजत्रा॥ हे दस्रा उपक्षयितारौ अश्विनौ वां युवां दानाय। अस्मदभिमतार्थं युवाभ्यां वा हविर्दातुं आववृतीय। आवर्तयामि याग
देशं प्रत्यावर्तयितुमित्यर्थः। केन साधनेनेति। तदुच्यते गोः स्तुतिरूपाया वाचः ओहेन वहनेन साधनेन यद्वा आवर्तनकाल उच्यते। मार्ग
स्था इव सा वहनेन जिव्रिः॥ जीर्णो जरठीभूतो तौग्र्यो न तुग्रस्य पुत्रो भुज्युरिव। स हि पितृभ्यां नासत्या भुज्युमित्यादिषु प्रसिद्धा च कि
माश्चर्यमहमावर्तयामीति। किंतु अपः क्षोणी अप इत्यंतरिक्षनाम क्षोणीति पृथिवीनाम द्यावापृथिव्यावपि वां युवयोर्महिना माहात्म्येन
युवयोः प्रसादेन सर्वोपकारिण्याविति स्यातां सर्वे प्रदेशा वा चितं सेवांत्वेत सेवते प्रत्येकं। यद्वा वां महिना यां यजमानो द्यावापृथिव्यौ प्रसा
दादयमपिः जूर्णः न स्याज्जीर्णो जरसा न दंसः पापात नरा उल्लक्षणात्मुमुक्षु अक्षुभिरकालात्पाप्मादीर्घजीवी भूयात् यद्वा हे यजत्रा वां प्र
सादात् जूर्णो यजमानः अंहसो दुरितस्यांहसोऽपि पः उरुकलक्षणाति सोमरसरूपाण्युदकानि क्षोणी क्षोण्यां समर्थः प्रगल्भे भूयाचिर
कालं अक्षुर्व्याप्तः सन् महिना माहात्म्येन सचते। द्वितीयावामित्यस्यमाहेत्यर्थः॥ ॥इति द्वितीयस्य चतुर्थे त्रयोविंशो वर्गः॥ ॥अथ ष
ष्ठी॥ ॥नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिं। प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजं॥ ॥हे सुदानू शोभ
नदानावश्विनौ यत् यदा नियुतोऽश्वान् नियुवेथे नियुज्याथे नियोजयथः॥ ताभिरस्मद्यज्ञगमनाय संयुक्तौ भवथः। ते दा स्वधा
भिरन्नैरलंकारणैरदकैर्वा पुरंधिं बहूनां धात्रीं पृथिवीमुपसृजथः। एवं च सति सूरिः स्तोता रंयजमानो वातो न वायुरिव तद्वत् क्षिप्रं युवां
प्रेषत्। तर्पयतु वेषत्। व्याप्नोतु कामयतां वा प्रीणातेर्वा तौ चाश्विनौ लिङिरूपमनंतरं कश्चन सूरिः स्तुत्या धिक्कर्माणि व्रतानि यस्य
मंतं महे महत्त्वाय। अयं यजमान आददे आदत्ते। स्वीकरोति। आङ्पूर्वादास्य विहरण इत्यात्मनेपदं। लोपस्त आत्मनेपदं। लोपस्त
आत्मनेपदेष्विति लोपः। यद्वा छांदसे लिटि रूपं। स्वीकृत्य च महत्त्वाय युवां सेवतर्पयतीत्यर्थः॥ ॥अथ सप्तमी॥ ॥वयं चिद्धि वां ज
रितारः सत्या विपन्यामहे वि पणिर्हितावान्। अधा चिद्धि ष्माश्विनावनिंद्या पाथो हि ष्मा वृषणावंतिदेवं॥ ॥वयं चिद्धि वयमपि जरितार ८१
स्तवकर्तारः सत्याः सत्यफलाः संतो विपन्यामहे विविधं स्तुमः पणिः पणाधारो द्रोणकलशो विहितवान्। स्थापितरसवानासीत्। य
द्वा पणिर्वणिक् लुब्धकोऽभयं धनं विहितवान्निहितधनो धनादस्मोप्य यतः विविधं युवतां। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। अध अपि वे वि

153
1914

श्विष्मेत्येवयः। पूरणाः। हे अश्विनौ अनिंद्यावनिंद्यनामिनतौ। हे वृषणौ कामानां वर्षितारौ युवां अंतिदेवं देवानामंतिके पाथः
सोमं पिबथः यद्वा अंतिके वर्तमानं देवमनुवानं सोममित्यर्थः॥ ॥अथाष्टमी॥ ॥युवां चिद्धि ष्माश्विनावनु द्यून् विरुद्रस्य प्रस्रवणस्य
सातौ॥ अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः॥ हे अश्विना युवां चिद्धि ष्म चित्यर्थः। पूरणाः अनु द्यून् प्रतिदिनं विरुद्रस्य
विविधं रुद्रः स्वद्रावणस्य विविधशब्दप्रमाणस्य द्रवणशीलस्य प्रस्रवणस्य शत्रुहंस्त्रसंख्यायस्य सातौ लाभनिमित्तभूते सति अगस्त्यः
एतन्नाम ऋषिर्नरां नृणां कर्मनिर्वाहकानां मनुष्याणां तेषु मनुष्येषु मनुष्याः संतिषु प्रशस्यतरो यः सहस्रैः अपरिमितैः स्तोत्रैश्चि
तयत् चेतयति स्तुत्या प्रबोधयति। तत्र दृष्टांतः। काराधुनीव कारा शब्दः तस्य धूनयिता उत्पादयिता शंखादिः स इव स मध्ये यद्वैतद
व्यागस्त्यविशेषणं करः शब्दयिता होत्रादिः तस्य धुनिः कंपयिता प्रेरकः इवेति सप्रत्यर्थे अस्य पमार्थस्य सप्रत्यर्थे प्रयोग इति निरुक्तं॥
॥ ॥अथ नवमी॥ ॥प्र यद्वहेथे महिना रथस्य प्र स्पंद्रा याथो मनुषो न होता। धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम॥ हे अ
श्विनौ युवां रथस्य गमनसाधनस्य महिना महत्त्वेन यत् यस्मात्प्रवहेथ धारयथो यत्तं यद्वा रथस्य स्वर्गगमनसाधनस्य धुरं वहंतः॥
तथा स्पंद्रा गच्छंतौ युवां याथो गच्छथ स्वस्थानं यज्ञारंभे आगच्छथः स्तुतसमाप्तौ पुनर्गच्छथश्चेत्। तत्र दृष्टांतः। मनुषो न होता मनुष्यस्य
यजमानस्य होता यथा यज्ञप्रारंभे आगच्छति कर्मण्यपवृक्ते पुनर्निर्गच्छति तद्वत्॥ आगमनसमये सूरिभ्यः स्तोतृभ्यः धत्तं धारयतं फलं
उत वा स्वश्व्यं शोभनाश्वसमृद्धं तं नासत्यासत्यौ एव सत्योन सत्यौ हे तादृशौ हे इन्द्र प्रसादाद्वयं रयिषाचो धनसमवायिनः स्याम भवेम॥ ॥अथ दश
मी॥ ॥तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यं। अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुं॥ ॥हे अश्विना हे अश्विनौ
वां युवयोः संबंधिनं प्रगमनेन स्तुत्यं रथं वयमद्य अस्मिन्नकाले विहुवेम आह्वयामः केन साधनेनेति उच्यते। स्तोमैः स्तोत्रैः कि
मर्थं सुविताय सुष्ठुप्राप्तये कीदृशं नव्यं स्तुत्यं अविकारकं नूतनं वा तथा अरिष्टनेमिं अहिंसितचक्रबलयं द्यां परियानं प्रकाशस्य परितो
गच्छंतं विद्यामेत्यादि गतं॥ ॥इति द्वितीयस्य चतुर्थे चतुर्विंशो वर्गः॥ ॥कदु प्रेष्ठाविति नवर्चं द्वितीयं सूक्तं। आगस्त्यं त्रैष्टुभमाश्विनं॥ कः
दु नवेत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः॥ पूर्वसूक्त एवोक्तः। कदु प्रेष्ठाविषां रयीणामध्वर्यंता यदुन्निनीथो अपां॥ अयं वां
यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानां॥ ॥हे अश्विनौ प्रेष्ठौ प्रियतमौ वां युवां कदु कदा भविष्यति उ पादपूरणः इष्यमाणाना
मीनानां कर्मणि च ध्याअं नानि धनानि च उन्निनीथः॥ ऊर्ध्वं प्रापयथ अध्वर्यंता वा अध्वरं पारयितुमिच्छंतौ युवां अपां स्वकानां रयि
दकानि वा उन्निनीथ॥ उत्सं वा उन्निनीथः। उत्सं अधः प्रापयथ इति यत्तत्कदा करिष्यत इव मुच्यत इति उच्यते॥ अयं यज्ञोऽस्माभिः अनु
ष्ठीयमानो वां युवयोः प्रशस्तिं कृतिमकृत करोति यज्ञोंऽसनीयानि स्तोत्राणि युवामेव प्रशंसतीत्यर्थः॥ यस्मादेवं तस्मात् हे वसुधिती व
सुधानस्य धातारौ च वरुत्यकर्माणौ तथा हे जनानामवितारौ रक्षकौ युवां कदाचनानां धनानां च दातारौ भवथ इति॥ ॥अथ द्वती
या॥ ॥आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः॥ मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहंतु॥ अश्विनो शो
भनाश्वयुक्तौ वां अश्वासः युष्मदीया इहास्मिन् यज्ञ आवहंतु प्रापयंतु॥ अथ विशेष्यविशेषणानि वा इह शुचयः शुभ्राः

भा॰अ॰२ प्रावापयस्यारस्युदकस्यपातारः॥ वातरंहसः वायुवेगाद्दिव्याः दिविभवाः अश्वाः अतनशीलाः मनोजुवः मनोजवाः वृषणो वर्षका अ॰४
युवानइत्यर्थः॥ स्वराजः स्वयमेवराजमानाः ईदृशाभवंति॥ ॥अथतृतीया॥ ॥आवांरथोवनिर्नप्रवत्वान्त्सृप्रवंधुरः सुवितायग
८२ म्याः॥ वृषणःस्थातारामनसोजवीयानहंपूर्वोयजतोधिष्ण्याः॥ ॥वृषणः स्थातारस्वस्वरथाधिष्ठानौवांयुवयोर्योरथोस्तिसत्सुविताय
शोभनफलायगम्यान॥ अस्मद्यज्ञमागच्छतु॥ पुरुषव्यत्ययः कीदृशोरथइतिसविशेष्यते॥ अवनिर्नप्रवत्वान्भूमिरिवात्यंतविस्ता
रवान्सृप्रवंधुरः विस्तीर्णपुरोभागः वृषभवर्षकस्याश्वस्यमनसोपिजवीयानमनोवेगवानित्यर्थः॥ अहंपूर्वः अहंकारपूर्वः मनस्वी
वान्युदारः॥ यजतोयष्टव्याः॥ ईदृशोरथआगच्छतु॥ ॥अथचतुर्थी॥ ॥इहेहजातासमवावशीतामरेपसातन्वानामभिःस्वैः॥
जिष्णुर्वामन्यः सुमखस्यसूरिर्दिवोअन्यः सुभगः पुत्रऊहे॥ ॥हे अश्विनौ युवांसमवावशीतां हरसस्यस्त्वापुनः पुनस्तुयथेका
मयेथांवायजं॥ पुरुषव्यत्ययः॥ कीदृशौयुवां इहेहजाता उभाभ्यामिहजातौ द्यावापृथिव्योर्मध्यमोत्तमस्थानेउच्यते॥ तयोः सभृतोचंद्रमसा
मयेथांवायजं अथर्वणायाश्विनावधि
विरेपकइतिनिरुक्तं॥ अरेपसाअपापौ अथर्वणस्यगुरोःशिरःछेदनादिनापापलेपरहितावितिभावः॥ अथर्वणायांश्विनादधि
चेश्वांशिरप्रत्येरयतमित्यादिमंत्रवर्णातकेनहेतुनेतिउच्यते॥ तन्वाशरीरेणशरीरसौंदर्येणनिमित्तेनस्वैर्नामभिः स्वीयैर्माहा
त्म्यविशिष्टैःअश्विनौनासत्यौविस्याद्दिभिरपिरमणीयशरीरत्वान्महिनापेतनाममवत्वाच्च हेतोः संरूपयेथइत्यर्थः॥ यद्वा अपरेप
मानजेतिशेयो॥ उक्तप्रकारेणगुरुशिरछेदादपापायेनशीर्षेणतादृशहंतव्यापनेनेतियानते॥ किंच वांयुवयोःअन्यः एकोमध्यम
स्थांतरिक्षस्यपुत्रःस्थानीयःसामजिष्णुर्जयशीलःसुमुखस्यशोभनयज्ञस्यसूरिःप्रमितासूर्येकुहेवहतिविश्वंजगधारयंतिचंद्रा
मनस्तस्योदयसतिद्याषधिवनस्पतिरिमित्यादृशोवर्धते॥ अपरमितासनउत्तमास्थानादिवोद्युलोकस्यपुत्रः पुत्रस्थानीयआ
दित्यःसुभगःशोभनरश्मिरूपधनऊहेवहति॥ हक्तंएवंप्रथकजगन्निर्वाहकौमहानुभावौयुवांसहस्तयेथ॥ अत्रनिरुक्तं॥ उ
इहजातौसंस्तूयेथेपापेनालिप्यमानयोतन्वनामभिश्वस्वैर्जिष्णुर्वामन्यःसुमहतोबलस्येरयितामध्यमादिवोअन्यःसुभगः
पुत्रऊह्यतआदित्यइति॥ ॥अथपंचमी॥ ॥प्रवांनिरश्वेःककुहोवशांअनुपिशंगरूपःसदनानिगम्याः॥ हरीअन्यस्यपीपयंत
वाजैर्मथ्नारजांस्यश्विनाविघोषैः॥ ॥हेअश्विनाअश्विनौवांयुवयोर्मध्येअन्यस्यैकस्यककुहःश्रेष्ठः पिशंगरूपःपीतवर्णोवावहु
भिरहापवयवैर्निरूप्यमाणोवा॥ रथोवशानअनुकामानुलक्ष्ययथाकामंअस्मद्यज्ञागमनेछयेत्यर्थः॥ यद्वावशान्स्वधी
नाःककुहःदिशःदिगंतरालानुक्रमेणनिर्वहेश्वरःस्थरत्नस्थानादेवयजनमुखंगच्छेनसदनातिअस्मद्यागगृहाणिप्रगम्याः॥
प्रकर्षेणगच्छतु॥ पुरुषव्यत्ययः॥ अन्यस्यपृष्यन्स्यति॥ नोक्तंतथाप्युत्तरवाक्यतथोक्तवांरत्राविलभ्यते॥ अन्यंस्ययुवयोर
न्यतमस्यहरीअश्वारजांसिलोकानअन्नलोकतान्योजनवाचकः॥ तेयजमानरूपाजनाइत्यर्थः॥ तेचप्रमथनेनालोडनेननिष्पा ८२
दितैर्वाजैरन्नैराभिश्वाद्दिरूपैर्घोषैःस्तुतिभिश्च॥ आध्मानादिशब्दविशिष्टैर्वापीपयंतआप्याययंति॥ ॥इतिद्वितीयस्यचतुर्थे
पंचविंशोवर्गः॥ ॥अथषष्ठी॥ ॥प्रवांशरद्वान्वृषभोनविष्टपाइवविरिफश्चरतिमध्वइष्णन॥ एवैरन्यस्यपीपयंतवाजै

155/1914

र्वेषंतीरूर्ध्वानद्यान आगुः॥ ॥हेअश्विनौयुवयोरन्यतमामध्यमस्थानःशरद्वान्शरणवानमेघरूपपर्णादीनांविशरणवान्अथवाबहुसं
वत्सरःपूर्वंनतानित्यइत्यर्थः॥ वृषभोनवर्षिताइंद्रः सरथशत्रूणांनिःसारयितामनपूर्वइंद्रःपुरातनावीरूपः॥ अंतानिसत्यादीनु
द्दिश्यचरति॥ प्रकर्षेणगच्छतिमध्यमस्थानश्चंद्रइतिपक्षेशरद्वानशरत्कालवानतस्मिन्कुलोहिचंद्रः संनद्धोभयति॥ तेनचतृणगुल्मौषध्या
दीनिवर्धंते॥ सकिमर्थमेवंकरोतीतिउच्यते॥ मध्वइष्णन्मधुनामधुमदृशस्यहविषःकर्मणिषष्ठी॥ हविरिच्छनतदर्थमेवंकरोतितथान्य
स्यान्तमादित्यस्यएवैःकामेगमनैर्वानिमित्तभूतैःपीपयंतआप्याययंति॥ हविर्भिर्यजमानाःतुष्टेनतेनप्रेरिताःवेघंतीःव्यापयंती
रूर्ध्वाउन्नताउन्नीराभवोननदनशीलायथानोस्मदर्थेआगुआगच्छंति॥ ॥अथसप्तमी॥ ॥असर्जिवांस्थविरावेधसागीर्बाढेअश्वि
नात्रेधाक्षरंती॥ उपस्तुतावबतंनाधमानंयामन्नयामंछृणुतंहवंमे॥ ॥हेवेधसौविधातारौअश्विनौवांयुवयोःबाढे
दृढेस्थवितिनिमित्तंभूतेसतिगीःस्तुतिरूपावाक्असर्जिसृज्यतेकीदृशीसास्थविरास्थिरानित्यावेदमयीत्रेधामंत्रादिभेदेनत्रि
प्रकाराक्षरंतिःयुवांगच्छंती॥ ईदृशीस्तुतिःकृतेत्यर्थः॥ तथाउपस्तुतौनाधमानंअभिनवफलंयाचमानमवतंरक्षतंतर्पयतंवा॥
किंचयामनगमनेअगमनेचहवमानकानंशृणुतं॥ ॥अथाष्टमी॥ उतस्यावांरुशतोवप्ससोगीस्त्रिबर्हिषिसदसिपिन्वतेनृन॥
वृषावांमेघोवृषणापीपयगोर्नसेकेमनुषोदशस्यन॥ ॥हेअश्विनौवांयुवयोरुशतादीप्तस्यवप्ससोरूपस्येवपुषोवाव्याप्तः
त्रिस्रोगीःस्तुतिःत्रिबर्हिषित्रिधान्वास्तीर्णबर्हिषोसदसियागंसदनेनृनकमनेनूनअस्मान्पिन्वतेआप्याययतिआथाययत्
वाचितत्रशानादिनाकप्रकारेणाउच्यते॥ हेवृषणावर्षितारौकामानांवांयुवयोःसभूतोमेघःसेक्तासरःप्रशानविशेषोवा॥ वृषा
वर्षकःसन्मनुषामनुष्यान्प्रतिदृश्यतप्रयछयापाय्यआप्याययतिआप्यायनदृष्टांतः॥ गोर्नसेकेउदकसेकेइवशांतनासेक
उदकेउदकस्येवतथाआप्याययतितद्वदित्यर्थः॥ यद्वामेतिसंप्रत्यर्थेगोरुदकस्यसेकेनिमित्तभूतेसतिपीपाययतिसंबंधः॥ ॥
अथनवमी॥ ॥युवांपूषेवाश्विनापुरंधिरग्निमुषांनजरतेहविष्मान॥ हुवेयद्वांवरिवस्यागृणानोविद्याम॥ हेअश्विनौयुवांपुरं
धिर्बहुप्रज्ञः पूषेवपोषकइवहविष्मान्हविर्युक्तोजरतेस्तौति॥ यद्वापुरंधिःबहूनांधारयित्रीपूषेवपृथिवीवाद्वितीयार्थेप्रथमा॥
युवांदृष्टोवातांयथास्तोमितइव॥ किमिवअग्निमुषसंचयथातथायुवामपिप्रातरनुवाकाश्विनशस्त्रयोराश्विनक्रतुवदाग्नेयोप
स्ययोरपिसद्भावादितिभावः॥ यतयद्वावरिवस्यापरिचर्ययायुक्तोगृणानःस्तोतास्तौति॥ तदायजमानापिजरतइत्यर्थः॥ विद्या
मेत्यादिगतं॥ ॥इतिद्वितीयस्यचतुर्थेषड्विंशोवर्गः॥ ॥अभूदिदमस्यचैतत्तायंसूक्तंसूक्तमाश्विनंजागतंअबाविडुमितिषष्ठी
तद्वानरानासत्याविस्प्रष्टमी॥ वाभाविपुभोअभूदिदमशेववृत्यात्रिष्टुभाविस्यनुक्रमणिकाप्रातरनुवाकाश्विनशस्त्रयोर्जागतछंद
स्यस्याविनियोगः॥ तथाचसूत्रितं॥ अभूदिदंयावांपरिज्मतिस्रीणि॥ ॥तत्रप्रथमा॥ ॥अभूदिदंवयुनमोषुभूषतारथो
वृषण्वान्मदतामनीषिणः॥ धियंजिन्वाधिष्ण्याविश्पलावसूदिवोनपातासुकृतेशुचिव्रता॥ हेमनीषिणामनस्विनामेधाविनक्
त्विजः॥ अस्माकमिदंवयुनंप्रज्ञानमभूतउत्पन्नं॥ कीदृशंतदिहउच्यते॥ वृषण्वानअभिमतवृषण्वान्रथःअश्विनोःसंबंधी

भा०अ०२ गमनसाधनो रथः आगत इति शेषः॥ तन्नावश्विनौ ओ षु भूषत ओ इति निपातद्वयसमुदायात्मकेनोकारेण चालितः॥ कृत्सु आभूषत अभि अ०४
मुखा भवत स्तोतृतां द्रष्टा मत्यनुभावाश्विनौ मदन अंतर आविशत इत्यर्थः॥ मा इयत संभावयत अश्विनौ विभाव्यते कुरुतेन कृतुकृत वतेम ह्यं
८३ धियं प्रिन्वा कर्मणा बुद्ध्यै वा प्रीणयितारौ धिषणा इति॥ त्या विश्पल्या वसु विशां प्रजानां अस्माकं पालयत धत्तो विश्पलाख्यायाः स्त्रिन ञ्ज
घायाः हिरण्मयं जंघा प्रदानेन तथाभूतौ॥ मघोनी घामा वसीविश्वल्या इत्याहितिगमः॥ दिव आदित्यस्य न पातान त्यारौ न पालयितारौ वा
…विप्रनादीन कर्मणो ईदृशावश्विनौ मदन॥ ॥अथ द्वितीया॥ ॥इंद्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा। पूर्णं रथं व
हेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना॥ ॥हे अश्विनौ युवां मिंद्रतमा हि ईश्वरतमौ खलु एवं प्रतिविशेषणं द्विः संबंध्यः। तथा
धिष्ण्यावुत्स्थौ मरुत्तमा मरुद्द्रुगामिनौ अमितरागिणौ अमित… दस्रा उपासयितारौ दंसिष्ठा अतिशयकर्माणौ र
थ्या रथार्हौ रथं वंतौ रथा रथिनौ नेतारः… रथीतमा… ईदृशौ युवां मध्वो मधुसदृशः
स्वादवः स्याम तस्य वापूर्णं पूरितं आचितं सर्वतः संनद्धं रथं वहेथे नयथा॥ तेनो कृगुणा विशिष्टेन रथेन हे अश्विनौ उक्तगुणविशिष्टौ
संतावुप याथ॥ यजमानमभिगच्छथः॥ ॥अथ तृतीया॥ किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते। अति क्रमि
ष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे॥ ॥हे… किमासाथे किमिति तिष्ठथः॥ अत्रे युक्तं कुत्रेत्याह॥ यः कश्चिज्जनो जन्मवान् अहवि
र्दानार्थं हवीरहितो महीयते पूज्यते॥ स्वयं युष्मान् पूजयति तं जनमतिक्रमिष्टं पराभूर्यतिस्म तं… पणेर्वणिजो
तस्य… तस्याः प्राणं जुरतं आहिंसितं अनीनत्रातं विप्राय मेधाविने वचस्यवे वचसः स्तोत्ररूपस्य युवाभ्यामिच्छत॥ म
ह्यं ज्योतिः कृणुत युष्मत्प्रसन्नता विषयज्ञानं कुरुतं॥ ॥अथ चतुर्थी॥ ॥जंभयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना। वाचं
वाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम॥ ॥हे अश्विनौ रायतः निंदितं… अस्मान् हंतुं आगच्छतो वा श्वनः श्वसदृशान्
भितो जंभयतं नाशयतं तथा मृधः… संग्रामं कुर्वतो वा हतं मारयतं॥ तानि… विदथुर्जानीथः॥ किंच जरितुर्युष्मा
न स्तोतुर्वाचं वाचं तां तां स्तुतिलक्षणां वाचं रत्निनीं कृतं सर्वामपि स्तुतिं रमणीयफलवंतीं कुरुतं॥ हे नासत्या सत्यभूतौ युवां उभा उभौ म
म मदीयां शंसं स्तुतिं अवतं रक्षतं॥ ॥अथ पंचमी॥ ॥युवमेतं चक्रथुः सिंधुषु प्लवमात्मन्वंतं पक्षिणं तौग्र्याय कं। येन देवत्रा मनसा
निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः॥ ॥हे अश्विनौ युवं युवां सिंधुषु समुद्रोदकेषु एवं प्लवं प्रसिद्धं प्लुतिसाधनं प्लवं नावं आत्मन्वं
तं… पक्षिणं पक्षवद्गतिसाधनं रथं… तौग्र्याय तुग्रनाम्नो राजः पुत्राय भुज्युनाम्ने… कं सुखकरं चक्रथुः। तौग्र्यो भुज्यू राजा
समुद्रवर्तीसेनः… प्रमथितुं प्रस्थितः… अश्विनौ… रक्षत्य
यमिति… पूर्वं प्रपंचितः॥ यद्वा कमिति पूरणः॥ … सहायभूतान् रथादीन्… कुरुतमित्यर्थः॥ अ ८३
यमर्थः स्तुतम्… इत्यादिमंत्रांतरेषु प्रसिद्धः। येन युष्मद्दत्तेन… देवत्रा देवेषु मध्ये मनसा अनुग्रहयुक्त्या
बुद्ध्या… निरूहथुः॥ निर्गमनं कुरुथः। तथा सुपप्तनी शोभनपतनं यथा भवति तथा पतनौ वा युवां महो मह

तः क्षोदसः उदकानां मध्ये… पेतथुः॥ गतवंतौ… पेतथुः इत्यर्थः॥ ॥इति द्वितीयस्य चतुर्थे सप्तविंशो वर्गः॥ ॥अथ षष्ठी॥ अवविद्धं तौग्र्य 157 J914
मप्स्वंतरनारंभणे तमसि प्रविद्धं। चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयंति॥ ॥अप्स्वंतर्मध्ये अवविद्धं अवस्तात् शत्रुभिः
पातितं अनालंबने आलंबनरहिते तमसि तमोवत्यमः… प्रतिबंधक जलमध्ये प्रविद्धं प्रकर्षेण पीडितं तौग्र्यं भुज्युं जठलस्य
जठरवदुदकधारकस्य मध्ये जुष्टाः सेविताः… नावः अंतर्जलं प्रविष्टाः अश्विभ्यामिषिताः… पारं
प्रापयंति॥ ॥अथ सप्तमी॥ ॥कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत्। पर्णा मृगस्य पतरोरिवार
भ उदश्विना ऊहथुः श्रोमताय कं॥ ॥कः स्वित् कश्चिद्… वृक्षः वृक्षविकारो रथः विकारे प्रकृतिशब्दः॥ यद्वा… अभिप्रायमेतत
… वृक्ष इत्यर्थः॥ कीदृशो रथः निष्ठितः निश्चलं वर्तमानः कुत्र तिष्ठति अर्णसः उदकस्य मध्ये यं वृक्षं तौग्र्यः तुग्रपुत्रो भुज्यु
र्नाधितो याचमानः पर्यषस्वजत परिष्वक्तमकरोत्॥ आलंबने दृष्टांतः॥ पतरोः पतनशीलस्य मृगस्य मार्जयितुः शोधयितुर्हिंसादेरार
से आलंबनाय पर्णानि वनानि यथा आलंबनाय प्रभवंति। तद्वत् हे अश्विनौ श्रोमताय कीर्तिमत्ताय उदूहथुः ऊर्ध्वं प्रापयथः॥ …
… वर्तनमकृथुरित्यर्थः॥ ॥अथाष्टमी॥ ॥तद्वां नरा…॥ हे नरा नेतारौ कर्मणां नेतारौ वा हे नासत्या असत्यरहितौ
सत्यफलौ वा वां युवां तादृशं स्तोत्रं अनुष्यात् अनुकूलं भवतु॥ अनुभवतु वा॥ …॥ यां प्रतिमानसः…
होत्रादयो यत् उचथं स्तोत्रं… अकुर्वन्। तद्वा मनुष्यान्… अश्विनौ अद्य अस्मिन्… अस्मादस्माभिः क्रियमाणात् सदसः
संबंधिनः सोम्यान् सोमयागसंपादकात्… अस्माभिर्यजमानैर्यथा क्रियमाणादपि… प्राणयत मिति… गतं॥ ॥
इति द्वितीयस्य चतुर्थे अष्टाविंशो वर्गः॥ ॥तं युंजाथामिति षडृचं चतुर्थं सूक्तं… आश्विनं॥ तं युंजाथां मनसो जवीयान् त्रि
वंधुरो वृषणा यस्त्रिचक्रः॥ येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः॥ ॥हे वृषणौ वर्षकौ कामानां युवां तं वक्ष्यमाणगु
णविशिष्टं रथं युंजाथां योजयतं… इत्याह॥ यो रथः त्रिवंधुरः त्रिः प्रकारसारथिस्थान बंधुरं रथिनः स्थानमित्याहुः॥ आया
घर्वाउपबंधुरेष्ठा इत्यादि मंत्रांतरं॥ यश्च त्रिचक्रः चक्रत्रितयोपेतः पुनः… येन रथेनोपयाथः उपागच्छथः॥ किं कृतः
शोभन कर्म… यजमानस्य दुरोणं गृहं… यागगृहं॥ … त्रिधातुना त्रिः प्रकारस्तानोपेतेन सुवर्ण
रजतताम्रधातुत्रयोपेतेन वा रथेनागमने दृष्टांतः॥ विर्न पर्णैः पक्षी पक्षैर्यथा शीघ्रप्रयत्नेन गच्छति। तद्वदुक्तलक्षणेन रथेनायतथः
…॥ ॥अथ द्वितीया॥ ॥सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमंतानु पृक्षे। वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचे
थे॥ ॥हे अश्विनौ युवयोः रथः सुवृत् शोभनवर्तनः शोभनचक्रपरिभ्रमणः यत् गच्छन् क्षामभिवर्तते। देवयजनभूमिं प्रति
गच्छति। यत् यं रथं क्रतुमंता… अनुअधीत्यर्थः॥ अधितिष्ठथः आश्रय
थः॥ तादृशो रथो देवयजनं प्रत्यागत इत्यर्थः॥ अनंतरं वपुष्या… वर्धनी इयं गीः इदानीं क्रियमाणप्रकारा स्तुतिरूपा
वाक् वपुः सचतां… दिवो दुहित्रा… उषसा देवतया सचेथे… गच्छथ। उषःकाले अश्विनयोः समानका

७०४

लत्वादिति भावः॥ ॥अथ तृतीया॥ ॥आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान्। येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च॥ ॥हे अश्विनौ वां युवां सुवृतं शोभनवर्तनं रथं आतिष्ठतं आरोहतं यो रथो हविष्मान् षष्ठ्यर्थे प्रथमा। हविष्मतो यजमानस्य व्रतानि कर्माण्यनुवर्तते। यद्वा यजमानाय दत्तहविष्मान् हविर्दाता येन च रथेन हे नरा नेतारौ वा हे नासत्यौ असत्यरहितौ युवामिषयध्यै यज्ञं प्राप्तुमिति शेषः तेन
भा०अ०२ रथेन वर्तिर्गृहं याथः गच्छथः। यजमानस्य यज्ञगृहं तनयाय पुत्राय आत्मने आत्महिताय च याथः॥ ॥अथ चतुर्थी॥ ॥मा वां वृको
८४ मा वृकीरा दधर्षीन्मा परि वर्क्तमुत माति धक्तं। अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनां॥ ॥हे दस्रौ शत्रूणामुपक्षपयितारौ अश्विनौ वां युवयोरनुग्रहादिति शेषः॥ वृकी हिंसकारण्यश्वादिर्मा दधर्षीत्॥ मा न धार्षीत् वृकीः॥ स्त्र्यादिः हिंसिका अन्या अपि मा दधर्षीत॥ वचनव्यत्ययः। धर्षणं मा कार्षुः॥ युवामेव मा भासयतीति यो ऽयं तु यथा युवां मा परिवर्क्तं परितो वर्जयतं उत अपि वा माति धक्तं अस्मानतिक्रम्यान्यस्मै मा दत्तं किमर्थमेवमिति उच्यते॥ वां युवयोरर्थाय यो भागो भजनीयो हविः रंशो निहितः तथा इयं च गीः स्तुतिरूपा वाग्गिनिहितेति शेषः॥ हे दस्रौ अश्विनौ वां युवाभ्यां इमे इमानि तथाऽयं च गीः स्तुतिम धूनां सोमरसानां निधयो निधानानि स्थापितानि॥ ॥अथ पंचमी॥ ॥युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवते ऽवसे हविष्मान्। दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातं॥ ॥हे दस्रौ अश्विनौ युवां गोतमः पुरुमीढः अत्रिश्च महर्षयः प्रत्येकं हविष्मान् सन् अवसे रक्षणाय वा हवते आह्वयति एवमहमपि आह्वयामि फलसाधनाह्वाने दृष्टांतः॥ यन्ता उपगन्ता उपगन्तुकामः ऋजूयेव ऋजुगामिनं मार्गं तं दिष्टां दिशं न गंतव्यां अभिमतां दिशं प्रति यथा तथा वां मम प्रियथा ध्वगामी स्वगंतव्यस्य दिग्घप्रगमनाय मार्गं ऋजुगामिनं मारूयति तद्वत्॥ यद्वा ऋजूयेव ऋजुगामिनी गंता ऋजुना एव मार्गेण ऋजिश्वामिव लघ्वायुष्मती णातिन मार्गेण स्वामिमतं फलं प्राप्नोति॥ हे नासत्यौ अश्विनौ मे मम हवमाह्वानं आलक्ष्य उपयातं उपगच्छतं॥ ॥अथ षष्ठी॥ ॥अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि। एह यातं पथिभिर्देवयानैरिष्मश्वन्तं ऊर्ज्ञमश्विना ॥ अश्विनौ युवयोः प्रसादादस्य तमसः तमन्त्रतोः श्रेयः प्रतिबंधकस्य दुःखस्य पारं पर्यंतं भूमिं अतारिष्म उत्तीर्णाः स्म हे अश्विनौ वां प्रति स्तोमः स्तोत्रं अधायि अकारीत्यर्थः। युवां देवयानैर्देवगंतव्यैर्मार्गैरिह अस्मद्यज्ञे आयातं आगच्छतं॥ ॥इति चतुर्थ्या व्याख्या
नः॥ ॥इति द्वितीयस्य चतुर्थे ऊनत्रिंश वर्गः॥ ॥७॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके चतुर्थो ऽध्यायः॥ ॥७॥ यस्य निश्वसितं वेदा यो वेदेभ्यो ऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ७ ७ ७ ७ ७ ७ ७॥

॥ द्वितीयाष्टकमध्ये चतुर्थो ऽध्याय आद ७ ॥७॥ ७ ७ ७॥ श्रीविष्णोनारायणार्पणमस्तु॥ ७ ॥७॥ ॥७॥ ॥ द्वितीयाष्टकमध्य पंचमो ऽध्याय आरभ्यते॥ व्याख्यातः सायणाचार्येण पंचमो ऽध्याय करिष्यते॥ ॥तत्र नाथामिनीदं प्रथममंडलस्य चतुर्विंशोनुवाके पंचपंचर्चं पंचमं सूक्तं पूर्वस्मात् गतं॥ ऋष्याद्याः सायणाचार्येण पूर्व समाध्याय करिष्यते॥ ॥ यद्यपि ऋष्यादयः पूर्वस्मादनुवर्तंते तथापि सूक्तविनियोगमात्रं प्रदर्श्यते। ॥ आश्विनं वा इति ल अश्विनत्वात् तु ॥ पर ऋषिः॥ पंक्तिकत्वात् सूक्तसंवर्ततु व्यावर्तते इति परिभाषितत्वात्॥ पकुर्वं कृषिश्चान्यस्मादिति परिभाषया गत्सः तथाश्विनं वा इलूकत्वात्तु सा ॥ ८४
इति परिभाषयेदमथाश्विनं अनादेशपरिभाषया त्रिष्टुभं॥ ताभामित्यनुक्रांतं॥ युवो रजांसीत्यादिनां पंचसूक्तानां तृतीयचतुर्थितानां प्रातरनुवाकाश्विनशस्त्र योर्विनियोगउक्त तत्रैदं पंचमं॥ ॥तत्र प्रथमा॥ ॥ता वामद्य तावपरं हुवेमोच्छंत्यामुषसि वह्निरुक्थैः॥ नासत्याकु

चिदंतावर्तिरिद्यावनपातांसमृग्मलरायः ॥ ॥तौ नौ रथवत्ने न प्रतिदृशौ युवां अद्यास्मिन् यागदिने हुवेम आह्वयाम उत्यासुशीः तया अपरं अपरस्मिन्नपि दिने तौ युवां हुवेम अपरमित्येतद् परस्मिन्नित्यर्थः॥ सम भिव्याहारातु अ पाचना मल यता परं चत्पादिमं वांतरं त यादर्शनाञ्ज
अपरयागं पर्यातिव॥ [illegible]
८३ [illegible]
स्कृतेर्वोदा अर्थदुरक्षितास्तुते: ईश्वरोवाइ इशाइ हानासृञ्मलराय अत्यर्थं शप्मन हविर्दीयजमानायत इर्थे तौ युवां उक्थैः शास्त्रैः
हुवेमेति संबंधः अत्रस्यातं पद्मकवचनतया नेतव्यं वह्निर्वर्यं वाय हुवचनं नेतव्यो अथवा वाक्यद्वयं यस्मात वह्निरयों
ज्ञातादकगुणको युवां संततिमाह यंयजमानस्तोयुवामाह्वयामादृति॥ ॥अथ द्वितीया॥ ॥अस्मे ऊ षु वृषणा मादयेथामुत्पणीर्हतमूर्म्या मदंता। श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः॥ ॥हे वृषणा कामानां वर्षकावश्विनौ युवां अस्मे उ अस्मासु एव सु मादयेथां सुष्ठु तृप्यतं अस्मभ्यं तर्पयतं मभिमतं तथा पणीन् वणिजो लुब्धकान् यष्टून् हतं उर्म्या अहतं नाशयतं कीदृशौ युवां ऊर्म्या रात्रिनामैतद् रात्रौ मदंता मादयंतौ यद्वा उर्मिरिति सोमनाम ऊर्मिर्यस्त पवित्रे आ इत्यादिषु तथा प्रयोगात् अस्मदीयेन सोमेन मदंतौ तादृशौ युवां मम मा अच्छोक्तिभिरभिमुख्य कराणि र्मल वरवाक्य रचिताः मतीनां कर्मणि षष्ठी मननसाधनाः स्तुतिः कर्णैः राकर्णनसमर्थैः श्रोत्रैः श्रुतं हे नरा नेतारौ युवां खलु एष्टा अन्वेष्टारौ बसमत्कृतीनां तथा निचेतारा लब्धानां तासां संचयकर्तारौ निश्चित्य वसमित्यत स्य स्थान यस्माद्दंतं विधातमस्मात्युत मिति॥ ॥अथ तृतीया॥ ॥श्रियेपूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः।
वच्यंते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः॥ ॥सविता सूर्यः दुहितरं सूर्याख्यां प्रदातुमनाः देवानाहूय सामर्थ्यसमीक्षणाय आजिपरिध्ययइमं जयतिमएषां कन्यकाम् कृस इस्वकृम स्तानं वलभन इत्येवं कन्यया तु तम तस्मिः दुहितरं प्रथ म जयं तु तमाश्विनाः
वपिज्ञि वाग्निप ध्य्यकृकमदसंकन्य का वलअतानतं द्र पाथ्वाज यतां तो वते रत्याद्भिः प्राथिंतो रथ यात्मस्य कंचित्कंचि ड्रागं तथ्यः परिकल्प्य मर्यास्वरये धारयता मिति अयमिति हासो ब्रलण प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् इत्यत्राभिमतो स्माभिः प्रथमाष्टके आवां पतिलं सत्या यत्य अन्नपंचितः अत्राह इपूषन् पोषक स्त्यूर्णतर्खद्र स्याप्युपलक्षणं मर्यां चंद्रमसा रेवाश्विना इसूर्या चंद्रमसा वित्यका इति यास्के नो नलातुभनः पूर्वं नियत्कृतपाय कृश्विनावित्सकं भवति इ पा यका इ नासत्या असत्य रहितौ इवा द वां युवां श्रिय श्रिय संज्ञास्त्र स्यकन्याया स्त्रलाभायेत्यर्थः॥ इषुकृतेव इव गण्ड न वार्थं आजिं धावननाय पुव ष्ठा प्रम जुगामिनौ कृतावव संतौ सूर्यायाः एतं नामिकायाः सवितुः
पुत्र्याः कर्मणि षष्ठी सूर्यां वहतुं रथे धारयितुमाज्ञिमुहज्ञ यतामित्यर्थः यस्माद्वंतं स्म इक जाता: कर्म सुसंपादिताः ककुहाः ककुद्रूपाः
सृत यो भरः अविच्छिन्न प्रवाहस्य वरुणस्य फलस्य प्रतिबंधक पापनिवारकस्य यागस्य सिध्यर्थं तत्संबंधिन्यो वां प्रति वच्यंते हो गत्रा
दिभिर्युवामवज्ञास्य गतं मंत्रे यागकाले च स्तुवंतीत्यर्थः॥ युगा जूर्णेव जीर्णानि युगानि च उपचाराः संप्रयत्यर्थः पूतना यागकालायथा
इ इ इ पतना अपीत्यर्थः। पूर्वकाल यथा युवाम वस्कवंति तद्दिदानीम पीति तात्पर्यं॥ ॥अथ चतुर्थी॥ ॥अस्मे सा वां माध्वीराति

भा०अ०२ रस्तु स्तोमं हविर्लोतं मान्यस्य कारोः ॥ अनु मद्रूं श्रवस्यामदानू सुवीर्याय चर्षणयो मदंति ॥ ॥ हे माध्वी मधुपूर्णपात्रयुक्तो अश्विनौ वां यु अ०५
वयोः संबंधिनी सा प्रसिश्रा रातिः दानं अस्मे अस्माकमस्तु भवतु तदर्थं मान्यस्य मननीयस्य कारोः स्तोतुरगस्त्यस्य स्तोमं स्तुतिं हिनोतं प्री
८५ णयतं हे सुदानू शोभनफलदानौ वां युवां श्रवस्या कीर्तिरन्नस्पृहा वा इछयायन्तु यस्मात् सुवीर्याय यजमाना यशोभनबलाय चर्षणयो
मनुष्या ऋत्विग्रूपा अनु मदंति अनुक्रमेण मादयंति युवाभ्यां सह हृष्यंति वा ॥ ॥ अथ पंचमी ॥ ॥ एष वां स्तोमो अश्विनावकारि मानेभि
र्मघवाना सुवृक्ति ॥ यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदंता ॥ ॥ एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ॥ यातं
वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदंता ॥ ॥ हे अश्विना हे मघवाना हविर्लक्षणधनवंतौ वां युवाभ्यां एषः स्तोमः स्तोत्रं सुवृक्ति सुष्ठु पापव
र्जनं यथा भवति तथा युक्त समासि अकारि कृतः कैः मानेभिः मानैः हविःप्रदानरूपाभिः सहितैः हे नासत्या असत्यरहितौ युवां
अगस्त्ये तं नाम्नि मघवामिति मदंता मादयंतौ संतौ वर्तिर्गृहं यज्ञसंबंधि यातं प्राप्नुतं किमर्थं तनयाय पुत्राद्यर्थं त्मने आत्मने च हि
ताय ॥ अतादिमंत्रा विपडीव्याख्याता ॥ ॥ इति द्वितीयस्य पंचमे प्रथमो वर्गः ॥ ॥ ७ ॥ कतरा पूर्वेत्येकादशर्चं षष्ठं सूक्तमागस्त्यं त्रैष्टुभं
द्यावापृथिवीदेवताकं तथा चानुक्रांतं अश्विप्लवि कृप नेदं निबिभद्रं द्वास्नद्यावापृथिवीयानि विधानीयामिदं तृतीयस्येतिखंडे सूत्रि
तं कतरा पूर्वा यस्मान्नातिवैश्वदेवमिति ॥ महाव्रते पि वैश्वदेव शास्त्र इदमेव द्यावापृथिव्यं निविधानं ॥ तमासादभिप्लविकात तृतीय सवनस्य
त्यतिदेशात ॥ ॥ तत्र प्रथमा ॥ ॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ॥ विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अह
नी चक्रियेव ॥ ॥ अयोरनयो द्यावापृथिव्योर्मध्ये कतरा पूर्वा पूर्वत्वेन कतरा वा अपरा परस्थ इतिनीएवं पौर्वापर्यप्रश्नः उभयोः
रविनाभावेन सदैव वर्तमानत्वात् इति भावः ॥ तथा कथा केन हेतुना जाते किमनयो रुत्पादनमित्यर्थः ॥ हे कवयः क्रांतदर्शिनः अतींद्रि
यस्य यूयं वदत कोविवेद पौर्वापर्यं कारणं च विशेषेण विविच्य जाना नाति न कोपि जानातीत्यर्थः ॥ अज्ञाने कारणमाह यद्ध यस्मात्
स्वलु एतौ नाम प्रसिद्धं विश्वं कृत्स्नमपि जगत् विशेषेण त्मना आत्मनैव अन्यनिरपेक्ष्येणैव बिभृतः धारयतः यद्ध्यस्य नामयत्किंचित्
पदार्थजातमस्ति विश्वं तत्सर्वं आत्मना बिभृतः अनेन यत्कारणं श्रमः तदुभ्याभ्यामेव क्रियत इति कारणाभावः प्रतिपादितः उत्त
रेण पौर्वापर्यभाव उच्यते अहनी एते द्यावापृथिव्यौ चक्रियेव चक्रयुक्ते इव वि वर्तेते पतयायेण वर्तेते अत्र कतरा पूर्वा कतरा परेत्यनयो
रित्यादिनिरुक्तं दृष्टव्यं ॥ ॥ अथ द्वितीया ॥ ॥ भूरिं द्वे अचरंती चरंतं पद्वंतं गर्भमपदी दधाते ॥ नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथि
वी नो अभ्वात् ॥ ॥ अचरंती अविचले द्वे एते द्यावापृथिव्यौ भूरिं बहुतरं चरंतं पद्वंतं पादयुक्तं ॥ गर्भं गर्भवद्वश्रितं कृत्स्नं प्राणिजातं
अपदी अविद्यमानपादे दधाते धारयतः अनयोः मध्ये खलु सर्वं जगत् क्षेमेण वर्तते धरणे दृष्टांतः पित्रोर्मातापित्रोरुपस्थे उत्संगव
र्तमानं नित्यं ध्रुवं आत्मजं सूनुं न पुत्रमिव यथाल्लिरोनधवर्धयंतौ धारयंतौ मातापितरौ न तु अथ प्रत्यक्षेण हे द्यावापृथिवी ८५
द्यावापृथिव्यौ इतरेतरापेक्षया द्विवमुभयोः नस्मान् अभ्वात् महतो भयहेतोः पापात् रक्षतं पालयतं यद्वा अभ्वो हि अभ्वमहत्तु अ
त्यर्थमित्यर्थः ॥ अश्वेतिमहन्नाम इदं द्रुत द्यावादेशस्य द्यावापृथिवीन्नाव्यस्य मध्ये रक्षतं प्रतिपदा प्रयोगश्छांदसः आमंत्र

तस्यापि विषमानत्वेन निघाताभावः ॥ ॥ अथ तृतीया ॥ ॥ अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ॥ तद्रोदसी जनयतं जरित्रे द्या 159/1914
वा रक्षतं पृथिवी नो अभ्वात् ॥ अदितेः एतद्दंतरिक्षस्याप्युपलक्षणं अखंडनीयायाः पृथिव्या स्ताइशस्यांतरिक्षस्य च संबंधि दात्रं धनं
आह्वयामि स्पृहयामीत्यर्थः ॥ कीदृशं तद्धनं अनेहः अपापं दुःस्वरहितं सत्यात्मकं अनर्वं अनरणं अक्षीणमित्यर्थः स्वर्वत् फलभूते
न स्वर्गेण तदुभयं वधं आहिंसितं नमस्वत् अन्नवत् ईदृशं धनं हुवेन हु अस्माभिः कांक्षितं उक्तलक्षणं धनं हे रोदसी द्यावापृथिव्यौ
जरित्रे स्तोत्रे यजमानाय जनयतं उत्पादयतं द्यावेत्यादि व्याख्यातं ॥ ॥ अथ चतुर्थी ॥ ॥ अतप्यमाने अवसावंती अनु ष्याम रोद
सी देवपुत्रे ॥ उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ॥ अवसा स्वत्वताधिकेन चिह्नितेन अवनेन सम्ध्या
अतप्यमाने अनीश्वरेण परेश्वरकर्म इदं रूप अतप्यमाने अन्यैरपीड्यमाने अवसा अन्नेन अवंती तर्पयंत्यो देवपुत्रे देवाः स्व
दत्ता रोमनुष्याः पुत्रस्थानीया ययोः तादृश्योः ऋकुवयस्मानुष्यास्तद्दत्ता अतदुपजीव्य तान्पुत्र इत्युच्यंते ईदृशी उभे रोदसी द्या
वापृथिव्यौ देवानामह्नां एतद्राजन्युपलक्षणं द्योतमानानामह्नां रात्रीणां च संबंधिभिरुभयविधैः नीतोह्यमाहिरूपैर्वे वस्त्रे
र्धनैर्निमित्तभूतैः तर्पयन्त्यर्थः ॥ तदर्थं युवां अनुष्याम अनुभवेम द्यावेत्यादि व्याख्यातं ॥ ॥ अथ पंचमी ॥ ॥ संगच्छमाने
युवती समंते स्वसारा जामी पित्रोरुपस्थे ॥ अभिजिघ्रंती भुवनस्य नाभिं द्यावा० ॥ संगच्छमाने परस्परमुपकारित्वेन सह युज्यमा
ने वृष्ट्या हविषा च परस्परं उपकार्योपकारभावः यद्वा पूर्वं संसृष्टे पश्चाद्वियुज्य वृष्टिहविषा अनुवर्त्य पश्चान्मनुष्यैः प्रार्थि
ते देवैः विवाहितसत्यौ संगते अभूतमित्याहुः अयमर्थो द्यावापृथिवी सह आस्तामित्यादिब्राह्मणे समाम्नातः युवती नित्यतरुण्यौ
मिश्रयंत्यौ वा सर्वेषु भावेषु संगमनं समानांतिके समानपर्यंते वा स्वसारौ परस्परं स्वसृभूते जामी बंधुभूते प्रजापतेः सकाशात् सहो
त्पन्नत्वात् परस्परं जामित्वं यथा च निगमादिवं च पृथिवीं चांतरिक्षमथो स्वः यतो द्यावापृथिवी निष्टतक्षेति पित्रोः सर्वस्य पितृ
स्थानीययोः पालकयोः ताभ्यां उपस्थे उत्संगस्थितं भुवनस्य भूतजातस्य नाभिं बंधकमुदकं अभिजिघ्रंती अभिजिघ्राणं कुर्वत्यौ स्पृशं
त्यौ समानमेतदुदकमित्यादि मंत्रवर्णात् उभयोरवप्रदानं प्रसिद्धं इदृशी नो रक्षतं ॥ ॥ इति द्वितीयस्य पंचमे द्वितीयो वर्गः ॥ ॥ अथ
षष्ठी ॥ ॥ उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ॥ दधाते ये अमृतं सुप्रतीके द्यावा० ॥ उर्वी विस्तीर्णे सद्मनी सदनाः
धारभूते बृहती महत्यौ महान्भावे देवानां उपलक्षणमेतत् देवमनुष्यादीनां अवसा प्रीत्या निमित्तेन जनित्री उत्पादयित्र्यौ जनित्र्यौ
एतमादेवानामवसा तर्पणेन निमित्तेन ऋतेन यज्ञेन च निमित्तभूतेन आह्वयामि देवानां हविरर्थं सस्य घनायेत्यर्थः ये सुप्रतीके
सुशोभनरूपे अमृतमुदकं दधाते धारयतः ते युवामाह्वयामि द्यावेत्यर्थः ॥ ॥ अथ सप्तमी ॥ ॥ उर्वी पृथ्वी बहुले दूरेअंते उप ब्रुवे न
मसा यज्ञे अस्मिन् ॥ दधाते ये सुभगे सुप्रतूर्ती द्यावा० ॥ उर्वी महत्यौ पृथ्वी पृथिव्यौ अनेकप्रकारेण प्रथमाने बहुले कार्य दूरेअंते
विप्रकृष्टांतदेशे अपारे इत्यर्थः ॥ ईदृश्यौ युवामस्मिन् यज्ञे नमसा नमः साधनेन स्तोत्रेण उप ब्रुवे उपेत्य ब्रवीमि स्तौमीत्यर्थः पुनः
कीदृश्यौ ये सुभगे शोभनभाग्ये सुप्रतूर्ती सुप्रतरणे शोभनदाने दधाते विश्वं जगत् ते युवामुप ब्रुवे स्तौमि ॥ ॥ अथाष्टमी ॥ ७ ॥

भा०अ०२ देवान्वायच्चकृमाकच्चिदागः सखायंवासदमिज्जास्पतिंवा॥ इयंधीर्भूयाअवयानमेषांद्यावा०॥ हे द्यावापृथिव्यौ वयं देवान् देवान् प्रति अ०५
यत्तु कच्चित् आगोपराधं नन्न यागकाले नेषां तेषां अयागलक्षणं सदमित् सर्वदेव चकृम कृतवंतो वयं सखायं वा प्रियं मित्रं वा प्रतियच्च कृ
८६ मजास्पतिं जायायाः पत्युः तां सांपतिं जामातरं वा जायापतिं प्रति दोषारोपणकृतं हास्याज्ञानादिरूपं यत्सर्वदेव चकृम एषामुक्तरूपाणां पापाना
मपगंतृ नुमियं धीर्युष्मत्कृतिरूपमिदं कर्म भूयाः भूयात् भवतु द्यावत्यादिगतं॥ अत्र सर्वत्र प्रकारांतरेण मंत्रमंतरेण स्तंतरक्षता
मिति प्रार्थ्यते तथा रश्विन्यादिवान् मनासंभवादुच्छितमेव न स्मनत्स्त्वाजान एवछिते अनुकूलभवतमित्यंगप्रार्थ्यते॥ ॥अथनवमी॥ ॥
उभाशंसानर्यामामविष्टामुभेमामूतीअवसासचेताम्॥ भूरिचिदर्यःसुदास्तरायेषामदंतइषयेमदेवाः॥ ॥उभा उभौ शंसा द्यावापृथिव्यौ नर
भयोर्हितयावुभावविष्टां मां भर्यां नरेभ्यो हितौ इरिस्थावुभयाश्रयस्तन्तीं मामविष्टाप्रक्षतां यथ द्यावापृथिव्याभिमानिदेवयारेवांशं
नसवाइनाभिधानान्नयुलिंगलात्था उभे ऊती रक्षिके द्यावापृथिव्यौ मामवसा रक्षणेन सचेतां यद्वा प्राणिभ्यो हितकरावुभावेहेत्रामुष्मि
क विषयौ शंसौ मामविष्टां प्राप्नुतां तत्तथाभे अप्युभे ऊती यौ संबंधिन्याः अभिमानिदेवयारवासास्मतर्पणेन निमित्तेन सचेतां॥
हे देवाः द्यावापृथिव्योरंतर्भूताः सर्वेपि देवाः अर्यः स्तोतारो वयं सुदास्तराय अतिशयेन शोभनदानं तस्मा इषा अन्नेन सोमलक्ष
णेन मदंतः मादयंतः संतो भूरिचिद्भूरित्वितु पुत्रार्थां अभिपूजितधनं इषयेम इच्छेम यद्वा अर्यः इति षष्ठ्यारूपं ईश्वराद्राजादेरपि सुदास्त
रायेत्यर्थः॥ शिष्टंसमानं॥ ऋतंदिवइति द्यावापृथिव्यस्य पश्वोः पुरोडाशस्य हविरनुवाक्या अग्नीषोमाविति सूत्रितं॥ ऋतंदिवेत
दवोचंपृथिव्या इति द्व इति॥ ॥अथदशमी॥ ॥ऋतंदिवेतदवोचंपृथिव्याअभिश्रावायप्रथमंसुमेधाः॥ पातामवद्याद्दुरितादभीकेपि
तामाताचरक्षतामवोभिः॥ ॥सुमेधा शोभनप्रज्ञोहं दिवे द्युदेवतायै पृथिव्यै देवतायै तत्प्रीतिकरं ऋतं स्तोत्रं प्रथमं मुख्यं नामैतत्तत्प्र
तनं प्ररूढतमं अवोचं ब्रवीमि किमर्थं अभिश्रावाय अभितः सर्वतः श्रवणाय किंच पिता पालको द्युलोकः माता सर्वस्य निर्मात्री पृथिवी
चोभे अवद्यान्निंदितात् दुःखप्रापकाद्दुरितात् सकाशात् पातां रक्षतां तथा अभीके अंतिकं तमेतन्नु समीपस्थैः अवोभिः अभिमततर्पणैः
रक्षतां पालयतां॥ ॥अथैकादशी॥ ॥इदंद्यावापृथिवीसत्यमस्तुपितर्मातर्यदिहोपब्रुवेवाम्॥ भूतंदेवानामवमेअवोभिर्विद्या
मेषंवृजनंजीरदानुम्॥ ॥हे द्यावापृथिवी द्यावापृथिव्यौ इदं अस्माभिः क्रियमाणं स्तोत्रं सत्यमस्तु अवितथं भवतु फलवद्भवत्वित्यर्थः
इदमित्युक्तं किं तदित्याह हे पितः द्यौः हे मातः पृथिवि युवां प्रति इह अस्मिन् यज्ञे यत्स्तोत्रमुपब्रुवे उपेत्य ब्रवीमि तत्सत्यमस्तु देवानां स्तो
तॄणामस्माकं अवमे अंतिकतमे तनूनित्य संनिहितौ युवां अवोभिः तर्पणैः युक्तौ भूतं भवतं अवाङ्मुखंगतं॥ ॥इतिद्वितीयस्य पंच
मे तृतीयोवर्गः॥ ॥आनइळाभिरिति एकादशर्चं सप्तमंसूक्तं आगस्त्यं त्रैष्टुभं वैश्वदेवं आनो विश्व इत्यनुक्रांतं विनियोगो लैंगि
कः॥ ॥तत्रप्रथमा॥ ॥आनइळाभिर्विदथेसुशस्तिविश्वानरःसवितादेवएतु॥ अपियथायुवानोमत्सथानोविश्वंजगदभिपित्वेम ८६
नीषा॥ ॥अनोविदथे यज्ञे इयं यज्ञं सुशस्ति शोभनास्ति शोभनं शंसनं स्तुतिभिः प्रदातव्यैः सह यद्वा इळाभिः तत्स्थि
तेषु नाचक्ष्वभूमिस्थानाभिर्देवताभिः सह विश्वानरः सर्वप्राणिहितकार्यग्निः सविता प्रेरक आदित्यश्च देव एतु आगच्छतु हे युवानो नि

त्यतरुणाय ज्ञास्यमिश्वविता यायूयं यानोस्मान् अभिपित्वे अभिपतनीये स्तोत्रे मनीषया मनसा इच्छित्वेन तर्पयेत्यर्थः अपिः संभावना
यां भवत्यस्मानु मत्सथ यथा विश्वं जगत् तुच्छ स्थावरस्यान्युपलक्षणं यद्वा कृत्स्नं प्रपंचं मत्सथ तथास्मानपि यद्वा गच्छास्य यजमानरूपमनुष्य
वाची सर्वानपि यजमानान्यथा मत्सथ तथा मत्सथेत्यर्थः॥ वैश्वदेवपशौ आनोविश्व इत्येषा हविषः पुरोनुवाक्या आनो देवानामुपवेतु शंसः
आनोविश्वआस्क्रागमंतु देवा इति॥ ॥सैषाद्वितीया॥ ॥आनोविश्वआस्क्रागमंतुदेवामित्रोअर्यमावरुणःसजोषाः॥ भुवन्यथा
नोविश्वेवृधासःकरन्सुषाहाविथुरंनशवः॥ ॥नोस्माकं यज्ञं विश्वे सर्वे देवाः आस्क्राः शत्रूणामास्कंदयितारः आक्रमितारो वा आगमं
तु आगच्छंतु किं तेमित्रः अर्यमा वरुणश्च एतेपि सजोषाः समानप्रीतयः संत आगमच्छंतु किंतु विश्वे देवानोस्माकं वृधासो वर्धयिता
रः यथा भवन्तु भवेयुः तथा सुषाहा सुष्ठु शत्रूणामभिभवित्वेनो स्मदीयं शवो बलं विथुरं हीनं यथा न करन्न कुर्युः तथा आगच्छंतु॥ ॥
अथतृतीया॥ ॥प्रेष्ठंवोअतिथिंगृणीषेग्निंशस्तिभिस्तुर्वणिःसजोषाः॥ असद्यथानोवरुणःसुकीर्तिरिषश्चपर्षदरिगूर्तःसूरिः॥
॥ ॥हे देवाः वो युष्माकं प्रेष्ठं प्रियतमं सर्वेषामभ्यागतत्वात् हविर्वहनात् अग्निर्देवानां प्रियतमः तमतिथिं गृणीषे गृणे स्तोमि स्तुत्य
येन मध्यमः कोनसा धनेन इळाभिः शंसनैः स्तुतिभिः कीदृशो हं तुर्वणिः तूर्णवनिः शीघ्रं संभक्ता सजोषाः युष्माभिः सह नीयमा
णः तमग्निं गृणीषे यथा येन प्रकारेणनोस्माकं वरुणः एतन्नामको देवः सुकीर्तिः शोभनकीर्तिमान् असत् सुकीर्तिभिः क्षेवरणस्यभू
रित्याद्विमं न वर्णय वरुणात् कीर्तिर्दुवपर्णाय अरिगूर्तः अरिषु अदातृषु सङ्गाश्रितः अरिणां हननाय उद्युक्तो वा सूरिः प्रेरयि
ता यो वरुणः इषश्चान्नानि पर्षत् पूरयतु तथा तमपि स्तुमइत्यर्थः॥ ॥अथचतुर्थी॥ ॥उपवएषेनमसाजिगीषोषासानक्तासुदुघेव
धेनुः॥ समानेअहन्विमिमानोअर्कंविषुरूपेपयसिसस्मिन्नूधन्॥ ॥हे देवाः वो युष्माकं नमसा हविषा नमस्कारेण वा उप उपेत्य जि
गीषा पापानां जिगीषया आ ईषे इच्छामि इच्छिषु गताविष्यस्य वृषेत् रूपं गत्यर्थस्य किंचित्तमेकं चनेन इदं रूपं भजामि कस्मिन्का
ले उषासानक्ता अहनि रात्रौ च यद्वा अहोरात्रदेवते अप्यभिगच्छाभिगता दृष्टांतः सुदुघा धेनुरिव सुदोग्ध्री धेनुर्यथा दोहाय दोग्
धुर्गृहमागच्छति तद्वत् किं कुर्वन् समानेस्मिन् समाने ईधनु सिद्धत्वेनो विषुरूपे नानारूपे पयसि क्षीरघृतादिके अर्कमर्चनीयमन्न
वा स्तुतिशस्त्रादिकं वा विमानः विविधं मिमानः कस्मिन्काले समाने अहन् एकस्मिन्नेव दिने एकस्मिन्नेवाहनीत्येवदेवार्थः एकस्मिन्नेवाह
नि समाने ऊधस्युत्यं नानारूपे पयसि इत्थं हविर्मिमानः इयमहं गच्छामीत्यर्थः॥ यद्वा सस्मिन् सर्वस्मिन् ऊधसि फलाख्ये क्षीरा
त्यादिके यज्ञनिमित्तभूते सति विषुरूपे पयसि नानारूपे सोमलक्षणे अर्कमन्नं साधनं स्तोत्रं वा विमिमानो हं युष्मानभिगच्छा
मि॥ ॥अथपंचमी॥ ॥उतनोहिर्बुध्न्योमयस्कःशिशुंनपिप्युषीववेतिसिंधुः॥ येननपातमपांजुनाममनोजुवोवृषणो
यंवहंति॥ ॥उत अपि च नोस्माकं अहिः अंतरिक्षगामी अहंता वा अहिंता वा अहन्यमानो वा एतन्नामको देवः स एव बुध्न्यः बुध
कं मांतरिक्षं तत्र दृष्टाविद्वर्भवो तेरिक्ष वारिणि तन्नामको देवो मयः सुखं करोतु करोतेर्लिङि रूपं किंच पिप्युषी चरु वन्नाल्पण्या
र्थः

भा० अ०२ पुरणोवा अस्मान् सेनाप्यापयंती सिंधुर्नामनदीवेतु आगच्छतु तत्र दृष्टांतः ॥ सिंधुनयथागिरुरूपापयंती गोर्गच्छति तद्वत् अपांनपातं उदका अ०५
८० मामपानपितारं वर्षप्रेरकमेतन्नामकं च इन्द्रादिकानामंतरित्तीयं पुत्रं अज्म आपथि वनस्य तपः तथ्यागिनिरिति निरुक्ते वंसादृशं मग्निसुना
मस्त्रालिभिः संगच्छमधु इतिसोत्रं धातुर्गत्यर्थः ॥ यं देवं मनोदेवाजुवः नमयेगाः वृषणः वर्षकामेघाश्वाव्हंतिसरुत्स्वकुरोतु ॥ ॥
इतिद्वितीयस्य पंचमे चतुर्थोवर्गः ॥ ॥ अथषष्ठी ॥ ॥ उतनईं त्वष्टागंत्वच्छास्मत्सूरिभिरभिपित्वेसजोषाः ॥ आवृत्रहेंद्रश्चर्षणिप्रा
स्तुविष्टमोनरांनइहगम्याः ॥ ॥ त्वष्टा देवोनास्मान् अच्छ अभिः प्राप्तुं ईं इदानीं गंतं यज्ञं वा आगंतु आगत्य चस्मतु सहार्थे प्रारास्तेवा
वर्तनं ॥ अत्र प्रशंसायां प्रतारंतं यथा तथा अभिपित्वे अभिगंतव्ये यज्ञनिमित्ते भूते सति सूरिभिः स्तोतृभिः कृत्विग्भिः सजोषाः स
मानं प्रीतिर्भवतितिरोप ॥ तथा वृत्रहा वृत्रघाती चर्षणिप्राः चर्षणयामनुष्याः यजमानाः कामैः पूरकस्तुविष्टमो बहुतमो महत्त
मः इन्द्रास्मिकर्मणि नराणां नोस्माकं उक्तगुणोपेतः सन् आगम्याः आगच्छतु ॥ ॥ अथसप्तमी ॥ ॥ उतनईं मतयोश्वयोगाः शिशुं
नगावः स्तरुणं रिहंति ॥ तमीगिरोजनयोनपत्नीः सुरभिष्टमं नरांनसंतः ॥ ॥ उत अपिच ईं एनं तरुणं नित्ययुवानं इन्द्रं तमयो
स्मद्दुद्द याश्वयोगाः अश्वसमानं प्रामयोरिहंति अश्वास्यंति स्तुवंतीत्यर्थः ॥ तत्र दृष्टांतः ॥ गावोदोग्ध्याधेनवः शिशुं नशिशुंभि
मवत्समिवतं यथा शिहंति तद्वत् तद्वा इलमीतमेवैनं नरां नराणां यजमानानां सुरभिष्टमं अतिशयेन सुरभिं जनयः फलस्यो
त्पादयित्र्यः गिरस्तुतयः नसंतव्यानुवंति सातिव्याप्तिकर्मतत्र दृष्टांतः ॥ जनयोनदुत्पादयित्र्यः पत्नीः पत्न्यः पतिमिव ॥ ॥ अथाष्ट
मी ॥ ॥ उतनईं मरुतो वृद्धसेनाः स्मद्रोदसीसमनसः सदंतु ॥ पृषदश्वासोवनयोनरथारिशादसोमित्रयुजोनदेवाः ॥ ॥ उत अ
पिचनईं अस्मदीयमेनं यागं वामरुतः स्मतुसहापि सदंतु गच्छतु कुतो देशात् उरोदसीरोदस्योः द्यावापृथिव्योः सकाशात् तुयद्वा रोदस्या
वपिगच्छतं कीदृशं तं स्तोमरतः ॥ वृद्धसेनाः प्रवृद्धबलाः समनसः समानमनस्काः पृषदश्वासः पृषद्वर्णाभ्याः पृषत्यो मरुतां
मितियास्कः जनवयोनयथैव नमस्वभावाः रथाः रंहणस्वभावाः रथवंतोवा मत्वर्थो लुप्यते यद्वा अवानयो रक्षकाः रथाइवस्थि
ताः रिशादसः रिशाः शत्रवः तेषामत्तारः मित्रयुजोदेवानमैत्री युक्ताश्च वहर्तारः ऋत्विज इव यद्वा मैत्रीयुक्ताः अन्ये देवा यथा गच्छं
ति तद्वत् ॥ ॥ अथनवमी ॥ ॥ प्रनुयदेषांमहिनाचिकित्रेप्रयुंजतेप्रयुजस्तेसुवृक्ति ॥ अधयदेषांसुदिनेनशरुर्विश्वमेरिणंप्रुषायंत सेनाः ॥ प्रज्ञायते यदेषां महत्त्वेन युक्ता
नराः चिकित्रे ज्ञानंत्यनु क्षिप्रं यं नु इति पूरणः तत् तेषांतारः स्त्रुचिक्रपोल्कूकस्पतीनां प्रयुजः प्रयोगानुः प्रयुंजते अध अथ प्र
यागानंतरं यतु यस्मात् एषां सेनाः रक्षत्यारकाः विश्वसर्वं भुवनं इरिणं उषरप्रदेशं यथा तथा सर्वतः प्रुषायं उत्पादयंतु ॥ तत्र दृष्टां
तः ॥ सुदिने मेघावरणादिरहिते दिने शरुः अकारहिंसकः प्रकाशः इव सयथा सर्वनाम वृणोति तथा मरुत्सेना अवरस्यासर्वभूष
रं करोति ॥ यद्वा मरुतामहिमा पृथिव्यां भवति तदा सस्यादिसमृद्धौ सत्यां प्रयोगं कुर्वंति यदायज्ञंतितदा मरुत्सेनाः सर्वां महीमदंतीत्ये
वं महीमुदंतीत्येवं महानुभावामरुत इति तेषां स्तुतिः ॥ ॥ अथदशमी ॥ ॥ प्रोअश्विनाववसेकृणुध्वंप्रपूषणंस्वतवसोहिसंति ८७
॥ अद्वेषोविष्णुर्वात ऋभुक्षा अच्छासुम्नाय ववृतीयदेवान् ॥ ॥ हे ऋत्विजः अश्विनौ एतन्नामकौ देवावुद्दिश्यावसे अस्मद्रक्ष

णायप्रोकृणुध्वं स्तुतिं प्रकर्षेण कृणुध्वं पूषणं पोषकं एतन्नामकं देवमप्यवसे प्रकर्षेण स्तुतिं कृणुध्वं किं च ये स्वतवसः स्वायत्तबलाः
संति तानपि प्रकृणुध्वं केते अद्वेषः द्वेषरहितो विष्णुर्व्यापकः एतन्नामको देवः प्रथमः मनाहूतोपि नकुप्यतीति वक्तुमद्वेष इत्युक्तं तथा वातः
सर्वत्र संचारी वायुः ऋभुक्षाः पतिरिंद्रश्चैतानपि कृणुध्वं अतो हं त्वां यतबलान् सर्वमपि देवान् सुम्नाय अच्छा आभिमुख्येन ववृती
यस्तोत्रेभिवर्तयेयं ॥ ॥ अथैकादशी ॥ ॥ इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः ॥ नि या देवेषु यतते वसू
युर्विद्याम वस्य उशिज्ञो रदानुं ॥ ॥ हे यजत्राः यष्टव्या देवाः वो युष्मत्संबंधिनी सा इयं प्रसिद्धा दीधितिः स्तुतिः अस्मे अस्माकमपि प्राणि
सर्वदर्च प्रपित्री सदनी च निवास वर्तीच भूयाः भूयानुभवतु या दीधितिर्वसूयुः वसुमती देवेषु नियतते नियमेन प्रयत्नं करोति तान
पि प्रकाशितुं सेव भयातु विद्याम तिगतः ॥ ॥ इतिद्वितीयस्य पंचमी पंचमो वर्गः ॥ ॥ पितुं न्वित्येकादशर्चं अष्टमं सूक्तं आगस्त्यमंन
देवताकं गायत्रं आद्यानुष्टुप् ककुभोष्णिग्व आद्याः नुष्टुप् पंचकस्त्वयोरुक्तानुष्टुभा इत्युक्तत्वात् ॥ तृतीया पंचमी षष्ठी सप्तम्येकाद
शी चेति पंचानुष्टुभः ॥ तथा चानुक्रमणिका ॥ पितुं न्वन्नस्तुतिर्गायत्रं वाद्यानुष्टुप्गर्भा तृतीयापंचम्याद्याश्चतिस्रोनुष्टुभ इति ॥
विनियोगं शौनक आह ॥ पितुं न्वित्सपतिदेन नित्यमन्नमुपस्थितं ॥ पूजयेदशनं नित्यं भुंजीत सविकुत्सयन् ॥ नास्य स्यादंनजाव्याधि
र्विषमप्यमृतं भवेत् ॥ वि – – त्वेनत्सूक्तेन पेद्याधिविनाशनं ॥ वक्त्यमेव भुंजीत नाश्नचिर्न जुगुप्सितं ॥ दृष्टाः पूजयेज्ञे च तुष्टः
याज्ञ दरिस्तदा ॥ शुद्ध्यंनास्याकिंचित्स्याग्ननज्याधिमाप्नुयादिति ॥ ॥ तत्र प्रथमा ॥ ॥ पितुं नु स्तोषं महो धर्माणं तविषीं ॥ यस्य
त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ अहमगस्त्यः नुक्षिप्रं पितुं पालकमन्नं स्तोषं स्तोमि महो महांतं धर्माणं सर्वस्य धारकं तविषीं बला
त्मकं यद्वा महतो लोकस्य धारकं यस्यान्नस्याज्ञसा बलेन सामर्थ्येन त्रितो विस्तीर्णतमः प्रख्यातकीर्तिः त्रिषु स्थित्यादिस्थानेषु तायमा
नोपींद्रो वृत्रं विपर्वं वृक्णसंधिकं यथा तथार्दयत हिंसितवान् ॥ ॥ अथद्वितीया ॥ ॥ स्वादो पितो मधो पितो वयं त्वा ववृमहे ॥ अस्मा
कमविताभव ॥ ॥ हे स्वादो आस्वादनीय पितो पालक मधो माधुर्योपेत पितो पानसाधनान्न वयं त्वां त्वां वृमहे संभजामहे अत्र सर्वत्रानानु
दात्तानां पूर्वस्य सामान्यवचनत्वनानिघातत्वं अनुदात्तानां तु विशेषवचनत्वान्निघातत्वं ॥ असत्वस्थि तु श्रवणं तस्य प्राग्रात्यज्ञाप
नार्थं हे पितो अस्माकमविताता पयिता भव ॥ ॥ अथतृतीया ॥ ॥ उप नः पितवा चर शिवः शिवाभिरूतिभिः ॥ मयोभुरद्विषेण्यः सखा
सुशेवो अद्वयाः ॥ ॥ हे पितो अन्न त्वं शिवः मंगलः अतः शिवाभिर्मंगलयुक्ताभिः ऊतिभिः रक्षणैः नोस्मान् आचर आगच्छ आगत्य च म
योभुः सुखस्य भावयिता अद्विषेण्य अद्वेष्यरसः प्रियरस इत्यर्थः ॥ सखा सखिवत् प्रियकारी सुशेवः अतः एव सुसुखकरः अ
द्वयाः द्वयरहितः उक्तगुण एव न तु तद्विपरीतो भवेत्यर्थः ॥ अथवा दृष्टांतवादीयं सखेव मनः कर्मविसंवादरहितः सख्यथा मनोभु
रद्वेष्यश्च भवति तद्वन्मपि भवेत्यर्थः ॥ ॥ अथचतुर्थी ॥ ॥ तव त्ये पितो रसा रजांस्यनु विष्ठिताः ॥ दिवि वाता इव श्रिताः ॥ ॥ हे पितो
तव त्वत्संबंधिनः त्ये ते स्वादुत्वादिपरसाः रजांसि लोकान् लोकसामर्थ्यानुभनु अनुकूल्येन विष्ठिताः विविधं स्थिताः विविधं स्थितौ दृष्टां
तः दिवि द्युलोके अंतरिक्षे श्रिता वाताः वायवः तत् यथा व्याप्तास्तद्वत् ॥ ॥ अथपंचमी ॥ ॥ तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो ॥ प्र 161/1914

भा॰अ॰२ स्वाद्वा नो रसानां तृप्तिर्यथा तथा उद्वेरते ॥ ॥ हे पितो बालकानां त्वेन त्वदर्थिनो नराः लव भोक्तारो भवन्तीति शेषः के ते नराः हे स्वादिष्ठ स्वादुतम पितो पा अ॰५
८४ रुक्तं तव रसं दनुग्रहात् तेनैव ते दातुः प्रयच्छन्तो भवन्ति । यद्वा तापितात् उत्पादयितार्थं अश्वासो हि भूयाः समर्थ मन्ये तेन किंच तव परसानां स्वादुरूपा
दीनां पूर्णा स्वाधानाः स्वादयितारो भक्षयितार एव तु विग्रीवा उद्यौ तिव हुता मम रुद्ग्रीवा एवं प्रेरते प्रकर्षेण गच्छन्ति संचरन्ति एव उत्कृष्ट
कारार्थः पूरणा वा भूलोके तारा एव हृढा भवन्तीति प्रसिद्धा अनया नेहि ग्रीवा अधो लंबं ते यद्वा तव रसानामतारः असंख्यात ग्रीवा उ
द्भवन्ति रसानां यद्वत्याहिति भावः एवं बहुरसोपेतं अन्नमितिन स्वस्तुतिः ॥ ॥ इति द्वितीयस्य पंचमे षष्ठो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥
त्वे पितो महानां देवानां मनो हितं ॥ अकारि चारु केतुना तवाहिमवसावधीत् ॥ ॥ हे पितो महानां पूज्यानां महतां वा देवानामिंद्रादीनां मनस्त्व
यि पितौ निहितं अकारि कृतं अमनमपि विहाय त्वय्येव वर्तते हे पितो तव चारु समीचीनेन केतुना त्वात् तेन प्रज्ञानलक्षणेन अवसारक्षणेन
अहिमघं वृत्रं वा अव धीनु हतवानिंद्रः अन्नः मयाहि सोम्य मंनं इति श्रुतेः अथवा तव केतुना ज्ञानेन हृक्षणेन अहिर्वा उपलग्नः क्षणहीद्रेणाः
हि रिभिपत ॥ ॥ अथ सप्तमी ॥ ॥ यद्दो पितो अजगन्विवस्व पर्वतानां ॥ अत्रा चिन्नो मधो पितो रं भक्षाय गम्याः ॥ ॥ हे पितो अन्नत्वाय
यदा विवस्वत्स पालकं अंत्य लोपश्छांदसः विवासन वतां विपुलप्रकाशनवतां विवोधनं धनं उत्कृष्टं धनवतां वा पर्वतानां मेघानां सं
बंधि अदः प्रसिद्धं तदुदकं अजगन् अगमत् गच्छतु अत्र चित्तु अस्मिन्काले नो स्माकं हे मधो हे पितो माधुर्योपेतान्न त्वं नोस्माकं अरं अलं
संपूर्णं भक्षाय भक्षणाय गम्याः गच्छ संनिहितो भव ॥ ॥ अथाष्टमी ॥ ॥ यदपामोषधीनां परिंशमारिशामहे ॥ वातापे पीव इद्भव ॥ य
तो वयं अपामोषधीनां संबंधि परिंशं परिलिशं पवितः कवकरमंनं आरिशामहे आस्वादयामः तेनान्नो हे कसारणं इवाता पे वातेन प्रा
णेना प्राति स्वनिर्वाह्मिति वातेनाप्यायत इति वा वाताप्यिन्नाद्विरारिरं इत्यारिरत्वं पीव इत आप्यायित एव भव अन्नोदकाभ्यां शरीर वृद्धिः प्रसि
द्धा ॥ यद्वा यद्यपामोषधीनां परिंशं लिंशं आस्वादयामः तथापि हे वातापे वात वत्सर्वव्यापक पितो त्वमत्य मपि पीवः पीवानेव भव ॥ ॥
अथ नवमी ॥ ॥ यत्ते सोम गवाशिरो यवाशिरो भजामहे ॥ वातापे पीव इद्भव ॥ ॥ पूर्वमंत्रं सामान्येन स्तुत्वेदानीं सोमलक्षणमन्नं स्तौ
ति हे सोम तव यत् तं यम् अंशं गवाशिरः गोविकारः क्षीरादाश्रयणद्रव्यं यवाशिरः यवविकाराश्रयणद्रव्यं शरीर पीवो भव ॥ ॥ अथ दशमी
॥ ॥ करंभ ओषधे भव पीवो वृक्क उदारथिः ॥ वातापे पीव इद्भव ॥ ॥ करंभादिरूपः सक्तुपिंडात्मितदात्मके हे ओषधे त्वं पीवश्च उत्कोल्य
वानुवृक्कः व्याधयर्जयिता भव उदारथिः उर्ध्वगमः इंद्रियाणां मूर्छापयिता भवगन्तः ॥ ॥ अथैकादशी ॥ तं त्वा वयं पितो वचोभिर्गा
वो न हव्या सुषूदिम ॥ देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादं ॥ ॥ हे पितो अन्न सोमरूप तं ताद्वृशं तं त्वां महानुभाव वचोभिः स्तु
तिवाक्यैः वयं सुषूदिम स्वादयामः रसानुन यद्दृष्टांतः गावो न हव्या गावइव हवींषि उत्पादयंति तथा त्वत्सकाशात्सोमं सुषूदिम किमर्थं
किं देवानां चानेतव्य उच्यते देवेभ्यः इंद्रादिभ्यः च तदर्थं सधमादं तैः सह मादयितारं न केवलं देवेभ्य एव किंतु सधमादं अस्माभिः स ८८
ह मादयितारं हुतशेषरूपं त्वां अस्मभ्यं अस्मदर्थमपि ॥ ॥ इति द्वितीयस्य पंचमे सप्तमो वर्गः ॥ ॥ समिद्धो अद्येत्येकादशर्चं
नवमं सूक्तं मागस्त्यं पूर्वं गायत्रं समिदाग्नि तनूनपादयः एकादश प्रत्यृचं देवतायास्तेनादिं देवताः प्रयाजादिरूपकम्याग्नेयाः प्र

याजाः क्रतुदेवताः छंदोदेवताः प्राणदेवताः आत्मदेवता इत्यादिना बह्वृच्यक्षानुपन्यस्य ब्राह्मणानि च प्रदर्शाग्नेय एवेति सिद्धांतितं समिद्ध आ 163/1914
प्रिय इत्यनुक्रांतं पशावेतस्यात्र आमेकादश प्रयाजरूपमिदमाप्रीसूक्तं ॥ ॥ तत्र प्रथमा ॥ ॥ समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ॥
दूतो हव्या कविर्वह ॥ ॥ हे अग्ने देव त्वं हवर्त्विग्भिः कृत्विग्भिः समिद्धः समिद्धः सम्यग्दीपितः देवः अत एव दीप्यमानः समिद्धो वा देवैः ॥ स
हितः समिद्धः सन अद्यास्मिन्यागदिने राजसि उद्भिषद्दूस सहस्रजित सहस्रस्य धनस्य तत्संख्याकानां शत्रूणां वा जेता ततः दूतः देवानां द
तः न यज्ञादि यातोहरः आदाता वा अग्निर्देवानां दूत आसीदिति श्रुतेः कविः क्रांतदर्शी इह त्वं हव्या अस्मदीयानि हवींषि वह देवेभ्यः प्रा
पय ॥ ॥ अथ द्वितीया ॥ ॥ तनूनपादृतं यते मध्वा यज्ञः समज्यते ॥ दधत्सहस्रिणीरिषः ॥ ॥ तनूनपात् यज्ञशरीरस्य न पाता स्थिताय
द्वा आपो वै तन्व उच्यन्ते इत्युक्तत्वात् तासां नपान्नपयिता तासां नप्ता वा अद्भ्य ओषधयः ओषधीभ्योग्निरिति नप्तृत्वं यज्ञः यज्यः यज्ञा नवा
हकत्वाद्वा यज्ञः इदृशाग्निः कृतं यज्ञं यते गच्छते अनुतिष्ठते यजमानाय तदभिमतार्थं मध्वा मधुरेण आज्यसोमादिद्रव्येण समज्य
ते किंभूतं त्वं सहस्रिणीः एतत्संख्या इषोन्नानि दधत यजमानेभ्यो धारयन् ॥ ॥ अथ तृतीया ॥ ॥ आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान्
॥ अग्ने सहस्रसा असि ॥ ॥ हे अग्ने आजुह्वानः अस्माभिराहूयमानः सन् ईड्यः अस्माभिः स्तुत्यः एतन्नामको देवः त्वं नोस्मदर्थं यज्ञियान यज्ञ
भाजो देवानावक्षि आवह हे अग्ने त्वं सहस्रसा असि अपरिमितधनस्य दातासि ॥ ॥ अथ चतुर्थी ॥ ॥ प्राचीनं बर्हिरोजसा सहस्रवीरम
स्तृणन् ॥ यत्रादित्या विराजथ ॥ ॥ प्राचीनं प्रागग्रं सहस्रवीरं सहस्रसंख्याका वीराः शत्रूणां विशेषेण ईरयितारो देवा यस्य तत्ता दृक्तं य
द्वा अपरिमितवीराः पुत्रादयो यत्र तादृग्वर्हिस्तत्रसमंत्रं कल्पणवलेनोपेतात्क्रत्विजः अस्तृणन् आच्छादयन् अत्र यस्मिन् बर्हिषि भादि
त्या आदित्याश्च विराजथ विविधं राजथ तद्बर्हिरस्तृणन् ॥ ॥ अथ पंचमी ॥ ॥ विराट् सम्राड् विभ्वीः प्रभ्वीः बह्वीश्च भूयसीश्च याः ॥ दुरो
घृतान्यक्षरन् ॥ ॥ विशेषेण राजन इति व्यत्ययेन कवचनं सम्राट् सम्यगिति पूज्यतरं राजमानाः अत्रापि व्यत्ययेनैकवचनं विभ्वीर्वि
भ्वा विविधं भाविन्यः प्रभ्वीः प्रभ्व्यः प्रकर्षेण भविन्यः बह्व्यः भूयसीः लोकप्रसिद्ध संख्याभिश्च भूयस्यश्च या दुरो यज्ञगृहद्वाराः
संति तां घृतान्युदकानि प्रात्कृपकारार्थं अक्षरन् क्षरंति ॥ यद्वा बह्वीर्भूयसीरित्यत्र संख्यावचनात्प्रमिता सां नामधेयानि ॥ ॥ इति
द्वितीयस्य पंचमे अष्टमो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ सुरुक्मे हि सुपेशसाधि श्रिया विराजतः ॥ उषासावेह सीदतां ॥ ॥ सुरुक्मे शोभ
नदीप्ताभरण प्रसिद्धे सुपेशसा शोभनरूपे उदश्याव होरात्रे देवते अधि अधिकं श्रिया सौंदर्येण विराजतः विशेषेण दीप्येते हि
यागादिनि घातः ता दृश्यावुषसौ एतद्द्वान्त्ररण्युपलक्षणं उषः शब्दो दिवसस्याप्युपलक्षकः रात्रिरुषश्चाभे इहास्मिन्दिने आसीदतां
आगत्य तिष्ठतां आगच्छतां ॥ ॥ अथ सप्तमी ॥ ॥ प्रथमा हि सुवाचसा होतारा दैव्या कवी ॥ यज्ञं नो यक्षतामिमं ॥ ॥ प्रथमा मुख्यना
मेतत्प्रथमौ प्रकृष्टतमौ हि प्रसिद्धौ सुवाचसा प्रियवक्तारौ दैव्या देवाहौ होतारा देवानामाह्वातारौ होमनिष्पादकौ वा कवी मेधाविना
वेतौ नोस्मदीयमग्नियज्ञं यक्षतां यजतां गच्छतां वा ॥ ॥ अथाष्टमी ॥ ॥ भारतीळे सरस्वति या वः सर्वा उपब्रुवे ॥ ता नश्चोदयत श्रिये ॥
॥ ॥ हे भारति भरत आदित्यः तस्य संबंधिनि भारती तादृशी एका देवते हे इळे भुवहि हे सरस्वति सरस्वतीति सरागयुक्तदेवतात

भा॰अ॰२ यंतरिक्षदेवं नाद्वृतिदेविदेवताः क्षित्यादिदेवताः एतास्तिस्र आदित्यप्रभावविशेषरूपा इत्याहुः यास्तिस्रः सर्वा वायुष्मात उपभुवे उपेत्य स्तो अ०५
मिताय यंतास्मान् भिये संपदे वा इदं यज्ञं प्रसरयत ॥ ॥अथ नवमी॥ ॥त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्समानजे॥ तेषां नः स्फातिमायज॥
८९ ॥ ॥त्वष्टा यज्ञसाधनपात्राभिमानिनी देवो रूपाणि यानि सृष्टानि रेतांसि रूपाणि कर्तुं प्रभुः हि शब्दः अत्यंतरप्रसिद्धिद्योतनार्थः यावः
त्वष्टा रेतसः सिक्तस्य रूपाणि विकरोतीति श्रुतेः सदेवो विश्वान्सर्वान्पशून्॥ असमदीयानावादिकान् समानजे सम्यगनक्ति
व्यक्तीकरोति संपूर्णदेहान् करोति तस्मात्तु इति नु इ अथ प्रत्ययः तेषां नः पशूनां स्फातिं वृद्धिं नोस्मदर्थमायज सर्वतः पूज्यथ कुर्वि
त्यर्थः ॥ ॥अथ दशमी॥ ॥उप त्मन्या वनस्पते पाथो देवेभ्यः सृज॥ अग्निर्हव्यानि सिष्वदत्॥ हे वनस्पते यूपाभिमानिदेव त्मन्या आ
त्मनैव देवेभ्यः अग्न्यादिभ्यः पाथः पशुरूपमन्नं उपसृज उत्पादय यूनभावे पशुनियोजनाभावेन हविषोऽभावात्॥ त्वय्येवं कृतवति
सति अग्निर्हव्यानि हवींषि सिष्वदत् स्वदयतु स्वादकरोतु॥ ॥अथैकादशी॥ ॥पुरोगा अग्निर्देवानां गायत्रेण समज्यते॥ स्वाहा
कृतीषु रोचते॥ ॥अयमग्निर्देवानां पुरोगाः असुरयुद्धं प्रति पुरोगामी यद्वा देवानां मध्ये यज्ञं प्रत्यग्निरेव पुरोगामी अत एवाग्नेयणीत्वा
देवाग्निशब्दानिष्पन्नः अग्निः कस्मादग्रणीर्भवतीति निरुक्तादृशोयं गायत्रेण एतदुपलक्षितेन मंत्रेण समज्यते सम्यक्कृ्यज्यते
स्वाहाकृतीषु स्वाहाकारे प्रसन्नाद्भिः प्रदीयमाने रोचते भदीप्यते एनाः प्रयाजदेवताः यज्ञावयवाभिमानिन्यः तद्द्वारा यज्ञ एव लु
यत इति कथ्यानिम्नतं अग्निरेव नामांतरमित्यन्य॥ ॥इति पंचमस्य द्वितीयस्य पंचमनवमो वर्गः॥ ॥७॥ अग्ने नयेति अष्टर्चं दशमं सूक्तं अग
स्त्यस्य त्रैष्टुभमाग्नेयं॥ अग्ने नयाष्टावाग्नेयमित्यनुक्रमणिका॥ प्रातरनुवाकाश्विनशस्त्रयोः त्रैष्टुभच्छंदसि विनियोगः॥ अयेतस्या उत्सा
ग्नेनया प्रहंन्निलप्रत्यामुनमा दुत्त मालिल उभरह्मिति सूत्रितत्वात्। अत्र शौनकः॥ उतपथ प्रति पंथा यो भ्रष्टो वापि पथः क्वचित्॥ पंथानं
प्रति पद्येत कुर्वात कर्म गार्हितं॥ अग्ने नयेति सूक्तेन प्रत्यृचं तु हुत्वाहुतं॥ ज्ञपेज्ञ प्रयतो नित्यमुपतिष्ठेत वान लभेति॥ आग्रायणे अश्वतस्यः श्रव
णाकर्मणि विनियुक्ताः श्रावण्यां पौर्णमास्यामित्यत्र सूत्रितं॥ अग्ने नय सुपथा राये अस्मानिति चतसृभिः प्रत्यृचं हुत्वेति आग्नेयपक्षोच्
यापुरोडाशयो राघं हुं अनुवाक्यत्वं तथा च सूत्रितं॥ अग्ने नय सुपथा राये अस्मान्पाहि नो अग्ने पायुभिरजस्रैरिति आग्रायणीयेष्टौ
अग्नेयस्यानुवाक्या स्विष्टकृदनीयया अक्षोतदहः प्रायणीये शिरित्वं च सूत्रितं अग्ने नय सुपथा राये अस्माना देवानामपि पंथामगन्मेति
विपरीताश्च याज्यानुवाक्य इति च॥ ॥तत्र सूक्ते प्रथमा॥ ॥अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्म
ज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥ ॥हे अग्ने अंगनादिगुणविशिष्टदेव द्योतमान विश्वानि वयुनानि सर्वाणि प्रज्ञानानि
अनेनेदं अनुष्ठितं इदं प्रोणीयमिति यद्ज्ञानं मस्तितद्विद्वान् इत्यर्थः यतो विद्वान् अतस्त्वम स्मान् सुपथा शोभनेन मार्गेण राये गंतव्या
य स्वर्गादि धनाय द्वितीयार्थे वाच तुर्थी प्रायणीयं रयिं प्रति नयत दर्थं जुहुराणं कुटिलकार्येनः पापं पापफलं प्रतिबंधरूपम् अस्मत् अस्मा ८९
त्तो युयोधि पृथक्कुरु ते तव वयं भूयिष्ठामतिप्रभूतां नम उक्तिं नमस्कारोक्तिं स्तुतिं विधेम परिचरेम कुर्मः आयुः कामेष्ट्यां अग्ने त्वं पा
रयेति द्विस्विष्टकृतो याज्येयाहि न इति च तुर्थी अनुवाक्या॥ नो अग्ने पायुभिरजस्रैरग्ने त्वं पारयान् नमोऽस्मानिति संयाज्ये इति हि सूत्रि
तं।

एत एव सूक्तस्य यत्याम पि संयाज्ये इति सूत्रितत्वात्॥ ॥सैषा द्वितीया॥ ॥अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च
पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ ॥हे अग्ने त्वं नव्यो नवतरः स्तुत्यो वा त्वमस्मान् आगातुच्छत्रून् अतिपारय कर्मसमाप्त्या
ति पारय अतिपारकामं यकेन साधनेन स्वस्तिभिरभिप्रितः स्वस्तिशब्दः शोभनवचनः अत्यंतं पूजितैर्यज्ञादिसाधनैः कानि दुर्गाणि दुर्ग
मनानि पापानि अनतिक्रमणीयानि दुरितान्यत्र नि अति वारय किंच अस्माकं पृथ्वी पृथुतरा पूश्च पूर्यापि भवतीति शेषः। च शब्दो वस्यमा
णानसमुच्चयार्थः पूरितिश्लाध्ये कवचनं॥ पुराण्यपि भवंतीत्यर्थः। तथा नोस्माकं उर्वी पृथ्वी बहुला भवत॥ ततः तोकाय अपत्याय
तनयाय पुत्राय तोकशब्दः पत्यसामान्यवचनः तनयशब्दः पुत्रवचनः शंस्करं योः मिश्रयिता भव यद्वा रोगाणां शमनं भयानां यावनं
च भव कुर्वित्यर्थः॥ ॥अथ तृतीया॥ ॥अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः॥ पुनरस्मभ्यं सुवितायदेव क्षां विश्वेभिर
मृतेभिर्यजत्र॥ ॥हे अग्ने त्वं अमीवाः रोगान् अस्मद् अस्मत्तो युयोधि पृथक्कुरु अनग्नित्राः अग्निना अज्वालिताः कृष्टीः प्रजाः अभ्यमंत
अभिमिमंते समानय एवं व्याहारादनिधानः तान् युयोधि यद्वा अनग्नित्राः पापिष्ठाः कृष्टयः प्रजाः तत्र याभ्यमित अभितो रोगैः प्रा
पयितं मर्हतीयत ततो दूरेणास्मत्तो वियोजयेत्यर्थः॥ न केवलं वियोगमात्रं अपितु पुनः पुनरिदं कर्तव्यं अस्मभ्यं अस्मदर्थं सुवि
ताय शोभनफलाय हे यजत्र यष्टव्य देव द्योतमानाग्ने विश्वेभिरमृतेभिः सर्वैरमरणधर्मभिः अन्यैर्यष्टव्यैर्देवैः सह क्षां पृथिवीं देवय
जनलक्षणामागच्छेति शेषः॥ पाहि नस्त्वत्स्याविनियोगः द्वयं अग्ने त्वं पारयेत्युक्तं तथा प्रयपाशवेषु बहुविधानवाक्यात थाच सू
त्रितं। पाहि नो अग्ने पायुभिरजस्रैः प्रवः शुक्राय भानवे भरध्वमिति॥ ॥सैषा चतुर्थी॥ ॥पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये स
दन आ शुशुक्वान्॥ मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः॥ ॥हे अग्ने नोस्मान् अजस्रैरनवरतैरविच्छिन्नैः पायुभिः पाल
नप्रकारैः पाहि पालय उत अपिच प्रिये यस्सदने तव प्रियभूमियागगृहे आसर्वतः शुशुक्वान् दीप्यमानो भवेति शेषः॥ किंच हे यवी
ष्ठ युवतम ते तव जरितारं गरितारं स्तोतारं मां त्वं भयं मा विदन मा लभतां मा प्राप्नोत॥ हे सहस्वः बलवन्नग्ने अपरमपरस्मिन्नका
ले भयं मा विदत अपरं मद्व्यं वा मा विदत॥ ॥अच्युतायभौमायं ककपाल पुरो नु द्धा मैमा नो अग्न इत्यनया शूमभिजुहोतितथा
सूत्रितं॥ मा नो अग्ने व सृजो अघायेत्येन मा शूयनाभिजुहोतीति॥ ॥सैषा पंचमी॥ ॥मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै॥ मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः॥ हे अग्ने नोस्मान् अघाय हिंसकाय अविष्यवे अविष्या विरतिकः
मो भंनेच्छवे पुनायेश्च नंनम् नंमकं खं दुःखं दुःखकारिणे दुःखकारिण इत्यर्थः॥ तस्मै रिपवे मा वसृजः मात्याक्षीः परधीनं मा कुर्वि
त्यर्थः॥ तथा नोस्मान् दत्वते दंतवत। दन्तैः खादते सर्पादये मावसृजः तथा नोस्मान् अदते अदंत काय शृंगादिभि घातिने मावस
ृजः तथा रिषते हिंसकाय तस्करराक्षसादये हे सहसावन् सहस्विन् मा परादाः पराभूतं मा देहि सर्वथा नो देहीत्यर्थः॥ ॥इति
द्वितीयस्य पंचमदशमो वर्गः॥ ॥अथ षष्ठी॥ ॥वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे वरूथं॥ विश्वाद्रिरिक्षोरुत वा
निनित्सोरभिह्रुतामसि हि देव विष्पट्॥ ॥हे ऋतजात यज्ञार्थमुत्पन्नाग्ने वरूथं वरणीयं त्वां मत्वं शरीरपोषाय गृणानः स्तुवन

165/1914

भा॰अ॰२ त्वावान् त्वया देवतया तुल्यः सन् नो विशंसत् एवमिमं च त्रिरत्वाश्मानं कस्मात् कुतश्चनापि रिक्षोऽहिंसितानाम्नि घोशेरात्रेः सकाशात् उत वा अथवा ३०५
निनित्सोः निंदितुमिच्छतः देवस्य अभिह्रुतः अभिख्यानि कुटिलं कुर्वतो द्वेष्याविष्यच्छविप्रोपेण बाधकात्तस्मि अनवतस्त्वरनु प्रयुह्याद यं जनावि
१० यंसत॥ ॥अथसप्तमी॥ ॥त्वेतां अग्न उभयान्विविद्वान् वेषि प्रपित्वे मनुषो यजत्र॥ अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भि
र्नाक्रः॥ ॥हे यजत्र यष्टव्याग्ने त्वं तान् उभयान् देवान्मनुष्यान् विद्वान् विविक्तान् जानन् प्रपित्वे संनिहित एव काले वे
षि कामयसे यजमानतया कुर्वन् भक्तः आक्रमितात्वं मनवे पञ्चम्यर्थे चतुर्थी॥ मनुष्यस्य यजमानस्य अभिपित्वे अभिप्राप्तकाले अ
भिगमनवति यज्ञे शास्यो भूः शिक्षणीयो भव यद्वा रंकुर उद्दर्शितविधेयो भव मर्मृजेन्यः शोधयिता यजमानः उशिग्भिः कामय
मानैर्ऋत्विग्भिरिति॥ ॥अथाष्टमी॥ ॥अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसान अग्नौ॥ वयं सहस्रमृषिभिः सनेम वि
द्यामेषं वृजनं जीरदानुं॥ ॥हे वयं अस्मिन्नग्नौ निवचनानि नियमपूर्वकाणि वचांसि स्तोत्ररूपाणि अवोचाम अवोचाम मः अंकितिर्न्नाय्य
तेमानस्य सनुः मीयत इति मानो मंत्रः तस्य सनुः सम्भक्ता मंत्रणोत्पाद्यवानत्वात सहसा मन्थ प्रथमानस्य सूनेः सहसा नयो गृणाम
भिभवितरि अग्नौ अवोचाम वयमभिर्ऋषिभिरतीन्द्रियार्थप्रकाशकैर्मंत्रैः साधनैः सहस्रमपरिमितं धनं सनेम संभजेमहि
विद्यामेति गतं॥ ॥इति द्वितीयस्य पंचमे एकादशो वर्गः॥ ॥अनर्वाणमित्यष्टर्चं एकादशं सूक्तं आगस्त्यं बार्हस्पत्यं त्रैष्टुभं॥
अनर्वाणं बार्हस्पत्यमित्यनुक्रांतं श्रौतविनियोगो लैंगिकः अत्रशौनकः॥ त्वावाजपेरनर्वाणं नमस्कृत्य बृहस्पतिं॥ वीरान् धनं च
प्राप्नोति सोऽक्षय्यं वर्तयत्यतीति॥ ॥तत्र प्रथमा॥ ॥अनर्वाणं वृषभं मंद्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः॥ गाथान्यः सुरु
चो यस्य देवा आशृण्वंति नवमानस्य मर्ताः॥ ॥हे होतर्न यं नवतरं स्तुत्यं वा तमनर्वाणं आगतारं स्तोतारं धीः नमित्यर्थः॥ वृषभं अपां
फलानां वा वर्षितारं मंद्रजिह्वं माद्यकवाचं बृहस्पतिं मंत्रस्य पालयितारं एतन्नामकं देवं अर्कैः अर्चनसाधनैर्मंत्रैर्वर्धय प्रशस्तं कुरु सुरु
चः शोभनदीप्तिर्नवमानस्य स्तूयमानस्य कर्मणि कर्तृत्यस्य यस्य बृहस्पतेः कर्मणि पञ्चम्यर्थे मानं स्तूयमानं गाथान्यः गाथा
तिवाङ्न्याम स्तुति च वक्तारं देवाः देवाश्च दत्तोऽमर्ता मनुष्या होत्रादयः यदुनवमानस्य स्तुवानस्य यजमानस्य संबंधिनस्ते आशृण्वं
ति॥ आशृणवंति पुराणं दस्युभिर्वर्धय॥ अत्रानर्वाणमत्र त्वतमन्यस्मिन्नित्यादितिरकं द्रष्टव्यं॥ बार्हस्पत्ये पशौ तमृत्विय इति याव
पायाज्या सूत्रितं च॥ बृहस्पते अति यदर्यो अर्हातामृत्वियाउपवाचः सचंत इति॥ ॥अथ द्वितीया॥ ॥तमृत्विया उपवाचः सचंते
सर्गो न यो देवयतामसर्जि॥ बृहस्पतिः स ह्यंजो वरांसि विभ्वाभवत्समृते मातरिश्वा॥ तं बृहस्पतिं ऋत्विजः याः वर्षत संबंधिन्यो
वाचो मन्त्रध्यंमिका उपसचंते समीपं सेवते यः सर्गो न उदकस्य स्रष्टापि तत्र ब्दाप्यर्थे देवयतां देवानिच्छतां यजमानानां असर्जि प्र
लंयद्यदे यं त्वमिच्छतां मनुष्याणां असर्जि सृष्टवान् रश्मसुदकं यद्वा॥ ऋत्वियाः आप्नकालीना वाचः स्तोत्राद्विश्रुतिवाचः असच
ते तं यः सर्गो न उदकस्रष्टिरिव सः एव बृहस्पतिः अंजो हि व्यंजकः स तु तस्मिन्वर्षति सर्वं भवति अत एव विभ्वा विभुर्व्याप्नोमा १०
तरिश्वा दृष्टिनिर्मातर्यंतरिक्षे चेष्टमानो वायुः सदृशो वा वरांसि वरणीयानि सर्वादिफलानि संपादयतः ऋते उदकनिमित्तभूते सति

163/1914

समभवन् संभूतः अथवा अंजो यज्ञियानां व्यंजकः मातरिश्वा फलस्य निर्माता यश्च अश्वसिता वर्तमानः स बृहस्पतिः ऋते यज्ञे निमित्तभूते
सति वरांसि वरणीयानि हवींषि इच्छन् विभ्वा विभुः समभवत्॥ ॥अथ तृतीया॥ ॥उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्राबाहू
॥अस्य क्रत्वाहन्यो३ यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान्॥ ॥अयं बृहस्पति उपस्तुतिं यजमानेनोपेत्य क्रियमाणां स्तुति
नमसः हविर्लक्षणस्यान्नस्योद्यतिं उद्यमं च श्लोकं अन्यां या मंत्रविद्यां यामिति तं च प्रयंसत प्रकर्षेण तत्र तस्मिंस्तु यजसीना वा तन्म
र्द्धं प्रयच्छस्यस्मिन् तत्र दृष्टांतः सवितेव सूर्य इव स यथा स्तोत्रादिकं स्वीकरोति तद्वत् यजमानप्रदानपक्षे सविता सर्वस्य प्रसविता सू
र्य इव स यथा बाहुभ्यः प्रकाशादि प्रयच्छति तद्वत् बाहुवा बाहुभ्यां यजमानो पीत्यर्थे॥ तस्य महत्त्वमाह॥ अरक्षसः स्वविरोधि रक्षो
रहितस्यास्य बृहस्पतेः क्रत्वा कर्मणा सामर्थ्येन अहन्यः अह्नि साधुर्यः सूर्योऽस्ति सभीमान् मृग इव भयजनकः सिंहादिरिव भी
मो भयहेतुः हविष्मान् बलवान् परिभ्रमतीति विग्रहः॥ स स्वयं महात्म्येन मंत्राभिमानिनो बृहस्पतेः सामर्थ्यात् संमेदहा घसुरां
जितानि तेजस्वी भवतीता दृशो महानुभावो यजमानदत्तं हविरादिकं स्वीकरोतीत्यर्थः॥ ॥अथ चतुर्थी॥ ॥अस्य श्लोको दि
वीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः॥ मृगाणां न हेतयो यंति चेमा बृहस्पतेरहिमायाँ अभि द्यून्॥ ॥अस्य बृहस्पतेः
श्लोकः स्तुत्यात्मिका कीर्तिः गर्जितवाग्वादिविघातमानः द्युलोके पृथिव्यां च इयते गच्छति व्याप्नोति यो बृहस्पतिरत्यो न अतनशील
आदित्य इव यक्षभृत पूजितं हविरादिकं दधातु बिभर्ति॥ ताः विविधं चेतयिता प्राणिनां विचेताः प्रज्ञायुक्तो वा यंसत नियच्छतिः फ
लंकं च मृगाणां हेः॥ न मन्निव्यंतो हेतयो न आयुधानी वास्यस्य बृहस्पतेरिमा हेतयः हिंसन्त्या युधानि यंति गच्छति चवयोगप्र
यमेति तन्नि घातः अहि मायन् आगत्य हंत्यो न रिक्ष वारिण्यो वा मायायेषां वृत्रादीनां तान् स्मरान् घ्नत् द्विवसानुकाला ध्वमा
रितिद्वितीयाता न्यायुधान्याभिलक्ष्य यंति चउपसर्गश्रुते योग्यक्रियाध्याहारः॥ ॥अथ पंचमी॥ ॥ये त्वा देवोस्रिकं मन्य
मानाः पापा भद्रमुपजीवंति पज्राः॥ न दूढ्ये अनु ददासि वामं बृहस्पते चयस इत्पियारुं॥ ॥हे देव बृहस्पते ये पापाः पापबुद्
यः अल्पाः पज्राः हविर्लक्षणान्नवंतः पापं न ज्ञाः वर्णाचान भद्रं कल्याणं त्वा त्वा उस्त्रिकं उस्त्रियुक्ति गोनामकु स्सिता मल्पक्षीरस्रा
विणीं गां जीर्णमनड्वाहं वा मन्यमानाः उपजीवंति उपेत्य प्राणाति अल्पं यावंत इत्यर्थः॥ दूढ्ये दुर्धिय इति वचनव्यत्ययः दुर्बुद्धिय
स्तेभ्यो वामं वननीयं धनं तान्न ददासि अनुकूलं न वितरसि हे बृहस्पते इवपियारुं सोमपानशीलं सोमेन यष्टारं महाफलादि
भुंह वयस इतगच्छ स्यव अनुग्रहीतं च यगतावित्यस्येद रूपं। यद्वा हे बृहस्पते पियारुं हिंसकं पीयतिर्हिंसाकर्मण इदं रूपं
तं प्राणिहिंसकं च यसइत हं स्यपीबृहस्पते य आतयसि दयपी युमितिनिरुक्तं॥ ॥इति द्वितीयस्य पंचमे द्वादशो वर्गः॥ ॥
॥ ॥अथ षष्ठी॥ ॥सुप्रैतुः सूयवसो न पंथा दुर्नियंतुः परिप्रीतो न मित्रः॥ अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवं
तो अस्थुः॥ ॥हे बृहस्पते त्वं सुप्रैतुः सुष्ठु गंतः मनुष्यस्य सूयवसः शोभनान्नस्य पंथा न मार्ग इव सुष्ठु यन्मार्गगामिनः सु
यवसः पंथा इव सुखकारी भवत्यर्थः॥ किं च दुर्नियंतुः दुःखेन नियमितरा तुः परिप्रीतः सर्वप्रकारेण संतुष्टः इषाहिः

मा॰ अ॰ २ हितो मित्रो न स इन्मंत्री न सय था दुर्नियानि वर्तयति तद्वत्त्वमपि तथास्मभ्यं कुर्वित्यर्थः। सास्विवदं मार्गाग्निवर्त्म मार्गे यज्ञादिरूपे यो अ॰ ५
गयितव्रतवाधिफलप्रदो भवेत्यर्थः।। किंच अनर्वाणः अपापाः ये नराः नोस्मानभि आभिमुख्येन चक्षते बोधयंति ते चिरृताः अज्ञाने
९१ नावृता अपि अपार्णुवंतः अपनवंतो ऽस्थः तिष्ठत यद्वा नर्यणः त्वामप्राप्नुवंतो यस्माद्विराधिनो नो स्मान अभिचक्षते अभिवदंतीति
दंति तेपीभताः आच्छादिता रक्षिता अपि अपार्णुवंतः अपगतरक्षणा भवंति। संयं स्तुभ इत्येषा द्वाईस्त्यत्ये पत्नोपुरोडाशस्य याज्यास
त्रितं च।। संयं स्तुभो वनयो न यं यो वापि त्रइति।। ।।अथ सप्तमी।। ।।सं यं स्तुभो वनयो न सर्वा आवनया भूमयो मनुष्याय थास्वामि
नं कर्म प्रति बा सयंति संगच्छंति तद्वत्तथा समुद्रे रोधचक्राः नदीनामैतत् रोधनशीलानि चक्राणि वा सतत्तस्ता इव शः कुल्ः कममा
णाधाराश्रवंतः स्रवंत्यो न यो यथा यांति तद्वत् सर्वा अपि स्तुतयः समेव प्राप्नुवंति गृध्रः गर्धनशीलः रश्मिमाकांक्षमाणः सबृहस्पतिः
विद्वान् क्ष्यमाणाभित्तः तरः तरणं जलम् अभिरक्षिं आपः उदकानि चाभि यं अंतर्मध्ये स्थितानि चक्षे पश्यति करोतीत्यर्थः।। ।।अथाष्टमी
।। ।।एवा महस्तुविजातस्तुविष्मान् बृहस्पतिर्वृषभो धायि देवः।। स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृ॰।। महः महान् तुविजातः बहु
र्यमु सन्नः तुविष्मान् बलवान् वृषभः भर्पा वर्षिता देवो बृहस्पतिः एवमेवं स्तुतिप्रकारेण धायि धीयते स्तूयते इत्यर्थः। संस्तुतो देवो नो
स्माकं वीरवत् पुत्रापुपेतं गोमत् गोभिर्युक्तं फलं धातुं करोतित्यर्थः। विद्यामेतिगतं।। ।।इति द्वितीयस्य पंचमे त्रयोदशो वर्गः।। ।।कंक
त इति षोडशर्चं द्वादशं सूक्तं ऋषिरगस्त्यः अप्तृणः सूर्यश्च यो देवताः त्रिष्टुप्छंदः सूर्ये विषमित्याद्यास्तिस्रो महापंक्तयः अष्टकोस
मकः पट्टाद्द्राकानवक कश्चेत्यरुलक्षणोपेतत्वात् न नानामित्येषा त्रयोदशी महाबृहती चत्वारोष्टका जगतश्च महाबृहतीति युक्तं
अत्र य पंच्यक्षराणि न्यूनानि तथाप्यूहेन पूरणीयानि। अत्रानुक्रमणिका कंकतः षोळशोपनिषदानुष्टुभमप्रणसोर्ये विषघ्नं कामा
नगस्त्यः प्राज्ञवीदृग्नाम्या द्याश्चतिस्रो महापंक्तयो महाबृहतीचेति उपनिषदिति रहस्यमित्यर्थः। विषघ्नं काय युक्तो गस्त्यः तत्परिहा
रार्थं इमुक्त्वानुश्रेतस्याविशेषविनियोगो लैंगिकः।। ।।अत्रशौनकः।। कंकतो नेति सूक्तं तु विषार्त्तः प्रयतो जपेत्।। विषं न कमते चास्
स्या सूर्या इत्युप विषादपि।। न्यकीट लूता कवि वं दंष्ट्रिशृश्चिकतश्च यत।। मूलं च कृत्रिमं चैव जपन् सर्वमपोहतीति।। ।।तत्र प्रथमा।। ।।
कंकतो न कंकतो थो सतीनकंकतः।। द्वाविति प्लुषी इति न्या द्दृष्टा अलिप्सत।। कंकतः अल्पविषयः कश्चित न कंकतः तद्व्यतिरिक्तो न विषो
म हीरगादिः तगतेर्गत्यर्थस्य वर्णव्यत्ययेन कंत इति सरन भवति अथो अपि च सतिनकंकतः सतीनमित्युदकनाम सतीनं गच्छतीति
तंनाम स्वपातात उदकचारी अल्पविषवान् कश्चिद् दुंदुभादिः द्वावितिवति अल्पविष महाविषभेदेन जलस्थल भेदेन वा द्विप्रकारा वितिपु
षीइति प्लुषणा वितिप्रकारद्वैविध्य श्रद्ध तयोः प्रतिपादनार्थमिकारद्वयं तथा अदृष्टाः अदृश्यमानरूपाः एतत्संज्ञकाश्च केचिद्वि ९१
षधराः एवं मुक्तप्रकाराः यतिसिं तेनन्याः लिप्सत विशेषेणालिंपंति सर्वाण्यंगानि विषमारणोति केनेषं हस्तमिति न ज्ञायत इति भावः
।। ।।अथ द्वितीया।। ।।अदृष्टान् हंस्यायत्यथो हंति परायती।। अथो अवघ्नती हंत्यथो पिनष्टि पिंषती।। ।।अनेन विषघ्नौषधील

यते आयती विषहरस्यसकाशमागच्छंती विषापनिर्हरणसाधनौषधिः अदृष्टान् अदृश्यमानान् विषधरान् हंति हिनस्ति अपि च प
रायती परागच्छंती संमार्जनसमये बाह्यप्रदेशं हंति नाशयति जलचरविषधरान् अथो अपि च अवघ्नती कर्मणि कर्तृप्रत्ययः अवहन्य
माना औषधिः स्वगंधेन हंति बहुविधा बहुविधान यद्वा काचिदौषधिः दशकाष्ठाद्यवयवैर्व अथो अपि च पिषंती पेषणकर्त्री द्वृषदा पिष्यमा
णा औषधिः पिनष्टि चूर्णीकरोतीत्यल्पविषान् अथवा सर्वेषु वाक्येषु विशेषेण सर्वविषकारिणां नाश उक्तः।। ।।अथ तृतीया।। ।।शरासः
कुशरासो दर्भासः सैर्या उत।। मौंजा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत।। अन्यांश्च विषहेतूनाह।। शरासः शराः वेणुदंडसदृशाः अच्छिद्राः तृ
णविशेषाः कुशरासः कुत्सितशराः अंतश्छिद्राः शरसदृशाः तृणविशेषाः दर्भासः दर्भाः कुशाः सैर्याः तदाकारविशिष्टा इवाः तृणवि
शेषाः आश्वयालाइति प्रसिद्धाः मौंजाः मुंजाः प्रसिद्धाः वैरिणाः वीरणप्रकाराः एषु लेषु वर्तमाना अदृष्टा उक्तरूपाः सर्वे विषधराः सा
कंमिलित्वा न्यलिप्सत निलिंपंति स्मा।। ।।अथ चतुर्थी।। ।।नि गावो गोष्ठे असदन् नि मृगासो अविक्षत।। नि केतवो जनानां न्यदृष्टा
अलिप्सत।। ।।गावो गोष्ठे स्वसदने नि षीदंति निषण्णाः मृगाः न्यविक्षत निविष्टाः स्वस्वस्थाने उपरताः जनानां प्राणिनां केतवः प्रज्ञानानि
उपसंहृत्य स्थितानित्यध्याहारः न्यास्वाप्य भवन् एतस्मिन् समये अदृष्टाः अदृश्यमानरूपाः न्यलिप्सत निलिंपंति विशेषेण।। ।।अ
थ पंचमी।। ।।एत उ त्ये प्रत्यदृश्रन् प्रदोषं तस्करा इव।। अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन।। ।।त्ये ते एते सर्पाः प्रत्यदृश्रन् प्रतिदृश्यंते
रात्रौ श्वासाश्लिंगनयद्वा तेरात्रौ हंतारः शिवाए ते प्रतिदृश्यंते तत्र दृष्टांतः प्रदोषं रात्रिशेषारात्रिं प्रति तमसाभिभूतास्तस्करा
इव हिंसकाश्चौरा दृश्यंते यथा तद्वत् हे दृष्टा अदृष्टाः अपरिदृश्यमानाः विश्वदृष्टाः विश्वं दृष्टं यैस्ते तादृशाः प्रतिदृश्यंते अतो हे न
राः प्रतिबुद्धा अभूतन भवत।। ।।इति द्वितीयस्य पंचमे चतुर्दशो वर्गः।। ।।अथ षष्ठी।। ।।द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः
स्वसा।। अदृष्टाः तिष्ठतेलयता सुकं।। ।।अतः परं विषचिकित्सा तत्र तावत् हे महासर्पाः वो युष्माकं द्यौः पिता पृथिवी माता सोमो भ्राता अदि
तिर्देवमाता सा स्वसा एवं महानुभावा महोरगाः अदृष्टाः अन्यैरदृश्यमानरूपाः स्वयं तु विश्वदृष्टाः सर्वस्य द्रष्टारो यूयं तिष्ठत रयस्थाने च्छेन मा
प्रति मागच्छत स्मृतरां कं सुखं यथा तथा इलयत।। तदैर संगच्छत सामत्रांद्रेन सोमाधारा एकः लोकः उच्यते पृथिव्यंतरिक्ष द्युस्थानस्थाः सर्पाः
स्वस्वस्थानं प्राप्नुत अस्माद्बाधां मा कुरुतेत्यर्थः।। ।।अथ सप्तमी।। ।।ये अंस्या ये अंग्याः सूचीका ये प्रकंकताः।। अदृष्टाः किंचनेह वः स
र्वे साकं नि जस्यत।। ये अंस्याः अंसाद्याः अंसंगाः अंसभवाः अंसाभ्यां स्यादंतो वात थाये अंग्याः अंगगाः अंगेन शरीरेण हंतारो वा
वृश्चिकादयः सूचीकाः सूचीसदृशपुच्छरोमाणो वृश्चिकाद्याः एव प्रकंकताः प्रकृष्टविषाः प्रकृष्टगामिनो वा महोरगाः अदृष्टाः अदृ
श्यमानाः वि किंचन यत किंचित्तु सर्पजातम् अस्ति इह अस्मिन् सर्वोपि वो युष्माकं किमस्ति अतो यूयं सर्वे साकं सह नितरां जस्यत मुंचतास्मान् जसु
मोक्षणे दैवादिकः।। ।।अथाष्टमी।। ।।उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा।। अदृष्टान् सर्वान् जंभयन्त्सर्वाश्च यातुधान्यः।। असौ सूर्यः पु
रस्तात् पूर्वस्यां दिशि उदेति उद्गच्छति सः विश्वदृष्टः विश्वैर्द्रष्टव्यः यस्य सर्वे द्रष्टारो अदृष्टहा अदृष्टाः विषविशेषाः विषधारविशेषा वा तेषां
हंता यद्वा अदृष्टमदर्शनम् अज्ञानं अंधकारस्तस्य हंता स एवं उदितः सर्वान् सर्वविषधराः पिशाचानि यापलायितां कुर्वन्नुदेतीति चेत् उच्यते

169
1914

भा॰ अ॰ सर्वान् अदृष्टान् अदृश्यान् विषराक्षसादीन् जंभयन् हिंसयन् तथा सर्वाश्च यातुधान्यः यातनाः ताः सर्वाः धात्र्यो अस्या दृषदोऽग्नेर्गर्गा अ॰ ७
गर्गा नीचाः जंभयन् पुरस्तादुदेति अनेनास्य तानि तस्य तेति संबंधः॥ ॥अथ नवमी॥ ॥ उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन्॥ आदि
७३ त्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा॥ ॥असौ पुरस्ताद् दृश्यमानः सूर्यः सर्वस्य प्रेरक आदित्य उदपप्तत् ऊर्ध्वं गच्छति पतते पुरु पुमागाः
महत् पर्वं कुर्वन् विश्वानि बहूनि विषाणि पुरु प्रभूतं जूर्वन् हिंसन् किं कुर्वन् सोऽपर्वतेभ्यः पर्वतवद्भ्यः प्राणिभ्यः तेषामुपकाराय आदित्यः वि
षोद्वासनामिदं नामधेयं विश्वदृष्टः विश्वदृष्टं संयन्ता अदृष्टहा अदृष्टानां विषविशेषाणां हंता एवं महानुभावः सूर्य ऊर्ध्वमारोहति
अतो विषशंका न कार्या॥ ॥अथ दशमी॥ ॥सूर्ये विषमासजामि दृतिं सुरावतो गृहे॥ सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं
हरिष्ठा मधुला चकार॥ ॥आदित्यमंडले चतुर्थ अंगुलिनाविषमाहायम धुकृत्य योजयित्वा नि विषा भवंतीति यदेतद्विषविद्याया
मुक्तं तदिदमत्रोच्यते॥ अहं विषापहर्ता गारुत्मः सर्वस्य प्रेरयितरि मधुविपाके सूर्यमंडले विषमासजामि बध्नामि सूर्ये असुजामि आ
सजं करोमि तत्र दृष्टांतः सुरावतः सुरां कुर्वतः गृहे सुरासंगतं दृतिमिव चर्ममयं सुरापात्रमिव यथा तत्तु ते शोषाय भवति तद्वदिदमपि
तस्य न बाधकमित्यर्थः॥ सो चिन्नु सोऽपि वा प्रजाया दुःखितोऽपि प्रजयः समर्थः खलु न मराति न म्रियते नो वयं मरामः तदनुग्रहात् तेन विष
स्य यापितत्वात् इयमपि न म्रियामहे उभयोः मरणकारणमिदं हरिष्ठाः हरयोऽश्वाः ते एषु स्थित आदित्यः आरे दूरे अस्य विषस्य योज
नं प्रापणं चकार तदेतदुच्यते हविषमधुला मधुलामध्वेतं चकार विषस्य विषभावं दूरे पनोपामतीचाकार तिरस्कृत्यं मधुलामधुदार्तनि
र्विषी कार्यामधुविपाये इति शास्त्रीयस्य विषयोजनं तेन वा मतीकारणं यदेतत्क्षिणामधुविद्या॥ ॥इति द्वितीयस्य पंचमे पंचदशो वर्गः॥
॥ ॥अथैकादशी॥ ॥इयत्तिका शकुंतिका सका जघास ते विषं॥ सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधुला मधु
लाचकार॥ ॥इयत्तिका इयत्तावत्त्वाणा इयतावती वा बालेत्यर्थः॥ शकुंतिका शकुंतः शकुनः तस्य स्त्री तां काक्षिरपिकाह सकाशा
त् ते तव विषं जघास भक्षितवती सा विषं स्पृष्टानि प्रसिद्धा सा न्यस्ता इति निपातसमुदायः एवं दसाप्यरुकृति का न म्रियते नि
त्य प्रतिपक्षस्य च बाकि सा विष्णेर्ब्याख्यानचर्व॥ अनेन विषायां यद्विपरीत विषं तस्य शकुनेभ्यः आदित्यात्मनः शिमसीत्युक्तं भवति॥
॥ ॥अथ द्वादशी॥ ॥त्रिः सप्त विष्पुलिंगका विषस्य पुष्यमक्षन्॥ ताश्चिन्नु न मरन्ति नो ॥ ॥त्रिः सप्त त्रिगुणिताः सप्तसंख्याका वि
ष्पुलिंगका विविधाः विष्पुलिंगकाः सप्त कालिकानल लोहितशकुनसमभेदेनैकविंशतिर्याः सांताः यद्वा त्रिः सप्त एकविंशतिभेदा विष्पु
लिंगकाः सूक्ष्मश्च शकुंकाः विषप्रतिपक्षभूताः विषस्योत्सादावरकस्य पुष्यपाप मक्षन् अदंतु नाशयंतु तस्यैव मरंति न येऽवम पापोऽदिष्ट
मविद्विष्टं॥ ॥अथ त्रयोदशी॥ ॥नवानां नवतीनां विषस्य रोपुषीणां॥ सर्वासामग्रभं नामारे॥ नवानां नवाधिकानां नदीनां पुनाः
श्च दृष्टानां मविषस्य पापकस्य सर्वस्य विषस्य रोपुषीणां रोपयित्रीणां छेत्रीणां सर्वासां दुष्टानां गंगादि नदीनां नाम अग्रभं ग्राभं व्या ७३
पि संवर्तं यामि अहं दांदसं लुङि ग्रांदसः कुर्दुरु हृयहो भः अस्य योजनमित्यादि गतं॥ ॥अथ चतुर्दशी॥ ॥त्रिः सप्त मयूर्यः सप्त
स्वसारो अग्रुवः॥ तास्ते विषं विजभ्रिर उदकं कुंभिनीरिव॥ ॥त्रिः सप्त एकविंशति संख्याकाः मयूर्यो मयूरस्त्रियः ताः विषकारि
सर्पं इषिण्या इति प्रसिद्धाः अग्रुव इति सर्पशत्रुत्वात् तथा सप्त तत्संख्याकाः सर्पेण सर्वं भावाः स्वसारः स्वयमेव सरः

णाः अग्रुवः नदीनामैतत्॥ कारगंगाद्याः प्रसिद्धाः सप्त नद्यः संति ताः हे दृहतव आविषं विजभ्रिरे विशेषेण हरत॥ तत्र दृष्टांतः॥
उदकं कुंभिनीः कुंभिन्यः कुंभवत्यः कुंभवंत ज्ञारिण्यः इव ता यथा तध रंतितद्वत्र पामृत्यं च प्रभृतं हरत॥ ॥अथ पंचदशी॥ ॥
इयत्तकः कुंभकं बभ्रुः रुद्रसि भवतिविलिखतावतालिसर्पाणां कुत्सितं शकुभयितामिय हीनाकुपुंभकोनकुलः सते विषं हरतु तिद्गायः
यदि न तथा स करोति तर्हि कुत्सितं तं नकुलं अश्मनाभिन द्विविदारयामि विषतिहरणप्रयोगया च द्विपाणगमनं पाषाणमनुतिष
ति ताद्विदः तद्विदमाश्रोमंतनः एवं प्रयोगसतिविपं प्रवारते विषादृता दूद्गाद्विषं प्रवर्ततो निर्गच्छतकाः प्रतिकुच्यते परान्चीः परागं
चनवतीः अतिदूरगाः सविभागः बताद्दिशोऽनुलक्ष्यीकृत्य दिगंतं प्रतिगच्छतु गनमां प्रति गच्छतिवित्यर्थः॥ अध्यायोपाकरणसर्ग
योकुपुंभकस्य शिवाशिवनियुक्ता दृश्विसकं जुहोतीत्यपक्रम्य कुपुंभकास्तदं प्रवर्ता इति सूत्रितत्वात्॥ ॥षोडशी॥ ॥कुपुंभक
स्तदब्रवीद्गिरेः प्रवर्तमानकः॥ वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषं॥ ॥एवं महानुभावेनागस्त्यमहर्षिणोच्यमाने सति गिरेः
सकाशात् जलपर्वतमानकः प्रवर्तमानो ऽतिशीघ्रमभिगच्छन् कुपुंभकान् कुलः तदब्रवीत् तद्वाक्यमाचख्यौ किं तदिति उच्यते वृश्चि
कस्येनद्विषं अरसं असारं बाधकं न भवतीत्यर्थः॥ तथा लोकोऽपि सर्पदृष्ट मपि कश्यादिरसायनमेव अतो न बाध इति हितदनिरवन
भिवचनेन सोऽपि निर्विषा भवत अथ वृश्चिकं प्रति नकुल आह हे वृश्चिक ते विषमरसं अतस्तत्र पापं किं करिष्यति तस्मात् परिहरेति यदे
व मायाविनं तदा प्रभृति वृश्चिकविषमसारमभवत् एवा विषानिर्हरण्युपनिषत्॥ ॥इति द्वितीयस्य पंचमे षोडशो वर्गः॥ ७ ॥
इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे द्वितीयाष्टके प्रथमे मंडले चतुर्विंशोऽनुवाकः॥ ॥ इति सायणाचार्यः॥ प्रथमं मंडलं
च॥ ज्ञातर्चिनां प्रथमं मंडलं व्याख्यानं॥ अथ द्वितीयं मंडलं व्याख्यायते त्वमग्ने द्युभिरित्यादिकं द्वितीयं मंडलं चत्वारोऽनुवाकाः तेषु प्र
थमेऽनुवाके एकादश सूक्तानि तत्र त्वमग्ने द्युभिरिति षोडशर्चं प्रथमं सूक्तं॥ मंडलद्रष्टा गृत्समद ऋषिः स च पूर्वमांगिरसकुले शुनहोत्र
स्य पुत्रः सन् यज्ञकाले असुरैर्गृहीतः इंद्रेण मोचितः पश्चात् तेनैव वचनेन भृगुकुले शुनकपुत्रो गृत्समदनामाभवत् तथा चानुक्रमणिकायां आं
गिरसः शौनहोत्रो भूत्वा भार्गवः शौनको भवत् स गृत्समदो द्वितीयं मंडलमपश्यदिति। तथा तस्यैव शौनकस्य वचनमप्यनुक्रमणे॥
त्वमग्न इति गृत्समदः शौनको भृगुतां गतः॥ शौनहोत्रः प्रकृत्या तु य आंगिरस उच्यत इति॥ तन्मंडलद्रष्टा शौनको गृत्समद ऋषिः॥
जगती छंदः मंडलादि परिभाषया आग्नेयं॥ अत्रानुक्रमणिका॥ त्वमग्ने जागतं त्विति॥ ॥तत्र प्रथमा॥ ॥त्वमग्ने द्युभिस्त्वमाशुशुक्ष
णिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥ ॥हे अग्ने अग्रणीत्वादिगुणविशिष्ट नृणां
नृपते नृणां मनुष्याणां मध्ये नयः पारः संततिपालिकायां पालयितः यद्वा भार्याभ्यां पदाभ्यां बहुत्वं नित्यस्वामित्वं च प्रतिपाद्यते सर्वेषाम
पि नराणां नित्यपालक इत्यर्थः नृणामित्यस्य नि घाताभावः छांदसः तादृश हे देव त्वं द्युभिर्यागादिवसैः निर्मितं भूत्वा जायसे यागार्थम
थने नोत्पद्यत इत्यर्थः॥ यद्वा तादृशादिवसैः सहितो जायसे तत्र यागदिवसे प्रसिद्धो भवसीत्यर्थः॥ तथा त्वमाशुशुक्षणिः जाय
से आसमंतात् दीप्यमानो भवसि आङि उपपदे शुचिदीप्तावित्येतस्य छांदसं सिद्धरूपं॥ यद्वा आशुशीघ्रं शुचदीप्तः सन्नुपतः स सद्यत

171
1914

भा॰ अ॰ २ इति आशुशुक्षणिः शीघ्रं शोषकः सन्नोतिर्दर्शनानिति यद्वा आहादिलेनेश्शुशुक्षणिः तादृशो भवसि एवं सर्वत्र प्रतिविशेषणं जायस इति योज्यं हे अग्ने त्वं अ॰ ५
अद्भ्यः रस्युदकेभ्यो जायसे विद्युद्रूपेण वाडवरूपेण वा समुद्रादिकेभ्यः अश्मनः पाषाणात्परिजायसे यो अस्मनि तरंग्नि
९३ नानि दिह मंथनेन त्वं वनेभ्यः वृक्षादिसमूहेभ्यो दावरूपेण युध्मोषधीभ्यः वैश्वानररूपेण एवं महानुभावेन त्वं मथनेनास्यंश्च सनु
सर्वान्मका भवसीत्यर्थः ॥ शुचिः इत्यस्य शुद्धादिरूपो जायस इत्यर्थः ॥ अत्र त्वमग्ने द्युभिरहाभिरित्यग्निर्तमनुसंधेयं ॥
॥ ॥अथद्वितीया॥ ॥तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः॥ तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च
नो दमे॥ ॥हे अग्ने होत्रं होतुः कर्म ऋत्विजाद्याहिलक्षणं मृदुरिनिर्दृपितवित्यर्थः मित्यर्थः तथा पोत्रं कर्म यदृत्विज दृपितवेषन
थाकुविचिर्यं यासकालमार्त्विजं तव वेत्ते नेष्ट्रं नेष्टुः कर्म प्रस्तितयावाद्वामित आग्नीध्र त्वमेवासि तथा तनायंतायन्मिच्छतसर्वे यमः
ग्नान्संयत प्रशास्त्रमेवावरुणस्य कर्म तत हे अग्ने त्वमध्वरीयसि अध्वरं यज्ञं कामयसे अध्वर्युर्भवसीत्यर्थः॥ तथाध्वर्युशब्दस्युत्पत्तेः।
अध्वर्युरध्वरं कामयत इतिवत्तिद्दिनिरुक्तं तथा ब्रह्मा च ब्राह्मणाच्छंस्यप्यसि तथा नोऽस्माकं दमे गृहे गृहपतिश्चासीति॥ ॥अथ तृतीया॥ ॥
त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः॥ त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या॥ ॥हे अग्ने त्वं सतां सतां
वृषभो वर्षितासि भवन इंद्रो भिवृद्धो सतां साधूनां इंद्रोसि कामानां वर्षितासि त्वं विष्णुरसि यत उरुगायः बहुभिर्गीयमानो नमस्कार्यश्च भव
सि हे ब्रह्मणस्पते परिवृढस्य कर्मणो मंत्रस्य वा पालयितस्त्वं यतः रयिवित् गवादिधनस्य वेत्ता अतो ब्रह्मासि हे विधर्तः विविधकारक
वेधानू रुपान्पुरंध्या बहु प्रकारया बुध्या सचसे समवेतोसि सर्वदा बुध्या संयुतस इत्यर्थः॥ ॥अथ चतुर्थी॥ ॥त्वमग्ने राजा वरुणो
धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः॥ त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः॥ ॥हे अग्ने त्वं यतो धृतव्रतः धारि
तकर्मासि अतो वरुणो राजासि यतो दस्मः शत्रूणामुपक्षयिता ईड्यः स्तुत्यश्च अतो मित्रः एतन्नामको देवोसि यतः सत्पतिः सतामभिमत
प्रदानेन पालयिता अतः अर्यमा भवसि दातत्वं चार्यम्णो लिंगं अर्यमेति तमाहुर्यो ददातीति यस्यार्यम्णो दानं संभुजं व्यापकं भव
ति यद्वा यस्य धनं संभुजं संभोगाय साधु गृहीतॄणां तथा त्वमंशः सूर्यमूर्त्यंतरभूतः एतन्नामको देवोसि तादृशो हे देव विदथे स्म
दीये यज्ञे भाजयुः फलानां भाजयिता प्रापयितासि॥ ॥अथ पंचमी॥ ॥त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजा
त्यं॥ त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः॥ ॥हे अग्ने त्वष्टा फलस्य साधु संपादयिता त्वं विधते परिचरते जनाय सु
वीर्यं शोभनवीर्यं धनं तनं धेनुर्भवसि आवा स्तुतिवाचः सतिन त्वत्स्वभूताः हे मित्रमहः हितकारितेजः प्रभूतधन त्वं नरा नरा
णां सजात्यं अस्माकं बाधवं भजत इत्यर्थः॥ हे अग्ने आशुहेमा अश्वप्रेरयिता त्वं स्वश्व्यं शोभनाश्वसमूहोपेतं फलं ररिषे ददासि हे ९३
अग्ने पुरुवसुः प्रभूतधनस्त्वं नरा नराणां शर्धो बलरूपो भवसि॥ ॥इति द्वितीयस्य पंचमे सप्तदशो वर्गः॥ ॥अथ षष्ठी॥ त्वमग्ने रु
द्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे॥ त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना॥ ॥हे अग्ने त्वं महो दिवो मह
तो फलाकाल॥ उपलक्षणमेतत् लोकत्रयस्य असुरः शत्रूणां निरसिता रुद्रोसि रुद्रः दुःखं दुःखहेतुर्वा पापादिः तस्य द्रावयिता

एतन्नामको देवोसि रुद्रो वा एष यदग्निरित्यादि मंत्रे रुद्रशब्देनाग्निरुक्तः रुद्र इति व्युत्पत्त्या नराणां दुःखेः पतिष्वंतीति रुद्राद्वशोसि 173/1914
रुद्रो रोदयतीति मत इति हेतिर उक्तं तथा मारुतं शर्धो बलं तस्य द्यौस्तथा आदित्यरूपश्च त्वमसि अग्ने द्युलोक सर्वं असुर
त्वमुत प्रादिवो असुरो यमन्नत्यादित्य तथा मारुतं मरुतां मरुत्संबंधि बलमसि वायुरूपश्च त्वमसीत्यर्थः॥ एवमग्न्यादित्यवायुरूप
त्वं पृक्षः अन्नस्य हविर्लक्षणस्य त्वमीशिषे ईशिषे ईश्वरो भव॥ यति अस्मद्वनस्मात्त्ववान्वायुसदृशः अरुणैररुणवर्णैः शंगयः
सुखं गृहरूपः आवासभूतः सन् यासि प्राप्नोषि यागस्थलं यद्वा अरणेर्गमनशीलैर्वातैर्वायुभिः स्यंनः सह यासि वन तथा त्वं पूषा सर्व
स्य पोषकः सन् नु क्षिप्रं त्मना आत्मना अनुग्रहरूपया स्वबुध्या विधतः परिचरतो यजमानान् पासि॥ ॥अथ सप्तमी॥ ॥त्वमग्ने द्र
विणोदा अरंकृते त्वं देवः सविता रत्नधा असि॥ त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेविधत्॥ ॥हे अग्ने त्वं अरंकृते त्वामलंकुर्वते
यजमानाय द्रविणोदाः हिरण्यस्य दातासि देवो द्योतमानः सविता सर्वस्य सकर्मसि प्रेरकस्त्वं रत्नधा रमणीयानां धनानां मणिमुक्ता
दीनां धारयितासि तथा हे नृपते नृणां पालक अग्ने त्वं भगो भजनीयः सन् वस्वो वसुनो धनस्य ईशिषे समर्थो भवसि दमे यो यजमाना
दमे यज्ञगृहे त्वां अविधत् परिचरति तस्य पायुः पालकस्त्वमसि॥ ॥अथाष्टमी॥ ॥त्वमग्ने दम आ विश्पतिं विशस्त्वां राजानं सुवि
दत्रमृंजते॥ त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति॥ ॥हे अग्ने विश्पतिं यजमानानां पालकं त्वां विशः यजमानाः दमे
स्वकीये यज्ञगृहे आसादयंति उपसर्गवशात् धात्वर्थक्रियाध्याहारः तथा त्वां राजानं दीप्यमानं सुविदत्रं शोभनज्ञानं अस्मदनुकूलचेत
सं ऋंजते प्रसाधयंति ऋंजतिः प्रसाधनकर्मेति यास्कः यत एवं तो हे स्वनीक शोभनज्वालारूपसेन त्वं विश्वानि सर्वाणि द
वीर्याणि त्वं पत्यसे पत्यर्थीकृत्य विश्वासां दिवि धामास्य सामपुरोडाशादीनां पत्यसे ईश्वरो भवसि ईश्वरकामनात उरत्यति पत्यत इति तं
धामकपाठानयद्वापृति भावमाचरसि त्वं सहस्राणि शतानि दश एतत्संख्याकानि प्रति एतत्संख्याकाना मभिमतसाधना
नां प्रतिनिधिरित्यर्थः प्रतिः प्रतिनिधिप्रतिकृतयारिति कर्मप्रवचनीयत्वं तेर्यत्फलं भवति तत्त्वया लभ्यत इत्यर्थः॥ ॥अथ नवमी॥
त्वमग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचं॥ त्वं पुत्रो भवसि यस्तेविधत्त्वं सखा सुशेवः पास्याधृषः॥ ॥हे अग्ने पितरं पाल
कं त्वां नरो नेतारो यजमाना इष्टिभिरेषणसाधनैर्यागैर्यजंत इति शेषः पितृवत्पालनाय यजंत इत्यर्थः तथा तनूरुचं शरीराणां दीपकं
शरीरेषु दीप्यमानं वैश्वानरात्मना त्वां भ्रात्राय साभ्रात्राय शम्या कर्मनामैतत् कर्मणा यजंत इति शेषः॥ यद्वा भव्यत्र वक्ष्यमाणनावि
धत्त्वेनेन संबंधः हे अग्ने यो नरस्ते त्वां अविधत् परिचरति तस्य त्वं पुत्रो भवसि पुत्रवत्पालयिता भवसि तथा त्वं सखा समानख्या
नः सखिवद्धितकारी सुशेवः सुखयिता सुखनामैतत् सुखकारी सन् आधृषः आधर्षकान्पापरसि पितृत्वकामाय पितृत्वं भ्रातृ
त्वकामाय भ्रातृत्वं पुत्रत्वकाय पुत्रत्वं सखित्वाय सखा भवसि त्रिप्रकारेण रक्षसीत्यर्थः॥ ॥अथ दशमी॥ ॥त्वमग्ने ऋभुराके नमस्यस्त्वं वा
जस्य क्षुमतो राय ईशिषे॥ त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥ ॥हे अग्ने त्वं ऋभुरुरु भासमानो महान्वा आके
अंतिके संनिधावेव नमस्यो नमस्कार्योस्तु य इत्यर्थः॥ इतरदेवता वन्मंत्रप्रतिपाद्यत्वाकारेण स्तुत्यो न भवसि किंतु प्रत्यक्ष इत्यर्थः॥

तथात्वं क्षमतः वाजवतः सर्वत्र श्रूयमाणस्य वाजस्यान्नस्य तथा धनस्य च ईशिषे स्वामी भवसि अतस्त्वं ईडे इत्यर्थः ॥ हे अग्ने त्वं विभासि विशेषेण अ०५
भा०अ०२ दीप्यसे तदर्थमनुक्रमेणैव धक्षि दहसि काष्ठादीन् दह्यांसि रूपं संहितायां भव भा वा भावश्छांदसः किमर्थं तत्र दाव नेष्ठेदनायां
धकारस्य च ढकारविषादान्वेनेयजमानाय नाकिंचित् यज्ञविशिष्टः विशेषेण शिक्षयिता साधयिता असि न को अप्य यति चध्यानिपधः
०२ । तथा आनतिः फलस्य सर्वत्र विस्तारयिता ॥ ॥ इति द्वितीयस्य पंचमे द्वादशो वर्गः ॥ ॥ अथैकादशी ॥ त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा
भारती वर्धसे गिरा ॥ त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥ ॥ हे अग्ने देव त्वं दाशुषे हविर्दत्तवते यजमानाय अदितिः
त्वं दुग्धिता परिपालयिता असि यद्वा अदीना भूमिरसि किंच त्वं होत्रा होमनिष्पादिका भारती भरतस्यादित्यस्यादित्यस्य संबंधिनी रश्मिरूपा असि
तां गिरा स्तुत्या वर्धसे प्रवृद्धो भवसि किंच त्वं शतहिमा हिमशब्दः कालोपलक्षकः अपरिमितकालान्नित्या इळा भूमिरसि ता दक्षसे
दानाय समर्थो भवसि तथा उत वृत्रहा वृत्रघातः तथा हे वसुपते धनपालक त्वं हाघापादहंता त्वं सरस्वती सरणवान् वायुः तत्संबंधिनी एतानि
या मध्यमा माध्यमिका असि आदित्यादित्यानां संबंधिन्या भारत्या सरस्वत्यास्या याजिह्वादेव्यः संति ता अपि त्वमेवेत्यर्थः ॥ ॥ अथ द्वादशी ॥
त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ॥ त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ ॥ हे अग्ने त्वं सुभृतः
सम्यक् पोषितः सन् उत्तमं निरतिशयं वयः अपत्यं अन्नमायुष्यं वा त्वमसि संपादकोसीत्यर्थः ॥ तथा तव स्पार्हे स्पृहणीये वर्णे लोहितशुक्लादिल
क्षणे संदृशि सम्यग्दर्शने श्रियः संपदः वर्णिकांत यो वा आश्रित्य वर्तंते उपसर्गश्रुतेर्योग्यक्रियाध्याहारः किंच त्वं वाजः अन्नं तत्साधकत्वा
तादृश्यं अन्नसाधकमित्यर्थः ॥ प्रतरणाः प्रतारयिता पापात् अत एव बृहन् महान् असि तथा त्वं रयिर्धनं पोषि बहुलः सर्वविषयबाहुल्या
पत्तः विश्वतः पृथुः विस्तीर्णः प्रख्यात इत्यर्थः ॥ ॥ अथ त्रयोदशी ॥ ॥ त्वमग्न आदित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे ॥ त्वां राति
षाचो अध्वरेषु सश्चिरे त्वे देवा हविरदंत्याहुतं ॥ ॥ हे अग्ने त्वां आदित्यासः अदितेः पुत्रा इंद्रादयः आस्यं स्वकीयं मुखं भक्षणपानादि
साधनं चक्रिरे इति वक्ष्यमाणेन संबंधः तथा हे कवे क्रांतप्रज्ञ मेधावि शुचयः शुद्धा आदित्या वा देवा जिह्वां स्वकीयां जिह्वां आस्वाद
नसाधनं चक्रिरे त्वन्मुखेनैव भक्षयंति त्वज्जिह्वयैवास्वादयंतीत्यर्थः ॥ तथा त्वामेव रातिषाचः रातिर्दानं दत्तं हविः तत्सहिता धनं वा ता
न समवेता देवा अध्वरेषु यज्ञेषु सश्चिरे सेवंते त्वामेव प्रतीक्षंते विना त्वया स्वयं हविर्भक्षणायोगात् एवं कृत्वा त्वयि देवाः सर्वे
आहुतं सर्वतो हुतं हविरदंति भक्षयंति एवं सर्वदेवोपकारिणां महानुभावं स्तौमीत्यर्थः ॥ ॥ अथ चतुर्दशी ॥ ॥ त्वे अग्ने वि
श्वे अमृतासो अद्रुह आसा देवा हविरदंत्याहुतं ॥ त्वया मर्तासः स्वदंत आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥ ॥ हे अग्ने त्वयि वि
श्वे सर्वे अमृतासः अमरणधर्माणः अद्रुहः अद्रोग्धारो देवा आसा त्वदीयेनास्येन आहुतं हविरदंति भक्षयंति अस्य आस्य
तृतीयैकवचने पदत्वाभावात् आसिस्यादिना आसैनादेशः ॥ इति दंपदादीति विभक्तौ वृद्धत्वं तथा मर्ता मनुष्या अपि त्वया साधनभू ५४
तेन आसुतिं रसरूपं अन्नादिकं स्वदंते आस्वादयंति त्वमेव वीरुधां लतादीनां गर्भः गर्भस्थानीयः तेषां मध्ये वस्थानात्त्व
म् सर्वेषां निवासभूतः सन् जज्ञिषे उत्पद्यसे स्म शुचिः ॥ ॥ अथ पंचदशी ॥ ॥ त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सु

जात प्र च देव रिच्यसे ॥ पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ ॥ हे अग्ने त्वं मज्मना बलेन तान् प्रसिद्धान् देवान् संगच्छते: 175/1914
सहितो भवसि तथा समर्थेन प्रति वासि त्वत्कृतैर्विभिन्नैः प्रतिनिधिभिर्वा भवसि प्रतिरूपो भवसि सहितो भवसि वियुक्तश्च भव
सीत्यर्थः ॥ हे सुजात शोभनजन्मन् प्रसहित मथनेनोत्पन्न वा हे अग्ने सुजन्म त्वं तादृशान् देवान् प्ररिच्यसे च अतिबलेन वाधिको भवसि
आधिक्ये कारणमुच्यते यस्मात् अत्राग्नौ यज्ञे पृक्षः सर्वभक्ष्यं अन्नं भूत्वा यजमानद्रव्यं तेनैव विभवत समर्थं भवति महिना माहा
त्म्येन यत्त्वां महत्त्वं अस्ति अनुतिष्ठंतीत्यर्थः ॥ कुलेन दुष्टतरा दसीस्व निरालम्ब भाव उभे द्यावापृथिव्यावनु तत्प्रतितया मध्ये व्याप्य
त्यर्थः त्वयि हुतं मन्त्रवत्स्वत्सुत्वं लोकत्रयं व्याप्तमित्यर्थः ॥ ॥ अथ षोडशी ॥ ॥ ये स्तोतृभ्यो गो अग्रामश्वपेशसमग्ने रातिमु
पसृजंति सूरयः ॥ अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ ॥ अनया होता स्वात्मनि निगमव्याजेनाभिमतमाशा
स्ते हे अग्ने सूरयो मेधाविनः प्रेरयितारो वा यजमानाः स्तोतृभ्यः स्तुतिकर्तृभ्यो गोअग्रां गावो अग्रगा मुख्या यस्यास्तादृशीं गोप्रमु
खां अश्वपेशसं पेशसि रूपनाम अश्वैर्निरूपणीयां एतद्द्वयं प्राधान्याभिप्रायं गोभिरश्वैश्चाश्वितां दक्षिणापरिगण
नेषु गवाश्वयोः प्राधान्यात् तादृशीं रातिं उपसृजंति ददति तान् यजमानान् अस्मांश्च स्तोतॄन् वस्यो वसीयः श्रेष्ठं स्वर्गादिस्थानं आ सर्वतः
प्रणेषि प्रकर्षेण नयसि खलु नयत्यर्थः हि प्रसिद्धौ वयं च सुवीराः शोभनपुत्रादिसहिताः विदथे यज्ञे बृहत् महत् मंत्रजातं
वदेम उच्चारयामः स्तुमहीत्यर्थः ॥ ॥ इति द्वितीयस्य पंचमे एकोनविंशो वर्गः ॥ ॥ यज्ञेन वर्धतेति त्रयोदशर्चं द्वितीयं सूक्तं मंड
लद्रष्टुः गृत्समदस्यार्षं दशाद्या जगत्य इति परिभाषयाग्नेयं न च्छंदानकं आदिदमपि जागतं ॥ यज्ञेन सप्तान्त्ये त्वनुक्रांतं प्रारंत
नु था काश्चिन शस्त्रया जर्ग तत्र छंदस्य स्यविनियोगः ॥ सूत्रं तु पूर्वसूक्ते एवोक्तं तथा चतुर्विंशिके तृतीयसवने जातवेदस्यनिवि
धानीयमिदं सूक्तं वर्धनेत्याग्निमारुतमिति सूत्रितत्वात् षळहाभिप्लवषळहयोस्तृतीये हन्यपि जातवेदस्यनिविद्धानीयमि
दं ॥ चातुर्विंशिकं तृतीयसवनमिति चतुर्विंशादतिदिष्टत्वात् ॥ ॥ तत्र प्रथमा ॥ ॥ यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा
तना गिरा ॥ समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदं ॥ ॥ हे यजमानाः ऋत्विजो वा यूयं जातवेदसं जातानां वेदिता
रं जातधनं जातप्रज्ञं वाग्निं यज्ञेन यागेन वर्धत प्रवर्धत सामान्येनोक्त्वा विशेषेणाह ॥ हविषा चरुपुरोडाशादिना तना विस्तृतया
गिरा स्तुत्या च यजध्वं पूजयध्वं कीदृशं समिधानं समिध्यमानं सुप्रयसं शोभनान्नं स्वर्णरं स्वर्गे नेतारं यजमानानां स्यता
दृशं यद्वा स्वरिति सर्वपर्यायः स्तुतीनां नेतारः स्तोतारः बहुस्तोतारमित्यर्थः ॥ द्युक्षं दीप्तिनिवासिनं वा होतारं होमसंपादकं वृज
नेषु बलेषु धूर्षदं बलस्य कर्तारमित्यर्थः ॥ अग्निपात्रवसतिशायां भवतीति प्रसिद्धं ॥ ॥ अथ द्वितीया ॥ ॥ अभि त्वा नक्तीरुषसो
ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ॥ दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥ ॥ हे अग्ने त्वां अभि प्रति नक्तीः
रात्रीः उषसः अहानि सर्वाणि रात्रिषु सर्वेषु अहःसु यद्वा नक्ता उषः सायंकालं लक्षयति सायं प्रातरग्निहोत्रस्य सद्भावात् सर्वेषु का
लेषु सायं प्रातः कालेषु वाववाशिरे आकांक्षते यजमानायर्त्विजः अहानि रात्रयश्च त्वामेव होमकामयते होतुं कालेकर्मणश्चा

भा॰ अ॰२ दनात कालानां कामनं उपचर्यंते॥ तत्र दृष्टांतः॥ स्वसरेषु स्वयं सरणशीलेषु दुः सरवसरणाधिकरणेषु गोष्ठेषु वधेन वोवत्सं न वत्सः अ॰५
मिव वंचेव पुरवारवं इभिर्वरणीयग्नेसंयतानियतस्त्वं दिव इव द्युलोकस्येव अरतिः व्याप्तोभिलितः तत्रत्यानां देवानां हविः प्रदानाये
९७ व समर्थः व्याप्त इत्यर्थः॥ मानुषा मनुष्याणां यजमानानां संबंधीनि युगा युगानि युगशब्दः कालोपलक्षकः प्रातरादिसवनानि सर्वेषु स
वनेषु भवत्यंन संयागादिनीयाद्धेणरात्रीः सर्वासु रात्रिष्वपि आभासितं मंतादीप्यसे॥ ॥ अथ तृतीया॥ ॥ देवास्तं देवा बुध्ने रजसः
सुदंससं दिवस्पृथिव्योररतिं न्येरिरे॥ रथमिव मघं शक्रं गाचिषमग्निं मित्रं न क्षितिषु प्रशंस्यं॥ तं प्रसिद्धमुक्तगुणविशिष्टमग्निं देवाः
प्रसिध्याप्याव हर्तारः कविजा वारजसो रंजनात्मकस्य लोकस्य बुध्ने मूले पृथिव्यां वेघामित्यर्थः॥ तत्रन्येरिरे नितरामीरयंति व्यापार
यंति स्वस्व हविर्भिभायकल्विपक्षे स्तोत्रादिना नितरां गच्छंति भजंते कीदृशमित्याह सुदंससं शोभनदर्शनं दिवस्पृथिव्योः द्यावापृ
थिव्योः अरतिं ईश्वरं गंतारं व्याप्तं वा वघंव दोधनं तस्मै हितं रथमिव रथं यथा स्तोभीमतला भायाश्च यंनेन इत्तयद्वारयमिव प्राप्तिसा
धनत्वेन वर्तमानं वघं वशिनस्यं शक्रं शोचिषं दीप्तवर्णं अग्निं मित्रं न रवत्कार्यसाधकं यद्वा आदित्यमिव क्षितिषु यागभूमिषु मनुष्ये
षु वा प्रशस्यं प्रशंसेणन्यस्यं वंमज्जनभावमग्निं न्येरिरे इति॥ ॥ अथ चतुर्थी॥ ॥ तमुक्षमाणं रजसि स्व आ दमे चंद्रमिव सुरुचं ह्वार आ
दधुः॥ पृश्न्याः पतरं चितयंतमक्षभिः पाथो न पायुं जनसी उभे अनु॥ तमुक्षमाणं रजसि रजसि रंजके स्वे आ दमे रक्ष्ये गृहे वा पृ
थिव्यां च घाणनाशिना आसिंच्यमानं वा स्वस्य कीयस्थ विज्ञेन देवयागगृहे आदधुः आदधतं कीदृशं तं चंद्रमिव सुरुचं द्रुमिति हिरण्यना
म हिरण्यमिव शोभनदीप्तिं पृश्न्याः प्रकाशवर्णायाः पृश्न्याः पतरं द्युलोकस्यांतरिक्षस्य गंतारं अक्षभिः स्वकीयज्वालारूपैः अवयवैः चि
तयंतं चेतयमानं पाथो न पाथुं उदकमिव रक्षकं उभे जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यावनुव्याप्तं भूम्यां होमाधारत्वेन स्थितत्वाद्धविः
प्रापणाय द्युलोकगामिनमित्यर्थः अतिभावः एवं रूपमग्निमादधते॥ ॥ अथ पंचमी॥ ॥ स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष
ऋंजते गिरा॥ हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु॥ ॥ सोग्निर्होता होमनिष्पादकः सन् विश्वं सर्वमध्वरं
यागं परिभूतु परितो भवतु तमुतमु वाग्निं हव्यैर्हविर्भिः गिरा स्तुत्या च सनुषो मनुष्या ऋंजते प्रसाधयंति ऋंजतिः प्रसाधनकर्मा। हरि
शिप्रो हरणशील हनुः दीप्तोष्णीषो वा शिप्राः शीर्षमुचिता हिरण्ययशिप्र इत्यादि मंत्रांतरात वृधसानासु प्रवर्धमानास्वोषधीषु ज्वा
लासु वा जर्भुरत पूर्यमाणा यहुगंतानां तं तपसं यहुरितीयार्थे सप्तमी॥ वर्धमाना ओषधीर्जर्भुरत पुनः पुनर्दहन्नित्यर्थः॥ द्यौर्द्यु
लोके रश्मिस्तृभिरिव नक्षत्रैरिव रोदसी अनु द्यावापृथिव्यावनुचितयत चेतयति ज्वालाभिर्विस्फुलिंगैश्च भुवमंतरिक्षं च व्याप्नोतीत्य
र्थः॥ इति द्वितीयस्य पंचमे विंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ स नो रेवत्समिधानः स्वस्तये संददस्वान् रयिमस्मासु दीदिहि॥ आ नः कृणु
ष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये॥ ॥ हे अग्ने स तादृशस्त्वं नोस्माकं स्वस्तये स्वस्त्यविनाशिनाम समायरेवत रयिं धनं ९७
उपर्युपरि शोभमत दानयोग्यं बाधनं अस्मासु संददस्वान सम्यक्प्रयच्छन् समिधानोस्माभिः सम्यगिध्यमानः सन् दीदिहि दीप्यस्व
यद्वा रेवदिति क्रियाविशेषणं राधनं समृद्धिमत यथा तथा दीप्यस्वेति तथाभूतः सन् नोस्मभ्यं सुविताय सुहिताय शोभनफलाय रो
दसी द्यावापृथिव्यावाकृणुष्व सर्वतः कुरुष्व उभौ लोकौ भोगप्रदौ कुर्वित्यर्थः॥ किमर्थमितिनदुच्यते हे देवाग्ने मनुषो मनुष्यस्य यजमानस्य मम 177/1914
संबंधीनी हव्या हवींषि वितये देवेभ्यो भक्षणाय पुनः पुनर्यागाद्यनुष्ठानायेत्यर्थः॥ ॥ अथ सप्तमी॥ ॥ दा नो अग्ने बृहतो दाः सहस्रिणो
दुरो न वाजं श्रुत्या अपा वृधि॥ प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतः॥ ॥ हे अग्ने नोस्मभ्यं बृहतो महतः प्रभूतान् गवा
श्वादिधनविशेषान् दाः देहि तथा सहस्रिणः सहस्रसंख्योपेतान् पुत्रभृत्यादीन् दाः देहि दाः दानभक्षाद्दसे॥ लुङि रूपं धात्वंमेदादनेघातः
श्रुत्ये कीर्त्ये वाजमन्नं दुरो न तस्य द्वाराण्यपि न श्रवस्थार्थं प्रादयार्थव्यवसायेन व्यवहरंति अपावृधि अपवृणु प्रेरयेत्यर्थः यद्वा द्वाराणी
व तत्प्राप्त्युपायान् विशदयति तदर्थं द्यावापृथिवी ब्रह्मणा परिवृढेन कर्मणा प्राची प्रकर्षेणांचने अस्मदनुकूले कृधि कुरु स्वर्ण आदित्य इव सम
थाजगत्प्रकाशयति तद्वत्शुक्रं दीप्तं त्वामुषसः उषः कालाविदिपु तवि घोतयंति उषः काले ह्यग्नयः प्रज्वाल्यंते॥ ॥ अथाष्टमी॥ ॥ स
इधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना॥ होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे॥ सोग्निः राम्या रमण हेतु
भूताः उषसः अनु अनुलक्ष्य इधानः इध्यमानः दीपितः सन् अरुषेण गच्छमानेन भानुना तेजसा स्वर्ण आदित्य इव दीप्यते सोग्निर्मनु
षः मनुष्यस्य होतुः होत्राभिर्होत्रेति वाङ्नाम होमसाधनभूताभिः स्तूयमानः स्वध्वरः शोभनयागो विशां प्रजानां राजा राजमानः स्वामीः
अथ च मनुष्याय यजमानायतदर्थं चारुः चरणशीलः अतिथिवत्पूज्यो भवति॥ ॥ अथ नवमी॥ ॥ एवा नो अग्ने अमृतेषु पूर्व्य धीष्पी
पाय बृहद्दिवेषु मानुषा॥ दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि॥ ॥ बृहद्दिवेषु प्रभूतद्युतिषु अमृतेषु मध्ये हे पूर्व्यभा
विन्नग्ने त्वा मनुष्याणां मध्ये नास्मदीया धीर्बुद्धिः स्तुतिकर्मवा एवमेवं पीपाय प्यायय तियहुगमानुषा मनुष्यानु धीस्वदीया बुद्धिः कर्मणाप्या
ययतु तयात्वदीयाधीः यजनेषु यज्ञेषु कारवे स्तोत्रे दुहाना धेनुः दोग्ध्री धेनुरिव लुप्तोपममेतत्त्मना आत्मनैव इषणि यषए घां सत्या शाति
नां अपरिमितसंख्याकं पुरुरूपं गवाश्वादिरूपेण नानारूपं धनं समृद्धं दुहाना भवति॥ ॥ अथ दशमी॥ ॥ वयमग्ने अर्वता वा सुवीर्यं ब्रह्म
णा वा चितयेमा जनाँ अति॥ अस्माकं द्युम्नमधि पंच कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरं॥ ॥ हे अग्ने वयं यजमानाः सुवीर्यं शोभनसामर्थ्योपे
तं यथा तथा अर्वता वा अरणकुशलेनाश्वेन वा शब्दश्चार्थे ब्रह्मणा वा अंनेन च त्वद्दत्तेन जनानस्मत्समानान् अति चितयेम अतिक्रम्य ज्ञायमहि
कर्मणि कर्तृप्रत्ययः यद्वा त्वद्दत्तेनाश्वेनान्नेन च सुवीर्यं चितयेम प्रकाशयेम तदर्थमस्माकं पंच पंचसु कृष्टिषु जनेषु निषादपंचमेषु चतुर्षु व
र्णेषु उच्चा उच्चैः अतिप्रभूतं दुस्तरं अन्येनाप्राप्तं द्युम्नं धनं स्वर्ण सूर्य इव अधिकं शुशुचीत दीप्यतां अधीत्ययमनर्थकोवा॥ ॥ अथैका
दशी॥ ॥ स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयंत सूरयः॥ यमग्ने यज्ञमुपयंति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे॥ ॥ हे
अग्ने सहस्य शत्रूणां अभिभवितः बलप्रभवो वा तादृशस्त्वं प्रशस्यः स्तुत्यः स त्वं नोस्मदीयं स्तोत्रादिकं बोधि बुध्यस्व सुइत्यकक इत्याह यस्मिन्नग्नौ
सुजाताः शोभनजनाः सूरयः स्तोतार ऋत्विजः इषयंत गमयंति स्तोत्राणि किं च हे अग्ने यज्ञं यजनीयं यं वाजिनो हविर्लक्षणान्नवंतो यजमाना
नित्ये तोके आत्मसपुत्रनिमित्तभूते सति यद्वा तस्मिन् यथा दीप्यते पुत्रस्तद्वत् यथा पिता दीप्यति तद्वत् स्वे दमे स्वकीये यागगृहे सवनीयादिस्थान
दीदिवांसं दीप्यमानमुपयंति हविः स्तोत्रादिना संबंधीत्यन्वयः॥ ॥ अथ द्वादशी॥ ॥ उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरय

ध्य शर्मणि॥ वक्ष्वोरायः पुरुश्चंद्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः॥ ॥हे जातवेदः आतानान् वितृतरश्मे स्तोतारस्त्वां स्तुवंत कृतिनः स
रयाम धारयेमा यजमानाश्च वयं भवासः उभे वयं शर्मणि सुखनिमित्तभूते सति तव संबंधिनः स्याम भवेम यद्वा तव शर्मणि स्याम त्वं च नोस्माकं च
९६ वानिवासहेतोर्वसिष्ठस्य रायो गवादिधनस्य पुरुश्चंद्रस्य अतिशयेनाल्हादकस्य बहुहिरण्योपेतस्य वा भूयसः प्रभूतस्य प्रजावतो भृत्याद्यु
पेतस्य पुत्रादिभोगपर्याप्तस्य वा स्वपत्यस्य शोभनपुत्रस्य ईदृग्रूपं धनं नोस्मभ्यं शग्धि देहि दातुं शक्तो भवसि॥ ॥ यस्त्वात् भ्य इति त्रयो
दशी व्याख्याता॥ ॥इति द्वितीयस्य पंचमे एकविंशो वर्गः॥ ॥ समिद्धो अग्निरित्येकादशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभं सप्तमी जगती।
समिधाग्निर्नराशंसं तनूनपादादय एकादशप्रयाजदेवताः समिद्ध एकादशाप्रं सप्तमी जगतीत्यनुक्रांतं पशौ शुनकानामिदमाप्रीसू
क्तं गृत्समदस्यापि शुनककुलत्वात् समिधा अग्निरिति शुनकानामिति हि सूत्रितं॥ ॥तत्र प्रथमा॥ ॥ समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् वि
श्वानि भुवनान्यस्थात्॥ होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन्॥ पृथिव्यां वेदिलक्षणायां समिद्धः सम्यग्दीप्तः एतन्नामकोग्निः
निहितः स्थापितः सन् विश्वानि सर्वाणि भुवनानि भूतजातानि प्रत्यङ् अभिमुखः सन् अस्थात् यद्वा सर्वजनाः पश्यंति तथा परस्तात् भवतीत्यर्थः
किंच सोग्निर्होता होमनिष्पादको देवानामाह्वाता वा पावकः शोधकः प्रदिवः पुराणः सुमेधाः शोभनप्रज्ञो देवो द्योतमानः एवं महानुभावो
ग्निः अर्हन् योग्यो योग्येभ्यः सन् देवान्यजतु अत्र यष्टव्यानिंद्रादीन् पूजयतु॥ ॥अथ द्वितीया॥ ॥नराशंसः प्रति धामान्यंजन् तिस्रो दिवः प्रति म
ह्ना स्वर्चिः॥ घृतप्रुषा मनसा हव्यमुंदन्मूर्धन्यज्ञस्य समनक्तु देवान्॥ ॥नराशंसः नरैर्नेतृभिः ऋत्विग्भिः शंसनीयः एतन्नामकोग्निः स्वर्चिः
शोभनज्वालः सन् धामानि स्थानानि आहुत्यधिकरणानि तत्तत्स्थानानि प्रतिप्रत्येकं महा स्वमहिम्ना अंजन् व्यक्तीकुर्वन् तिस्रो दिवः द्योतमानान्त्रीन् भू
म्यादिलोकांश्च प्रति प्रत्येकं अंजन् अतिशयेन व्याप्नुवन् प्रकाशेनांतरिक्षं हविः प्रापणेन द्युभूमी इत्यभिप्रायः यद्वा लोकानां प्रत्येकं त्रित्वोपेतत्वात् ति
स्रो दिव इत्युक्तं तिस्रो दिवः पृथिवीस्तिस्र इत्यादिमंत्रवर्णात् त्रयो वा इमे त्रिवृतो लोका इति ब्राह्मणाच्च॥ तथा घृतप्रुषा घृतसिंचता
मनसा हव्यं उदन् क्लेदयन् स्निग्धीकुर्वन् यज्ञस्य मूर्धन् मूर्धनि मुखे होमसमये देवान् यष्टव्यान् समनक्तु सम्यक् व्यक्तीकरोतु तर्पयत्वित्यर्थः
॥ ॥अथ तृतीया॥ ॥ ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य। स आ वह मरुतां शर्धो अच्युतमिंद्रं नरो बर्हिषदं यज
ध्वं॥ ॥हे अग्ने ईळितोस्माभिः स्तुतः सन् मनसा अस्मदनुग्रहबुद्ध्या नः यक्षि तमेव यजसि स तादृशो यष्टा त्वमावह आकारय कान् मरुतां शर्धो
गणं अच्युतमक्षीणमिंद्रं तद्विनाभूतमिंद्रमपि यद्वा मावि रस्मत्तोपेतमिंद्रं अनंतरं हे नरो नेतारः ऋत्विजो बर्हिषि सीदंतं तमिंद्रं यजध्वं पू
जयध्वं॥ ॥अथ चतुर्थी॥ ॥देव बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्यां। घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञि
यासः॥ ॥हे बर्हिः देव एतदभिमानिन् वर्धमानं सुवीरं शोभनवीरसंपादकं सुभरं सुपूर्णं अस्यां वेद्यां राये स्तीर्णं भव॥ किम
र्थं राये धनाय अस्यां वेद्यां सप्तम्यर्थे प्रथमा संहितायां यणादेशश्छांदसः घृतेनाज्येनाक्तमिदं स्निग्धं बर्हिः सीदत के हे वस
वः एतन्नामकाः हे विश्वे सर्वे देवाः हे आदित्याः यज्ञियासो यज्ञार्हा यूयमिदं बर्हिर्निषीदत अस्मिन्बर्हिषि निषीदतेत्यर्थः॥ ॥अथ ९६
पंचमी॥ ॥वि श्रयंतामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः॥ व्यचस्वतीर्वि प्रथंतामजुर्या वर्णं पुनाना यशसं सुवीरम्॥

द्वारो देवीः अग्ने द्वाराभिमानिन्यो विश्रयंतां विश्लिष्यंतां विवृतापिधाना भवंतु कीदृश्यस्ता उर्विया उर्व्यः महत्यः नमोभिर्नमस्कारोपेतैः स्तो
त्रैर्हूयमानाः सुप्रायणाः सुष्ठु प्रकर्षेण गंतव्याः ईदृश्यो द्वारो विश्रयंतां किंच व्यचस्वतीः व्याप्तिमत्यः अजुर्याः अहिंस्याः अजननायाः सुवीरं शो
भनपुत्रोपेतं यशसं यशस्विनं यशः पुनं वर्णं वर्णनीयं रूपविशेषं पुनानाः यजमानाय शोधयित्र्यः संपादयित्र्यः ईदृश्यो विप्रथंतां विशेषेण
प्रख्याता भवंतु॥ ॥इति द्वितीयस्य पंचमे द्वाविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते।
तंतुं ततं संवयंती समीची यज्ञस्य पेशः सुदुघे पयस्वती॥ ॥साधु साधूनि नोस्मदीयानि अपांसि कर्माण्युद्दिश्य सनता सनातनेन अवि
च्छिन्नप्रवृत्तिकेन त्वा वाहिना उक्षिते प्रवृद्धे यद्वा पुराणवाचिनः सनच्छब्दस्य व्यत्ययेन तस्य प्रथमाद्विवचनस्याकारः सनातने नित्ये इत्यर्थः
।अस्मिन् पक्षे उक्षिते फलस्य सेचयित्र्यौ वर्तेते निपातः उषासानक्ता अहोरात्रदेवते वय्या इव कुशले इव रण्विते शब्दिते स्तुते परस्परं गच्छं
त्यौ ततं विस्तृतं तंतुं तंतुस्थानीयं यज्ञं संवयंती संवयंत्यौ समीची सम्यक् प्रवर्तमाने यद्वा वयंत्यौ उत्पादयित्र्यौ सम्यक् प्रवर्तमाने परस्परानुकूले किमर्थं
संवयंतौ यज्ञं अनुष्ठीयमानस्य पेशो रूपं निर्मातुमिति शेषः॥ यज्ञं निर्वर्तयितुं तदवयवानुक्रमेणानुष्ठापयित्र्यावित्यर्थः॥ अहोरात्राभ्यां
हि यज्ञास्तन्यंते सुदुघे सुफलस्य दोग्ध्र्यौ पयस्वती उदकवत्यौ अहोरात्राभ्यां खलु वृष्टिर्जायते एवं महानुभावे अहोरात्रदेवते अ
स्मद्यज्ञं निर्वहतामित्यर्थः॥ ॥अथ सप्तमी॥ ॥दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा। देवान्यजंतावृतुथा समंज
तो नाभा पृथिव्या अधि सानुषु त्रिषु॥ ॥दैव्या दिविभवा दिव्यौ अग्निः तस्माद्दिव्याग्निद्वयं होतारा होतारौ आह्वातारौ देवानां होमनिष्पाद
कौ वाग्नी पार्थिवांतरिक्ष्यौ प्रथमा मुख्यौ विदुष्टरा विद्वत्तमौ वपुष्टरा प्रकृष्टवपुषौ दैवौ ऋचा मंत्रेण ऋजु अविकलं यथा तथा सम्यक्
यक्षतः पूजयतः ऋतुथा तत्तत्काले देवान् यष्टव्यान् यजंतौ तौ देवौ पृथिव्या नाभा नाभौ उत्तरवेद्यां अधि उपरि त्रिषु सा
नुषु समुच्छ्रितेषु प्रदेशेषु गार्हपत्यादिषु समंजतः समंक्तः अंजेर्लेट्यडागमः॥ ॥अथाष्टमी॥ ॥सरस्वती साधयंती धियं न इळा
देवी भारती विश्वतूर्तिः॥ तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पांतु शरणं निषद्य॥ ॥नोस्मदीयां धियं बुद्धिं यागं वा साधयंती
सरस्वती एतन्नामका देवी भारती च विश्वतूर्तिः विश्वानि तूर्णानि यस्याः सा तादृशी सर्वविषयगता वा कृ एतदुभयविशेषणं तिस्रो देवीः
एतास्तिस्रो देव्यः स्वधया अस्मद्दत्तहविर्लक्षणेनान्नेन इदं बर्हिर्यज्ञं अच्छिद्रं यथा तथा पांतु पालयंतु किं कृत्वा शरणं यागगृहं अभि
षद्य आश्रित्य यद्वा स्वधया इदं बर्हिरिमं यज्ञमागत्यास्मदीयं शरणं गृहं निषद्याच्छिद्रं यथा तथा पांतु॥ ॥अथ पिशंगरूप इति नवमी
त्वाष्ट्रपशोः पुरोडाशस्य याज्या पिशंगरूपः सुभरो वयोधाः प्रथमभाजं यशसं वयोधामिति सूत्रितत्वात् पाठस्तु॥ पिशंगरूपः
सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः प्रजां त्वष्टा विष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः॥ पिशंगरूपः सुवर्णवर्णः ना
नारूपो वा सुभरः शोभनयज्ञः शोभनभरणो वा वयोधाः वयसोन्नस्य धारयिता दाता वा श्रुष्टी क्षिप्रगुणः वीरो विविधमीरयि
ता देवकामः देवाः काम्यंते येन तादृशः पुत्रो जायते यजमानस्योत्पद्यते तत्तस्मात् त्वष्टा एतन्नामको देवोस्मे अस्मभ्यं नाभिं
कुलस्य बंधिकां प्रजां पुत्रादिरूपां विष्यतु विमुंचतु विसृजत्वित्यर्थः॥ अथ अपि च देवानां संबंधि पाथोन्नमप्येतु स्मानेन अपिः क्रि

भा॰अ॰२ यथावासं वं ध्यतेगछत्वित्यर्थः॥ ॥अथदशमी॥ ॥वनस्पतिरवसृजन्नुपस्थादग्निर्हविः सूदयाति प्र धीभिः॥ त्रिधा समक्तं नय अ॰५
तुप्रजानन्देवेभ्यो दैव्यः शमितोपहव्यं॥ ॥वनस्पतिर्यूपाभिमानी एतन्नाम काग्निः अवसृजन् अस्मदीयकर्म जानन् उपास्मत्समी
९१ पस्थात् निवन अग्निः पाका धाराग्निश्च हविः परुरूपधीभिः कर्मभिः विशेषैः पाकसाधनैः प्रकर्षेण सूदयाति क्षारयति अपाका
थिक पाकादिशादियेन हविः पचतीत्यर्थः॥ किंच देव्या देवसंबंधि आहुत्यधिकरणभूताग्निः शमिता हविषः संस्कर्ता॥ यद्वा देव्याः श
मिता एतन्नाम काग्निः अग्निर्वै देवानां शमितेति श्रुतेः त्रिधा त्रिप्रकारं उपस्तरणावदानाभिघारणैः समक्तं सम्यक्सिक्तं हव्यं हविः प्र
जानन् विद्वान् नयन प्रकाराभिज्ञः सन् देवेभ्यः उपनयतु समीपं प्रापयतु॥ ॥अथैकादशी॥ ॥घृतं मिमिक्षे घृतमस्य योनिर्घृते
श्रितो घृतम्वस्य धाम॥ अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं॥ ॥अस्याग्नेर्घृतमाज्यं मिमिक्षे सिंचामि यतोस्य घृतं
योनिः कारणं उत्पत्तिरपि घृते श्रितः आश्रितः अस्याग्नेर्घृतमेव धामतेजः घृतेन संदीप्यते इदानीं संबोध्याच्यते हे अग्ने वृष
भ फलस्य वर्षितस्त्वं अनुष्वधं प्रति हविः सर्वेष्वपि हविःषु दीयमानेषु आवह देवान् आहूय तान् मादयस्व प्रीणयतत् स्वाहाकृ
तं स्वाहाकारेण दत्तं वक्षि वह च॥ ॥इति द्वितीयस्य पंचमे नवविंशो वर्गः॥ ॥हुवे वइति नवर्चं चतुर्थं सूक्तं भार्गवः सोमाहुतिनाम
क ऋषिः अग्निर्देवता त्रिष्टुप्छंदः हुवेन सोमाहुतिर्भार्गवा हत्यनुक्रमणिका॥ प्रातरनुवाकाश्विनशस्त्रयोः त्रैष्टुभे छंदसि इदं सूक्त
तं च॥ हुवे वः सुद्योत्मानं निर्हो ता हो त्वादवदूति सूक्तो इति॥ ॥तत्रप्रथमा॥ ॥हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसं
॥ मित्र इव योदिधिषाय्यो भूद्देव आदेवे जने जातवेदाः॥ ॥हे यजमाना वो युष्मदर्थं अग्निं हुवे आह्वयामि कीदृशं तं सुद्योत्मानं सुष्ठु
द्योतमानं सुवृक्तिं सुवर्जितं पापैः शोभनस्तुतिं वा विशां यजमानानां अतिथिं अतिथिवत् सदा पूज्यं सुप्रयसं शोभनहविर्लक्षणा
न्नं किंच जातवेदाः जातानां वेदिता यो देवोग्निर्मित्र इव सखेव आदित्य इव वा दिधिषाय्यः धारयितार भून्नुभयत्र कृतेति उच्यते॥
आ देवे देवपर्यंते जने मनुष्यप्रभृतिदेवपर्यंतेषु तेषां धारको भवतीत्यर्थः॥ ॥अथद्वितीया॥ ॥इमं विधंतो अपां सधस्थे द्वितादि
धुर्भृगवो विक्ष्वायोः॥ एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः॥ ॥इममग्निं विधंतः परिचरंतो भृगवोस्मत्पूर्वमहर्षयः
अपां सधस्थे सहस्थाने अंतरिक्षे आयोर्मनुष्ययजमानस्य संभूतासु विक्षु प्रजासु विक्षु तेषां मध्ये च द्विता द्वयोः स्थानयोः दधुः अद
धुः धारयन् दधातेर्लडि रूपं योग्निर्भूमभूत्वा अत्यर्थं विश्वानि भूतजातान्यस्मादिति धीन्यभ्यस्तु अभिभवतु स कीदृशः देवा
नामरतिरीश्वरस्तेषां मध्ये वा प्रमरणशीलो वास्म घागं प्रतितथाजीराश्वः क्षिप्राश्वः॥ ॥अथतृतीया॥ ॥अग्निं देवासो मानुषी
षु विक्षु प्रियं धुः क्षेष्यंतो न मित्रं॥ स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ॥ ॥देवासो देवाः क्षेष्यंतः स्वर्गं प्रतिगच्छं ९१
तः संतः पूर्वं मानुषीषु मनुष्यसंबंधिनीषु विक्षु प्रजासु प्रियं देवानां प्रीणयितारमग्निं धुः अधुः स्थापितवंतः तत्र दृष्टांतः॥ क्षेष्यंतो
मित्रं न यथा प्रतिगच्छंतो न या मित्रं प्रियं सखायं स्वगृहरक्षार्थं स्थापयंति तद्वत् यद्वा एवं देवैः स्थापितो योग्निर्दास्वते हविर्दत्तवते यजमाना
य तदर्थं दमे गृहे आहितः स्थापितः दक्षाय्यः समर्धयिता दाता वा सोग्निः उशतीः कामयमानाः ऊर्म्याः रात्रीः

सर्वासु रात्रिषु आ दीदयत् दीप्यते सर्वतः सर्वा रात्रीरादीपयति॥ ॥अथचतुर्थी॥ ॥अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य द 179 1914
क्षोः॥ वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान्॥ ॥अस्याग्नेः पुष्टिः शरीरवृद्धिः रण्वा रमणीया च युक्ता तत्र दृष्टां
तः॥ स्वस्य पुष्टिरिव यथा लोके स्वकीया पुष्टिः सुखकर रमणीया भवति तद्वत् यद्वा अस्याग्नेः संबंधिनी पुष्टिः यथा यजमानविषया रण्वा तद्वत्
किंच हियानस्य सर्वत्र गच्छतः व्याप्नुवतो दक्षोः काष्ठानि दहतः दग्धुमिच्छोरस्याग्नेः संदृष्टिः संदर्शनाविर्भावापि रण्वा योग्निरोषः
धीषु काष्ठेषु जिह्वां ज्वालां जायते व बनं ज्वालाविभरिभ्रत्॥ अत्यर्थं विहारति कंपयतीत्यर्थः हरते यङ्गंतत्वेन दाधर्त्यादिषु नि
पातितात् लस्य शागमः॥ यङ्लोगादनिघातः तत्र दृष्टांतः रथ्यो रथार्हत्यो न यथात्यथा वारान् दंशवारणसाधनान् वारान् वालान् दो
धवीति कंपयति तद्वत् योग्निर्ज्वालाः कंपयति अस्याग्नेः पुष्टी रण्वेति॥ ॥अथपंचमी॥ ॥आ यन्मे अभ्वं वनदः पनंतोशिग्भ्यो ना
मिमीत वर्णं॥ स चित्रेण चिकिते रंसु भासा जुजुर्वां यो मुहुरा युवा भूत्॥ ॥यदा यस्याभ्वं महत्त्वं मम संबंधिनो वदनः वनंतः संभक्तारः
यद्वा वनदः भजमानाः पनंतः स्तोतारः अवश आभ आर्षवाचीन सर्वेभ्रः किप अपाय्योरित्याकारलोपः आपनंतरसमंतात् स्तुवंति सोग्निः
उशिग्भ्यो मदीयं रूपं कामयमानेभ्यः तन्निभ्यो वर्णं स्वसदृशं रूपं नामिमीत न ज्ञाप्यः स्वार्थानिर्मिमीते च स्वस्य रंसु रमणीयेषु आज्यादिहविः
षु निर्मितेषु चित्रेण भासा हिरण्यकवचादिना नानावर्णया दीप्त्या चिकिते विज्ञायते किंच योग्निः जुजुर्वान् जीर्णः सन् ज्वालोपशमे स एव मुहुः
पुनः पुनः आ युवा सर्वतोभिश्रयिता तरुणो वा आभूत् आभवति पुनराज्यादिसंयोगात्॥ ॥इति द्वितीयस्य पंचमे त्रिंशो वर्गः॥
॥ ॥अथषष्ठी॥ ॥आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत्॥ कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः॥
योग्निर्वना वनानि वृक्षसमूहान् तातृषाणो तृषितः इव त्वरमाण इत्यर्थः॥ आ भाति आभासयति दहतीत्यर्थः॥ यद्वा वना वने आ
भाति किंच वार्णं उदकमिव पथा प्रवणेन मार्गेण गच्छति तद्वत् इतस्ततो गच्छतित्यर्थः रथस्य वोढव्य इव स्वानीत् शब्दयति यद्वा रथश्च वा
त सोढुर्यादृशः यथा रथो युक्त्या मार्गेण गच्छन् स्वनति तद्वत् किंच कृष्णाध्वा कृष्णवर्त्मा तपुः तापकः रण्वो रमणीयः एवंभूतः सन् चि
केत ज्ञायते प्रकाशत इत्यर्थः॥ कुत इव नभोभिर्नक्षत्रैः स्मयमानः शोभमानो द्यौरिव द्युलोक इव स यथा नभोभिरंतरिक्षप्रदेशविशेषैः स्म
यमानः शोभमानो द्यौरादित्य इव नीलवर्णांतरिक्षे वा यादृशाय यथा ज्ञायते तद्वत् उरुसंचारेण कृष्णीभूतमार्गो ज्ञायते प्रकाशयत इत्यर्थः
॥ ॥अथसप्तमी॥ ॥स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः॥ अग्निः शोचिष्माँ अतसान्युष्णन् कृष्णव्यथिरस्वदयन्न भूम॥
योग्निर्व्यस्थात् विविधं तिष्ठति व्याप्नोति विश्वं तथा योग्निरुर्वीं विस्तृतां पृथिवीं सर्वां यश्च अभिदक्षत् आभिमुख्येन प्रवर्धमानो भवति उ
भे अपि च छलयोगान् अनिहत्यते सोग्निः पशुर्न पशुरिव यथा ज्ञातः पशुः स्वच्छंदेन चरति तथा योग्निः स्वयुः स्वयमेव गच्छन् अगोपाः गो
परहितानियामकवर्जित इत्यर्थः एति गच्छति किं कुर्वन् शोचिष्मान् प्रकृष्टदीप्तिः कृष्णव्यथिः कृष्णवर्णमार्गः आदग्धा व्यथाकाराः कंटका
दयो येन तादृशः सन् भूम अत्यधिकं अभ्रदयन् न आस्वादयति विरूक्षगतान् रसान् अतसानि संततानि नीरसानि वा तत् उरुत्वाद्दनि उ
ष्णन् दहन्निति॥ ॥अथाष्टमी॥ ॥नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि॥ अस्मे अग्ने संयद्वीरं बृहंतं क्षुमंतं वाजं स्वप

भा०अ०२ तं रयिं दाः॥ ॥हे अग्ने ते तव संबंधिनः पूर्वस्य पर्वं यागसमये कृतस्याय सोऽभिमतफलस्य अर्थितोऽस्मरणे सति तत्स्मृत्यानुभवापितृतीये अ०५
दिवसे यागे तृतीयसवनेऽयं द्वायाप्रातरनुवाकसंबंधिनो आग्नेयाप स्याश्विनानां मध्ये अन्यत मन्तृतीये कृतो मन्मननीयं स्तोत्रं ऊर्ध्वासि अङ्गि
१८ रसां स्यत स्तोमाभिः अहं अग्ने तं चास्मै अस्मभ्यं संयदाग्नेः संयन्तो वीरा यस्मिन् वता हत्वा बृहन्तं महान्तं स्वमन्तं नाम व्रतं कीर्तिं वाजं उरुलक्षणं
नं स्वपत्यरयिं च दिदीहि॥ ॥अथ नवमी॥ ॥त्वया यथा गृत्समदासो अग्ने गुहा वन्वन्त उपराँ अभिष्युः॥ सुवीरासो अभिमातिषाहः
स्मत्सूरिभ्यो गृणते तद्वयो धाः॥ ॥हे अग्ने त्वया रक्षकेण वन्वंतः छांदसं भजन्तः गृत्समदा ऋषयः आत्मानि पारोक्ष्येण वचनं यथा
गुहा गुहायां वर्तमानान् उपरान् उपरमणमाधमान् उपरिष्ठाद्वर्तमानान्वा धनविशेषानभिष्युः अभिभवेयुः तथा कुर्वित्यर्थः कीदृशाः सु
वीरासः शोभनपुत्राः सुपुत्राः अभिमातिषाहः वैरिणां पापादीनां सोढारः किंच सूरिभ्यो मेधाविभ्यो यजमानेभ्यो गृणते व्यत्ययेनैकवच
नं शब्दयन्तः स्तोतृभ्यः यद्वा सूरिभ्यो यजमानेभ्यो गृणते स्तोत्रे च स्मत प्रशस्तं अतिप्रभूतं तत्तादृशं प्रसिद्धं वयोऽन्नं धाः धेहि॥ ॥इति
द्वितीयस्य पंचमे पंचविंशो वर्गः॥ ॥होताजनिष्टेत्यष्टर्चं पंचमं सूक्तं सोमाहुतेरार्षमाग्नेयमानुष्टुभं होताष्टावानुष्टुभमित्यनुक्रान्तं प्रातर
नुवाकाश्विनशस्त्रयोराग्नेये क्रतावस्य विनियोगः॥ सूत्रितं च॥ अग्नायो होताजनिष्ट चेति चतुर्विंशे हन्यपोऽहमवाज्यं चतुर्विंशे होताजनिष्ट
त्यात्यमिति अभिप्लविके द्वितीये हनीदमेवाज्यं द्वितीयस्य चतुर्विंशनाज्यमित्यतिदिष्टत्वात्॥ ॥तत्र प्रथमा॥ ॥होताजनिष्ट चेतनः पिता
पितृभ्य ऊतये॥ प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमं॥ ॥होता होमनिष्पादकः चेतनः चेतयिता स्मदनुष्ठितस्य पिता पालकोऽस्मद्यज्ञ
स्येदृशोऽग्निरजनिष्ट उत्पन्नः किमर्थं पितृभ्यः पालकेभ्यो यजमानेभ्यः ऊतये अर्थं चतुर्थी तेषां तर्पणाय च वयं च वाजिनः हविर्ल
क्षणान्नवंतः संतः प्रयक्षं प्रकर्षेण यष्टुं जेन्यं जेतव्यं यमं यमनीयं वसु धनं तत्राकमत्राक्रोभूयास्म लुङ्ब्धनिति तिशपः यद्वा वाजिनोऽन्न
स्य यमं यमनं कर्तुं शकेम मयक्षं जेन्यं वसु धनं मित्युपमान उत लक्षणं धनमिव तत्प्रथा वरोधं शाकुमस्तदुत॥ ॥अथ द्वितीया॥ ॥
आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि॥ मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति॥ ॥यज्ञस्य नेतरि यागस्य निर्वाहके यस्मिन्नग्नौ सप्त रश्मयः
सप्त संख्याकारश्मिवच्छामा होत्रकाः आतताः स्वस्वकर्मभिः सर्वतो व्याप्ता भवंति स पोता पालको देवानां पात्रा त्य ऋत्विग्रूपाग्निर्मनुष्व
त मनुष्यतोत्वत दैव्यं दैवायत्तः तत्संबंधि अष्टमं अष्टलिंकृ संबंधितद्विश्वं कर्तव्यतानं सप्तहोत्रैः स हस्वयमष्टमम इन्वति व्याप्नोति॥ य
द्वा दिव्यस्य लिंगव्यत्ययः सपोतेति संबंधः सप्तहोत्रकः सहाष्टमो भूत्वा तद्यज्ञं निर्वहतीत्यर्थः॥ ॥अथ तृतीया॥ ॥दधन्वे वा यदीम
नु वोचद्ब्रह्माणि वेरु तत्॥ परि विश्वानि काव्या नेमिश्चक्रमिवाभवत्॥ ॥पूर्वमंत्र होत्रादिवत्स्वयमपि यज्ञं निर्वहतीत्युक्तं अत्र तत्सर्वं तत्
त्वम्मा नाक्षितां स्वयमेवतिर्वहतीत्याह॥ वा अथ वा ईमेनं यज्ञं अनुलक्ष्य दधन्वे धारयति द्रविणादिकं दधन्वि धारयत्यध्वर्य्वादिरूपः यानि ब्रह्माणि
स्तोत्राणि अनु वोचत् अन्वाह होत्रादिरूपः अत्र वा नित्यत याद्यं तत्सर्वं वेः वरं कामयते जानाति वा स्वयमनुष्ठातारं अयमग्नि १८
र्विश्वानि सर्वाणि काव्याकाव्यानि कवयामधाविनः कृतिः तत्संबंधीनि कर्माणि परि अभवत् परिभवति स्वायत्तानि करोति व्याप्नोति इत्य
र्थः॥ व्याप्तौ दृष्टांतः नेमिः चक्रं वर्तुलवलयः चक्रं रथांगं यथा कार्त्स्न्येन व्याप्नोति तद्वत्॥ ॥अथ चतुर्थी॥ ॥साकं हि शुचिना शुचिः

प्रशास्ता क्रतुनाजनि॥ विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते॥ ॥शुचिः स्वयं शोधकः प्रशास्ता देवानां प्रशास्तृनामकऋत्विग्रूपः प्रशासिता याय 181/1914
नाविप्रानां ऋत्विनां क्रतुना शोधकेनाग्निहोत्रादिकर्मणा साकं हि सह एव जायते उत्पन्नः जातामात्र एव भुवः सर्वस्य प्रशास्ता च सन्नाग्निहोत्रा
दिनिर्वोढा भवतीत्यर्थः॥ अस्याग्नेर्व्रतानि फलपर्यवसायीनि ध्रुवाणि कर्माणि कर्माणि विद्वान् जानन् यजमानो वया इव विततानः शाखा
इवानुरोहते क्रमेणानुतिष्ठति॥ ॥अथ पंचमी॥ ॥ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः॥ कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः
॥ ॥याः वक्ष्यमाणाः लक्षणाः अंगुलयः इदं मनुष्ठायमानं कर्म ययुः प्राप्नुवंति अनवति घाति ताः आयुवः गंत्र्यः व्याप्ता धेनवः
प्रीणयित्र्यः स्वसारः स्वयंसारिण्यो गुलयोऽनेष्टुः हविर्याचितुः शिक्षयितुः शोधयितुः पोषयितुर्वा नेष्टृरूपस्याग्नेः यद्वेत्वाम कः
कृत्विग्रूपास्ति सृभ्य अगार्हपत्यादि मूर्तिनामपि वरं वर्णं कुवित् बहु कृत्वः संचन्त सचंते परिचरंति॥ ॥अथ षष्ठी॥ ॥यदी मा
तुरुप स्वसा घृतं भरन्त्यस्थित॥ तासामध्वर्युरागतौ यवो वृष्टीव मोदते॥ ॥यदि यदा मातुः सर्वस्य निर्मातुः भूम्याः वेदिलक्षणा
याः स्वसा स्वसृस्थानीया जुहूः घृतं भरंती सती उपास्थित उपरिष्टाद् दृष्टिं एकवचनमविवक्षितं जुहूपभृद्ध्रुवाः घृतं भरंत्यः तिष्ठंतीत्य
र्थः॥ तदानीं जुहूदीनां मांगतो यागान्य प्राप्तास्तासामध्वर्युः एतन्नामकऋत्विग्रूपः अध्वरं कामयमानो वायमग्निः मोदते हृ
ष्यति यथा वृष्टीव वृष्ट्या यथा मोदते तद्वत्॥ ॥अथ सप्तमी॥ ॥स्वः स्वाय धायसे कृणुतामृत्विगृत्विजं॥ स्तोमं यज्ञं चादरं वने
मा ररिमा वयं॥ ॥अयमग्निः स्वः स्वयमेव स्वाय स्वकीयाय धायसे कर्मणे हविषां धारणाय वा ऋत्विक् होताजनिष्टेत्यादिनोक्त
लक्षणो होतृपोतृप्रशास्तृ ऋत्विग्रूपः सन् ऋत्विजं आर्त्विज्यं भावप्रधानोऽयं निर्देशः देवर्त्विग्रूपः सन् ऋत्विजं मानुषमार्त्विज्यं कृ
णुतां करोतु वयं च तदनुग्रहात् आदरं अरमलं स्तोमं स्तोत्रं यज्ञं च तदाश्रयं यागमपि अरं अलं मत्यर्थः॥ वनेम संभजेमहि ररि
म दद्मः हविः यद्वा स्तोमं वनेम यज्ञं यज्ञयोग्यं हवी ररिम॥ ॥अथाष्टमी॥ ॥यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः॥ अ
यमग्ने त्वे अपि यं यज्ञं चकृमा वयं॥ ॥हे अग्ने विद्वान् सर्वमाजानान् भिस्त्रः प्रयोगज्ञो वा यजमानो यथा विश्वेभ्यो यजतेभ्यः सर्वेभ्यो य
जनीयेभ्यो देवेभ्यः अरं पर्याप्तं करत् कुर्यात् तथा त्वमनुग्रहाणेत्यर्थः॥ वयं यमपि यं यज्ञं यागविशेषं चकृम कुर्मः स
यागस्त्वे अपि अपि त्वय्येवास्तीत्यर्थः॥ त्वमेव तस्मात्सर्वदेवार्थं यागं तत्तद्देवरूपः सन् निर्वहेत्यर्थः॥ ॥इति द्वितीयस्य
यस्य पंचमे षड्विंशो वर्गः॥ ॥इमां म इति अष्टर्चं षष्ठं सूक्तं सोमाहुत्यार्षमाग्नेयं गायत्रं इमां मे गायत्रं हीत्यनुक्रान्तं॥ प्रातर
नुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्यस्य विनियोगः सूत्रितं च॥ इमां मे अग्ने समिधमिमामिति त्र्याणां मुतेमा मुह्वं हि इति आप
राह्णिक्या मुपसदी मां मे अग्ने समिधमिमामिति तिस्रः कृत्वा कुपस्त्वा न व समिधंत्यः कृत्वा विनियोक्त्याः अथोपसदिति
स्वं इमस्त्रितं॥ इमां मे अग्ने समिधमिमामिति तु सामिधन्य इति॥ ॥तत्र प्रथमा॥ ॥इमां मे अग्ने समिधमिमामुपसदं वने
॥ इमा उ षु श्रुधी गिरः॥ ॥हे अग्ने मदीयां इमां अधीयमानां समिधं इमामुपसदं उपसदनसाधनां माहुतिमुपसद्याग
क्रियमाणां वा वनेः संभजथाः तथा इमा अपि गिरः स्तुतीः सुष्ठु श्रुधि शृणु॥ ॥अथ द्वितीया॥ ॥अया ते अग्ने विधे

14076C

भा॰अ॰ मोर्जोनपातमश्वमिष्टं ॥ एनासत्तेनसत्ताना ॥ ॥हे अग्ने त्वां अया अनया आहुत्या विधेम परिचरेम हे ऊर्जो नपात बलस्य नप्तः नस्य अ॰५
५५ नपातयिता वा हे अश्वमिष्टं व्यापकयज्ञाय इष्ट आशुक्रियमाणं कर्माश्वं तदिच्छतीति अश्वमिष्टिः सत्वर माणा युपसदाचरंतीति कर्मभिम
मत्वरंत ततिमः ताभिर्धनीरत्व्यतिता देवता अयतंनिति द्योषः यद्वा त्वमुपभ्रहितेन विधेम ॥ ॥अथतृतीया ॥ ॥तंत्वागीर्भिर्गिर्व
णसंद्रविणस्युंद्रविणोदः ॥ सपर्येमसपर्यव ॥ ॥हे द्रविणोदाः धनस्य दातः अग्ने त्वं ताद्दर्गिर्वणसं गीर्भिः स्तुतिभिर्वननीयं द्र
विणस्युं द्रविणेच्छुं धनेच्छुं त्वां सपर्यवः परिचरणकर्ता तदर्थं गीर्भिः स्तुतिभिः सपर्येम परिचरेम ॥ ॥अथचतुर्थी ॥ ॥सबो
धिसूरिर्मघवावसुपतेवसुदावन ॥ युयोध्यस्मद्द्वेषांसि ॥ ॥मघवा अन्नवान सूरिर्विद्वान प्रेरकोवा सन उक्तलक्षणस्त्वं बोधि बुध्यस्व
अस्मदीयं स्तोत्रं किंच हे अग्ने द्वेषांसि द्वेष्टॄन अस्मदस्मत्तो युयोधि पृथक्कुरु ॥ ॥अथपंचमी ॥ ॥सनो वृष्टिं दिवस्परि सनो वाजमनर्वा
णं ॥ सनः सहस्रिणीरिषः ॥ ॥सः स एवाग्निनोस्मदर्थं दिवस्परि द्युलोकादंतरिक्षात्परीतिपंचम्यर्थानुवादी वृष्टिं करोतीति शेषः
स एव नोस्मदर्थं अनर्वाणं अविचलमनुष्यवाजं बलं ददातु तथा सहस्रिणीः अपरिमितप्रकाराणि इषः अन्नानि स एवाग्निर्ददातु ॥
॥ ॥अथषष्ठी ॥ ॥ईळानायावस्यवे यविष्ठदूतनोगिरा ॥ यजिष्ठहोतरागहि ॥ ॥हे यविष्ठ युवतम दूत देवानां यजिष्ठ सुक्रतु य
जितृ भत होतः देवानामाह्वातर नोस्माकं गिरा अस्मदीयया स्तुत्या ईळानाय स्तुवते अवस्यवे स्वरक्षणमिच्छते म
दर्थं आगहि आगच्छ ॥ ॥अंतर्ह्यग्न ईयसे विद्वान जन्मोभया कवे ॥ दूतो जन्येव मित्र्यः ॥ ॥हे कवे मेधाविन्नग्ने अंतर्जनानां हृदये ईय
से हि गच्छसि तानाभिर्वाहिः सन्नतो विद्वानुभयं द्विविधं जन्मांतरीयं इत्याहिमंत्रातर प्रसिद्धि द्योतनार्थः कीदृशत्वं उभया उभयविधा
नि जन्मानि यष्टॄणां यजमानानां यष्टव्यानां देवानां च संबंधीनि विद्वान जानन सन ईयसे इति संबंधः ॥ तत्र दृष्टांतः ॥ जन्योजनेभ्यो
हितः मित्र्यः मित्रेभ्यो हितो दूत इव सयथा प्रजानां चित्तवृत्तिं नानायंत्रीप्रेषितः तासां मनोज्ञातानि तदूत्तमप्यस्माकं अंत
रीयं इत्यर्थः ॥ ॥अथाष्टमी ॥ ॥सविद्वां आचपिप्रयो यक्षिचिकित्व आनुषक् ॥ आचास्मिन्त्सत्सि बर्हिषि ॥ ॥हे अग्ने सत्वं विद्वान वि
द्याभिरतः सन आच पिप्रयः सर्वतः स्मान प्रीणय च कामैः हे चिकित्व श्चेतनावन आनुषक् अनुक्रमेण यक्षि यज देवान आसत्सि
आसीद च अस्मिन्नस्तीर्णे बर्हिषि ॥ ॥इति द्वितीयस्य पंचमे सप्तविंशो वर्गः ॥ ॥ अग्ने यविष्ठ भारतेति षळृचं सप्तमं सूक्तं सौमाहुत्या
र्षं भार्गवस्यं गायत्रं प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छंदस्युक्तस्य विनियोगः पूर्वसूक्ते एव ततः आग्रयणी कर्मण्यायादिनियुक्ता ॥
सैषा सूक्ते प्रथमा ॥ ॥ अग्ने यविष्ठ भारताग्ने द्युमंतमाभर ॥ वसो पुरुस्पृहं रयिं ॥ ॥हे अग्ने यविष्ठ युवतम हे भारत भारता
ऋत्विजः तेषां संबंधी भारतः ते भरणं क्रियमाणत्वात् हविर्भिरात्वात् अथवा हविर्भिः स्तोत्रादिभिर्वा प्रियमाणत्वात् ॥ तादृश हे वसो वासकत्वात् वासक रू
पाग्ने श्च युं अतिप्रजाम्यं द्युमंतं दीप्तिमंतं पुरुस्पृहं बहुभिरार्थिभिः स्पृहणीयं रयिं आभर आहर ॥ ॥अथद्वितीया ॥ ॥मानो ३३
अरातिरीशत देवस्य मर्त्यस्य च ॥ पर्षितस्या उत द्विषः ॥ ॥हे अग्ने त्वदनुग्रहान्नोस्मान अरातिः अदानं शत्रुत्वाय द्वारुद्देवस्य रा
तिश्च त्वः शत्रुवाची कल्लिंगो भवति अदाता शत्रुः मा ईशत पराभवितुं शक्तो माभूत मा विपर्यायीकुर्यात अरातिर्विशेष्यते देवस्य च

र्मर्त्यस्य च संबंधीनीतिः कालिता उत अपि च तस्या उभयविधायाः द्विषः अस्मद्दातेः पृपर्षि पृपरय ॥ ॥अथतृतीया ॥ ॥विश्वा 183
उत त्वया वयं धारा उदन्या इव ॥ अतिगाहेमहि द्विषः ॥ ॥उत अपि च हे अग्ने वयं त्वदनुग्रहाद्विश्वा द्विषः सर्वानपि द्वेष्टॄन उदन्या 1914
धारा इव उदक संबंधीनी धारा असत्कृतिरिवमनाआत्मने व अन्यानिरपेक्षणातिगाहेमहि अभिक्रम्य गच्छेम ॥ ॥अथचतुर्थी ॥ ॥
शुचिः पावक वंद्योग्ने बृहद्विरोचसे ॥ त्वं घृतेभिराहुतः ॥ ॥हे पावक शोधकाग्ने शुचिः शुद्धो वंद्यः नमस्कार्यः सन बृहद्महत अ
त्याधिकं विरोचसे विविधं दीप्यसे यतस्त्वं घृतेभिः घृतैराहुतः समंतात्सिक्तः अतो विरोचसे ॥ ॥अथपंचमी ॥ ॥त्वंनो असिभा
रताग्ने वशाभिरुक्षभिः ॥ अष्टापदीभिराहुतः ॥ ॥हे भारत ऋत्विजां पुरस्तान्नीयाग्ने नोस्मदीयस्त्वं वशाभिः वंध्याभिः गोभिः उ
क्षभिः बलीवर्दैः च अष्टापदीभिर्गर्भिणीभिश्चाहुत आराधितोसि ॥ ॥अथषष्ठी ॥ ॥द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ॥
सहसस्पुत्रो अद्भुतः ॥ ॥द्र्वन्नः समिद्रूपान्नः सर्पिरासुतिः सर्पिरासवनं आसिच्यते यस्मिन्नता दृशः प्रत्नः पुरातनः होता होम
निष्पादकः वरेण्यः वरणीयः सहसस्पुत्रः सहसो बलस्य पुत्रस्थानीयः बलेनोत्पन्नत्वात अद्भुतः आश्चर्यभूतो रमणीय इत्यर्थः
एवं महानुभवोग्निः मामनुजानातिवित्यर्थः ॥ ॥इति द्वितीयस्य पंचमे अष्टाविंशो वर्गः ॥ ॥वाजयन्निवेति षळृचं अष्टमं सूक्तं
सौमाहुतं इदं आद्यानुवस्था भावानुमंउलदृष्टाः सम ऋषिः अग्निर्देवताहिद्याद्या गायत्री छंदः ॥ अंत्यानुष्टुप वाजयन्नित्यानुष्टुब्वित्यनु
क्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोस्तृतीयसकले नास्यातमावर्जितस्य विनियोग उक्तः ॥ ॥तत्र प्रथमा ॥ ॥वाजयन्निव नूरथान्योगां
अग्नेरुपस्तुहि ॥ यशस्तमस्य मीळ्हुषः ॥ ॥हे अभ्रनरात्मन क्षिप्रं अग्ने योगान अश्वान उपस्तुहि कीदृशस्याग्नेः यशस्तमस्य प्रवृद्धयश
सः मत्वर्थानुप्यते मीळ्हुषः सेक्तुः फलस्य ईदृशस्य योगान ॥ स्तुहि होतरिति वा संबोध्य स्तुतौ दृष्टांतः वाजयन्निव अन्नमिच्छन पुरुष इव
स यथा अश्वान गमनाय स्तौति तद्वत यद्वा कल्क्षणस्याग्नेः गमनसाधनान स्तुहि ॥ ॥अथद्वितीया ॥ ॥यः सुनीथो ददाशुषे जुजु
र्योजरयन्नरिं ॥ चारुप्रतीक आहुतः ॥ ॥सुनीथः शोभननयनः अजुर्यः अजरणीयः अनभिभाव्यः चारुप्रतीकः शोभनोपक्रमः
सोयोग्निः दाशुषे हविर्दत्तवते यजमानाय तदर्थं अरिं स्वशत्रुं जरयन नाशयन आहुतः समंताद्दाराधितो भवति ॥ ॥अ
थतृतीया ॥ ॥य उस्रिया इमे यदो सपसि प्रशस्यते ॥ यस्यव्रतं न मीयते ॥ ॥योग्निः उस्रिया ज्वालया युक्तः सन दमेषु आआग
त्यादोषा रात्रिपु उषसि भद्रः स्तवप्रशस्यते स्तूयते यस्याग्नेर्व्रतं कर्म न मीयते न हिंस्यते न क्षीयते ॥ ॥अथचतुर्थी ॥ ॥आयः स्वर्णभा
नुना चित्रो विभात्यर्चिषा ॥ अंजानो अजरैरभि ॥ ॥योग्निः चित्रश्चायनीयः नानावर्णो वा अर्चिषा ज्वालया रश्मिसमूहेन आविभाति स
र्वतो भासते तत्र दृष्टांतः स्वः सूर्यो भानुनाकिरणेन सूर्यस्तेन यथा विभाति तद्वत् किं कुर्वन अजरैर्नित्यैः ज्वालासमूहैः अभिसर्वतः अंजानः
व्यंजयन प्रकाशयन ॥ ॥अथपंचमी ॥ ॥अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः ॥ विश्वा अधि श्रियो दधे ॥ अत्रिं शत्रूणां अत्ता
नां यो भक्षकं स्वराज्यं स्वयमेव राजमानं स्वाराज्यमनु अभिलक्ष्य अग्निं उक्थानि शस्त्राणि वावृधुः वर्धयंतिस चाग्निः विश्वाः सर्वाः श्रि
याः अधिदधे धारयति ॥ ॥अथषष्ठी ॥ ॥अग्नेरिंद्रस्य सोमस्य देवानामूतिभिर्वयम् ॥ अरिष्यंतः सचेमह्यभिष्याम पृतन्यतः ॥ ॥

भा॰अ॰२ ॥ ॥अनतिप्र्यंतः केनाप्यहिंस्यमाना वयं अग्नेरिन्द्रस्य सोमस्य देवानां मन्येषामपि ऊतिभी रक्षणाभिः सचेमहि युक्ता भवेम तथा युक्ता वयं अ॰५
पृतन्यतः पृतनामात्मन इच्छतः शत्रून् अभिष्याम अभिभवेम पृतनाशब्दात् क्यचि कव्यध्वरपृतनस्यर्चि लोप इत्यकारलोपः ॥ ॥७॥ इति द्विती
१०० यस्य पंचमेऽष्टाविंशो वर्गः ॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ इति श्रीमद्राजाधि
राजपरमेश्वर वैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिता
भाष्ये द्वितीयाष्टके पंचमोऽध्यायः ॥ ॥७॥ ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ॥ श्रीः ॥ ॥
श्रीगणेशाय नमः ॥ श्रीः ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरम् ॥ ॥निहोतेति षडृ
र्चं नवमं सूक्तं गृत्समदस्यार्षं निहोतेत्यनुक्रान्तत्वात् । अनुक्तत्वात् त्रिष्टुप् तुह्यादिपरिभाषयाग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्र
तौ त्रैष्टुभे छन्दस्यस्य विनियोगः ॥ अथैनस्य इति खंडे सूत्रितं । निहोता होतृषदने इति स्रुक् इति ॥ अग्निप्रणयने आद्यैकैव विनियुक्ता । पं
चम्यां पौर्णमास्यां इति खंडे सूत्रितं । निहोता होतृषदन इति द्वे इति ॥ तस्मिन् सूक्ते प्रथमा ॥ ॥निहोता होतृषदने विदानस्त्वेषो दीदिवाँ अस
दत् सुदक्षः ॥ अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥ ॥गृत्समदः स्तौति ॥ होता देवानामाह्वाता विदानो विद्वान् त्वेषः
प्रवृद्धः दीदिवान् दीप्यमानः सुदक्षः शोभनबलः अदब्धव्रतप्रमतिः ॥ अदब्धानि अहिंसितानि व्रतानि कर्माणि यस्याः सा अदब्धव्र
ता प्रकृष्टा बुद्धिः यस्य स तथोक्तः वसिष्ठः सर्वस्य वासयितृतमः वासयतेस्तृजन्तस्य इष्ठनि रूपं ॥ सहस्रंभरः सहस्रस्यानेकविधस्य भर्ता वि
दरणेन नानाविधरूपस्य धारक इत्यर्थः ॥ बहुसहस्रस्य सर्वस्य भर्ता । तथा वाजसनेयं स वै वि सहस्रं सर्वं भर इत्येतदाहेति ॥ शुचिजिह्वः
शुचिर्दीप्तिका ज्वालाख्या यस्य स तथोक्तः एवंभूतोऽग्निः होतृषदने होतृगृहसदीनीति होतृषदनमुत्तरवेदिः अधिकरणे ल्युट् ॥ तत्र न्यसद
त् नितरामसीदत् इत्युक्तार्थं ब्राह्मणं । निहोता होतृषदने विदान इत्यग्निर्वै देवानां होतास्य तदेतान् नसदनं यदुत्तरवेदीनाभिस्त्वेषो दीदिवाँ अ
सदत्सुदक्ष इत्यासंनाद्धि संतदीभवत्यदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां तस्य तद्धोतृषदनं यदुत्तरवेदीनाभिस्त्वेषो दीदिवाँ अ
सदत्सुदक्ष इत्यासंनाद्धि संतदीभवत्यदब्धव्रतप्रमतिर्वसिष्ठ इत्यग्निर्वै देवानां वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निरित्येषा ह वा अ
स्य सहस्रंभरता यदेनमेकं सन्तं बहुधा विहरन्तीति ॥ ॥अथ द्वितीया ॥ ॥त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ॥ त्वमु त
मेव । अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ हे वृषभ अभिमतफलवर्षक हे अग्ने त्वं दूतः अस्मदीययज्ञे देवतार्थं दूतो
भव ॥ त्वमु त्वमेव नोऽस्माकं परस्पाः आपदः पालयिता पाता च भव किंच वस्यो वसुनो धनस्य आ प्रणेता अस्मान् अभिमुख्येन प्रापयिता भव
अप्रयुच्छन् अप्रमाद्यन् दीद्यन् दीप्यमानः अग्निः कर्माणि शोभमानः त्वं नोऽस्माकं तोकस्य पुत्रस्य तने तनोति विस्तारयति कुलमिति ॥ तनः पौत्रः
तस्मिन् अस्मदीयानां तनूनां गोपाः गोपायिता ॥ तथा च ब्राह्मणं अग्निर्देवानां गोपा अग्निमेव तत्सर्वतो गोप्तारं परिदत्त आत्मने च य
जमानाय चेति तादृशस्त्वं च गोपायिता भवामीति बोधि बुध्यस्व ॥ ॥अथ तृतीया ॥ ॥विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे १००
सधस्थे ॥ यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ॥हे अग्ने परमे उत्कृष्टे जन्मन् जायते प्रादुर्भवत्यस्मिन्निति जन्मस्थानं

द्योः तस्मिन् द्युलोके वर्तिता यत् तुभ्यं विधेम स्तोत्रादिभिः परिचरेम । अवरे द्युलोकादधस्थाने सधस्थे अन्तरिक्षे स्थिताय तुभ्यं स्तोमैः स्तोत्रैर्विधेम 185/1914
परिचरेम यस्माद्योनेः पृथिवीरूपात् स्थानात् त्वमुदारिथ उत्पन्नोऽसि प्रादुर्भूतोऽसि तं त्वां मतं पृथिवीप्रदेशं यजे अपूजयामि ॥ तत्र हि
समिद्धे समिद्धिः समिध्यमाने त्वयि हवींषि पुरोडाशादीनि प्रजुहुरे अध्वर्यादयः प्रजुह्वति जुहोतेर्लिटि रूपं ॥ ॥अथ चतुर्थी ॥ ॥अ
ग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ॥ त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ॥हे अग्ने यजीया
न् यष्टृतमस्त्वं हविषास्मदत्तेन यजस्व देवानां पुरतः इदं स्वादुतरमिदं स्वादुतरमिति ब्रूहि । यद्वा श्रुष्टी क्षिप्रकारी त्वं देष्णं देयं राधो ध
नं अभिगृणीहि अस्मदभिमुख्येन ब्रूहि प्रयच्छेत्यर्थः ॥ दानसामर्थ्यं दर्शयति । रयीणां धनानां मध्ये रयिपतिः उत्तमस्य धनस्य प
तिरसि हि । यद्वा रयीणां रयिपतिरित्यत्र कारकविभक्त्यनुवादः ॥ त्वं शुक्रस्य दीप्तस्य वचसः अस्मदीयस्य स्तोत्रस्य मनोता प्रज्ञाता भव
सि ॥ यद्वा मनोता ॥ ॥अथ पंचमी ॥ ॥उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ॥ कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं
स्वपत्यस्य रायः ॥ ॥दस्म दर्शनीय हे अग्ने दिवेदिवे प्रतिदिनमग्निहोत्रकाले जायमानस्य ते तव उभयं वसव्यं दिव्यं भौमं च वसु
वसव्यादित्वात् स्वार्थिको यत्प्रत्ययः ॥ तादृशमुभयं वसु न क्षीयते न क्षीयते ॥ अस्योभयविधधनसद्भावे मंत्रवर्णः ॥ त्वं ह्यग्ने दिव्यस्य रा
जसि त्वं पार्थिवस्य पशुपा इव त्मना ॥ अतस्त्वं जरितारं स्तोत्रं कुर्वाणमिमं यजमानं क्षुमन्तं अन्नवन्तं कीर्तिमन्तं वा कृधि कुरु किंच स्वपत्यस्य
शोभनापत्ययुक्तस्य रायो धनस्य पतिं स्वामिनं कुरु ॥ साकमेधपर्वणि पूर्वेद्युरनुसवनं तिस्र इष्टयः कर्तव्याः प्रथमायां अग्नेरनी
कवतः सैनानीकतिथ्याज्या ॥ तथा च सूत्रं साकमेधा इति खंडे सूत्रितं ॥ सैनानीकेन सुविदत्रो अस्मा इति ॥ ॥सैषा सूक्ते पंचमी ॥ ॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ॥ अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ ॥हे अग्ने
सतादृशस्त्वं सैनानीकेन युक्तस्त्वं सुविदत्रः सुप्रलितः सुधनो वा अस्मे अस्माकं भव देवान् यष्टा देवानां हविः प्रदानेन पूजकः आ
यजिष्ठः यष्टृतमः अदब्धः केनाप्यतिरस्कृतः गोपाः देवानां गोपयिता । उतापि च नोऽस्माकं परस्पाः दुरितेभ्यः पारयिता पा
ता च त्वं द्युमत् कांतियुक्तं रेवत् धनयुक्तं यथा भवति तथास्मभ्यं दिदीहि दीदिहि क्षेमेण सर्वतो दीदिहि क्षेमेण सर्वतो दीप्य
स्व ॥ ॥इति द्वितीयस्य पंचमे प्रथमो वर्गः ॥ ॥७॥ जोहूत्र इति षडृचं दशमं सूक्तं गार्त्समदं त्रैष्टुभमाग्नेयं । जोहूत्र इत्यनुक्रान्तत्वात् ॥
सूक्तविनियोगः पूर्ववत् लैङ्गिकः । अथ तस्मिन् सूक्ते प्रथमा ॥ जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ॥ श्रियं वसानो
अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ॥ ॥जोहूत्रः सर्वैर्यज्ञार्थं स्तुत्याह्वातव्यो वा ह्वयतेर्जुहोतेर्वा रूपं ॥ तादृशः प्रथमः
अग्निर्देवानामग्रमग्रस्याम्नानात् ॥ मुख्यो योऽग्निः यत् यदा इळः इळायाः पदे उत्तरवेद्यात्मके स्थाने मनुष्येण यजमानेन समिद्धः
सोऽग्निः पितेव देवानां हविः प्रापणेन पालको भवति श्रियं दीप्तिं वसानः आच्छादयन् अमृतः मरणधर्मरहितः विचेताः विवि
धप्रज्ञः श्रवस्यः श्रव इत्यन्ननाम तस्मै हितः वाजी बलवान् सोऽग्निर्मर्मृजेन्यः सर्वैः परिचरणीयो भवति ॥ यङ्लुगन्तात् केन्यप्र
त्ययः ॥ ॥अथ द्वितीया ॥ ॥श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ॥ ॥श्यावा रथं वहतो रोहिता वा

भा॰अ॰२ नारयाहवकोविभृत्रः॥ अमृतो मरणधर्मरहितो विचेता विशिष्टप्रज्ञः चित्रभानुः विचित्रदीप्तिः श्यावा अधिवाहयनीयदीप्तिर्वा सोग्निः अ॰६
१०१ विश्वाभिर्गीर्भिः स्तुतिभिः धनभृतः सर्वैर्वाक्यैः क्रियमाणं मम हवं स्तोत्रं श्रूयाः शृणोतु॥ अस्याग्नेः रथं श्यावा श्याववर्णा अश्वा
वहतः वा अपि वा रोहिता रोहितवर्णा वा अरुषं रथं वहतः तादृग्वर्णयोरश्वयोः श्यावादिवर्णपरिग्रहः स्वेच्छया भवति। विभृत्रः नानालो
केषु विहृतः चक्रे कर्म निर्भरकारि खलु॥ कृतः कर्मणि लिट्॥ ॥अथ तृतीया॥ ॥उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशा
सु गर्भः॥ शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः॥ ॥उत्तानायामुत्तानशयायामरण्यां सुषूतं अग्निं होत्रार्थं ऋत्वि
ग्भिरमग्निमजनयन्। अध्वर्य्वादयः उत्पादयन् सोग्निः पुरुपेशासु पेशः इति रूपनाम। बहुरूपास्वोषधिषु गर्भो भुवत्॥ अंतर्वर्तमानया
गर्भ इव भवत्॥ भुवत् भवतेर्लेटि रूपं। शिरिणायां हिंसिकायां रात्रौ तस्यां भूतानि हिंस्यंते रात्रिः तस्यामपि अक्तुना अंजकेन तमसा तेनतमसा
अपरिवृतः असंस्पृष्टः अत एव महोभिः तेजोभिर्युक्तः प्रचेताः प्रकृष्टप्रज्ञः सन् वसति दीप्यमानो वर्तते॥ ॥अथ चतुर्थी॥ जि
घर्म्यग्निं हविषा घृतेन प्रतिक्षियंतं भुवनानि विश्वा। पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नै रभसं दृशानं॥ विश्वा सर्वाणि भुवनानि प्रतिः
क्षियंतं वैश्वानरात्मना धितिष्ठितं। पृथुं महांतं तिरश्चा सर्वतः प्रवर्तमानेन वयसा पशुसाधकेन बृहंतं प्रवृद्धं अन्नैर्हविर्लक्षणैर्व्यचिष्ठं व्यापकं र
भसं धिवेगवंतं दृशानं एवं गुणवत्तया दृश्यमानमग्निं पुरोडाशादिलक्षणेन हविषा घृतेन च प्रति। किं च सर्वाणि भूतानि क्षेति पृथिव्यां
वर्तमानेन वयसा धूमेन बृहंतं व्यचिष्ठमन्नैः रभसं दृशानमित्यनवकाशेन बलमाल्यं रसं दीप्यमानमित्येतदा विश्वतः व्यास सर्वतः प्रत्यंचं जुहो
मीत्यनेन रक्षासत्यहेलमानेन मनसा तज्जुषेत तस्य तन्मर्यश्रीरिति मर्यश्रीरित्येष स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः॥ दीप्य
मानो भवतीति॥ ॥अथ पंचमी॥ ॥आ विश्वतः प्रत्यंचं जिघर्म्यरक्षसा मनसा तज्जुषेत॥ मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृ
शे तन्वा जर्भुराणः॥ ॥विश्वतः सर्वतो व्याप्य वर्तमानं प्रत्यंचं यज्ञं प्रत्यागच्छंतं अग्निं यजनघृतेन आ जिघर्मि आसिंचामि॥ अरक्ष
सा बाधकरहितेन मनसा स्तोत्रेण सह तदाज्यं जुषेत भजतां सेवतां वर्तमानं प्रत्यंचं यज्ञं प्रत्यागच्छंतं॥ मर्यश्रीः मर्यैर्मर्त्यैः श्रयणीयो
भजनीयः॥ स्पृहयद्वर्णः यादृशं वर्णं यजमानः स्पृहयति तादृशवर्णोपेतः तन्वा तेजसा जर्भुराणः पूर्यमाणोग्निः नाभिमृशे अति
तेजस्वितया अभिमर्शनीयो न भवति॥ अभिमृशे कृत्यार्थे तवै प्रत्ययः॥ ॥अथ षष्ठी॥ ॥ज्ञेया भागं सहसानो वरेण त्वा
दूतासो मनुवद्वदेम॥ अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि॥ ॥वरेण वरणीयेन तेजसा नितरां तेजः नूनं सहसानः
शत्रूनभिभवन्॥ त्वं भागं भजनीयं स्तोत्रं ज्ञेयाः जानीहि॥ आशीर्लिङि बाहुलकाद्धस्यः यागाद्दीर्घे। त्वां दूतासः त्वं दूतो येषां सि
ते त्वादूतासः। यद्वा त्वया प्रेरिताः वयं मनुवत् मनुरिव वदेम स्तोत्रं ब्रूयाम॥ जुह्वा करणेन स्थापितेन जुहूनामिका आज्यपात्री विशेषो वात
या अनूनं संपूर्णं मधुपृचं मधुना कर्मफलेन यजमानं संयोजयंतमग्निं धनसाः धनस्य संभक्ताहं वचस्या स्तुतिकामनया जोहवी १०१
मि॥ आह्वयामि॥ ॥इति द्वितीयस्य षष्ठे द्वितीयो वर्गः॥ ॥श्रुधी हवमित्येकविंशत्यृचं एकादशं सूक्तं। गार्त्समदं॥ अत्रानु
क्रमणिका। श्रुधि सैकेंद्रं विराट्स्थानमंत्या विराट्स्थानात्रिष्टुप्तल्लक्षणमनुक्रमण्यामुक्तं॥ पंक्ती चैरात्रिष्टुभ

श्चतुर्दश्यो विराट्स्थान चक्रे पंक्ति भिश्च विराट्स्थानेति॥ अंत्याभिष्टुप्रचिन्नोषस्यानुक्रमात्। इंद्रो देवता ऋष्यस्य चतुर्थे हनि मरुत्वतीय शस्त्रे इंद्र सूक्ते 187/1914
निविधानं ततो वेदंतत्रीयं सूक्तं चतुर्थे हनीति खंडे सूत्रितं॥ श्रुधी हवमिंद्र मरुत्वां इंद्रेति मरुत्वतीयमिति॥ ॥अथ तस्मिन् सूक्ते प्रथमा॥
॥ ॥श्रुधी हवमिंद्र मा रिषण्यः स्याम ते दावने वसूनां॥ इमा हि त्वामूर्जो वर्धयंति वसूयवः सिंधवो न क्षरंतः॥ गृत्समदः स्तौति॥ ॥
हे इंद्र मे ममदीयमिदं स्तोत्रं श्रुधि शृणु मा रिषण्यः मा हिंसीः इदं मत्यं न साधीय इति मा निराकार्षीः॥ दुरस्यद्रविणस्य वृषण्यति रि
षण्यतीति निपातितः॥ वयं तेन तव वसूनां दावने दानाय स्याम पात्रभूता भवेम। इमाः अस्माभिर्दत्तानीव वसूयवः ज्ञातुर्यजमान
स्य धनमिच्छंति। छंदसि परेच्छायां क्यच्॥ तादृशानि क्षरंतः स्रवंतः सिंधव इव॥ घृतक्षरणोपेतानि॥ ऊर्जो हविर्लक्षणान्यन्नानि
त्वां वर्धयंति हि॥ ॥अथ द्वितीया॥ ॥सृजो महीरिंद्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः॥ अमर्त्यं चिद्दासं मन्यमानमवाभि
नदुक्थैर्वावृधानः॥ ॥शूर हिंसक हे इंद्र या अपो अपिन्वः अवर्धयः पूर्वीः प्रभूताः ताः अहिना मेघेन वृत्रेण वा परि
ष्ठिता आक्रांताः ततस्त्वं तस्मादहेः सकाशात् महीः महतीः अपः सृजः असृजः उक्थैः शस्त्रैर्वावृधानो वर्धमानस्त्वं दासं
सर्वस्यापक्षयितारं अमर्त्यं चित् मरणधर्मरहितमेवात्मानं मन्यमानं तमसुरं अवाभिनत् अवाभिन्नः यथा भवति तथा॥ भिदि
र विदारणे लङि सिपि रूपं॥ ॥अथ तृतीया॥ ॥उक्थेष्विन्नु शूर येषु चाकं स्तोमेष्विंद्र रुद्रियेषु च॥ तुभ्येदेता यासु मंदसानः
प्र वायवे सिस्रते न शुभ्राः॥ ॥हे शूर इंद्र येषु उक्थेषु स्तोत्रैः क्रियमाणेषु शस्त्रेषु रुद्रियेषु रुद्रियं सुखं तत्साधनभूतेषु यद्वा
रुद्राः स्तोतारः तत्कृतेषु तदात्मनां स्तोमेषु चनुक्षिप्रं चाकन् कमितः कामयसे कमते वा। कन तर्वाय इति लुङि रूपं॥ यासु स्तोत्रेष्व
रूपासु स्तुतिषु मंदसानो हृष्टो भवसि ता एताः शुभ्राः दीप्यमानाः स्तुतयः वायवे अस्मदीयं यज्ञं प्रत्यागच्छते। तुभ्येत् तु
भ्यमेव प्रसिस्रते तदर्थमेव प्रसरंतीति नः संप्रत्ययार्थे। ता अधुना सेवस्व॥ ॥अथ चतुर्थी॥ ॥शुभ्रं नु ते शुष्मं वर्धयंतः शुभ्रं व
ज्रं बाह्वोर्दधानाः॥ शुभ्रस्त्वमिंद्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः॥ ॥हे इंद्र ते तव शुभ्रं शोभनं शुष्मं बलं स्तोत्रैर्वर्धयंतः
शुभ्रं दीप्तं वज्रमायुधं नु क्षिप्रं तव बाह्वोर्दधानाः निदधानाः स्तूयमानो हीश्वरो दधाय वज्रमादत्ते इतीत्थंरूपेणायुधं निदधानाः
भवामः। वावृधानः स्तोत्रैर्वर्धमानः शुभ्रः तेजसा युक्तः त्वं अस्मे अस्माकं दासीः उपक्षयित्रीः विशः आसुरीः प्रजाः सूर्येण सूर्य
प्रकारेण आयुधं क्षिप्रेरयति त्वं युध्यस्वेति। एवंरूपेण वा वज्रेणैव निहितेन सह्याः अभिभवस हतेर्ल्यप्ययेन लिङि परस्मैपदं॥
॥ ॥अथ पंचमी॥ ॥गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियंतं॥ उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण॥ ॥हे शूर इंद्र
गुहा गुहायां निहितं निहितं अत एव गुह्यं अप्रकाश्यं गूळ्हं गूढं अप्सु अंतरा हितं अत्र कस्मिन्नतिरोधानरूपेऽर्थे पुनरुक्तयस्तिरोधा
नभूयस्त्व प्रतिपादनपरः अभ्यासाद्धि भूयानर्थो भवति यथा होदर्शनीयाहो दर्शनीयेति॥ तादृशं मायिनं मायाविनं असुरं क्षियं
तं निवसंतं उतो अपि च अपो द्यां दिवं च तस्तभ्वांसं स्वसामर्थ्येन स्तंभयंतं इत्थंभूतमहिं असुरं मेघं वा वीर्येण सामर्थ्यभूतेन वज्रे
णाहन् हतवानसि। हन्तेर्हिंसागत्योरित्यस्य लङि रूपं॥ ॥७॥ इति द्वितीयस्य षष्ठे तृतीयो वर्गः॥ ॥अथ षष्ठी॥ ॥स्तवा नु त

भा० अ० २ इंद्र पूर्व्या महान्युत स्तवाम नूतना कृतानि॥ स्तवा वज्रं बाह्वोरुशंतं स्तवा हरी सूर्यस्य केतू॥ ॥हे इंद्र पूर्व्या पुरातनानि महानि महांति ते अ० ६
तव कर्माणि नु क्षिप्रं स्तवस्तवाम॥ उत अपि च नूतना अधुनातनानि कृतानि कर्माणि स्तवाम बाह्वोरुशंतं दीप्यमानं वज्रं स्तवस्तवाम
२०२ किंच सूर्यस्य सुवृष्टेरकस्य सर्वीर्यस्य वा सूर्यो मनो वा इंद्रस्य केतू प्रज्ञापकौ हरी एतं नामकावश्वौ स्तवस्तवाम ऊ पसृक्षतौ तिङ्गतिङ्भ
वतीति उत्तमबहुवचनस्य मध्यमैकवचनादेशः॥ बहुलं छंदसीति शपो लुगभावः॥ ॥अथसप्तमी॥ ॥हरी नु त इंद्र वाजयंता घृत
श्चुतं स्वारमस्वार्ष्टां॥ विसमना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन्॥ ॥हे इंद्र वाजयंता वेगं कुर्वंतौ तव रोतौ तिणिच् ते तव हरी एतं नामका
वश्वौ घृतश्चुतं घृतस्योदकस्य च्यावयितारं स्वारं मेघध्वनिं नु क्षिप्रं अस्वार्ष्टां स्वरतिः शब्दकर्मा पाकं पचतीतिवद् कर्तारं नुवादः॥ लुः
ङि रूपं समना समरूपा या इ समना सर्वतो व्याप्ता प्रथिवी गर्जनेन श्रुत्वा ममोदकं भविष्यतीति प्रथिता भूत्॥ तथा पर्वतश्चित् मेघोपि सरिष्यन्
वर्षणार्थं गमिष्यन् अरंस्त अरमत रमते लुङि रूपं॥ ॥अथाष्टमी॥ ॥नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अ
क्रान्॥ दूरे पारे वाणीं वर्धयंत इंद्रेषितां धमनिं पप्रथन्नि॥ ॥अप्रयुच्छन् अप्रमाद्यन् वर्षणे सावधानः पर्वतो मेघः निषादि निभ
स्तो निषण्णं आसीत् मातृभिरद्भिः माध्यमिकाभिर्वाग्भिर्वा संवावशानः सह शब्दं कुर्वाणः अक्रान् अक्रमीत् इतस्ततः संचारमकरोत्
क्रमेर्लुङि बहुलं छंदसीति विकरणस्य लुक्॥ दूरे पारे अतिदूरे अंतरिक्षप्रांते स्थितां वाणीं माध्यमिकां वाचं वर्धयंतः स्तोत्रैः समृद्धां कुर्वंतः
स्तोतारो मरुतो वा इंद्रेषितामिंद्रेण प्रेरितां धमनिं शब्दं कुर्वाणां तां वाचं नितरां पप्रथन्॥ अप्रथयन्॥ ॥अथनवमी॥ ॥इंद्रो महां
सिंधुमाशयानं मायाविनं वृत्रमस्फुरन्निः॥ अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात्॥ ॥बलवानिंद्रः महां महांतं
सिंधुं स्यंदते इतस्ततः संचरतीति सिंधुर्मेघः तमाशयानं तमधिष्ठाय शयानं मायाविनं वृत्रमस्फुरं॥ यद्वा सिंधुरुदकं तदधिष्ठा
य शयानं वृत्रं रणो व्याकाशमिति वृत्रो मेघः तं निस्फुरन् निरहन् वृष्णः वर्षकस्य अस्येंद्रस्य कनिक्रदतः शब्दं कुर्वाणाद्वज्रात् भिया
ने भयं प्राप्ते रोदसी द्यावापृथिव्यौ अरेजेतां अकंपेतां दाधर्ति दर्धर्ति इत्यादिना कनिक्रदत् इति अभ्यासनिपातितः॥ ॥अथदशमी॥ ॥
अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात्॥ नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य॥ ॥वृष्णः कामानां वर्ष
कस्येंद्रस्य वज्रः अरोरवीत् भृशं शब्दमकरोत् करोत्यपेक्षायामाह॥ यद्यदा अमानुषं मनुष्याणां रहितं यद्वा मानुषोऽहं न भवामीत्येवं
मन्यमानं तमसुरं मानुषो मनुष्याणां हितकारी यद्वा मतिमानिंद्रो निजूर्वात् नितरां हिंस्यात् जिघांसतीत्यर्थः॥ जूर्वेर्हिंसाकर्मणो
लेटि रूपं॥ सुतस्याभिषुतं सोमं पपिवान् मायिनो मायाविनो दानवस्य दानोर्नाम्नः माता दानः शत्रुरित्यादि पुत्रत्वात्॥ तस्याः
पुत्रस्य मायाः वंचनानि न्यपादयत् न्यपातयत् बबाध इति यावत्॥ ॥इति द्वितीयस्य षष्ठे चतुर्थो वर्गः॥ ॥अथैतस्मि
न सूक्त एकादशी॥ पिबापिबेदिंद्र शूर सोमं मंदंतु त्वा मंदिनः सुतासः॥ पृणंतस्ते कुक्षी वर्धयंत्वित्था सुतः पौर इंद्रमाव॥ शूर २०२
बलवन् हे इंद्र पिब पिब त्वं अभिषुतमिमं सोमं पिब आदरार्थं पुनर्वचनं॥ मदिनो मदकराः सुता अभिषुताः सोमाः त्वां मंदंतु त्वां
मादयंतु॥ मदि स्तुत्यादिषु व्यत्ययेन परस्मैपदं॥ ते सोमास्ते तव कुक्षी उदरस्योभौ पार्श्वौ पृणंतः पूरयंतः संतः त्वां वर्धयं
तु॥

इत्था अनेन प्रकारेण पौरः उदरपूरकः सुतोऽभिषुतः सोमः इंद्रं त्वामावत् अतर्पयत् अतेर्लङ्पूरणार्थस्य लङि रूपम्॥ ॥अथ द्वादशी॥ ॥ 189/1914
त्वे इंद्राप्यभूम विप्रा धियं वनेम ऋतया सपंतः॥ अवस्यवो धीमहि प्रशस्तिं सद्यस्ते राये दावने स्याम॥ ॥हे इंद्र विप्रा मेधावि
नो वयं त्वे त्वयि अभूम अपि सानुनयप्रश्रेवर्ते तेन वह्दृदयावर्तामहे इति ऋतया ऋतं कर्मफलं तत्कामनया सपंतः
त्वां परिचरणाख्येन कर्मणा स्पृशंतो वयं धियं तव उद्देशेन क्रियमाणं कर्म वनेम संभजेम सहि वन षण संभक्तौ आशीर्लिङि
लिङ्याशिष्यङिति अङ्प्रत्ययः॥ किंच अवस्यवः त्वत्तो रक्षणमिच्छंतः प्रशस्तिं प्रशंसनं प्रकृष्टशंसनं स्तोत्रं धीमहि त्वयि निदध्मी
महि॥ ततः ते त्वदीयस्य राये धनस्य दावने दानाय सद्यः अभूताः स्याम॥ इदानीं भवेम॥ ॥अथत्रयोदशी॥ ॥स्याम
ते त इंद्र ये त ऊती अवस्यव ऊर्जं वर्धयंतः॥ शुष्मिंतमं यं चाकनाम देवास्मे रयिं रासि वीरवंतं॥ ॥हे इंद्र ते तव ऊती ऊत्या प्र
णयनेन अवतेः प्राप्त्यर्थस्य निरूपं॥ तेन अवस्यवो रक्षणकामाः ऊर्जं हविर्लक्षणमन्नं वर्धयंतो भवंति ते तव वयं ते स्याम तदधीना भव
म देव द्योतमान हे इंद्र शुष्मिंतमं दानभागा यादृशं तथा बलवत्तमं॥ यद्वा शत्रूणां शोषयितृतमं यं रयिं चाकनाम कामयामहे॥ कनतेः कांत
र्थस्य यङ्लुगंतस्य लिटि रूपं॥ वीरवंतं पुत्रपौत्रैः सहितं तादृशं रयिमस्मे अस्मभ्यं रासि देहि॥ ॥अथचतुर्दशी॥ ॥रासि क्षयं रासि
मित्रमस्मे रासि शर्ध इंद्र मारुतं नः॥ सजोषसो ये च मंदसानाः प्र वायवः पांत्यग्रणीतिं॥ ॥हे इंद्र क्षयं निवसत्यत्रेति क्षयो गृहं तद
स्मभ्यं रासि देहि तथा मित्रं मित्रत्वं अस्मभ्यं रासि वाक्यभेदादनिघातः॥ मारुतं मरुतां देवविशां संबंधि शर्धो बलं नोऽस्मभ्यं रासि
एतेन मरुतामप्यागमनं प्रार्थ्यते॥ ये मरुतः सजोषसः सह प्रीयमाणाः मंदसाना माद्यमाना वायवो वायवः गंतारः संतः अग्रणी
तिं अग्रनीयमानं सोमं प्रपांति प्रकर्षेण पिबंति तेषां शर्ध इति समन्वयः॥ यद्वा ये च वायवो अग्रनीयमानं सोमं पिबंति तेषां वायूनां
बलं रासि वायव इति पृथक् प्रयोगे बहुवचनं वायुर्हि सोमस्याग्रपातेति॥ ॥अथपंचदशी॥ ॥व्यंत्विन्नु येषु मंदसानस्तृपत्सोमं पाहि द्रह्य
दिंद्र॥ अस्मान्त्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः॥ ॥हे इंद्र येषु तव सहायभूतेषु मरुत्सु मंदसानो माद्यन् भवसि ते मरुतो नु क्षि
प्रं व्यंतु सोमं भक्षयंतु उत इवार्थे द्रह्यत् दृढं तृपत् रूपं आत्मानं दृढं कुर्वन् तृप्यन् तर्पयन् इमं सोमं पाहि पिब॥ तरुत्र शत्रूणां हिंसक
हे इंद्र त्वं बृहद्भिर्बलवद्भिः अर्कैः अर्चनीयैर्मरुद्भिः सहितस्त्वं आ इति चार्थे तेनास्मान् पृत्सु संग्रामेषु पशुपुत्रादिभिः साद्भिरस्मान् तथा
द्यां नभश्च दिवं अवर्धयः॥ यद्वा येषु सोमेषु मंदसानो माद्यमानो भवसि ते सोमा व्यंतु त्वां गच्छंतु शेषं पूर्ववत्॥ ॥इति द्वितीयस्य ष
ष्ठे पंचमो वर्गः॥ ॥अथ षोडशी॥ ॥बृहंत इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान्॥ स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिंद्र वा
जमग्मन्॥ तरुत्र आपद्भ्यस्तारक हे इंद्र ये पुमांसः सुम्नं सुखकरं उक्थेभिर्वा उक्थैः शस्त्रैः आविवासात् परिचरेयुः विवासतेर्लेट्याडाग
मः ते एव पुमांसः नु क्षिप्रं अभिवृद्धेन बृहंतो महांतो भवंति॥ बृंहणः॥ किंच बर्हिः स्तृणानासः बर्हिराच्छादयंतः ये त्वां परिच
रंति ते त्वोता इत त्वया रक्षिताः संतः पस्त्यावत् गृहसहितं वाजमन्नं अग्मन् गच्छंति॥ ॥अथ सप्तदशी॥ ॥उग्रेष्विन्नु शूर मंद
सानस्त्रिकद्रुकेषु पाहि सोममिंद्र॥ प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिं॥ ॥हे शूर बलवन् इंद्र उग्रेषु उद्गूर्णेषु त्रि

भा॰अ॰२ गल्लवत्काग्निवत् दुकेषु ज्योतिर्गोशे युक्तियेतन्नामकेषु आभिप्लविकेषु अहःसु मंदसानो हृष्यन् सोमं पाहि पिब ततः प्रीणानः सोमपानेन अ॰६
प्रीताभवानश्मश्रु पुलिमं तोमं प्रशाधुवत धून कंपनं यत्र तु गतस्य रूपं पुनः पुनर्धन्वन्न कृतस्याभिषुतस्य पातिं पानमुद्दिश्य हृ
१०३ रिभ्यामश्वाभ्यां युक्तः सन् याहि गच्छ॥ ॥अथाष्टादशी॥ ॥धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभं॥ अपावृणोर्ज्यो
तिरार्याय नि सव्यतः सादि दस्युरिंद्र॥ ॥शूर हे इंद्र शवस्तादृशं बलं धिष्व धारय दध्यातेर्लोटि बहुलं छंदसीति शपो लुक्॥ छंदस्यु
भयथेति वास आर्धधातुकत्वात् इडागमः॥ येन बलेन दानुं दनोः पुत्रं वृत्रं और्णवाभं ऊर्णनाभिः कीटविशेषः ऊर्णवाभ उल्क
भ्वते तमिव भासाभिनत् बिभेदेत्यर्थः यद्वा ऊर्णनाभिः तद्वाभं तस्य सदृशमित्यर्थः॥ ततस्तमोरूपस्य हननाद्यार्यायकर्मणामनु
ष्ठात्रे जनाय कुलाय राजर्षये वा ज्योतिः प्रकाशकं मासित्यं अपावृणोः उद्घाटितवानसि दस्युः कर्मणामुपक्षयिता सर्वलः सव्यतः
तस्य सव्यपार्श्वे निषादितः यानि तरां संनाबाधितो वर्तते॥ ॥अथैकोनविंशी॥ ॥सनेम ये त ऊतिभिस्तरंतो विश्वाः स्पृध आर्येण
दस्यून्॥ अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरंधयः साख्यस्य त्रिताय॥ ॥सनेम तान् पुरुषान् संभजेम ये तव ऊतिभिः पालनैः विश्वाः
स्पृधः स्पर्धमानाः सर्वा विड्वः तरंतः हिंसंतः॥ तथा आर्येण आर्यभावेन दस्यून् उपक्षयितॄन् अहिंसंतो भवंति॥ तद्दस्मभ्यं वशमा
नय किं च त्वष्टुः पुत्रं विश्वरूपमेतन्नामकमसुरं अरंधयः रध्यतिर्वशगमने वशमानय॥ यद्वा तमसुरमवधीः रध
हिंसासंराध्योः रधिजभोरचीति नुम् इट्टस्त्वाद्यमवधीरित्ययमर्थः॥ ते त्रितायक विश्वरूपो वैत्वाष्ट्र इत्यत्र महता प्रबंधेन प्रपंचि
तः॥ किं च सख्यस्य सखिभावस्य अनुपालनाय त्रिताय महर्षये वनं रक्षानय॥ यद्वा सनेम ते वयं प्रशस्ताभव ममये च यंत वरक्षाभिः
स्पर्धमानाः प्रजाः दस्यूंश्च तरंतोऽतिक्रामंतो भवेम सनेमेति रथ्यर्थ आप्नुत॥ यथा सनेम मित्रावरुणा सनंत इति सकर्मकश्च नभ्या
द्गजः सनेम वाजं तव त्वेति। तरंतः तॄ प्लवनतरणयोः शानशि रूपं संज्ञावचनश्चैतंतोदात्तः यथा नरंतउद्य मंहनेति॥ ॥अथविंशी॥ ॥
अस्य सुवानस्य मंदिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः॥ अवर्तयत्सूर्यो न चक्रं भिनद्वलमिंद्रो अंगिरस्वान्॥ ॥मंदिनो मद
रमिमं सुवानस्य कृतवतः त्रितस्यतार्णतमस्य महर्षेरिर्थ वावृधानः सोमेन वर्धमान इंद्रः अर्बुद अंबूनि ददातीति अर्बुदो मेघः
अनुस्वारस्य छांदसः॥ यद्वा नामैतत् अर्बुदाख्यमसुरं न्यस्तः॥ असु क्षेपणे हिंसायामित्यस्य लङि तिपि बहुलं छंदसीति विकरणस्य लुक्॥
गुणे कृते हल्ङ्याप्भ्य इति तलोपः॥ नितरामवधीत्। महांतं विद्द्वुदंनिकमीः पदेत्यादिषु अर्बुद यः स्पष्टमुक्तं। किं च अंगिरस्वान् अंगि
रोभिः सहित इंद्रः अवर्तयत् असुरहननार्थं वज्रं भ्रामयत् न सूर्यश्च कं भ्रामयति तद्वत्॥ यद्वा यमस्मात् सूरा तभियासूर्यः
स्वकीयं रथचक्रेन अवर्तयत् निषेधार्थीयो नकारः वर्तयितुं नाशकत् तं बलं पणीनां प्रभुमसुरं अभिनत् वज्रेणाभिनत् यद्वा ह्रि
चक्रो ह्रि पूर्वं सूर्यस्य रथः। तस्यैकं चक्रमिंद्रेणापहृतं सूर्य इति कर्पां कलुगितिप ष्ठ्येकवचनस्य सूर्यस्य संबंधि चापहृतं तदेकं चक्रं ३०२
मवर्तयत् रक्षो हननार्थं भ्रामयत्॥ तेन चक्रेण बलमभिनत् इत्यर्थः॥ अहर्गणेषु माध्यंदिन सवने पूतायमानरूपेषु अछा
वाकस्य असूरदः ग्रस्य संशकमभितं पेवतिम्॥ नूनं सा त इति पात स्यांते त्रिसनायस प्रत्रिंच। नूनं सा त इत्यंतमुत्तममिति॥

मिपासूक्त एकविंशी॥ ॥नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी॥ शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सु 191
वीराः॥ ॥हे इंद्र या दक्षिणा दक्षमुत्साहनं करोतीति दक्षिणा स्तोतृभ्यो देयात् त्वत्संबंधिनी मघोनी धनवती जरित्रे स्तोत्रे वरं श्रेष्ठम 1914
भिमतमर्थं नूनं प्रति दुहीयत। इदानीं प्रति दोग्धि संपादयत्वित्यर्थः॥ तादृशीं दक्षिणां स्तोतृभ्यो स्मभ्यं शिक्षा प्रयच्छ किंच भगो
भजनीयः त्वं माति धक् दहिर्नाशार्थस्य लुङि मंत्रेघसेत्यादिना च्लेर्लुक्॥ नास्मान् अतिक्रम्य अन्येभ्यो दक्षिणां मादाः प्रथममस्मभ्यं द
त्त्वा पश्चादन्येभ्यो दीयतामित्यर्थः॥ यद्वा नो अस्माकं कामान् मा धक् मा धाक्षीः अपेक्षित फलदानेन पूरयेत्यर्थः॥ सुवीराः शोभनपुत्र
पौत्राः संतो वयं विदथे यज्ञे बृहत्प्रभूतं स्तोत्रं वदेम तामुद्दिश्य ब्रवाम अत्र सा ते प्रति दुग्धामिति प्रकृत्य वीरो गवीरयत्यमित्रान्वेत
वा स्याइति कर्मणा वीरयतेर्वेत्यंतं निरुक्तमनुसंधेयं॥ ॥इति द्वितीयस्य पंचमे पंचमो वर्गः॥ ॥६॥ इति गार्त्समदे मंडले प्रथमोनुवा
कः॥ द्वितीयेनुवाके एकादश सूक्तानि॥ तत्र यो जात इति पंचदशर्चं प्रथमं सूक्तं॥ गार्त्समदं त्रैष्टुभमैंद्रं सर्वसवेनिष्केवल्यनिविद्धानीय
स्य पुरस्तात् यो जात एवेति सूक्तं शंसनं॥ यदि प्रयास्यानीति खंडे सूत्रितं॥ यो जात एवेति निष्केवल्य इति। आभिप्लविकेत्तहनि निष्केव
ल्ये यो जात एवेति निविद्धानीयं॥ सूत्रितं च॥ तृतीयस्य त्र्यर्यमायो जात एवेति माध्यंदिन इति विश्वजिति माध्यंदिन सवने मैत्रावरु
णः स्व उग्न्भ प्रकृतात्सूक्तात् पूर्वं यो जात एवेति सामसूक्तं शंसेत विश्वजितोग्निनर इति खंडे सूत्रितं॥ सत्राम हासो यो जात एवाभरक्
इति सामसूक्तानि॥ अतिपु निष्केवल्यानि विधानमिदं श्येना जिराभ्यामित्यखंडे सूत्रितं॥ निवाहारी इति यो जात एवेति माध्यंदिन इति
महाव्रते निष्केवल्य यो जात एवेति सूक्तं॥ उरु इति खंडे सूत्रितं॥ बनेन वायोन्य धायि चाकन् यो जात एव प्रथमो मनस्वानिति॥ अत्रेति
हासो गृत्समदः देवताया मुक्तः संयुत्स्य मतप्स्यमात्मानमिंद्रं बाहीरन महद्रूपः अदृश्यत मुहूर्तेन दिविदिव्योपाष्टिं च दृच॥१॥ ॥तमिंद्रमिति मत्वा
त दैत्यो भीमपराक्रमौ॥ धुनिश्च चुमुरिश्चोभा मायुधावभिपेततुः॥२॥ विदित्वा सततं योर्थवषिः पापं चिकीर्षिताः॥ यो जात इति स
तत्कर्माण्यैंद्राण्यकीर्तयत्॥३॥ अन्यत्वन्यथा वर्णयंति॥ पुराकिल द्वावैन्ययज्ञं समाजग्मुः॥ गृत्समदोपि तत्रागत्य सदस्यासी
त् दैत्यास्तं इंद्रं विघांसयाशु समागमन॥ तान्दृष्ट्वानि र्जगामिंद्रोय शाकृत समदाकृतिः॥ स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्नि
रगच्छत॥ निर्गच्छंतमृषिं दृष्ट्वा अयमिंद्र इति मन्यमाना नास्तमसुराः परिवव्रुः॥ नाहमिंद्र इत्युक्त्वा॥ किं तेयं गुणापेतमदुरयनेनः
सक्तेन तान्समुवाच॥ अपरेत्वेवं कथयंति॥ गृत्समदस्य यज्ञप्रविष्टमकार्षीत् नमिंद्रं ज्ञात्वा असुराः परिवव्रुः॥ स इंद्रो गृत्समद
रूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम॥ ततोसुराः इंद्रो विलंबित इत्यंतः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अ
यमिंद्रो गृत्समदरूपेण गत इति तं जगृहुः॥ सता आद्यमिंद्रोपि इत्यनेन सूक्तेन प्रत्युवाच॥ अयमेवार्थो महाभारते प्रपं
चितः॥ ॥तत्र प्रथमा॥ ॥यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्॥ यस्य शुष्माद्रोदसी अभ्यसे
तां नृम्णस्य मह्ना स जनास इंद्रः॥ ॥गृत्समदो ब्रूते॥ हे जनासो जनाः हे असुराः यः जात एव जायमान एव सन् प्रथमः देवानां प्र
धानभूतः मनस्वान् मनस्विनामग्रगण्यः देवो द्योतमानः सन् क्रतुना रक्षणाख्येन स्वकीयेन कर्मणा देवान्सर्वा

भा॰ अ॰२ नयाग देवान्॥ पर्यभूषत् रक्षकत्वेन पर्यग्रहीत्॥ भूषा अलंकारे भ्वादिः लङि रूपं॥ यद्वा सर्वानन्यान् पर्यभूषत् पर्यभवत् अत्यक्रा अ॰६
१०४ मत् अभिभूयते त्रवर्तनं व्यत्ययेन शपः॥ श्युकः क्कितीति इट्प्रतिषेधः॥ यस्येंद्रस्य शुष्मात् शारीरात् बलात् रोदसी द्यावापृथिव्यौ अभ्यसेतां।
अबिभीतां। भ्यसु भये अनुदात्तेत् भ्यस भयवेपनयोरिति निरुक्तः॥ अभ्यसेतां वेपेतां वा। तथा च मंत्रांतरं॥ इमे चित्तव मन्यवे
वेपेते भियसा मही इति। नृम्णस्य सेनालक्षणस्य बलस्य मह्ना महत्त्वेन युक्तः स इंद्रो नामा इमिति। अत्र निरुक्तं। यो जात एव प्रथमो मन
स्वान् देवो देवान् क्रतुना कर्मणा पर्यभवत् पर्यगृह्णात् पर्यरक्षत् अत्यक्रामत् इति वा यस्य बलात् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य
मह्ना बलस्य महत्त्वेन स जनास इंद्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्तेति॥ ॥अथ द्वितीया॥ ॥ यः पृथिवीं व्यथमानामदृंहत् यः
पर्वतान् प्रकुपितां अरम्णात्॥ यो अंतरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इंद्रः॥ ॥हे जनाः यः इंद्रः व्यथमानां चलंतीं पृथिवीं
अदृंहत्॥ शर्कराभिर्दृढामकरोत्॥ दृह दृहि वृद्धौ॥ यश्च प्रकुपितान् इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमि
तवान्॥ स्वे स्वे स्थाने स्थापितवान्॥ अरम्णात् रमु क्रीडायां अंतर्भावितण्यर्थस्य व्यत्ययेन श्ना प्रत्ययः॥ यश्च वरीयः उरुतमं अंतरिक्षं वि
ममे निर्ममे विस्तीर्णं चकारेत्यर्थः॥ यश्च द्यां दिवमस्तभ्नात् स्तभ्नित् रोधमकरोत्॥ स्तंभु रोधने इति सौत्रो धातुः स एव इंद्रः नामा इमिति।
॥ ॥अथ तृतीया॥ ॥ यो हत्वाहिमरिणात् सप्त सिंधून् यो गा उदाजदपधा वलस्य॥ यो अश्मनोरंतरग्निं जजान संवृ
क् समत्सु स जनास इंद्रः॥ ॥ यः अहिं मेघं हत्वा मेघहननं कृत्वा सप्त सर्पणशीलाः सिंधूः स्यंदनशीलाः अपः अरिणात् मेरय
त्। यद्वा सप्त गंगा यमुनाद्या मुख्या नदीरिरिणात् तदुप्रस्रवणं व्याहि॥ यश्च बलस्य बलनामकस्यासुरस्य अपधानात् निरुद्धा
गा धान्निर्गताः गा उदाजत्॥ निरगमयत्। अपधा अपपूर्वाद्धाञो गतश्चोपसर्गे इति भावे कः प्रत्ययः सुपां सुलुगिति पंचम्या
आकारः॥ यश्च अश्मनोः अश्नुते व्याप्नोत्यंतरिक्षमित्यश्मा मेघः अत्यंतमदृप्रयोः मेघयोरंतर्मध्ये वैद्युतमग्निं जजान॥ उत्पाद
यामास। यश्च समत्सु संभक्षयंति यत्र अरीणामायूंषीति समदः संग्रामाः तेषु संवृक् संवर्जनकृत् शत्रूणां हिनस्ति वा वृजि वर्जने संवृक् भव
ति। वृणक्तेः सार्वस्याक्विपि रूपं। स इंद्रो नामा इमिति॥ ॥अथ चतुर्थी॥ ॥ येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः॥
श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास इंद्रः॥ ॥ येन इंद्रेण इमानि विश्वानि च्यवनानि च्यावनानि भुवनानि कृतानि स्थिरी
कृतानि॥ यश्च दासं वर्णं शूद्रादिकं यद्वा दासमुपक्षपयितारं असुरं अधरं निकृष्टमकः गुहायां गुह्यस्थाने नरके वा अकः अकार्षीत्।
करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुकि रूपं॥ लक्षं लक्ष्यं जिगीवान् जितवान्। सो सन्लिटोर्जेरिति अभ्यासादुत्तरस्य कुत्वं। दीर्घः
छांदसः॥ जितवान् यः। अर्यः अरेः षष्ठ्येकवचने छांदसो यणादेशः॥ शत्रोः संबंधीनि पुष्टानि समृद्धानि आदत् आदत्ते। तत्र
दृष्टांतः॥ श्वघ्नी यश्च अभिर्मृगान् हंतीति श्वघ्नी व्याधः यथा व्याधो जिघत्सन् मृगं परिगृह्णाति तद्वत्॥ ॥अथ पंचमी॥ ॥ यं स्मा
पृच्छंति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनं॥ सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इंद्रः॥ ॥ अपश्यंतो जना घो १०४
रं शत्रूणां घातकं यं पृच्छंति स्म कुह स इति स इंद्रः कुत्र वर्तत इति। सेति सोचि लोपे चेत्पादपूरणमिति सोर्लोपे गुणः। नैषो अस्तीति

यतीति मन्यमाना जनाः एनमिंद्रमाहुः एष इंद्रो नास्तीति तथा च मंत्रो नेंद्रो अस्तीति नेम उ त्व आहेति। इमिति पूरणः स इंद्रः विज इव उद्वे 193/1914
जकार्थे इव उद्वेजक एव सन् अर्यः अरेः संबंधीनि पुष्टीः पोषकानि गवाश्वादीनि धनानि आमिनाति सर्वतो हिनस्ति मीङ् हिंसायां मिनाते
निगमे इति ह्रस्वः अतस्तस्मात् अस्मा इंद्राय स इंद्रो अस्ति इति श्रद्धां विश्वासं कुरुत यद्यप्यसौ वित्रासकत्वादस्माभिर्न दृश्यते तथापि अस्तीति
विश्वासं कुरुतेत्यर्थः निर्धारणमहिमोपेतः स इंद्रो नामा इमिति॥ ॥इति द्वितीयस्य षष्ठे सप्तमो वर्गः॥ ॥ अथास्मिन्नष्टमे षष्ठी॥ ॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः॥ युक्तग्राव्णो यो ऽविता सुशिप्रः सुतसोमस्य स जनास इंद्रः॥ ॥ यो रध्र
स्य राधिंसामर्थ्याः समृद्धस्य चोदिता धनानां प्रेरयिता भवति यश्च कृशस्य च दरिद्रस्य च यश्च नाधमानस्य नाधृ याञ्चोपता
पैश्वर्याशीःषु याचमानस्य कीरेः॥ करोतेः कीर्तयतेर्वा स्तोतुर्ब्रह्मणो ब्राह्मणस्य च धनानां प्रेरयिता यश्च सुशिप्रः शोभनहनुः सु
शीर्षको वा स यः युक्तग्राव्णः अभिषवार्थमुद्यतग्राव्णः सुतसोमस्याभिषुतसोमस्य यजमानस्याविता रक्षिता भवति स एव इंद्रो नामा इ
मिति। ब्रह्मणो वृद्धस्य तं नपरत्वस्या प्रदानत्वात्। यथा ब्रह्मवत्वाना अजरं सुवीरमिति। अयं तं तो दातः पद्यत इति तन्नपरः॥ ॥अ
थ सप्तमी॥ ॥ यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः॥ यः सूर्यं य उषसं जजान यो अपां नेता स जनास इंद्रः।
॥ ॥ यस्य सर्वत्र यमितुर्वर्तमानस्य प्रदिशि प्रदेशने अनुशासने अश्वाः सो वा वर्तते। यस्यानुशासने गावः यस्यानुशासने ग्रामाः
यसंति ग्रामाः जनपदाः यस्याज्ञायां विश्वे सर्वे रथासो रथाश्च वर्तंते। यश्च वृत्रं हत्वा सूर्यं जजान जनयामास। यश्चोषसं। तथा मं
त्रः अजीजनत्सूर्यमुषसमग्निमिति। यश्च मेघभेदनद्वारा अपां नेता प्रेरकः स इंद्र इत्यादि प्रसिद्धं॥ ॥अथाष्टमी॥ ॥ यं क्रंदसी
संयती विह्वयेते परेऽवर उभया अमित्राः॥ समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इंद्रः॥ ॥ यः क्रंदसी रोदसी शब्दं कुर्वा
णा मानुषी दैवी च इमे सेने संयती परस्परं संगच्छंत्यौ यमिंद्रं विह्वयेते स्वरक्षार्थं विविधमाह्वयतः परे उत्कृष्टाः अवरे अवार
अधमाश्चोभयाः उभयविधाः उभयमाह्वयंति॥ समानं इंद्रं रथं सदृशं रथमातस्थिवांसा आस्थितौ इंद्राग्नी तमेवेंद्रं नाना
पृथक्पृथक् हवेते आह्वयेते यद्वा समानमेकं रथमारूढौ इंद्राग्नी हवेते यज्ञार्थं यजमानैः पृथगाह्वयेते तथोऽस्य तरः स इंद्रो ना
इमिति॥ ॥अथ नवमी॥ ॥ यस्मान्न ऋते विजयंते जनासो यं युध्यमाना अवसे हवंते॥ यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्यु
त् स जनास इंद्रः॥ ॥ यस्मादृते जनासो जनाः न विजयंते विजयं न प्राप्नुवंति। अतः युध्यमानाः युद्धं कुर्वाणा जना अवसे स्वरक्षणा
य तमिंद्रं हवंते आह्वयंति। यश्च विश्वस्य सर्वस्य जगतः प्रतिमानं प्रतिनिधिर्बभूव॥ यश्च अच्युतच्युत्॥ अच्युतानां क्षयरहितानां
पर्वतादीनां च्यावयिता स इंद्र इत्यादि प्रसिद्धं॥ ॥अथ दशमी॥ ॥ यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान॥ यः श
र्धते नानुददाति शृध्यां यो दस्योर्हंता स जनास इंद्रः॥ ॥ यः महि महत् एनः पापं दधानान् शश्वतः बहून् अमन्यमानान् आ
त्मानं अजानतः जनान् शर्वा शृणाति शत्रून् अनेनेति शरः वज्रः तेन आयुधेन जघान हंतेर्लिटि रूपं यश्च शर्धते उत्साहं कुर्वते अ
नात्मज्ञाय जनाय शृध्यां उत्साहजननीयं कर्म नानुददाति न प्रयच्छति। अनुपूर्वात् ददातेः दानं जुहोत्यादिक अभ्यस्तानामादिरिति

भा॰अ॰२ निहितो दासवर्तीति गमेर्निघातः॥ यश्च दस्योः पुष्टानि आदत्ते स इंद्र इत्यादि पूर्ववत्॥ ॥इति द्वितीयस्य षष्ठे अष्टमो अ॰६
वर्गः॥ ॥अथैकादशी॥ ॥यः शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत्॥ ओजायमानं यो अहिं जघान दानुं शयानं स जना
२०७ स इंद्रः॥ ॥यः पर्वतेषु क्षियंतं च इंद्रभियावहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसंतं शंबरं एतन्नामकं मायाविनमसुरं
चत्वारिंश्यां शरदि चत्वारिंशे संवत्सरे अन्वविंदत् अन्विष्य लब्धवान् ततः ओजायमानं ओजोवत् आचरंतं स्यड् सलोपश्च तुजंतात्
सामान्येति सकारलोपः॥ बलमाचरंतं अहिं अहंतारं दानुं दानवं शयानं शयानं जघान हतवान् स इंद्रो नाहमिति॥ ॥अथ द्वादशी
॥ ॥यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिंधून्॥ यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतं स जनास इंद्रः॥ ॥यः स
प्तरश्मिः सप्तसंख्याकाः पर्जन्यात्मका यस्य तु च रश्मयः वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्चेत्येते ये चे
मे शिमिविदिषः पर्जन्याः सप्त पृथिवीमभिवर्षंति वृष्टिभिरिति तैत्तिरीयारण्यके समाम्नाताः। वृषभो वर्षकः तुविष्मान् वृद्धिमान्
बलवान् बाहुसमर्पणस्वभावान् सिंधून् सर्तवे सरणाय अवासृजत् अवसृष्टवान् यः इंद्रो गंगाद्याः सप्त मुख्याः नदीः सृज
यत यश्च वज्रबाहुः स नु द्यां दिवमारोहंतं रौहिणमसुरं अस्फुरत्॥ जघान स्फुरणेन हानिः॥ ॥अथ त्रयोदशी॥ ॥ द्यावा चिदस्मै
पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयंते॥ यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इंद्रः॥ ॥अस्मै इंद्राय द्यावा च या
वापृथिवी द्युलोकपृथिव्यौ इत्यनयोः प्रमित्रयोर्वरणयोरिति यत्॥ नमेते स्वयमेव प्रह्वौ भवतः। णमु प्रह्वत्वे कर्मकर्तरि लुङ् तस्य नमां
चक्रुः चिणाविति यकः प्रतिषेधः। चिदपि च अस्येंद्रस्य शुष्मात् बलात् पर्वताभयंते बिभ्यति यः सोमपाः सोमस्य पाता निचितः स
र्वैः यद्वा अन्यैः अपि देवैभ्यो दृढांगः॥ वज्रबाहुः वज्रसदृशबाहुः यश्च वज्रहस्तः वज्रयुक्तः स इंद्र इत्यादि प्रसिद्धं॥ ॥अथ
चतुर्दशी॥ ॥७॥ यः सुन्वंतमवति यः पचंतं यः शंसंतं यः शशमानमूती॥ यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इंद्रः॥ ॥
यः सुन्वंतं सोमाभिषवं कुर्वंतं यजमानमवति रक्षति। यश्च पुरोडाशादीनि हवींषि पचंतं यश्च ईडते इत्यते सु पांसु लुगिति चतुर्थ्याः पूर्व
सवर्णदीर्घः। स्तोत्रशस्त्राणि शंसंतं यश्च शशमानं भवति स्तोत्रं कुर्वाणं रक्षति ब्रह्म परिवृढं स्तोत्रं यस्य च वर्धनं वृद्धिकरं भवति॥
तस्य च यस्य सोमो वर्धनहेतुर्भवति यस्य च इदं राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति॥ स इंद्र इत्यादि प्रसिद्धं॥ ॥अ
थ पंचदशी॥ ॥यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः॥ वयं त इंद्र विश्वह प्रियासः सुवीरासो विदथमा वदेम॥ ॥
दुध्रः दुर्धरः। यः सुन्वते सोमाभिषवं कुर्वते पुरोडाशादि हवींषि पचते यजमाना
य वाजं अन्नं बलं वा आदर्दर्षि भृशं प्रापयसि स त्वं सत्यः यथार्थभूतोसि न पुनर्नास्तीति बुद्धियोग्योसि किलेति प्रसिद्धौ। ते तव प्रि
यासः सर्वदा स्नेहास्पदभूता वयं सुवीरासः कल्याणपुत्रपौत्राः संतो विश्वह सर्वदा विदथं स्तोत्रं आवदेम ब्रूयाम॥ ॥इति द्वितीयस्य षष्ठे नवमो वर्गः॥ १०७
ऋतुर्जनित्रीति त्रयोदशर्चं द्वितीयं सूक्तं गार्त्समदं। ऋतुः सप्तोना त्याद्रिष्टुप् इत्यनुक्रमणिका॥ अस्मिन्नेव तदुक्तं इति कारादंगतीत्रिष्टुप्
त्रिष्टुप्सिद्धं तस्य परिभाषया जगत्यः। इंद्रो देवता। उक्थ्ये तृतीयसवने छावाकशस्त्रे अस्य सूक्तस्य विनियोगः॥ सूत्रितं च॥ ऋतुर्जनित्री

195/1914

तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते॥ तदाहना अभवत्पिप्युषी पयोंशोः पीयूषं प्रथमं तदुक्थ्यम्॥ ॥ऋतुर्जनित्रीति ... न्ये कानीति सूत्रितं॥ ॥अथ तस्मिन्
सूक्ते प्रथमा॥ ॥ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते॥ तदाहना अभवत् पिप्युषी पयोंशोः पीयूषं प्रथमं
तदुक्थ्यम्॥ ॥ऋतुर्वर्षाख्यः कालः जनित्री सोमस्य जननयित्री जननी भवति। तस्याः परि तस्याः जनन्याः सकाशाज्जातः सोमस्य अ
पः उदकानि मक्षू शीघ्रमाविशत्॥ यासु अप्सु सोमो वर्धते ता अविशदित्यन्वयः॥ तस्मादप्सु प्रविष्टत्वात् सोमः आहना आहंतव्या अ
भिषोतव्या भवति आहना इति सकारांतमिदं पदं॥ तथा च मंत्रवर्णः॥ यत्र मही आहनसो विहायसः इति॥ या वा अप्सु रूपायाः सोम
वा लतायाः पयः सारभूतं पिप्युषी वर्धयंत्यभवत् स्फायतेर्लिटि प्युसो लिट्यभ्यासस्येति पी भावः। वसोः संप्रसारणं उगितश्चेति ङीप्। अंशोः
तस्याः सोमलतायाः पीयूषं रसभूतं पयः उक्थ्यं प्रशस्यं हविर्विशिष्टं भवति॥ ॥अथ द्वितीया॥ ॥सध्रीमा यंति परि बिभ्रतीः प
यो विश्वप्स्न्याय प्र भरंत भोजनं॥ समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ ॥सध्रीं अंचतेर्लुक् छांदसः सहस्य
सध्रिरिति सध्र्यादेशः अंतोदात्तत्वेन निपातितः। सध्रीचीनाः पयः उदकं परिपरितो बिभ्रतीर्बिभ्राणाः ईं एतान् यः आयंति सर्वतो ग
च्छंति तान् वा याः विश्वप्स्न्याय विश्वासामपामाश्रयभूताय समुद्राय भोजनं भुज्यत इति भोजनः पयः प्रभरंत प्रकर्षेण संपादयं
ति कृत्यल्युटो बहुलं॥ प्रवतां प्रवणवतां निम्नगानां पयसामनुष्यदे रूत्यार्थे तवेकेन केन्यत्वन इति केन् प्रत्ययः। अनुष्यंदनीया अ
मार्गः समानः कान्दियतां स्तानि सोमो त्वाहननदीप्रवर्तनादीनि कर्माणि प्रथमं पूर्वं अकृणोः अकार्षीः स ताः इंद्र महिमा पत त्वं
उक्थ्यासि सर्वैः प्रशस्यो भवसि॥ ॥अथ तृतीया॥ ॥अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते॥ विश्वा एकस्य विनुद
स्तितिक्षते यस्तासु उक्थ्यः॥ ॥यजमानो यदा वेदिभ्यां दक्षिणा ददाति तदेको होतानुवदति याज्यापुरोनुवाक्याभ्यां देवताः स्मारयति
एकोध्वर्युः रूपा पश्वादीनां रूपाणि मिनन् हिंसन् तदपाः तादृशपशुनाय्यमपः कर्म यस्य तादृशः अस्यैतावन्तःसन् ईयते देवयजन
सर्वत्र गच्छति एकस्याध्वर्योः विश्वा विनुदः सर्वाणि तत्कृतकाणि विक्षेपणरूपाणि कर्माणि वैगुण्यानीति तितिक्षते न स्योग्य प्रायश्चित्तकर
णेन क्षमासहते॥ गुप्तितिज्भ्यः सन्निति सन्॥ तानि हविः प्रदानादीनि कर्माणि यस्य मरुणाः कारयसि त्वमुक्थ्यासि॥ ॥
अथ चतुर्थी॥ ॥प्रजाभ्यः पुष्टिं विभजंत आसते रयिमिव पृष्ठं प्रभवंतमायते॥ असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ ॥
इंद्र इ पुष्टिं तया पोषकं धनं सर्वाभ्यः प्रजाभ्यः विभजंतः अस्य तावत अस्य तानि हितिविभागं कुर्वंतो गृहमेधिनः आसते
स्वस्व गृहे पानिव संति। तत्र दृष्टांतः॥ आयते गृहं प्रत्यागच्छते तिथये पृष्ठं भारकं प्रभवंतं बहुभरणसमर्थं रयिं धनं यथा विभजंत
प्रयच्छंति तद्वत्। असिन्वन् बंधादि कर्म कुर्वन् लोकः पितुः पालयित्र्यादेः सकाशात आगतं भोजनं मुदं कं तत्कार्या ओषधीः
दंष्ट्रैः दंतैः अत्ति भक्षयति यद्वा असिन्वन् अघासियमाणाग्निः पितुः पालकस्य यजमानस्य संबंधि भोजनं हविर्लक्षणमन्नं दंष्ट्रैः
दंष्ट्रासदृशैः स्वज्वालाभिरत्ति॥ यस्ता कृणोः इत्यादि सिद्धम्॥ ॥अथ पंचमी॥ ॥अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः॥ तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः॥ ॥हे इंद्र अथाधि वलविं स्थितमानाय सूर्याय पृथिवीं

भा॰ अ॰ २ चलितानां मर्तानां दृढीकृत्य संदृशे संदर्शनीयाम् अकृणोः अकरोः। दृशोर्विण्यंतात्क्विप्प्रत्ययांतत्वेन निपातितः। यश्च त्वं धोतीनां चलंतीनां नदी अ॰ ६
नां पथः। मार्गान् अरिणक् अरेचयः गंतुं योग्यानकरोरित्यर्थः। रिचिर विरेचने लङि सिपृतस्य हल्ङ्याब्भ्य इति लोपः। अहिहन् अहेर्हं
१०६ तृस्य मेघस्य वा हंतः हे इंद्र देवाः स्तोतारः संतो स्तोमभिः स्तोत्रैरनेन अवर्धयन्। तत्र दृष्टांतः। उदभिर्न यथा वाजिनमश्वं
उदभिरुदकैर्वर्धयंति तद्वत्। पद्दन्नोमास्निशादिना उदभावः। शेषं प्रसिद्धं॥ ॥इति द्वितीयस्य षष्ठे दशमो वर्गः॥ ॥अथ षष्ठी॥
यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ॥ स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः॥ ॥हे इंद्र यस्त्वं भो
जनं भुज्यत इति भोजनं अन्नादिकं च यजमानेभ्यः प्रयच्छसि। दय दानगतिरक्षणहिंसादानेषु आत्मनेपदी। किंच वर्धनं वृद्धिकरं ध
नं बलं वा दयसे तथा आर्द्रात् क्लिन्नात् गोः शुष्कं मनार्द्रं क्षीरादिकं मधुमत् मधुरं रसोपेतं दुदोहिथ दुग्धवानसि। दुहेर्लिटि क्रादिनियमादि
डागमः॥ स त्वं शेवधिं निधिं धनं विवस्वति यजमाने निदधिषे स्थापितवानसि। विश्वस्य जगतः एकः अद्वितीय एव सन् ईशिषे स्वामी भवसि। ईश ऐश्वर्ये ईशः सइति
इडागमः। सगुत्यादि सिद्धं॥ ॥अथ सप्तमी॥ ॥यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः॥ यश्चासमा अजनो दिद्यु
तो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः॥ ॥हे इंद्र यस्त्वं पुष्पिणीः पुष्पवतीश्च प्रस्वः प्रसूताः प्रसूयमाना वा अवनीः विविधा ओषधीः
दानेषु पदं यत्र सस्यान्यत्र तिष्ठन्ति दानं क्षेत्रं अधिकरणे ल्युट्। तस्मिन् क्षेत्रे धर्मणा सकललक्षणेन कर्मणा व्यधारयः न्यदधाः य
श्च त्वं दिवो द्योतमानस्य सूर्यस्य असमाः विषमाः नानाप्रकारा दिद्युतः॥ दीप्तीरजनः अजनयः यद्वा दिवो नक्षत्राणि। जनतेर्लङि
व्यत्ययेन शप्। यश्चोरुः महांस्त्वं अभितः सर्वतः ऊर्वान् महतः प्राणिनिकायान् पर्वतान्वा अजनयः शिष्टं स्पष्टं॥ ॥अथाष्टमी
॥ ॥यो नार्मरं सहवसुं निहंतवे पृक्षाय च दासवेशाय चावहः॥ ऊर्जयंत्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः॥ ॥
पुरुकृत पुरूणां कर्मणां कर्ता हे इंद्र यस्त्वं नार्मरं नॄन् मनुष्यान् मारयतीति नृमरः नरः कश्चिदसुरः तस्यापत्यं नार्मरः तं सहवसुं
वसुनाम सहवर्तत इति सहवसुः असुरनामैतत् एतन्नामकं असुरं निहंतवे हंतुं तुमर्थे तवेन्प्रत्ययः॥ तादौ च निति कृत्यतौ इति गतेः प्रकृ
तिस्वरत्वं निहंतुं ऊर्जयंत्याः बलवत्याः वज्रधारायाः अपरिविष्टं मलादिभिरव्याप्तं आस्यं भक्ष्यैव अवहः तमसुरं प्रापयय
द्वा ऊर्जयंत्याः पिशाचिकाया आस्यं प्रापयः॥ किमर्थं पृक्षाय च हविर्लक्षणान्नलाभाय दासवेशाय दासानां दस्यूनां वेशाय वि
नाशाय च॥ यद्वा अस्माकमन्नलाभाय दस्युविनाशाय च॥ ॥अथ नवमी॥ ॥शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चो
दमाविथ॥ अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः॥ ॥हे इंद्र एकस्य एकाकिनः श्रेष्ठस्य वा वायुस्तेभ्यः स्तोतृ
म स्वनिमितं तदर्थं शतं दश दश शतानि हरयो वा हनार्थं भवंति॥ तथा च मंत्रवर्णः। इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य ह
रयः शता दशेति। अपि च यश्च आद्यः सर्वेषां सर्वतः उपजीव्यः ततस्ते भोजनाया घदेनं नाघुरिति हि श्रुतिः। यद्वा यश्च त्वं चो १०६
दं स्तोत्राणां प्रेरयकं यजमानं आविथ रक्षितवानसि॥ किंच यस्त्वं अरज्जौ रज्जुवर्जिते बंधनागारे दस्यून् पुरुषान् समुनप् दभीतये दभी
तिर्नाम कश्चिदृषिः तदर्थं समुनप् हिंसितवानसि। उंद् हिंसाकर्मणो लङि व्यत्ययेन श्नम् हल्ङ्याब्भ्य इति सिपो लोपः। अडभावश्छांद

सः। किंच सुप्राव्यः सर्वेन सर्वैः प्रसर्पणीयो भवः। शिष्टं सिद्धं॥ ॥अथ दशमी॥ ॥विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृ 197/1914
त्नवे धनं॥ षळस्तभ्ना विष्टिरः पंच संदृशः परि परो अभवः सास्युक्थ्यः॥ ॥विश्वे सकलाः सर्वे ऋत्विजः सआकारः सर्वाः रोधनाः रो
धकास्तान् घः। अस्य इंद्रस्य पौंस्यं पुंसो भावः पौंस्यं वीर्यमिति यावत्। अनु तद्वीर्यमनुवर्तंते अस्मा इंद्राय ददुः हविर्लक्षणमन्नं यजमा
नाः प्रयच्छंति। किंच कृत्नवे कर्मणां कर्त्रे इंद्राय धनं दधिरे सर्वे जना धारयंति। तथा च मंत्रः। इंद्राय द्यावः पृथिवी ... आपो रयिं रक्षंति जीरयो
वनानीति। विष्टिरः विस्तीर्णाः षट् संख्याका उर्वीः। द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्चेत्येवंरूपाः॥ ता अस्तभ्नाः
नियमितवानसि। संदृशः सम्यक् पश्यंतीति संदृशो जनाः पंच संदृशः पंचजनान् परि सर्वतः परः पारयिता पालयिता वा अभवः॥
भवसि गतमन्यत्॥ ॥इति द्वितीयस्य षष्ठे एकादशो वर्गः॥ ॥अथैकादशी॥ ॥सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विंदसे व
सु॥ जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेंद्र विश्वास्युक्थ्यः॥ ॥वीर बलवन् हे इंद्र तव वीर्यं सामर्थ्यं सुप्रवाचनं सुष्ठु प्रवच
नीयं सर्वैः श्लाघनीयमित्यर्थः॥ किं तत् एकेन क्रतुना कर्मणा वसु विंदसे शत्रूणां धनं लभसे विद्लृ लाभे तुदादिः स्वरितेत् यद्वा तदीयं
धनं स्तोतॄन् प्रापयसि इति यत्तत् प्रशस्यमित्यर्थः॥ स त्वं बलवता जातूष्ठिरस्य एतन्नामकः कश्चित्तस्य वयोन्नं प्रादः। यद्वा जातूष्ठिर
स्य जातु कदाचित् सर्वदा स्थिरस्य सहस्वतः बलवतो यजमानाय यद्वा कर्मणः संबंधि वयो हविर्लक्षणमन्नं प्रविंदसे इति समन्वयः। या यानीमा
नि अन्यानि विश्वा सर्वाणि कर्माणि चकर्थ कृतवानसि। स तादृशस्त्वं उक्थ्यः सर्वैः प्रशंसनीयो भवसि॥ ॥अथ द्वादशी॥ ॥अरमयः स
रपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिं॥ नीचा संतमुदनयः परावृजं प्रांधं श्रोणं श्रवयन्त्सास्युक्थ्यः॥ ॥हे इंद्र सरपसः सरण
मयः कर्म यासां ता सरपसः। ... अपः ... तराय तरणाय अरमयः अक्रीडयः किंच तुर्वीतिनामकः
श्चिद्राजर्षिः ... वय्यश्च नामकश्चित् तस्मै ताभ्यां स्रुतिं सरणं प्रति अरमयः ताहि तत्पूर्णां महानदीं ... समर्थमवा
तो नावं ... परावृजं परित्यक्तं ... पापानि ... कश्चिदृषिः तमधः ... संतं उदनयः ऊर्ध्व
पद्यः ... किंच अंधं संतं श्रोणं पंगुं संतं चक्षुष्मंतं ... पंगुकरणाच्च उदनयः किं कुर्वन् प्रकर्षेण श्रवयन् आत्मानं कीर्तिमंतं कु
र्वन् उदनय इति समन्वयः। स्पष्टमन्यत् सिद्धं॥ ॥अथ त्रयोदशी॥ ॥अस्मभ्यं तद्वसो इति। अस्मभ्यं तद्वसो सर्वस्य वासक वसुमन्वा
हे इंद्र ... तद्राधो धनं दानाय उपक्षणमंतत॥ भोगाय च समर्थय स्वदेहि अस्मान् संगमयेत्यर्थः। अर्थः। अर्थ याच
ने चुरादिरदंत आत्मनेपदी। तेन यन्नेत बहु प्रभूतं वसव्यं वस्वेव वसव्यं वस्वादिभ्यः स्वार्थिके यत् तादृशं प्रभूतं धनमस्ति खलु चित्रं वा
यनीयं यं धनं अनुयन ... धनाय इति द्वितीया॥ भुवस्याः भागमस्तु ... अंत इति भावितण्यर्थत्वात्। अकर्मकत्वं। यथा रोहि
तादि ... कर्मणि उद्देश्यकर्मत्वविशेषकर्मत्वं ... उद्देश्यकर्मणः सकर्मकत्वं भविष्यति। यथा माणवकं पुत्रीयतीति भाष्य उ
दाहृतं। श्रवः ... तदंतस्य लङ्... रूपं॥ सुवीराः कल्याणपुत्रपौत्राः संतो विदथे ... प्रभृ
तं ... वा वदेम॥ ॥इति द्वितीयस्य षष्ठे द्वादशो वर्गः॥ ॥अध्वर्यवो भरतेंद्राय द्वादशर्चं तृतीयं सूक्तं॥ गार्त्समदं त्रैष्टु

भा॰ अ॰२ मिंद्रं। अध्वर्यवो द्वादशेत्यनुक्रांतं। सूक्तविनियोगो लैंगिकः। अतिरात्रे प्रथमे पर्याये होतुः शस्त्रयाज्या अध्वर्यवो भरतेंद्राय सोममिति। अ॰६
गृत्समदाद्भूतं॥ अध्वर्यवः अध्वरस्य नेतारः अध्वरं यजमाना युंजंतः। कव्यध्वरे एतत्स्यादिलोप इत्यकारलोपः। अध्वरं युनक्तियास्कः॥
२०२ अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति वेति। हे अध्वर्यवः इंद्राय देवाय सोमं हविर्धानादुत्तरवेदिं प्रतिभरत हरत अ
मत्रिनस्याविद्यमानत्वादनिघातः। हृत्वा अमत्रेभिः अमत्रैः सह अर्ह इत्यत्र होत्राहृत्य इति अमत्राणि चमसाः तैः मधुमत्करं अंधः सो
मलक्षणमन्नं आसिंचत अध्वर्यो प्रक्षिपत। अत्र यास्कः। आसिंचतामत्रेभिर्मदनीयमंधोमन्नं पात्रैर्ममाअस्मिन्नेतीति॥ वीरः स
इंद्रः अस्य सोमस्य पातिपानं प्रति सदैव कामी हि कामयमानो हि तस्मात्कारणात् एवमस्मै वृषभाय इंद्राय सोमं जुहोत। इंद्रायेनयोर्
इति तनननमनथनाश्चेति तत्त्वादेशः। एष इंद्रः तदित्थं सोमहविःक्षिं कामयते॥ ॥अथ द्वितीया॥ ॥ अध्वर्यवो यो अपो व
व्रिवांसं वृत्रं जघानाशन्येव वृक्षं। तस्मा एतं भरत तद्वशायं एष इंद्रो अर्हति पीतिमस्य॥ ॥हे अध्वर्यवः य इंद्रः अपः उदकानि व
व्रिवांसं आवृत्य स्थितं वृत्रं वृणोत्यावृणोतीति वृत्रो मेघः तं मेघं वज्रेण जघान हतवान्। अशन्येव यथा अशन्या वै घुताग्निना वृक्षं
दहति तद्वत्। तस्मै तद्वशाय सोमकामाय तस्मा इंद्राय एतं सोमं भरत उत्तरवेदिं प्रति हरत एष इंद्रः अस्य सोमस्य पीतिं पानमर्ह
दहति तद्वत्॥ तस्मै तद्वशाय सोमकामाय तस्मा इंद्राय एतं सोमं भरत
ति॥ ॥अथ तृतीया॥ ॥ अध्वर्यवो यो दृभीकं इत्यादि॥ हे अध्वर्यवः यः इंद्रः दृभीकं सर्वान्विदारयतीति भियं करोतीति दृभीकः
नामासुरः तमसुरं जघान यश्च वलासुरेण निरुद्धा गा उदाजत् निरगमयत् तत्तस्मै तमेव बलमसुरं अपवः अपावृणोत् हिंसितवान्
निरस्थर्थः। वृणोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। हल्ङ्याब्भ्य इति तिलोपः। तस्मा इंद्राय एतं सोमं अंतरिक्षे वातमिव धाराभि
निस्यर्थः। वृणोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। हलङ्याब्भ्य इति तिलोपः। तस्मा इंद्राय एतं सोमं अंतरिक्षे वातं नवातमिव धाराभि
र्वामं कुरुत। तदेवाह। सोममिंद्रं आवृणोत सर्वत आच्छादयत। वृङ्वरणे आच्छादने अदादिकः। लोटि रूपं। तत्र दृष्टांतः जूः जीर्णा
यथा वस्त्रैः गामाच्छादयति तद्वत्॥ ॥अथ चतुर्थी॥ ॥अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून्। यो अर्बुदमव
नीचा बबाधे तमिंद्रं सोमस्य भृथे हिनोत॥ ॥हे अध्वर्यवः यः इंद्रः नवनवतिं च एकोनशतं बाहून् चख्वांसं चक्षणं दर्शयंतं। य
द्वा आत्मनो देहे निरंतरं वर्तमानं उरणं एतन्नामकमसुरं जघान
द्वारवनमेः कसोर्गु पत्वं लोपः छांदसं रूपं॥ सर्वस्य दर्शयंतं। यद्वा आत्मनो देहे निरंतरं वर्तमानं उरणं एतन्नामकमसुरं जघान
यश्च अर्बुदं एतन्नामकमसुरं नीचा न्यग्मुखं कृत्वा अवबबाधे तमिंद्रं सोमस्य भृथे सोमं बिभर्ति पात्रे हिनोत वर्धयत।
यद्वा सोमस्य भृथे भरणे संपादने सति हिनोत तोषयत। प्रीणयत। हि गति वृद्ध्योः स्वादिः॥ ॥अथ पंचमी॥ ॥अध्वर्यवो यः स्वश्नं
जघान यः शुष्णमशुषं यो व्यंसं। यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इंद्रायांधसो जुहोत॥ ॥हे अध्वर्यवः यः इंद्रः अश्नं अश्ना
तिभक्षयति प्राणिजातमिति॥ यद्वा अश्नुते व्याप्नोति अश्नः कश्चिदसुरः तमसुरं सुष्ठु जघान अशुषं केना
प्यशोषणीयं शुष्णमसुरं यश्च तं असुरं व्यंसं अंसहीनं कृत्वा जघान यश्च पिप्रुं तेन तादृशेन उग्रा प्यवर्तमानं एतन्नामकमसुरं नमु २०७
चिमसुरं जघान यश्च तेजोविकेन मुचिमसुरं नालभतेति प्रकृत्य फेनेन शिरउदवर्तयदित्यं तेन वाक्यसंदर्भेण नमुचिवधः प्रपं
चितः तथा मंत्रश्च अपां फेनेन नमुचेः शिर इंद्रोदवर्तय इति रुधिक्रां एतन्नामकमसुरं यश्च जघान तस्मा इंद्राय अंधसो हविर्लक्ष

णान्यन्नानि जुहोति॥ ॥अथ षष्ठी॥ ॥अध्वर्यवो यः शतं शंबरस्य पुरो बिभेदाश्मनेव पूर्वीः। यो वर्चिनः शतमिंद्रः सहस्रमपावपद्भरता सोममस्मै॥ ॥हे अध्वर्यवः य इंद्रः शंबरस्य मायाविनोऽसुरस्य पूर्वीः पुरातनीः शतं पुनः पुरीः अश्मनेव अश्मसदृशेन वज्रेण
बिभेद यश्च इंद्रो वर्चिनः वर्चो दीप्तिः सामर्थ्यमितिविधीयमाना इतिविधीयमानत्वेन ... तस्यासुरस्य सहस्राणि शतं सह
स्रं एतत्संख्याकान् परिमितान्वीरान् पुत्रान् आवपत् युगपदेव भूम्यामपातयत्॥ ॥अथ सप्तमी॥ ॥अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान्। कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै॥ ॥हे अध्वर्यवो जघन्वान् हतवान् पूर्वं
शत्रून् य इंद्रः शतं सहस्रमसुरान् भूम्या उपस्थे उत्संगे अवपत् एकेन प्रकारेणापातयत्॥ किंच यः कुत्सस्य एतन्नामकस्य राजर्षेः आ
योः पौरवस्य राजर्षेः अतिथिग्वस्य दिवोदासस्य एतेषां त्रयाणां वीरान् अभिगंतॄन् प्रति द्रुह्वनः॥ कुत्सादीन् असुरान् न्यावृणक् वृणक्
हिंसाकर्मा अवधीत्॥ तथा च मंत्रवर्णः॥ त्वं कुत्सं शुष्णहत्येष्वाविथारंधयोऽतिथिग्वाय शंबरमिति॥ तादृशायेंद्राय सोमं भरत॥
॥ ॥अथाष्टमी॥ ॥अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहंतो नशथा तदिंद्रे। गभस्तिपूतं भरत श्रुतायेंद्राय सोमं यज्यवो जुहोत॥
॥नरः कर्मणां नेतारो हे अध्वर्यवः यदभिलषितमर्थं कामयाध्वे॥ कामयतेर्लेटि धडागमः। श्रुष्टी क्षिप्रं इंद्रे सोमं वहंतः प्रापयंतो
यूयं तदभिलषितं फलं नशथ प्राप्नुत॥ श्रुताय लोके प्रसिद्धायेंद्राय गभस्तिपूतं हस्ताभ्यां मार्जनेन दाहनादिभिः शोधितं सोमं
भरत उत्तरवेदिं प्रति हरत ततो यज्यवः यागं कुर्वाणा हे अध्वर्यवः आहृतं सोममिंद्राय जुहोत जुहुत॥ अग्नौ प्रक्षिपत॥ ॥अथ
नवमी॥ ॥अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वं। जुषाणो हस्त्यमभि वावशे व इंद्राय सोमं मदिरं जुहोत॥ ॥अस्मा
इंद्राय सोमं श्रुष्टिं क्षिप्रं कर्तन कुरुत॥ कृञो लोटि बहुलं छंदसीति विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तनबादेशः॥ आमंत्रि
तस्याविद्यमानत्वान्न निघातः। किंच वनं संभजनीयं वनउदकेन निपूतं दशापवित्रेण शोधितं सोमं वने चमसे उन्नयध्वं जुषाणः स इंद्रः
वो युष्माकं हस्ताभ्यामभिषुतं सोमं अभिवावशे कामयते वशकांतौ यङ्लुगंतस्य लिट्यभ्यासस्य नात्मनेपदं लोपश्च आत्मनेपदमिति
लोपः॥ मदिरं मदकरमिमं सोममिंद्राय जुहोत॥ इंद्रादिदेवतार्थं अग्नौ प्रक्षिपत॥ ॥अथ दशमी॥ ॥अध्वर्यवः पयसोधर्यथा गोः सो
ममेभिरीं पृणता भोजमिंद्रं। वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत॥ ॥हे अध्वर्यवः यथा गोरूधः पयसा पूर्णं तद्वदी
मेनं भोजं फलस्य दातारं रक्षितारं वा इंद्रं सोमेभिः सोमैः पृणत॥ पूरयत॥ मे मदीयस्यास्य सोमस्य निभृतं गूढं स्वसाध्यं स्वभावं
महमेव वेद जानामि॥ इति पूर्वेण परस्मिन् कथितं। तथापि युष्माभ्यं ब्रवीमीत्यर्थः दित्संतं सोमं दातुमिच्छंतं यजमानं यजतायष्टव्य इंद्रो
भूयोऽतिशयेन चिकेत दित्संतं ददातेः दानइच्छायां सन् सनि मीमाघ्वितीति आकारस्य इस् अत्र लोपोऽभ्यासस्यार्धधातुकाति
सकारस्य तत्वं॥ ॥अथैकादशी॥ ॥अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा। तमूर्दरं न पृणता यवेनेंद्रं सो
मेभिस्तदपो वो अस्तु॥ ॥हे अध्वर्यवो यः इंद्रः दिव्यस्य द्युलोकार्हस्य वस्वो वसुनो धनस्य राजा भवति यश्च पार्थिवस्य पृथिव्यां ज्ञा
तस्याविक्षीणं अंतरिक्षमुच्यते तत्रत्यं धनं पार्थिवं तस्य राजा यश्च क्षम्यस्य क्षमा भूमिः तत्रत्यं धनं क्षम्यं तस्य राजा भवति तम

199
1914

भा॰अ॰२ यं विधं मिंद्रं सोमेभिः सोमैः पृणन पूरयन ॥ तत्र दृष्टांतः ॥ ईदं नउदीर्णमुदरं कुसूलं यथा यवेन तत्पूर्णं तद्वदिंद्रं पूरयतेति नाहं शंसो माध्विनेंद्रो अ॰६
१०८ दर पूरणलक्षणमयः कर्मेवा युष्माकमस्तु ॥ ॥अथ द्वादशी॥ ॥अस्मा अस्मै तदिति ॥ एषा व्याख्याता ॥ ॥इति द्वितीयस्य पंचमे चतुर्द
शो वर्गः॥ ॥ प्रघान्वस्येति दशर्चं चतुर्थं सूक्तं ॥ गार्त्समदं त्रैष्टुभमैंद्रं । अत्रानुक्रमणिका ॥ प्रघान्दशेति दशरात्रे षष्ठ इनि निष्केवल्ये त्री
णि सूक्तानि तत्र द्वितीयं ॥ षष्ठस्येति खंडे सूत्रितं ॥ एंद्रया सुपत्नः प्रघान्वस्या भूरकेति निष्केवल्यमिति त्र्यकुमामके निष्केवल्ये प्र
घान्वस्येत्युपास्यं ॥ तुर्यायामुपनस्तोमस सूत्रितं ॥ व्ययैमा मनुषा देवता प्रघान्वस्य महतो महानीति ॥ ॥सेषास्य के प्रथमा॥ ॥
प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचं ॥ त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिंद्रो जघान॥ ॥ सत्यम सत्राभृते महतो
म बलवतः सत्यस्य सत्यसंकल्पस्यास्येंद्रस्य सत्यानि यथार्थानि महानि महांति करणानि अस्मिन् सूक्ते वक्ष्यमाणानि कर्माणि
नु घ प्रवोचं प्रकर्षेण ब्रवीमि॥ वच परिभाषणे छंदसि लुङ् लिट् इति वर्तमाने लुङ् । अस्यतिवक्तिख्यातिभ्योऽङ् इति च्लेरङ् । वच उम् ॥ घाति प्रसिद्धौ
कानि तानीत्युच्यंते । त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येवं रूपेष्वभिप्लविकेष्वहःसु सुतस्याभिषुतं सोममिंद्रोऽपिबत ॥ ततः पीतस्यास्य सोम
स्य मदे हर्षे संजाते सतींद्रः अहिं वृत्रमसुरं जघान हतवान॥ ॥अथ द्वितीया॥ ॥अवंशे द्यामस्तभायद्बृहंतमा रोदसी अपृणदं
तरिक्षं ॥ स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इंद्रश्चकार॥ ॥अवंशे आकाशे द्यां द्योतमानं सूर्यं द्युलोकं वा अस्तभायत ॥ इंद्रः
अस्तभ्नात ॥ अनवलंबनस्य तस्यावस्थानमकराहित्यर्थः ॥ स्तंभ इति सौत्रो धातुः क्र्यादिः लङ् व्यत्ययो बहुलमिति श्नाय पि शाय
ता दृशः बृहंतं महांतं नारिक्षं रोदसी द्यावापृथिव्यौ च अपृणत स्वतेजसा पूरितवान् किंच स इंद्रः पृथिवीं विस्तीर्णां भूमिं धारयत॥
अधारयत तथा पप्रथ च प्रथितां भूमिं अप्रथयत । प्रथ प्रख्याने । ण्यंतस्य लुङि चङि रूपं च अन्यतरस्यामिति म थ्यादान्नत्वं सोमस्य
मदे हर्षे संजाते सति तानीमानि कर्माणींद्रश्चकार॥ ॥अथ तृतीया॥ ॥सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनां
॥ वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इंद्रश्चकार॥ ॥ सद्मेव यथा यज्ञगृहाण्यमानैः षट्त्रिंशत्प्रक्रमा प्राचीत्येवं रूपैः परि
माणैः प्राक्प्रवणानि कुर्वंति तद्वत् सिंधुलोकान् मानैः परिमाणैः प्राचः प्राङ्मुखान्वि मिमाय इंद्रो विशेषेण निर्मितवान् ॥
तथा नदीनां खानि निर्गमनद्वाराणि वज्रेण च अतृणत अस्वनत तृदिर्हिंसानादरयोः रुधादिर्लङ् ॥ तथा च मंत्रः ॥ इंद्रो अस्मां अर
दद्वज्रबाहुरिति । तथा दीर्घयाथैः बहुकालगंतव्यैः पथिभिर्मार्गैः वृथा सृजत् अनायासेन ता नदीः सृष्टवान् सोमस्येति सिद्ध
मिति॥ ॥अथ चतुर्थी॥ ॥ स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ॥ सं गोभिरश्वैरसृजद्रथेभिः सोमस्य
ता मद इंद्रश्चकार॥ ॥ प्रावोळ्हॄन् चुमुरिधुनिप्रभृतीन् कराद्दभीतेः पुरं संरुध्य परिगत्य तस्मात्पुरान्निर्गच्छतः तथा स इंद्रः दभी
तेः दभीतिर्नाम कश्चिद्राजर्षिः तस्य प्रवोळ्हॄन् प्रवाहून् स हि वहोरोढ् अवर्णस्येत्येवं प्रकर्षेण तं दभीतिं अहन्त तानसुरान् । मध्यमार्गे
परिगत्य तेषां विश्वं सर्वमायुधमिध्ये दीप्यमाने वह्नौ अधाक् अधाक्षीत् दहर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ पश्चात्तं दभीतिं १०८
गोभिरश्वै रथेभिः रथैश्च समसृजत् संयोजितवान् सोमस्येति सिद्धमिति॥ ॥ अथ पंचमी॥ ॥ स ईं महीं धुनिमेतोररम्णादिति।

अति मूर्तना स्थिकाह मरत्नीयस कमुपसाय अतिमर्तिने ति खंडे सूत्रितं ॥ स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ॥ ते 201 / 1914
उत्स्नाय रयिमभि प्रतस्थुः सोमस्य ता मद इंद्रश्चकार॥ ॥ स इंद्र ईं एनां महीं महतीं धुनिं धुनाति स्तोतॄणां पापानीति धुनिः पर स्तीन
दीं तां एतोः ईश्वरप्रहासक्तिधानेपिता सुन्प्रत्ययः । अपि णांगमनार्थं अररम्णात उपारमयत महीं ज्ञात्वा नदीं अल्पोदकामकरो
दित्यर्थः ॥ ततः स इंद्रः अस्नातॄन् स्नातुमशक्तान् तरणासमर्थान् ऋषीन् स्वस्ति क्षेमेण अपारयत ॥ ते महर्षयः उत्स्नाय तां नदी
मुत्तीर्य रयिम पृथग्वतं वितरयिं अभिलक्ष्य प्रतस्थुः प्रस्थिरभूवन् सिद्धं ॥ ॥इति द्वितीयस्य पंचमे पंचदशो वर्गः॥ ॥अथ षष्ठी॥
॥ सोदंचं सिंधुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ॥ अजवसो जविनीभिर्विवृश्चन्त्सोम॰॥ ॥ स इंद्रः सिंधुं प्राचं सं
तं महित्वा स्ववीर्येण महिम्ना उदंचमरिणात ॥ उदङ्मुखमकरोत ॥ सिंधुशब्दः छंदसि पुंलिंगः ॥ उषसः ॥ उषो देव्याः अनः शकटं
वज्रेण संपिपेष चूर्णीचकार एतच्च दिवश्चिद्घा दुहितरं महयंतमस्य सं वस्यतां किं कुर्वन् । अजवसः जवहीना दुर्बलाः सेना जविनीभिः
जवयुक्ताभिः सेनाभिः विवृश्चन् विशेषेण भिंदन् संपिपेषेति समन्वयः ॥ ओव्रश्चू छेदने ग्रहिज्यादिना संप्रसारणं व्रश्चादिना षत्वं
॥ ॥अथ सप्तमी॥ ॥ स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ॥ प्रति श्रोणः स्थाद्व्यनगचष्ट सोम॰॥ ॥ पुरा किल क
न्यकाः च शर्दीं निषादाः परावृजं ऋषिं दृष्ट्वाभिदुद्रुवुः ततः स ऋषिः इंद्रं स्तुत्वा चक्षुःपादं लब्धेभवदित्यतदाह । कनीनां क
न्यकानां अपगोहं अपगूहनं तिरोभावं विद्वान् परावृगृषिः आविर्भवन् सर्वेषां प्रत्यक्षो भवन् उदतिष्ठत श्रोणः पूर्वं पंगुः स ऋषिः
इंद्रस्य प्रसादाद्दृष्टिभग्नज्ञातः ताः कन्याः प्रतिस्थात पूर्वमंधः अधुना चक्षुर्लाभाद्व्यचष्ट ताः कन्यकाः विशेषेण पश्यति स्म तानीमानि कर्माणि स
इंद्रश्चकार॥ ॥अथाष्टमी॥ ॥भिनद्वलमंगिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत ॥ रिणग्रोधांसि कृत्रिमाण्येषां सोम॰॥ ॥ अंगिरोभिर्गृ
णानः स्तूयमानः स इंद्रः बलं बलनामकमसुरं अभिनत । तथा गवां निरोधकस्य पर्वतस्य दृंहितानि शिलाभिर्दृढीकृतानि द्वाराणि व्यैरत ॥
उद्घाटितवान ॥ तदर्थं एषां पर्वतानां कृत्रिमाणि क्रियया निर्वर्तितानि रोधांसि निरोधकद्वाराणि रिणक् उद्घाटयत गतमत्यत ॥ अतिमृ
तिनाम्न्यकाह निष्केवल्ये सूक्तमुखीया ॥ स्वप्नेनेत्येषा ॥ सूत्रितं ॥ स्वप्नेनाभ्युप्या चुमुरिं धुनिं चेति सूक्तमुखीयेति ॥ ॥सैषा सूक्तेन नवमी ॥
॥ स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघंथ दस्युं प्र दभीतिमावः ॥ रंभी चिदत्र विविदे हिरण्यं सोम॰॥ ॥ स त्वं दस्युं सर्वस्यापक्षयितारं चुमु
रिं च एतं नामानौ असुरौ स्वप्नेन दीर्घनिद्रया अभ्युप्य संयोज्य जघंथ हतवानसि ॥ ततस्ताभ्यां युध्यमानं दभीतिं राजर्षिं प्रावः ॥ र
क्षितवानसि । तथा च मंत्रवर्णः ॥ त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंत्विति ॥ आवः अवते रक्षणार्थस्य लङि सिपि रूपं
रंभी चित् दंडधारी वास्य दौवारिकः ॥ अत्रास्मिन् युद्धे तयोरसुरयोर्हिरण्यं धनं विविदे लेभे विदुल्लाभे स्वरितेत् तानीमानि कर्माणि
सोमस्य मदे सतींद्रश्चकारेति ॥ ॥अथ दशमी ॥ एषा व्याख्याता ॥ ॥ इति द्वितीयस्य पंचमे षोडशो वर्गः॥ ॥ प्रवः सतामिति न
वर्चं पंचमं सूक्तं गार्त्समदमैंद्रं । अत्रानुक्रमणिका ॥ प्रवोनवोत्याद्रिष्टुबाद्यानि । नवमाद्यं पंक्तिरित्याद्यं त्रिष्टुब्वत् परिभाषयात्तगत्यः ॥ त
दीयपर्याये ब्राह्मणाच्छंसिनः प्रवः सतामिति सूक्तं । अतिरात्र इति खंडे सूत्रितं ॥ प्रवः सतां ज्येष्ठो होरयः कर्मागमनितियाज्याति ॥ ॥

भा॰ अ॰२ तस्मिन्सूक्ते प्रथमा॥ ॥प्रवः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे॥ इंद्रमजुर्यं जरयंतमुक्षितं सनाद्युवानमवसे ह अ॰६
वामहे॥ उक्तमर्थ भूते॥ हे यजमाना वो युष्मदर्थं सतां देवानां ज्येष्ठतमाय अतिशयेन श्रेष्ठाय इंद्राय तदर्थं अग्नाविव समिधाने।
१०८ इव शब्द एवार्थः॥ दीप्यमान एवाग्नौ हविः प्रभरे संपादयामि ततः परं सुष्टुतिं शोभनां स्तुतिं करोमि॥ भर इति हृञ् भरणे छांदसः
भयप्रदर्शनं शिरूपं॥ अजुर्यं मजरणीयं जरयंतं सर्वं मन्युजरयंतं उक्षितं। सोमेन सिक्तं सनात् सनातनं युवानं नित्यं तरुणं ता दृश
मिंद्रमवसे स्माकं रक्षणाय तस्य तर्पणाय हवामहे आह्वयामः॥ ॥अथ द्वितीया॥ ॥यस्मादिंद्राद्बृहतः किंचनेमृते विश्वान्यस्मि
न्संभृताधि वीर्या॥ जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुं॥ ॥बृहतो महतः यस्मादिंद्राद्दृते किमपि ईमिदं
जगत् न ननालीत्यर्थः॥ नेति निपातद्वयस मुदाय अनेति। नेति निषेधार्थे नेति निषेधार्थे एकपदे सांप्रदायिकं उक्तार्थे मंत्रः
नं इंद्र तेन वचनेना मरिंच नेति यद्वा इंद्राद्दृते इदं जगत् किंचन न भवत्यपित्यर्थः॥ कुतः एतदुच्यते। अस्मिन्निंद्रे विश्वानि सर्वा
णि वीर्याणि सामर्थ्यानि अधि संभृतानि अधिकं संभृतान्यासते यश्चेंद्रो जठरे स्वोदरे सोममभिषुतं सोमरसं भरति बिभर्ति किंच त
न्वितन्वां स्वकीये सर्वस्मिन्शरीरे सहो बलं महः महत्तेजश्च बिभर्ति हस्ते च वज्रमायुधं बिभर्ति शीर्षणि शिरसि क्रतुं विज्ञानं भरति बिभ
र्ति यद्वा न योगादनिघातः॥ वाक्यभेदाद्बाभिघाताभावः शीर्षणि शीर्षंश्छंदसीति॥ ॥अथ तृतीया॥ ॥न क्षोणीभ्यां परिभ्वे त
इंद्रियं न समुद्रैः पर्वतैरिंद्र ते रथः॥ न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु॥ ॥हे इंद्र ते तव इंद्रियं क्षोणीभ्यां
द्यावापृथिवीभ्यां न परिभ्वे न परिभवनीयं॥ इत्यादि तवे केन केन्यत्वनइति केन्प्रत्ययः॥ उदात्त स्वरितयोरिति स्वरितत्वं किंच ते र
थः॥ समुद्रैः पर्वतैश्च न परिभवनीयः॥ तव वज्रमायुधं कश्चन पुमानं नान्वश्नोति न व्याप्नोति परिभवितुं॥ अश्नोतिर्व्याप्तिकर्मा यदा परस्मै
पदं॥ व्यत्ययः॥ शत्रुवधार्थं हि त्रिविजयकाले पुरु पुरूणि बहूनि योजना योजनानि पतसि गच्छसि तदा तव बलाद्दिन परिभवनीयमिति
समन्वयः॥ ॥अथ चतुर्थी॥ ॥विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरंति वृषभाय सश्चते॥ वृषा यजस्व हविषा विदुष्टरः पिबें
द्र सोमं वृषभेण भानुना॥ ॥हे यजमाना यविश्वे सर्वे जनाः यजताय सर्वैर्यजनीयाय धृष्णवे शत्रूणां धर्षणशीलाय वृषभा
य कामानां वर्षित्रे सश्चते सज्यमानाय स्तुत्यादिकर्मवतां स्तोतृप्रेताद्दृशायेंद्राय क्रतुं यज्ञादिलक्षणं कर्म भरंति हि हरंति खलु न
णयतीत्यर्थः॥ भरंति हि योगादनिघातः॥ यस्मादेवं तस्माद्वृषा सोमं रससेचनसमर्थः॥ विपुष्टरः॥ विद्वच्छब्दात्तरपि छांदसं सं
प्रसारणं शासिवसिघसीनां चेति संहितायां षत्वं विदुष्टरः स्तोता हविषा यातमिंद्रं यजस्व॥ इदानीमिंद्रं संबोध्याह॥ हे इंद्र वृषभेन
कामानां वर्षकेण भानुना दीप्यमानेनाग्निना सह सोमं पिब॥ ॥अथ पंचमी॥ ॥वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृष
भायपातवे॥ वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति॥ ॥हे इंद्र वृष्णः फलस्य वर्षितुः मध्वः मदकरस्य सो १०९
मस्य कोशो रसः ऊर्मिः अनुष्ठातृणां पापवर्णार्थं प्रेरकः सन् पवते गच्छति। पवगतौ॥ अनुदात्तेत् किमर्थं वृषभान्नाय बलवर्षका
न्नि अंनानि सस्य स तथोक्तः॥ तादृशाय वृषभाय कामानां वर्षित्रे इंद्राय पातवे पानार्थं पवत इति समन्वयः॥ किंच वृषणा सो

मरससेचनसमर्था अध्वर्यू अध्वर्युप्रतिप्रस्थातारौ वृषभासः वर्षका अद्रयोभिषवग्रावाणश्च वृषणं स्वर्गादिफलस्य सेक्तारं सोमं
वृषभाय देवानां श्रेष्ठाय तुभ्यं सुष्वति सुन्वंति॥ सुनोतेर्लटि बहुलं छंदसीति विकरणस्य श्लुः अदभ्यस्तादिति। झेरदादेशः॥ ॥इति द्वि
तीयस्य षष्ठे सप्तदशो वर्गः॥ ॥अथ षष्ठी॥ ॥वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा॥ वृष्णो मदस्य वृषभ त्व
मीशिष इंद्र सोमस्य वृषभस्य तृप्णुहि॥ ॥वृषभ कामानां वर्षक हे इंद्र ते तव वज्रः वृषा कामवर्षकः॥ तथा ते रथोपि वृषा तव ह
री एतन्नामकावश्वौ वृषणा वर्षकौ तव आयुधानि वज्रव्यतिरिक्तान्यायुधान्यपि वृषभाणि ईदृशा वर्षकस्य मदस्य मदकरस्य सो
मस्य त्वं ईशिषे ईश्वरो भवसि॥ हे इंद्र वृषभस्य वर्षकेण सोमस्य सोमेन तृप्णुहि॥ तृप प्रीणने स्वादिः छंदस्यादिषु
तृप मनात् नोतीति पठितं॥ तथापि सर्वविधीनां छंदसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति॥ ॥अथ सप्तमी॥ ॥प्रते
नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः॥ कुविन्नो अस्य वचसो निबोधिषदिंद्रमुत्सं न वसुनः सिचामहे॥ ॥दाधृ
षिः धृष्टः सन् शत्रूणां धर्षकोहं समने संग्रामे युद्धा ध्वपि॥ वचस्युवं॥ अमितत्वादिवात् उवङादेशः स्तोत्रमिच्छंतं नावं नाव
मिव आपद्भ्यस्तारकं ते त्वां सवनेषु त्रिषु ब्रह्मणा स्तोत्रेण प्रयामि प्राप्नोमि॥ किंच अस्य वचसः स्तुतिलक्षणं मद्वाक्यं कुविद्बहु नि
बोधिषत्॥ इंद्रो नितरां बुध्यतां॥ बुध अवगमने लेटि सिप् बहुलमिति सिप्। कुविद्योगादनिघातः॥ तिङ्ङ्चोदात्तवतीति गतेर्नि
घातः॥ वयं च उत्सं न जलस्य निधानभूतं कूपमिव वसूनां निधानभूतमिंद्रं सिचामहे सोमेन सिंचामः सिचिरक्षरणे स्वरितेत् आग
मानुशासनस्यानित्यत्वात् नुमभावः॥ ॥अथ ष्टमी॥ ॥पुरा संबाधादभ्यावर्तस्व नो धेनुर्न वत्सं यवसस्य पिप्युषी॥ सकृत्सु ते सु
मतिभिः शतक्रतो संपत्नीभिर्न वृषणो नसीमहि॥ ॥हे इंद्र संबाधात् शत्रुजन्यात् बाधात् पुरा नोस्मान् अभ्यावर्तस्व आवर्तय।
यथा संबाधोस्मान् न स्पृशति तथा कुर्वित्यर्थः॥ तत्र दृष्टांतः॥ धेनुर्न वत्सं यथा यवसस्य घासेन पिप्युषी आप्यायिता धेनुर्वत्सं
अशनाय प्रवर्तयति तद्वत् हे शतक्रतो वयं सकृत् मतिभिः त्वादृषयेः शोभनैः स्तोत्रैः सकृत् सद्य एव नसीमहि संगच्छामहि॥
॥ ॥तत्र दृष्टांतः॥ ॥वृषणा न संपत्नी संगतान् युवानः यथा पत्नीभिर्व्याप्यंते तद्वत्॥ ॥अथ नवमी॥ ॥नूनं सा त इति व्याख्याता॥ ॥
इति द्वितीयस्य षष्ठे ष्टादशो वर्गः॥ ॥तदस्मा इति नवर्चं षष्ठं सूक्तं नाभाकस्यार्षं अत्रानुक्रमणिका॥ तदस्मै त्रिष्टुबंतमिति। अं
त्या त्रिष्टुप् शिष्टाः महापंक्त्यः॥ अतिरात्रे द्वितीये पर्याये अच्छावाकशस्त्रे तदस्मा इति सूक्तं॥ अतिरात्रे पर्यायाणामित्यखंडे
सूत्रितं। तदस्मै नव्यमस्यापिब यस्य जज्ञानं इति याज्यंति॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥तदस्मै नव्यमंगिरस्वदर्चत शुष्मा यदस्य
प्रत्नथोदीरते॥ विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरत॥ नभंतामन्यके समे॥ हे स्तोतारः नव्यं नवतरमन्यैरदृष्टपू
र्वं तत्तादृशं स्तोत्रं अंगिरस्वत् अंगिरस इवास्मा इंद्राय अर्चत ब्रूत। यद्यस्माज्जातमात्रस्यास्येंद्रस्य शुष्माः शत्रूणां शोषकाणि तेजां
सि प्रत्नथा प्रत्नपूर्वविश्वमा घल छंदसीति इवार्थे थाल् प्रत्ययः॥ प्रत्नानि पुरातनानीव उदीरते उद्गच्छति उद्गतानि॥ अनुदात्तेत्। तिङ्
चोदात्तवतीति गतेर्निघातः यद्यस्माच्च विश्वा सर्वाणि गोत्रा मेघा मरीवृता वृत्रेणाक्रांतान् सर्वत्र सुपां सुलुगिति डादेशः॥ तानप्रदेशान्

203/1914

भा॰अ॰२ दृंहिता नितरां दृढीकृतान मेघान सोमस्य मदे हर्षे संजाते सति स इन्द्रः स्वबलेन ऐरयत उदघाटयत॥ अभेषमेदेनापः प्रेरयामासेत्यर्थः॥ य अ॰६
द्वा विश्वानि सर्वाणि परिवृता बलात्कारेणाक्रांतानि दृंहिता निपर्वता विलेभिरे धानिगोत्र इति त्र कथ्यचक्षुर्वेति समुच्चार्थे त्र प्रत्ययः॥ गवां
११० वंशानि स्वसारो ऐरयत तस्मात्कुदान्विरगमयत तस्मात्स्वर्णंतीति सम्बन्धः॥ ऐरयत उरगन्तीण्यंतस्य लङि रूपं यद्वृत्तयोगादनिघातः॥७
॥ ॥अथ द्वितीया॥ ॥ स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत॥ शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महि
ना प्रत्यमुंचत॥ ॥स इंद्रः भूतु भवतु वर्धतामित्यर्थः॥ य इंद्रः नूनं तेजो बलं मिमानः कुर्वाणः सन् प्रथमाय प्राथमिकाय धायसे
धे इंद्रपान सोमपानाय महिमानमातिरत अवर्धयत नातिरतेर्व्यत्ययेन ऊः यद्योगादनिघातः॥ शूरः शत्रूणां शातयिता य इंद्रः युत्सु युद्धे
षु तन्वं स्वकायं शरीरं परिव्यत वर्मणा परिवीतमकरोत। स इंद्रो महिना स्वकीयेन महिम्ना शीर्षणि स्वशिरसि द्यां प्रत्यमुंचत अधा
रयत॥ ॥अथ तृतीया॥ ॥अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः॥ रथेष्ठेन हर्यश्वेन विच्युताः प्रजीरयः
सिस्रते सध्र्यक्पृथक्॥ ॥ अधापि च हे इंद्र त्वं प्रथमं मुख्यं तद्वीर्यं सामर्थ्यमकृणोः अकरोः। किं तत् ब्रह्मणा स्तोत्रेण स्तुतिसाधन
भूतेन वेदवाक्येन अस्य वीर्यस्य स्तोतृजनस्याग्रे पुरतः यत् शुष्मं शत्रूणां शोषकं बलमैरयः उदगमयः जीरयो जरयितारो बाधका
असुराः रथेष्ठेन रथस्थितेन हर्यश्वेन त्वया विच्युताः स्वस्थानात् च्याविताः संतः सध्र्यक् सध्रीचीनाः परस्परसंगताः पृथक् भी
त्याभियुक्ताः संतः प्रसिस्रते प्रकर्षेण धावंति। स्रुगतौ जुहोत्यादिः बहुलं छंदसीत्यभ्यासस्येत्वं। सध्र्यगिति सहस्य सध्रिरिति स
ध्र्यादेशः अद्रिसध्र्योरंतोदात्तत्वं निपातनादुदात्तस्वरितयोरिति यणः स्वरितत्वं॥ ॥अथ चतुर्थी॥ ॥ अधा यो विश्वा भुवना
भि मज्मनेशानकृत्प्रवया अभ्यवर्धत॥ आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत॥ ॥अधापि च प्रवयाः
प्रवयाः पुरातनो य इंद्रः विश्वा भुवनानि सर्वान् लोकान् मज्मना बलेनाभिभूय ईशानकृत् आत्मानं सर्वस्याधिपतिं कुर्वन्॥ यद्वा अ
स्मदादीन् देवान् तत्तल्लोकाधिपतीन् कुर्वन् अभ्यवर्धत सर्वतः प्रवृद्धोऽभवत॥ आत् अनंतरं वह्निः जगतो वोढा स इंद्रः ज्योतिषा
स्वीयेन तेजसा रोदसी द्यावापृथिव्यौ आतनोत व्याप्ते अकरोत् च तमांसि तमोरूपाणि रक्षांसि दुधिता दुःस्थिता निदुर्गतानि सीव्यन् वि
स्तारयन् समव्ययत आवृणोत जगद्व्याप्य इत्थं वर्तत इत्यर्थः॥ ॥अथ पंचमी॥ ॥स प्राचीनान्पर्वतान्दृंहदोजसाधराची
नमकृणोदपामपः॥ अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥ ॥स इंद्रः प्राचीनान् इतस्ततः प्रकर्षेणांच
तो गच्छतः सपक्षान् पर्वतान् ओजसा बलेन दृंहत् पक्षच्छेदं कृत्वा भूमौ दृढान् अचलानकरोदित्यर्थः॥ अपां मेघस्थितानामुदका
नामपः स्यंदनलक्षणं कर्म अधराचीनं अधःस्थदेशमंचति गच्छतीत्यधराचीनं तादृशमकृणोत् मेघभेदनं कृत्वा अपो भूमाव
पातयदित्यर्थः॥ किं च विश्वधायसं विश्वस्य धात्रीं पृथिवीं बलेन अधारयत् मायया प्रज्ञया उपायेन द्यां द्युलोकं अवस्रसः स्रंसनग
तात्॥ संपदादिलक्षणो भावे क्विप् अवपूर्वाद्दस्तंभात्॥ ॥इति द्वितीयस्य पंचमे एकोनविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥सास्मा अरं ११०
बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि॥ येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः॥ ॥स ताह

205
1914

श इंद्रः अस्मै जगते अरमलं पर्याप्तो बभूव। रक्षकत्वेन स्वामी बभूवेत्यर्थः॥ पिता सर्वस्य पालकः प्रजापतिः विश्वस्मात् जनुषो जननात्
परि उपरि स्थितात् वेदसो ज्ञानात् तद्विशिष्टं बाहुभ्यां स्वकीयाभ्यां समकृणोत। तुविष्वणिः बहुकीर्तिः महास्वनो वा स इंद्रः येन ज्ञानेन
क्रिविं एतन्नामानमसुरं वज्रेण हत्वी स्नात्व्यादयश्चेति त्वा हत्वा तां पृथिव्यां भूमौ शयध्यै शयनाय पृथिव्यां निधाय न्यवृणक्
वृणक् हिंसाकर्मान्यवधीत॥ ॥अथ सप्तमी॥ ॥अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगं॥ कृधि प्रकेत
मुप मास्या भर दद्धि भागं तन्वो३ येन मामहः॥ ॥हे इंद्र अमाजूः यावज्जीवं गृह एव जीर्यंती पित्रोः सचा मातापितृभ्यां सह भ
वंतीनयाः कन्यापरपतिमलभमाना सती दुहिता समानात् आत्मनः पित्रोश्च साधारणात् सदसः सदनात् अधिकरणे चोपसंख्या
नमिति पंचमी॥ गृहादुपस्थायेव यथा भागं याचते तथा स्तोता हं भगं भजनीयं धनं त्वामिये ईमत्यादिषु भिघुतमइतियत्व
येनात्मनेपदं॥ इयइन देशः॥ तांप्रयाचते च द यं धनं प्रकेतं प्रकर्षेण ज्ञातव्यं कृधि कुरु तत्र उपमासि एतावदिदं धनमिति कु
रु आभर तत्र धनं संपादय भागं भजनीयं तन्वः शरीराय मह्यमिति यावत् दद्धि देहि॥ येन धनेन मम मरुः स्तोतृन्मामान्
आप्नुयायसि॥ ॥अथाष्टमी॥ ॥भोजं त्वामिंद्र वयं हुवेम ददिष्ट्वमिंद्रापांसि वाजान्॥ अविड्ढींद्र चित्रया न ऊती कृधि वृषन्निं
द्र वस्यसो नः॥ ॥हे इंद्र भोजं पालयितारं भोजयितारं वा त्वां वयं हुवेम ह्वयेम ह्वयतेर्लिङि बहुलं छंदसीति संप्रसारणं॥ हे इंद्र त्वं अपां
सि कर्माणि वा वाजान् अन्नानि ददिः दाता दाण दाने॥ आदृगमहनजन इति किप्रत्ययः॥ लिड्वद्भावादभ्यासादि कार्यं॥ न लोकाव्ययेत्येतानिष
ष्ठीप्रतिषेधः॥ अतात्वं हे इंद्र चित्रया नानाप्रकारेण ऊती ऊत्या पालनेन नो अस्मान् अविड्ढि रक्ष हे वृषन् कामानां वर्षक हे इंद्र
नोऽस्मान् वस्यसः अतिशयेन वसुमतः कृधि कुरु॥ ॥अथ नवमी॥ ॥नूनं सात इति व्याख्याता॥ ॥इति द्वितीयस्य पंचमे विंशो
वर्गः॥ ॥ प्रातारथ इति नवर्चं सप्तमं सूक्तं गार्त्समदं त्रैष्टुभमैंद्रं॥ प्रातरित्यनुक्रांतं॥ लैंगिको विनियोगः॥ ॥तस्मिन्सूक्ते
प्रथमा॥ ॥प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः॥ दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत॥
रथो रंहणाद्रथः यज्ञः सवनत्रयात्मकः स्तूयते अतिनवः स्तौति मातसस्निः स्नातिर्गतिकर्मा आदृगमहनजनेति किप्रत्ययः॥ ईदृशः एवंवि
धो यज्ञः प्रातः प्रातःकाले योजि अयोजि अस्माभिः चतुर्युगः युज्यंत इति युगाभिग्रावाणः चत्वारि युगानि यस्य स तथोक्तः॥ अध्वर्या
दृत्विगभिप्रायं वा॥ त्रिकशः तिस्रः कशा वाचा मंद्रमध्यमक्रुष्टरूपा यस्य स तथोक्तः सवनत्रयाभिप्रायं वा। सप्तरश्मिः अश्नु
वते व्याप्नुवंति कर्माणीति रश्मयः छंदांसि सप्तसंख्याकानि गायत्र्यादीनि छंदांसि यस्य स तथोक्तः॥ दशारित्रः अरिभ्यः पापेभ्य
स्त्रायंत इति अरित्राणि दश संख्याकान्यरित्राण्यस्य सतो दश॥ चमसाध्वर्युभिप्रायं वा॥ मनुष्यो मनुष्याणां हितः स्वर्षाः स्वर्ग
स्य दाता एवंविधो यज्ञः इष्टिभिः प्रायणीयातिथ्यादिभिः मतिभिर्मननीयस्तोत्रैः रंह्यो गमनीयो भूद्भवत॥ यद्वा नवोऽभिनवः स
स्निः सनोतेर्भिषग्वनादिकामानां दाता रथो रमंते अस्मिन्निति रथः स्यंदनः प्रातःसवने चसोमपानार्थं योजि अश्वैरयोजि कीदृशः
चतुर्युगः त्रिकशः तिस्रः कशा यस्य स तथोक्तः॥ सप्तरज्जुः दशारित्रो दशावलकः मनुष्यः मनुष्यहितः स्वर्षाः स्वर्गस्य संगम

यिता इंद्ररथः इषिभिर्यागैर्मतिभिः स्तोत्रैश्च प्राप्तव्यो भवति॥ ॥अथ द्वितीया॥ ॥ सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः अ॰ ६
भा॰ अ॰ २ स होता। अन्यस्या गर्भमन्य ऊ जनंत सो अन्येभिः सचते जेन्यो वृषा॥ ॥स यज्ञः सोमो वा अस्मा इंद्राय प्रथमं प्रातः सवने अरं पर्याप्तो
२११ भूत्॥ स च द्वितीयं माध्यंदिने सवने पर्याप्तो भूत् उतापि च स तृतीयं। तृतीयसवने पर्याप्तो भूत् सर्वेन कालेनाध्वनारिति द्वितीया सप्तमः
सामोऽयामनुषो मनुष्यस्य होता रक्षार्थं भवति॥ किंच अन्ये ऋत्विजः अन्यस्याः पृथिव्या वेद्यास्मिकाया वा यागार्भे जातं सोमं
च यज्ञं वा जनंत अजनयंत् प्रमिमेत्यर्थः॥ वृषा अभिमतफलवर्षकः जेन्यो जयसमर्थः॥ सोमो वा अन्येभिः अन्यैर्हविर्भिर्देवैः स
चते संगच्छते पचसमवायो अनुदात्तेत॥ ॥अथ तृतीया॥ ॥ हरी नु कं रथ इंद्रस्य योजमायै सूक्तेन वचसा नवेन॥ मो षु त्वामत्र बहवः
हि विप्रा नि रीरमन् यजमानासो अन्ये॥ ॥इंद्रस्य संबंधिनि रथे हरी पृतं नामकावश्वो नु क्षिप्रं कं सुखेन आयै गमनाय नवेन अन्यैरकृ
तपूर्वेण वचसा वेदात्मकेन सूक्तेन साधनेन युज्ञं युनज्मि युजिर्योगे लुङि इरितो वेति च्लेरङादेशः। अत्रास्मिन्यज्ञे बहवो विप्रा मेधा
विनः स्तोतारो भवंति हि तथापि अन्ये मद्व्यतिरिक्ता यजमानासो यजमानाः त्वां सु सुष्ठु मो नि रीरमन् नि मा रमयंतु अस्मदीयं यज्ञ
मागत्य सोमं पिबतीति भावः॥ रीरमन् रमेर्ण्यंतस्य लुङि सन्वद्भावादभ्यासस्येत्वदीर्घौ वाक्यभेदाद्बहुत्वाभावे नानिघातः॥ ॥अ
थ चतुर्थी॥ ॥आ द्वाभ्यां हरिभ्यामिंद्र याह्या चतुर्भिरा षड्भिर्हूयमानः॥ आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः॥ ॥ हे इंद्र
हूयमानस्त्वं द्वाभ्यां हरिभ्यामश्वाभ्यामिमं यज्ञं प्रति सोमपानार्थमायाहि॥ चतुर्भिर्हरिभिरायाहि॥ तथा षड्भिरागच्छ सोमपेयं
सोमपानं कर्मणि भवो यत ईपूर्वोतीति॥ ॥पातुं अयं सोमः प्रति अष्टाभिर्दशभिर्वा याहि॥ अत्र नोदीर्घो हितीति ऋतिभ केर त्वतं॥ दशभिर्हरिभिरागच्छ
सुमख सुयज्ञ सुधन वा हे इंद्र अयं सोमस्त्वदर्थमभिषुतः॥ अतो यज्ञस्य मृधो हिंसा मा कः मा कार्षीः॥ करोते लुङि मंत्रे घ
सेत्यादिना च्लेर्लुक्॥ गुणे कृते हल्ङ्याब्भ्यो दीर्घादिति सलोपः। यद्यपीद्रस्य द्वावेव हरी तथापि तत्तद्विभूतिभेदाभिप्रायेण नानात्वं॥ अतो बहुत्वं
मविरुद्धं॥ ॥अथ पंचमी॥ ॥आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः॥ आ पंचाशता सुरथेभिरिंद्रा षष्ट्या स
प्तत्या सोमपेयं॥ ॥हे इंद्र सोमपेयं पातव्यं सोमं प्रति अर्वाङ् अस्मदभिमुखः सन् विंशत्या विंशतिसंख्याकैरश्वैरायाहि त्रिंशत्संख्या
कैर्हरिभिर्युजानो युज्यमानस्त्वं सोमपानं प्रत्यायाहि सुरथेभिः शोभनरथगमनैः पंचाशता हरिभिर्याहि तथा षष्ट्या सप्तत्या संख्या
कैर्हरिभिः सप्तत्या समसंख्याकैर्हरिभिः सोमपानं प्रत्यागच्छ॥ ॥इति द्वितीयस्य पंचमे एकविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥आ
शीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः॥ अयं हि ते शुनहोत्रेषु सोम इंद्र त्वाया परिषिक्तो मदाय॥ ॥आशीत्या आशीति
संख्याकैः सोमपानार्थमर्वाङ् अस्मदभिमुखः सन् आयाहि नवत्या एतत्संख्याकैरश्वैरागच्छ शतेन शतसंख्याकैर्हरिभिरुह्यमानो
धार्यमाणस्त्वं आयाहि। हे इंद्र इंद्रियस्मात् मदाय त्वदर्थाय शुनहोत्रेषु सवनेषु हूयते सोमो याभिरिति शुनहोत्राः पात्रविशेषाः तेषु अ
यं सोमः त्वाया त्वत्कामनया परिषिक्तः॥ ॥अथ सप्तमी॥ ॥मम ब्रह्मेंद्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य॥ पुरुत्रा हि विहव्यो ब २११
भूथास्मिन् शूर सवने मादयस्व॥ ॥हे इंद्र मम ब्रह्म अस्मदीयामेव स्तुतिमच्छाभिलक्ष्य याहि विश्वा व्याप्तौ हरी रथस्य धुरि युगप्रां
ते धिष्व संधत्स्व॥ पुरुत्रा पुरुभिर्बहुभिर्यजमानैः। त्वं विहव्यो विविधं कृतव्याह्वानो बभूथ भूतोसि॥ बभूथात्थं जगृभ्म ववर्थेति निपातनादिड्भावः॥ हे शूर अस्मिन् सवने यज्ञे मादयस्व सोमपानेन हृष्टो भव॥ ॥अथाष्टमी॥ ॥ न म इंद्रेणेति इंद्रेण सख्यं

207
1914

ममगव्यं यत्सख्यलक्षणं सख्यं न वियोषत् कदाचिदपि न वियुज्यतां॥ योतेर्लिङि सिब्बहुलमिति सिप् अडागमः॥ अस्य इंद्रस्य दक्षि
इंद्र कर्तृकं दानमस्मभ्यं दुहीत अभिमतफलं दुग्धां दुहेर्लिङि रूपं॥ ज्येष्ठे अतिशयेन प्रशस्ये वरूथे आपन्निवारके वरणीये वा गभस्तौ
बाह्वोरुप समीपवर्तिनः स्याम। इंद्रस्य हस्तस्पर्शयोग्या भवेमेत्यर्थः॥ किंच प्राप्तप्राये सोमपानार्थमिंद्रस्य यज्ञस्य शालायां प्रवे
शे प्रवर्तमाने वयं सत्रैर्ब्राह्मणैस्तेनारोभवेम॥ ॥अथ नवमी॥ ॥नूनं सा त इति व्याख्याता॥ ॥इति द्वितीयस्य पंचमे द्वाविंशो वर्गः॥ ॥
अपाय्यस्येति नवर्चं अष्टमं सूक्तं। गात्समदं त्रैष्टुभमैंद्रं॥ पायीत्यनुक्रांतं॥ लैंगिकः सत्रविनियोगः॥ द्वितीये पर्याये होतृशस्त्र या
ज्या अपाय्यस्येषा॥ ॥सूत्रितं च प्रथमा॥ ॥अपाय्यस्यांधसो मदाय मनीषिणः सुवानस्य प्रयसः॥ यस्मिन्निंद्रः प्रदिवि वावृधा
न ओको दधे ब्रह्मण्यंतश्च नरः॥ ॥सुवानस्य सोमाभिषवं कुर्वाणस्य मनीषिणः प्राज्ञस्य यजमानस्य संबंधिनः प्रयसः प्रीङ् तर्पणे अ
सुन् प्रीतिकरस्य सोमलक्षणस्यांधसः मदाय अपायि एतदंधमिंद्रेण पीतमित्यर्थः॥ यद्वा अपायीति पातेर्ण्यंतस्य योर्बहुलमिति च्लिण
कर्तरि भवति। छंदसि लुङ्लङ्लिट इति लोडर्थे लुङ्॥ प्रीतिकरस्यांधसः मदाय अपाय्यीशे षष्ठीव कस्याः कर्मणि षष्ठी॥ इंद्रः सोमं पि
बन् प्रदिवि पुराणे यस्मिन्सोमलक्षणेंधसि वावृधानो वर्धमान इंद्रः ओको रथे संध्यतया निवासं चकार किंच ब्रह्मण्यंतः इंद्राय स्तोत्र
मिच्छंतः नरः कर्मणां नेतारऋत्विजो यस्मिन्निवासं दधिरे तदेतदपायीति पूर्वेणान्वयः॥ ॥अथ द्वितीया॥ ॥ अस्य मंदानो मध्वो वज्र
हस्तोहिमिंद्रो अर्णोवृतं वि वृश्चत्॥ प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमंत॥ ॥अमेस्य ध्वः तृतीयार्थे षष्ठी॥ अनेन
मदकरेण सोमेन मंदानो हृष्यन् वज्रहस्तः वज्रयुक्तो हस्तो यस्य स इंद्रः अर्णोवृतं उदकस्यावरकं वृत्र कोनरवृतं वा अहिं वृत्रं मेघं वा वि वृ
श्चत् विशेषेणाछिनत्॥ ओव्रश्चू छेदने तौदादिकः लङि ग्रहिज्यादिना संप्रसारणं॥ यस्माद्वाहिभेदनेन जातनदीनां प्रयांसि प्रीणयि
तॄणि जलानि अच्छ समुद्रमभिलक्ष्य प्र चक्रमंत गंतुमुपाक्रमंत॥ तत्र दृष्टांतः॥ वयो न यथा पक्षिणः स्वसराणि कुलाय अर्यते प्राप्यते
इति स्वसराणि कुलायाः तानभिलक्ष्य गच्छंतितद्वत्॥ ॥अथ तृतीया॥ ॥ स माहिन इंद्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रं॥
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत्॥ ॥माहिनो महनीयः पूजनीयः यद्वा महिमोपेतः अहिहा अहिं मेघं हतवा
निंद्रः। अक्तुना आत्मनोर्कप्रकाशेन अहःप्रभृतिकालभिक्षेप॥ स इंद्रः अपां अर्णः जगतो स्रोतोलक्षणं प्रवाहं समुद्रं अच्छाभिलक्ष्य
प्रैरयत् प्रैरयत्॥ किंच स इंद्रः अंगिरसां बिलांतर्वर्तिनां गवां लाभाय सूर्यमजनयत्॥ ततः गाः पणिभिरपहृता गा विदत् अलभत विदि
रुलाभे॥ लुङि इरितो वेति च्लेरङादेशः॥ वाक्यभेदादनिघातः॥ तथा अक्तुना तेजसाह्नां दिवसानां वयुनानि प्रज्ञानानि प्रकाशनं साधय
त॥ ॥अथ चतुर्थी॥ ॥सो अप्रतीनि मनवे पुरूणींद्रो दाशद्दाशुषे हंति वृत्रं॥ सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य
सातौ॥ ॥ स इंद्रः दाशुषे हविर्दत्तवते मनवे मनुष्याय यजमानाय पुरूणि बहूनि अप्रतीनि इतरसंनिधानानि दाशत् ददाति किंच

स्तंअकरं इंतिवि। द्वश: यईद्र: सूर्यस्य सातौ साति: संभजनं सूर्य संभजन विषयेभूते पस्पृधानेभ्य: अहमेव प्रथमं सूर्य प्राप्नुयामि
तिस्पर्धमानेभ्य स्तोतृभ्य: न्र्भ्य: सप्तम्ये शतीमेव अतसाध्य स्तत्यापि हेतुभूत: सात्रसमाश्रयणीयोभूदभूत॥ यद्वासूर्यस्य साते
११२ पांतकर्मणि अधिकरणविक्रिन सूर्यस्य संबंधिनि युध्येपस्पृधानेभ्य: अतसाह्योभूत॥ ॥अथपंचमी॥ ॥ससत्वतउंद्र: सूर्यमादेवो
रिणड्मत्यायसत्वान्॥ आयदूयिंगुहदवद्यमस्मैभरदंशंनतशोदशस्यन॥ ॥सत्वान् एतशेन स्तूयमान: देवोद्योतमान: स
इंद्र: सुन्वते सोमाभिषवं कुर्वते मर्त्याय मनुष्याय एतशाय सूर्यं मारिणक् एतशेनस्पर्धमानं सूर्यं बलेनारेचयत। तथाच निगम:
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्र इतिय घस्मात एतश: सौवश्व्यारात्ता दशस्यन यजमान: अस्माई ह्यगुहदवद्यं प्रछ
नावद्यं रयिमामरूपधनं आभरत॥ संपादयामास॥ ॥तत्र दृष्टांत:। अंशं नयथा पिता अंशं पुभागं पुत्राय भरति तद्वत॥ ॥इति
द्वितीयस्य षष्ठे त्रयोविंशो वर्ग:॥ ॥अथषष्ठी॥ ॥सरंधयत सदिव: सारथये शुष्णमशुषं कुयवं कुत्साय॥ दिवोदासाय नवतिंच
नवेंद्र: पुरोव्यैरच्छंबरस्य॥ ॥सदिव: दीप्तियुक्त: स इंद्र: सारथये आत्मन: सारथ्यं कुर्वते कुत्साय राजर्षये शुष्णं शोषयति सर्वमि
ति शुष्ण: कश्चिदसुर: तमशुषंनकेनापि शोषणीयं एतं नामानमसुरं रंधयत॥ रध्यतिर्वशगमने वशमनयत॥ यद्वा रधहिंसा
संराध्यो इत्यस्य ण्यंतस्य रधिजभोरचीतिनुम॥ अवधीत॥ किंच स इंद्र: दिवोदासाय एतन्नामकाय राज्ञे शंबरस्याऽसुरस्य नवनवतिं
पुर: अैरत विदारितवान॥ ॥अथसप्तमी॥ ॥एवातइंद्रोचथमहेमश्रवस्या नत्मनावाजयंत:॥ अश्याम तत्साप्तमाशुषाणाननमो
वधरदेवस्य पीयो:॥ ॥हे इंद्र श्रवस्या श्रवसं अन्नमात्मन इच्छंत: उच्छंती घ्याया: पूर्वसवर्णदीर्घ:॥ अंनं काम्यं वा जयंत: तां बलिनं कुर्वंत: यद्वाश्र
वस्या यश: कामनया वा जयंतो न्नमिच्छंत:॥ दृश्यामपि पाणिच्च दृश्यते॥ अश्वार्थंता गव्यंता वाजयंत इतिक्यजंततो चित प्रातिपदिक
त्वात उदात्तं स्यात॥ वाजयंत: शतकतुमिति यथा॥ ताद्दशाय ते तुभ्यमेव उचथ्यं स्तोत्रं त्मनात्स्ययमेवन: अहमप्रापयेम॥ द्विग
तौ संप्रत्यर्थे इदानीं आशुषाणा: आश्नोते: कानमित्यत्रयीव हलमिति लिप्यपि विकरण इयउप्रत्यय: सच बाम भुवाना: वयंच
दभिलषितं तत्साप्तं सप्तपुरुषसंबंधिसप्तपदीनं सख्यं। अश्याम व्याप्नुयाम अदेवस्य देवानिंदाहीन अजानत: पीयो: पीयति
र्हिंसा कर्मा हिंसकस्या सुरस्य वध: वध्यंते शत्रवो नेनेति वधरायुधं नमनम: ततं अधोनमय। ननम: णमुपूर्व ण्यंतस्य लुङि
चङि रूपं द्विलर:॥ ॥अथाष्टमी॥ ॥एवातेगृत्समदा: शूरमन्मावस्यवोनवयुनानितक्षु:॥ ब्रह्मण्यंत इंद्र तेनवीय इषमूर्जं सु
क्षितिंसुम्नमश्यु:॥ शूर वलवन हे इंद्र ते तुभ्यं गृत्समदा: अवयात्क:॥ गृत्सम इति गृत्समदेना अस्तदइति मेधाविनाम गृणाते स्तुतिक
र्मणइति तथाविधा मन्नाम ननीय स्तोत्रं तथा एवमेव तक्षु: ततक्ष: चकु:॥ तत्र दृष्टांत:॥ अवस्यवोन अव: गत्यर्थादिव तेरस्कन्निरु
पमवइति॥ अवो गमनमिच्छंत: पुमांसो वयुनानि मार्गान यथाकुर्वंति तद्वत॥ किंच नवीय: स्तुपांसलुगिति षष्ठ्यालुक नवीयसोन
वतरस्य ते तव ब्रह्मण्यंत: स्तोत्रं कर्तुमिच्छंत: गृत्समदा: सुक्षितिमिषं शोभननिवासोपेतमंनं उर्जं बलं सुम्नं सुखं चास्कं: प्राप्नुयु:। ११२
एकस्मिन् गृत्समदे बहुवचनं पराक्षाभिर्हृग्भिरुक्षा॥ ॥अथनवमी॥ ॥नूनं सातइतिमिक्षार्था॥ ॥इति द्वितीयस्य षष्ठे चतुर्विंशो वर्ग:
॥ ॥

॥ ॥वयंतइतिनवर्चंनवमंसूक्तं। कार्त्समदंत्रैष्टुभमैंद्रं। वयंतइत्यनुक्रांतं॥ सूक्तविनियोगो लिंगादवधार्यतां॥ ॥तस्मिन्सूक्ते प्रथमा 209
॥ ॥वयंतेवयइंद्रविद्धिषुण: प्रभरामहेवाजयुर्नरथं॥ विपन्यावादीध्यतोमनीषासुम्नमियक्षंतस्त्वावतोनॄन॥ ॥हे इंद्र ते तुभ्यं वयं 1914
वयं सामलक्षणमनं प्रभरामहे प्रकर्षेणसंपादयाम:॥ तत्र दृष्टांत:॥ वाजयुर्नयथान्नमात्मन इच्छन् पुमान रथं शकटं संपादयति॥ तद्वत एवंह
वि: संपादकानास्मान् सुविद्धि जानीहि विदज्ञानार्थस्य लोटिरूपं वा स्यादिल्वादनिपात:॥ किंकुर्वता वयं विपन्यया: तव स्तोत्रं कुर्वाणा: मनी
षामनसएव यात्स्तुत्या दीध्यतो दीप्यमाना: दीधी दीप्ति देवनयो: व्यत्ययेनशत त्वावत: युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमि
ति वतुप। त्वत्सदृशान नॄन नेतॄन अग्न्यादीन सुम्नमियक्षंत: याचमाना:। यद्वा सुम्नं सुखेन नॄन नेतॄन अग्न्यादीन देवान इयक्षंत: इ
यक्षतिर्गतिकर्मा हवि पाता न प्राप्नुवंता वयं प्रभरामहइति समन्वय:॥ ॥अथद्वितीया॥ ॥त्वंन इंद्रत्वाभिरूतीत्वायतोअभिष्टिपासित
नान॥ त्वमिनोदाशुषोवरूतेत्थाधीरभियोनक्षतित्वा॥ ॥हे इंद्र त्वं त्वाभि: त्वदीयाभिरूताउतिभि: पालनादिभिनोस्मान पाहि। किंचत्वा
यत: सूप आत्मन: त्वच शत्रुरनुम इति विभक्तेरादात्तं। कामान जनान अभिष्टिपा सुपांसुलुगिति सोराकार:॥ अभिष्ट्योभिगंतार:
शत्रव: तेभ्य: पातारक्षको सि भवसि दाशुषो हविर्दत्तवतो यजमानस्य त्वमिन: ईश्वर: वरूतोरक्षिता असि स्वभितोतानि पालनादिका
रस्यइंकार:॥ बाधकानां निवारको सि॥ किंच त्वं तस्य स्तोतुरित्थाधी: एवंविधा पद्वा पथ मरूप कर्मासि यस्त्वां त्वामभिनक्षति हविषा परि
चरति॥ ॥अथतृतीया॥ ॥सनोयुवेंद्रोजोहूत्र: सखाशिवोनरामस्तुपाता॥ य: शंसंतंय: शशमानमूतीपचंतंचस्तुवंतंचप्रणेषत॥ यु
वा तरुणा यदृर्णां फलस्य शमयिता वा जोहूत्र: स्तोतृभिराकातव्य: हान आधाससखा सखिभूत: शिव: सुखकर: स इंद्र: नरां नरशब्दस्यो:
मिद्वां दसो गुण: नरशब्दस्य वा आभि आगमानुशासनस्यानित्यत्वात्नुडभाव: कर्मनेतॄणामस्माकं पाता पालको भवति। य: इंद्र: स्त्रा
णिशंसंतं यश्च शशमानं शश पुतं गंतावक्रिया: कुर्वाणं पुरोडाशादिकं हवींषि पचंतं स्तुवंतं सामभि: स्तोत्रं कुर्वाणं स्तुतत्वास्त्रयो: प्रति
गीता प्रगीत मंत्र साध्यत्वेन भेदस्य प्रतिपादितत्वात अत्र पृथङ्निर्देश:॥ एवमयं यजमानं ऊती कृत्यारक्षणेन प्रनेषत। नयतेर्लेटि
सिब्बहुलमिति सिप अडागम:॥ तिङ्श्चोदात्तवतीतिगतेर्निघात:॥ कर्मणां पारं प्रापयेत॥ ॥अथचतुर्थी॥ ॥तमुस्तुषइंद्रंतं
गृणीषेयस्मिन्पुरावावृधु: शाशदुश्च॥ सवस्व: काम्ंपीपरदियानो ब्रह्मण्यतोनूतनस्यायो:॥ ॥तमुतमेवेंद्रं स्तुषे स्तौमि॥ त
यात मिंद्रं गृणीषे शंसामि॥ उभयत्र पुरुषव्यत्यय:। यस्मिन्निंद्रे पुरा पूर्वं स्तोतारो वावृधु: प्रवृद्धा अभवन शाशदुश्च शत्रून् नहिं
सितवंत: श्च शत्रून नोत्किंदितुमादीनामित्यभ्यासस्य दीर्घ:॥ इयान: स्तोतृभिर्याच्यमान: स इंद्र: ब्रह्मण्यत: स्तोत्रमिच्छतो नूत
गिरसामुचश्यानुजुवान अस्मात तादिंद्रोगातुमिस्मन॥ मुष्णं नु पस: सर्येण स्तवान मस्याचिच्छिश्नथत्पूर्व्याणि॥ ॥अंगिरसांसंब
धीनि इच्छयाइकयानिजुजुवानुज्जुर्याप्रीतिसेवनयोरित्यस्यात्लिटि चांसौ रूपं। सेवमान: स इंद्र: गातुपाणिभिरूपद्रुतामंगिरसां
मार्गमिस्मन प्रेरयन अस्तंतपा स्तोत्रकामप्रशनेन तुतान तुत धावित्यस्यलिङि बहुलं छंदसीति विकरणस्य श्लु:॥ अवर्धयत किंच

भा०अ०२ स्वधावान् स्तोतृभिः स्तूयमानः सर्वेण स्वात्मभूतेन दस्युसोमुष्णन् अभ्यहरत् उदिते हि सूर्ये उषसो व्याव तेनैतादृशः स इंद्रः अश्नस्य अश्नुते अ०६
स्वतेजसा सर्वं जगद्व्याप्नुवतः कश्चिदसुरः तस्य पूर्व्याणि पुरातनानि पुराणि बलानि वा शिश्नथत् अश्नथयत् शिथिलीचकार॥ ॥इति द्विती
१३३ यस्य पंचमे पंचविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥स ह श्रुत इंद्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः॥ अव प्रियमर्शसानस्य साह्वाञ्छिरो
भरद्दासस्य स्वधावान्॥ ॥देवो द्योतमानः श्रुतः कीर्तिमान् अत एव दस्मतमः सर्वैरतिशयेन दर्शनीयः स इंद्रः मनुषे मनोरर्थं ऊर्ध्वो भुव
त्कामप्रदाने प्रवृत्तो ऽभूत् अभवत्॥ नाम प्रसिद्धौ॥ इति पूरणः॥ तद्युक्तं साह्वान् शत्रूनभिभवन्। स्वधावान् बलवानिंद्रः अर्शसान
स्य लोकबाधमानस्य दासस्य एतन्नामकस्यासुरस्य प्रियं शिरः अवभरत। अधःपातयत्। हरतेर्लङि छंदसि हुग्रहोर्भः॥ ॥अथ स
प्तमी॥ ॥स वृत्रहेंद्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि॥ अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत्॥ ॥वृत्रहा वृत्रस्य
हंता पुरंदरः शंबरपुरां दारयिता स इंद्रः कृष्णयोनीः निकृष्टजातीः दासीः उपक्षयित्रीः असुरसेना व्यैरयत्। अनुदत। किं च मनो
रर्थं क्षां पृथिवीं अपः उदकानि च अजनयत् यजमानस्य सत्रा महांतं शंसम् अभिलाषं तूतोत्। कामप्रदानेन पूरयत्। तुर त्वरणे इति सौत्रो
धातुः। शपः श्लुः। तुजादित्वाद्दीर्घः। यद्वा सत्रा महतः शंसं शंसनीयं शंसकं कामप्रदानेन वर्धयत्॥ यद्वा कृष्णयोनीः कृष्णाख्येनासुरेण नि
षिक्तरेतस्का दासीः आर्यस्त्रियः व्यैरयत् तथा मंत्रः। यः कृष्णगर्भा निरहन्नृजिश्वना इति॥ ॥अथाष्टमी॥ ॥तस्मै तवस्यमनु दायि
सत्रेंद्राय देवेभिरर्णसातौ॥ प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत्॥ ॥देवेभिर्देवनशीलैः स्तोतृभिः अर्णसातौ उ
दकलाभनिमित्ते तस्मा इंद्राय तवस्यं तवसे बलाय हितं बलवर्धनं हविः सत्रा सततं सर्वेष्वहःसु अनुक्रमेण सवनत्रये दायि अदायि॥
यद्वा तवस्यं बलं प्रशस्यायदायि ततनवस्यं देवेभिर्देवैरुदकभजने अनुक्रमेण तद्बलं तस्मा इंद्राय दायि॥ तथा मंत्रः॥ अनु ते दायि मह इं
द्रियाय इति। यदा अस्य इंद्रस्य बाह्वोर्वज्रं प्रतिधुः स्तोतारो सुरवधसमर्थकं स्तोत्रेण प्रतिनिदधुः। स्तूयमानो हीन्द्रो दस्युवधार्थं वज्र
मादत्ते। दधुः दधातेर्लुङि गातिस्थेति सिचो लुक्। आत इति प्रसक्तः। तत स्तेन वज्रेण दस्यून् असुरान् हत्वी हत्वा तदीया आयसीः योम
यीः पुरो नितारीत् नितरामनाशयत्॥ ॥अथ नवमी॥ ॥नूनं सा त इति व्याख्याता॥ ॥इति द्वितीयस्य पंचमे षड्विंशो वर्गः॥ ॥वि
श्वजित इति षळृचं दशमं सूक्तं। गार्त्समदमैंद्रं। अंत्या त्रिष्टुप् शिष्टाः पंच जगत्यः तृतीये पर्याये होतुः शस्त्र एतत्सूक्तं सक्तं
च। विश्वजिते तिसृभिः प्रातः स्थ आयुष्यमानेति यौस्यति॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्व
राजिते॥ अश्वजिते गोजिते अब्जिते भरेंद्राय सोमं यजताय हर्यतं॥ ॥हे अध्वर्यो इंद्राय सोमं भर संपादय कीदृशाय विश्वजि
ते सर्वस्य जेत्रे। तदेतत्प्रपंचयति धनजिते शत्रुवित्तस्य तदीयधनानां जेत्रे स्वर्जिते स्वर्जितः स्वर्गस्य जेत्रे अधिपतये सत्राजिते सततं
जयशीलाय महतां जेत्रे वा नृजिते नृणां नायकानां जेत्रे उर्वराजिते उर्वरा सर्वसस्याढ्या भूः तस्याः जेत्रे अश्वजिते गोजिते बलेनाप
हृतानां गवां जेत्रे अब्जिते वृत्रेणाक्रांतानामपां जेत्रे यजताय यजनीयाय तस्मा इंद्राय हर्यतं हर्य गतिकांत्योः भृमृशीत्यादिना १३३
कर्मण्यतच् कमनीयं स्पृहणीयं वा सोमं भरेति समन्वयः॥ ॥अथ द्वितीया॥ ॥अभिभुवे ऽभिभंगाय वन्वते षाळ्हाय सहमा

नाय वेधसे॥ तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इंद्राय वोचत॥ ॥अभिभुवे सर्वस्याभिभवित्रे अभिभंगाय असुराणां 211
भंजकाय वन्वते वननं संभक्तिः ल्यप्रत्ययेन उच्यते॥ शत्रूणां धनानां संभजनाय अषाळ्हाय साहेः कर्मणि निष्ठा। अभावश्छांद 1914
सः। शत्रुभिरनभिभूताय सहमानाय सर्वं सहाय वेधसे सर्वस्य विधात्रे तुविग्रये पूर्णग्रीवाय ग्रसेर्गृशब्द औणादिकः कर्मणि
कप्रत्ययः॥ तुविभिर्बहुभिः स्तोतव्याय वह्नये सर्वस्य वोढ्रे दुष्टरीतवे अन्यैर्दुस्तराय दुर्हिंसाय सत्रासाहे सर्वदाभिभवित्रे महतो
भिभवित्रे वा एवंविधायेंद्राय नमः नमः शब्दपूर्वकं स्तोत्रं वोचत। हे स्तोतारो यूयं ब्रूत ब्रू आ लुङि ब्रुवो वचिः अस्यतिवक्तिख्याति
भ्यो ङ् इति च्लेरङादेशः। वच उम् इति उम् आगमः॥ ॥अथ तृतीया॥ ॥सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः॥ वृतं
चयः सहुरिर्विक्ष्वारित इंद्रस्य वोचं प्रकृतानि वीर्या॥ ॥सत्रासाहः बहूनामभिभविता जनभक्षः जनानां यजमानानां कामप्रदा
नेन संभक्तः संभजनीय इति वा जनंसहः बलिनां जनानामभिभविता च्यवनः शत्रूणां च्यावयिता स्वस्थानात्। युध्मः यो
द्धा यो जोषमनुप्रीतिमनु उक्षितः सिक्तः सोमेन वृतंचयः वृतस्याभीष्टस्य चेता संचेता तद्दाता इत्यर्थः। यद्वा वर्तते पुनः पुनरभिमु
खमागच्छतीति वृतः शत्रुः तं चयति हिनस्तीति वृतंचयः चयतिर्हिंसाकर्मा तथा च यास्कः॥ यो वै भागी नं भागान्नुदते चयते
वैनं स यदि वैनं न चयत्यथ पुत्रमथ पौत्रं चयते त्वेवैनमिति सहुरिः अभिसहनशीलः उरिन्प्रत्ययः अभिभविता शत्रूणां विक्षु
प्रजासु आरितः पालकत्वेन प्रापिता भवति तादृशस्य इंद्रस्य कृतानि वृत्रहननादिरूपाणि वीर्याणि सामर्थ्यानि प्रवोचं प्रकर्षेण व
दामि॥ ॥अथ चतुर्थी॥ ॥अनानुदो वृषभो दोधतो वधो गंभीर ऋष्वो असमष्टकाव्यः॥ रध्रचोदः श्नथनो वीळितस्पृथुरिंद्रः सुयज्ञ उ
षसः स्वर्जनत्॥ ॥अनानुदः अनुपश्चाद्ददातीत्यनुदः आतश्चोपसर्ग इति कर्तरि कः। स नास्ति यस्य स तथोक्तः। प्रभूतधनदानेन समानो
नास्तीत्यर्थः। अत एव वृषभः कामानां वर्षिता दोधतः दुध हिंसाकर्मा हिंसकस्यासुरस्य वधः हंता गंभीरः। महत्त्वेन गांभीर्योपेतः ऋष्वः
महान् यद्वा दर्शनीयः ऋ सर्वैः असमष्टकाव्यः अश्व्याप्तौ कर्मणि निष्ठा कृदितादिविकल्पः। नञ्समासः रध्रस्याभकर्मारध्र
चोदः रध्र हिंसासंराध्यः रध्राणां समृद्धानां प्रेरकः यद्वा शत्रूणां हिंसकानां नोदकः श्नथनः शत्रूणां बलापहारेण श्लथयिता वीळि
तो दृढांगः पृथुः स्वतेजसा जगद्व्याप्य वर्तमानः सुयज्ञः शोभनकर्मा एतादृश इंद्रः उषसः स्वः सूर्यं इति द्वितीयान्तं। सूर्यं च यं जनत
प्रादुश्चकार॥ ॥अथ पंचमी॥ ॥यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः॥ अभिस्वरा निषदा गा अवस्य
व इंद्रे हिन्वाना द्रविणान्याशत॥ ॥धियो हिन्वानाः स्तुतीः प्रेरयंतः उशिजः इंद्रं कामयमानाः मनीषिणो मेधाविनो ऽगिरसः
अप्तुरः अपां प्रेरकादिंद्राद्गातुं गवां मार्गं यज्ञेन तपसा वा विविद्रिरे लेभिरे ततः अवस्यवः रक्षणमिच्छंतः इंद्रे गाः स्तोतारः हि
न्वानाः हिनोतिर्वध्याः स्तोत्रैः प्रेरयंतः अंगिरसः अभिस्वरा अभितः स्वरणं शब्दनं यस्य तेन स्तोत्रेण निषदा उपसदनेन च द्रवि
णानि गोधनानि आशत व्याप्नुवन् अश्नोतेर्लुङि बहुलं छंदसीति विकरणस्य लुक्॥ ॥अथ षष्ठी॥ ॥इंद्र श्रेष्ठानि द्रविणानि धे

भा॰अ॰२ ह्निवांसं इन्द्रस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां॥ ॥ हे इंद्र श्रेष्ठान्युत्तमानि द्रविणानि धनानि अ॰६
अस्मभ्यं धेहि निधेहि दक्षस्य दक्षं भर्त्त्वे पत्र कर्मकरणसामर्थ्यस्य चित्तिं ख्यातिं धेहि अस्मे अस्मभ्यं सुभगत्वं शोभनधनवत्त्वं सौभा
११४ ग्यं वा धेहि रयीणां तया दत्तानां धनानां पोषं समृद्धिं धेहि तनूनां अंगानां। यद्वा तायते पत्रभिः कुलमिति तन्वः तनोतेः करणे ऊप्र
त्ययः। तेषामरिष्टिं अहिंसां धेहि तथास्मदीयाया वाचः स्वाद्मानं स्वादुतां अह्नां सुदिनत्वं शोभनदिनत्वं च धेहि। येषु हीदादयो
वा उत्पन्ने तानि सुदिनानि तेषां भावः सुदिनत्वं॥ ॥ इति द्वितीयस्य पंचमे विंशो वर्गः॥ ॥ त्रिकद्रुकेष्विति चतुर्ऋचं एकादशं सू
क्तं। गार्त्समदमैन्द्रं। अत्रेयमनुक्रमणिका॥ त्रिकद्रुकेषु चतुष्कमष्टाष्टिः शाक्वरमत्या त्रिष्टुबिति। आद्यायामष्टिश्छंदः चतुः
षष्ट्यक्षरं अवशिष्टा षष्ट्यक्षरा अतिशाक्वर्य अंत्या त्रिष्टुब्वा॥ षोडशिशस्त्रे त्रिकद्रुकेष्विति तृचः सूत्रितं त्रिकद्रुकेषु महिषो यवा
शिरं प्रा सोमपुरोरुचमिति तच्चावाति दुदसाविति। अविवाक्ये दशमेऽहनि मरुत्वतीये प्रतिपत्तृचः स्यात् त्रिकद्रुकेष्विति प्रथमा दशमेऽहनी
ति खंडे सूत्रितं॥ आत्वा रथं यथोतय इत्येतस्या स्थाने त्रिकद्रुकेषु महिषो यवाशिरमिति आ। श्वमेधिकमध्यमेऽहनि मरुत्वती
य आघातस्य विशेषान्वस्याम इति खंडे सूत्रितं॥ त्रिकद्रुकेषु महिषो यवाशिरमिति मरुत्वतीयस्य प्रतिपदिति। महाव्रतेपि माध्यंदि
ने सवने ब्राह्मणाच्छंसिनः स्तोत्रियस्तृचः त्रिकद्रुकेषु महिषो यवाशिरमिति स्तोत्रिय इति सूत्रितं॥ ॥तस्मिन्सूक्ते प्रथमा॥ ॥त्रिकद्रु
केषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत्॥ स ईं ममाद महि कर्म कर्त्तवे महामुरुं सैनं सश्चद्देवो
देवं सत्यमिंद्रं सत्य इंदुः॥ ॥ एतन्मंत्रार्थे। महिषः महान् पूज्यः तुविशुष्मः बहुबलः तृपत् तृप प्रीणने तुदादिः। आगमानुशा
सनस्यानित्यत्वान्नुमभावः। तृप्यन्निंद्रः त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेषु आभिप्लविकेष्वहःसु अभिषुतं यवाशिरं यवम
यैः सक्तुभिर्मिश्रितं आङ्पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामित्यादिना शिर इत्यादेशः। तं सोमं विष्णुना सहापिबत् यथावश
त् पूर्वं यथा तं सोमं अकामयत तथापिबत् वश कांतौ बहुलं छंदसीति बहुलं छंदसीति शपो लुग्भावः। पीतः स सोमः महां महांत
मुरुं तं उरुं विस्तीर्णं इमं इंद्रं ममाद अमादयत। किमर्थं। महि महद्वृत्रहननादिलक्षणं कर्म कर्त्तवे कर्त्तुं किं सत्य इंदुः स्रवन् देवो
दीप्यमानः स सोमः सत्यं यथार्थभूतं देवं सोमं कामयमानमेनमिंद्रं सश्चत् सश्चतिर्व्याप्तिकर्मा व्याप्नोतु॥ ॥अथ द्वितीया॥ ॥
अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे। अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं
सत्यमिंद्रं सत्य इंदुः। अध अथ सोमपानानंतरं त्विषिमान् दीप्तिमानिंद्रः ओजसा बलेन क्रिविं नामासुरं युधा युद्धेन अभ्यभवत् अभि
भूतवान्। किंच स इंद्रः रोदसी द्यावापृथिव्यौ आपृणत् स्वतेजसा समंतात्पूरयामास। तथा अस्य पीतस्य सोमस्य मज्मना बलेन
प्रवावृधे प्रकर्षेण वर्धते। यद्वा अस्य क्रिवेरसुरस्य मज्मना सारेण रोदसी अपूरयत। स इंद्रः सोमं द्विधा विभज्यान्यं भागं स्वकीये ११४
जठरे अधत् अधत्त इमं अपरं भागं देवेभ्यः प्रारिच्यत प्रारेचयत एतेनार्धमिंद्राय अर्धमन्येभ्यो देवेभ्य इत्युक्तं भवति। तथा तैत्तिरीय
के सर्वेषामर्धमिंद्रः प्रति तस्मादिंद्रो देवतानां भूयिष्ठभाक्तम इति॥ ॥अथ तृतीया॥ ॥ साकं जातः क्रतुना साकमोजसा व

क्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः। दाता राधः स्तुवते काम्यं वसु॥ ॥ क्रतुना कर्मणा प्रज्ञया वा साकं सह जातः साकमोजः 213
सा बलेन सह वक्षिथ विश्वं वोढुमिच्छसि॥ वहेः सनंतस्य लिटि रूपं चत्वारि भवति किंच त्वं वीर्यैः शत्रुहननादिलक्षणैः पराक्रमैः साकं 1914
सह वृद्धः प्रवृद्धः मृधो हिंसकान् संग्रामान्वा सासहिः। न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधः। तेषामभिभविता विचर्षणिः पुण्यकृतो
पुण्यकृतश्च विविधं पश्यन् [illegible] स्तुवते स्तोत्रं कुर्वाणाय यजमानाय राधः साधकं काम्यं प्रार्थनीयं वसु धनं दाता सन् वक्षिथेति
समन्वयः। सेनमिति पराशान् [illegible]॥ ॥अथ चतुर्थी॥ ॥तव त्यन्नर्यं नृतोऽप इंद्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम्॥
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः॥ भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषं॥ नृतो सर्वेषां नर्तयितः हे इं
द्र नर्यं नराणां हितकरं प्रथमं प्रततं प्रथमं प्रततमिति यास्कः॥ पूर्व्यं पूर्वकाले संभवं त्यत् तत् अपः कर्म दिवि स्वर्गलोके
प्रवाच्यं प्रकर्षेण वक्तव्यं श्लाघनीयमित्यर्थः। किं तत् देवस्य [illegible] असुं प्राणं शवसा बलेन रिणन् हिंसन् त्वं अपः
तेन निरुद्धान्युदकानि प्रारिणाः प्रेरयः इति यत् तत् कर्म तत् प्रवाच्यमिति समन्वयः॥ परोक्षनिर्देशो विशिष्टः स इंद्रः विश्वं व्या
प्तं आदेवं तमोरूपं असुरं ओजसा बलेन अभिभुवत् अभिभवतु किंच शतक्रतुरिंद्रः ऊर्जं बलं विदात् लभतु इषं हविर्लक्षणमन्नं
विदात् विदिर्लाभे लेटि आडागमः॥ ॥ इति द्वितीयस्य पंचमे अष्टाविंशो वर्गः॥ ॥ गार्त्समदं मंडले द्वितीयानुवाकः॥
तृतीयेऽनुवाके दश सूक्तानि। तत्र गणानामित्येकोनविंशत्यृचं गार्त्समदं प्रथमं सूक्तं॥ अत्रेयमनुक्रमणिका॥ गणानामेकोना ब्रह्मणस्
त्यं द्वादश्यस्य बार्हस्पत्यान्त्यद्विलिंगाः पंचदश्यंत्या त्रिष्टुभाविति॥ पंचदशी एकोनविंशी त्रिष्टुभौ शिष्टा जगत्यः। यास्कस्त्वदस्य तिबृहस्प
यते ता बार्हस्पत्याः शिष्टा ब्राह्मणस्पत्याः प्रवर्ग्ये [illegible] मितिखंडे सूत्रितं॥ गणानां त्वा प्रथश्च यस्येति॥ ॥
तस्मिन्सूक्ते प्रथमा॥ ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्व
न्नूतिभिः सीद सादनं॥ ॥ हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबंधि
नं गणपतिं त्वा यां गणपतिं कवीनां क्रांतदर्शिनां कविं उपमश्रवस्तमं उपमीयते अनयेत्युपमा सर्वेषामन्नानामुपमानां श्रवो
न्नं यस्य स तथोक्तः अतिशयेनोपमश्रवा उपमश्रवस्तमः। उपमः माङ् माने आतश्चोपसर्गे कर्मणि आङ्प्रत्ययः आतो लोपः संज्ञा
यां दस्सोरिति [illegible] ज्येष्ठराजं प्रशस्यतमाः तेषां मध्ये राजंतं ब्राह्मणां मंत्राणां स्वामिनं त्वा त्वां हवामहे॥ अस्मिन्कर्मण्याह्वयामः॥
किंच नोऽस्माकं स्तुतीः शृण्वन् त्वं ऊतिभिः पालनैः हेतुभूतैः सादनं सीदत्यस्मिन्निति सदनं यज्ञगृहं मा सीद उपविश॥ ॥अथ
द्वितीया॥ ॥देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः॥ उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्र
ह्मणामसि॥ ॥ असुर्य असुराणां हंतः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानाः तव [illegible] इत्यादेवाश्विदेवा अपि यज्ञियं यज्ञार्हं भा
गमानशुः॥ प्राप्नुवन्। यद्वा प्रचेतस इति बृहस्पतेर्विशेषणं। प्रकृष्टज्ञानवत् [illegible] देवा इति योजनीयं॥ यद्वा प्रचे
तसः विभक्तिपरिणामः प्रचेतसि त्वयि सति देवाः यज्ञियं भागमानशुः कर्मविघ्नकारिणामसुराणां रक्षोघ्नमंत्रैरपाकर

भा०अ०२ णात। नवेद्ब्रह्मण्वद्भिर्यन्तीति श्रवणात् ज्योतिषां तेजसां महः मंहनीयः सूर्य उस्रा इव किरणाः स्फायितंचीत्यादिना रक्प्रत्ययः। य अ०६
था किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मंत्राणां जनिता जनयितासि। जनिता मंत्र इति निपातनात् णिलोपः॥ ॥अथ
३३५ तृतीया॥ ॥आ विबाध्या परिरापस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि। बृहस्पते भीमममित्रदंभनं रक्षोहणं गोत्रभिदं स्व
र्विदं॥ हे बृहस्पते परिरपः परितः रपः पापरूपं रक्षः। यद्वा रपः परिवक्ष्य कार्यं वा चिक्षिप। परिवृतानि इत्यत्न तमांसि च विबाध्य
तेजसा निराकृत्य ज्योतिष्मंतं ज्योतिर्मात्र इतं कृतस्य यज्ञस्य प्रापयितृकं भीमं शत्रूणां भयंकरं अमित्रदंभनं शत्रूणां हिंसकं। तद्दे
वाह रक्षोहणं रक्षसां हंतारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं सर्वस्य लंभकं रथमातिष्ठसि अधितिष्ठसि॥ ॥अथ चतुर्थी॥ ॥
सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत्। ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनं॥ ॥हे बृहस्पते सु
नीतिभिः शोभननयनैर्यागमार्गैः तेजनं यसि अपासित फलं प्रापयसि त्रायसे जनमापद्भ्यो रक्षसि च। यो यजमानः तुभ्यं हवि
र्लक्षणमन्नं दाशात् प्रयच्छेत्॥ दाश्र दाने लेट्यडागमः॥ तमंहः पापं पापरूपदारिद्र्यं वा न अश्नवत् न प्राप्नुयात्॥ अश्नोतेर्लेटि व्यत्ययेन परस्मैप
दं। अडागमः॥ ब्रह्मद्विषः ब्राह्मणानां मंत्राणां वा द्वेष्टुः तपनः तापकोसि॥ किंच मन्युमीः मन्योः क्रोधस्य परेषां वा हिंसकोसि मीङ् हिंसा
यां क्विप्। तत्तव तत् इदं महिमहत् तत् प्रभूतं महित्वनं महत्वमस्ति॥ ॥अथ पंचमी॥ ॥न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वया
विनः॥ विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते॥ ॥हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पा
लयसि तं जनं अंहः अहंतव्यं दुःखं न बाधते दुरितं तत्कारणं पापं च न बाधते अरातयः हिंसकाः तं जनं कुतश्चन सर्वास्वपि दिक्षु न तितिरुः
तिरतिर्हिंसाकर्मा लिट्॥ न हिंसंति। तथा द्वयाविनः मनस्यत् क्रियायां चान्यादृशेन द्वयं येषामस्ति ते द्वयाविनः वंचकाः तेपि तं जनं न
बाधंते। किंच ध्वरसो वा हिंसकाः विश्वाः सर्वाः सेनाः तदर्थं विबाधसे। विशेषेण बाधस एव॥ ॥इति द्वितीयस्य पंचमे एकोनत्रिंशो
वर्गः॥ ॥अथ षष्ठी॥ ॥त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे। बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मम
र्तु दुच्छुना हरस्वती॥ ॥हे बृहस्पते त्वं नोस्माकं गोपाः पालयिता पथिकृत् सन्मार्गस्य कर्ता भवसि॥ विचक्षणः विशेषेण द्रष्टा सर्वज्ञः
सन्। तव व्रताय त्वत्संबंधिने यज्ञाय मतिभिः स्तोत्रैः जरामहे स्तुमः। जरतिः स्तुतिकर्मा। यः पुमान् नोस्मान् अभिलक्ष्य ह्वरः कौटि
ल्ये भावे असुन्। कौटिल्यं दधे विदधाति तं स्वा स्वकीया दुच्छुना दुर्बुद्धिः हरस्वती वेगवती सती मर्मर्तु मारयतु॥ मृङ् प्राणत्यागे अंत
र्भावितण्यर्थस्य यङ्लुकि लोटि रूपं॥ ॥अथ सप्तमी॥ ॥उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः॥ बृहस्पते अप
तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि॥ उत वा अपि च हे बृहस्पते अरातीवा अभिमुखमागमनवान् सानुकः समुच्छ्रितः सा
नुः समुच्छ्रितमिति यास्कः। वृकः वृक आदाने धनादीनामादाता यो मर्त्यो मनुष्यः अनागसो अपराधहीनान् नोस्मान् मर्चयात्। मर्चयति ३३५
र्हिंसाकर्मा हिंस्यात् तं मर्तं पथो वैदिकान्मार्गात् अपवर्तय निवर्तय नोस्माकं अस्यै देववीतये देवानां वीतिः सोमभक्षणमर्चिति देववी
तिः तस्या देवानां वीति र्वीतिः अस्यै देववीतये अस्मै यज्ञाय नोस्माकं सुगं सुष्ठु गंतव्यं मार्गं कृधि कुरु यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः॥
॥ ॥

॥ ॥अथाष्टमी॥ ॥त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुं। बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन्॥ 215/1914
॥ ॥अवस्पर्तः उपद्रवेभ्यः पारयितः यद्वा अवसा रक्षणेन आपद्भ्यः पारयितः हे ब्रह्मणस्पते त्वा त्वां तनूनां शरीराणां पुत्रादीनां वा त्रातारं
पालयितारं अधिवक्तारं अस्माकं पक्षपातेन अधि अधिकं वक्तारं अस्मयुं हविःप्रदानेस्मान् कामयमानं त्वां हवामहे अस्मिन्
मंत्रे आह्वयामः किंच देवनिदः देवान् निंदकान् निबर्हय विनाशय दुरेवाः दुष्टगमनाः दुर्बुद्धयः शत्रवः उत्तरं उत्कृष्टतरं सुम्नं सुखं
मा उन्नशन् मा व्याप्नुवंतु॥ ॥अथ नवमी॥ ॥त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि। या नो दूरे तडितो या
अरातयोऽभि संति जंभया ता अनप्नसः॥ ॥हे ब्रह्मणस्पते सुवृधा सुष्ठु वर्धयित्रा त्वया हेतुना वयं स्पार्हा स्पृहणीयानि वसु ध
नानि मनुष्या सुपां सुलुगिति चतुर्थ्येकवचनस्याकारः। मनुष्येभ्यो दातृभ्यः आददीमहि गृह्णीमहि आङो दोनास्यविहर
ण इत्यात्मनेपदं॥ दूरे दूरदेशे या अरातयः याश्च तडितः अंतिकं ता अरातयः नोस्मानभिसंति। अभिभवंति अनप्नसः कर्महीना
न् अरातीः तान् शत्रून् जंभय नाशय। अभिना शत्रेः पुरादिः। अत्र निरुक्तं॥ त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीया
नि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तडितो याश्चांतिके रातयो दानकर्माणो वा दानप्रज्ञा वा जंभय ता अनप्नसोऽप्न इति
रूपनामेति॥ ॥अथ दशमी॥ ॥त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा॥ मा नो दुःशंसो अभिदिप्सुरीश
त प्र सुशंसा मतिभिस्तारिषीमहि॥ ॥हे बृहस्पते पप्रिणा पूरकेन पृ पालनपूरणयोः आदृगमहनजनः किकिनौ लिट्च इति किन्प्रत्ययः॥ छांदसो यणादे
शः। कामानां पूरकेन सस्निना शुद्धेन युजा सहायेन त्वया हेतुना उत्तमं वयो हविर्लक्षणमन्नं वयं धीमहे धारयामः बृहस्पतौ धारया
मः धीधारणे दैवादिकः॥ दुःशंसः दुःशंसनीयः अभिदिप्सुः अभिभवितुमिच्छुः पुरुषः नोस्माकं मा ईशत मा ईश्वरः ईश्वरो मा
भवतु॥ ईश ऐश्वर्ये लेट्यडागमः॥ वयं मतिभिः स्तोत्रैः सुशंसाः शोभनशंसनोपेताः संतः प्रतारिषीमहि प्रकर्षेण वर्धमहि
॥ ॥इति द्वितीयस्य पंचमे त्रिंशो वर्गः॥ ॥७॥ अथैकादशी॥ ॥अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सास
हिः॥ असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः॥ ॥हे ब्रह्मणस्पते अनानुदः अनुपश्चाद्ददातीत्यनुदः
संयस्य नास्तीत्यनानुदः दातृतरः श्रेष्ठ इत्यर्थः। अत एव वृषभः कामानां वर्षिता आहवं आहूयते त्रेति आहवो युद्धं आङि यु
द्धे इति अप्प्रत्ययः संप्रसारणं च तत् जग्मिः गंता आदृगमहनेति किन्प्रत्ययः लिड्वद्भावाद्द्विर्वचनमित्यत्र षष्ठीप्रतिषेधः॥ श
त्रुं गातयितारं निष्टप्ता नितरां तस्य तापकः तृन्नंतत्वात् षष्ठीप्रतिषेधः॥ निसस्तपतावनासेवन इति षत्वं॥ तादौ च निती तिग
तेः स्वरः॥ पृतनासु संग्रामेषु सासहिः शत्रूणामभिभविता एतादृशस्त्वं सत्यः सत्यपराक्रमः सत्यप्रज्ञो वासि। ऋणयाः ऋण
स्य यापयितासि यु मिश्रणामिश्रणयोः॥ ण्यंतस्य क्विपि णिलोपे लोपो व्योर्वलीति वलोपः॥ किंच उग्रस्य चित् उद्गूर्णस्यापि
दमिता उपशमयिता वीळुहर्षिणः दृढहर्षस्य कामुकस्य नास्तिकस्यापि दमितासि॥ ॥अथ द्वादशी॥ ॥अदेवेन मनसा यो
रिषण्यति शासामुग्रो मन्यमानो जिघांसति। बृहस्पते मा प्रणक् तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः॥ ॥यः पुमान्

भा॰अ॰२ अदेवेन देवान मन्यमानेन। यद्वा आकार इतित्रि॰ श्लिष्टेन मनसा स्मान् रिषण्यति हिनस्ति। दुरस्य ईविण स्यू वृषण्यतिरिषण्यतीतिनिपा अ॰६
तितः॥ यश्चोग्रः पापचितः मन्यमानः आत्मानं बहु मन्यमानः॥ यः पुमान शासां उक्थस्य शंसिता रं यद्वा अस्माकं मा शंसां शासां शासि
११६ तॄणां उग्र इति वा योजनीयं। अस्मान् जिघांसति। हंतुमिच्छति हंते: सनि सन्दू आज्झन गमां सनी इति दीर्घः। हे बृहस्पते तस्य वधः वध्या
तेने नेति वध आयुधं नो स्मान् मा रूणकू कृष्ट॰ पासं पर्कं श्नमविकरणी व्यत्ययेन अमागमः चास्तिलोपश्च इति न निघातः। व्यत्ययेनाद्युदात्तः।
किंच दृप्स्य दुःष्टगमनस्य शर्धता बलवतः। यद्वा दुष्टाभिसंधेः वेगं कुर्वतः तस्य मन्युं क्रोधं हत्वा नेचानिकर्मतत् प्रसासाधिराकुर्मेथ
॥ ॥ अथत्रयोदशी॥ ॥ भरेषु हव्यो नमसा पसद्यो गंता वाजेषु सनिता धनं धनं॥ विश्वा इदर्यो अभिदिप्स्वो मृधो बृहस्पतिर्वि व
वर्हा रथां इव॥ ॥ स बृहस्पतिः भरेषु हव्यो संग्रामेषु हव्यः योद्धृभिः स्वरक्षणार्थमाह्वातव्यः नमसोपसद्यः सर्वैर्नमसोपसदनी
यः किंच वाजेषु गंता संग्रामेषु रक्षार्थं गमनशीलः। तथा धनं सनिता संभक्ता दाता॥ तृनंतत्वात् षष्ठीप्रतिषेधः॥ तथा अर्यः स्वामी
बृहस्पतिः अभिदिप्स्वः अनिभवनेच्छावतीः विश्वा इत् सर्वा एव मृधः हिंसिकाः सेना रथान् इव युद्धे वेगेन परकीयान् रथानिव विव
र्हविशेषेणाच्छिद्रा चकार॥ यद्वा इवशब्दश्चार्थे रथांश्च विववर्हेत्यर्थः लिट्॥ ॥ अथचतुर्दशी॥ ॥ तेजिष्ठया तपनी रक्षसस्तपये
तानिदे दधिरे इह स्वीर्यं॥ आविस्तत्कृष्व यदसत्त उक्थ्यं बृहस्पते विपरिरापो अर्दय॥ हे बृहस्पते तेजिष्ठया अतिशयेन तिग्मया तप
नीतापकारिण्या हेत्या रक्षसः राक्षसांस्तपतापय येत्वाक्षसाः इहस्वीर्यं युद्धेषु दृढ़पराक्रमं त्वा निदे निंदाया विषयं दधिरे कृतवं
तः तान् तापयेति समन्वयः। तेन उक्थ्यं सर्वैः प्रशंसनीयं यद्वीर्यमसत् पूर्वमासीत् तदधुना आविष्कृष्व प्रकटीकुरु तेन वीर्येण
परिरापः परितो निंदकान् स्तुतान् वर्दय विशेषेण बाधस्व॥ बार्हस्पत्ये पशौ॥ एषा हविषो नुवाक्या। प्रदानानामिति खंडे सूत्रितं।
बृहस्पते अतियदर्यो अर्हादिति शतयाउपवाचः सन्वंतइति। एषैवाभिनरश्चपरिधानीया॥ सूत्रितं। बृहस्पते अतियदर्यो अर्हा
दितिपरिधानीयेति॥ ॥ सेषा सकेपंचदशी॥ ॥ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीदयच्छवसर्तप्र
जात तदस्मासु द्रविणं धेहि चित्रं॥ ॥ ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान्कामानतीत्यं ब्रह्म
वर्चसं तेजः अर्हात पूजयेत अर्ह पूजायां लेघडागमः जनेषु ब्राह्मणेषु द्युमत् दीप्तियुक्तं कर्म सो धनं च विभाति विशेषेण दीप्य
ते यच्चशवसा बलेन स्वाश्रयं जनं दीदयत् दीदयति दीप्ति कर्मा दीपयति चित्रं चायनीयं तत् ब्रह्मवर्चसं रूपं द्रविणं अस्मासु धेहि
निधेहि यद्वा अर्यः उदारो पि वित्तवान् यद्धनं अतीवार्हात अर्हतश्च दद्यात यच्च तद्धनं जनेषु तव स्तोत्रं कुर्वाणेषु दीप्तियुक्तं कर्मः
साधनं च विभाति। यच्च धनं शवसा आदिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि॥ तथा च ब्राह्मणं। बृहस्प
ते अतियदर्यो अर्हादित्यतया परिदध्यात् ब्रह्मवर्चसकामो तीवान्यान् ब्रह्मवर्चसमर्हति द्युमद्विभाति द्युमदिव वै ब्रह्मवर्च
सं विभाती तीवा वै ब्रह्मवर्चसं भाति यद्दीदयच्छवसर्तप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति चित्रः ११६
मिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवतीति॥ ॥ इति द्वितीयस्य षष्ठे एकत्रिंशो वर्गः॥ ॥ अथ षोडशी॥ ॥ मा न स्ते
नेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवो न्नेषु जागृधुः॥ आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः॥ ॥ हे

बृहस्पते नो स्मान् स्तेनेभ्यः स्यान् मा रिरीपयेति स्तेनाश्चोरास्तेभ्यः मा दाः तान् दर्शयति। ये चोराः द्रुहः प्राणद्रोहस्य वस्तेनेभ्यः स्या
न मारिरीपयेति स्तेनाश्चोरास्तेभ्यः पदे स्थाने निरामिणः नितरां रमणशीलाः रिपवः हिंसकाः संतः अन्नेषु परकीयेषु अभिजागृधुः
अभिकांक्षति गृधु अभिकांक्षायां लिटि रूपं। ये च देवानां विव्रयः विशेषेण वर्जनं आ ओव्रीजी वर्जने इति धातुः वर्जने वर्तते ओव्याय एवं विद्वान
दत्त्वा दक्षिणां प्रति गृह्णाति न नं दक्षिणा व्रीणाति इति वृक्णस्य वर्जनार्थं दस्य अपि वर्जनार्थत्वं। ततु हृदि स्वकीये हृदय आ ओहते आवहं
ति देवानां यागान् स्तुतांश्च न कुर्वाम इति मन्यन्त इति यावत् तेभ्यो स्मान् मा दा इति समन्वयः। ये पुमांसः सर्वे साम्नः साममयात् त्वत्तः प
रः परस्तात् अन्यदुत्कृष्टं साममयं इदं आग्नं सामैव रक्षोहन्ति न किंचिदपि जानंति। किंतु सर्वे साधकं साम त्वामेव विदु यो स्मान् स्तेनेभ्यो मा दाः॥
॥ ॥ अथ सप्तदशी॥ ॥ विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत् साम्नः साम्नः कविः॥ स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हंता मह
ऋतस्य धर्तरि॥ ॥ हे ब्रह्मणस्पते ब्रह्मणस्पतिं महो महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने त्वष्टा प्रजापतिः विश्वेभ्यो भुवनेभ्यः
स्परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं अजनत् अजीजनत खलु तन्न स्तत्सा घः साम्नः सर्वस्यापि साम्नः कविः कुशब्दे अच इ इति प्रत्य
यः उच्चारयिता कर्तासि। यद्वा कविः क्रांतदर्शी त्वष्टा साम्नः साम्नः सर्वस्यापि साम्नः सारेण त्वां अजीजनत॥ किंच स ब्रह्मणस्पतिः म
हा महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतॄन् कामम् ऋणमिव चिनोतीति ऋणचित् किंच ऋणयाः पापरूपस्य ऋणस्य
यापयिता पृथक् कर्ता च द्रुहः कर्मणो द्रोग्धुः रक्षसस्य हंता भवति॥ ॥ अथाष्टादशी॥ ॥ तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो
यदंगिरः॥ इंद्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवं॥ ॥ अंगिरः आंगिरस हे बृहस्पते गवा माया कारी बलेना
धिष्ठितः पर्वतः। तव श्रिये आश्रयणार्थं व्यजिहीत विवृतद्वारतामगच्छत् ततस्त्वं यत् यदा गोत्रं इति त्रक घचश्चेति समूहार्थत्रप्रत्य
यः गवां समूहं मुदसृजो निरगमयः। तदानीं इंद्रेण युजा सहायेन युक्तस्त्वं तमसा वृत्राख्येन परिवृतं परित आक्रांतं अपामर्ण
वं स्थानभूतं मेघं निरौब्जः नितरामधोमुखमकार्षीः॥ ॥ अथैकोनविंशी॥ ॥ ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधितनयं च जि
न्व॥ विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः॥ ॥ हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणां मधिपते अस्य जगतो यंता नियाम
कस्त्वं सूक्तस्य अस्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं बोधि बुध्यस्व तनयं पुत्र पौत्रादिलक्षणं संतानं जिन्व। जिविप्रीणनार्थः। तो
शिवं प्रीणय। भवादृशाः देवाः यदवंति रक्षंति तत्तादृशं विश्वं सर्वं भद्रं कल्याणं भवति। अतो वयं विदथे स्मिन्यज्ञे सुवीराः शो
भनपुत्रपौत्राः संतः बृहत्प्रभूतमिदं स्तोत्रं वदेम ब्रूयाम॥ ॥७॥ ॥ इति श्रीमद्राजाधिराज परमेश्वर वैदिकमार्गप्रवर्तक श्री
वीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिता भाष्ये द्वितीयाष्टके षष्ठोध्यायः
॥ ०॰ ७॥ ७॥ ७॰ ॥ ७॥ श्रीशंकरार्पणमस्तु॥ ७ ७ ७ ७०७०७ ७७ ८॥ ७॥ ॰७॰ ७॰ ७ ॥ ॥ ॥ ॥
॥ .... ६६६६६६६६६६६६६ श्रीगणेशाय नमः॥ हरिः शिवः नमः
ॐ॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ कृपिद्वेषो वनो वि नियागपुरः सरम

217
1914

अ० अ० २ ॥ सप्तमोध्यायो व्याख्यायते ॥ ॥ गार्त्समदस्य द्वितीयमंडलस्य तृतीयेनुवाके दश सूक्तानि तत्र सेमामिति षोडशर्चं द्वितीयं अ० ७
सूक्तं। अत्रानुक्रम्यते। सेमां षोडश जगत्यास्त्रिष्टुप् द्वादश्यंत्ये। मंडलद्रष्टा गृत्समद ऋषिः द्वादशी षोडश्यौ त्रिष्टुभौ शिष्टा जगत्यः
११ ३ ॥ ब्राह्मणस्पत्यं हि तत्र ह्यादिपरिभाषया द्वादशीवर्जितानि ब्राह्मणस्पत्यानि॥ अस्य सूक्तस्य द्वादश्या ऐंद्री इंद्रदेवत्या
च शब्दात ब्राह्मणस्पत्या च सामान्यविनियोगः पूर्वमेवोक्तः विशेषविनियोगस्तु लिंगादवगंतव्यः॥ ॥तत्र प्रथमा॥ ॥सेमामिति॥ सेमाम
विड्ढि प्रभृतिं य ईशिषे याविधेम नवया महा गिरा॥ यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिं॥ ॥ हे ब्रह्मणस्पते
य स्त्वं ईशिषे सर्वस्य ईश्वरो भवसि स त्वं इमामस्मदीयां प्रभृतीं प्रकर्षेण भृतिं स्तुतिं॥ आविड्ढि प्राप्नुहि अवतेः प्राप्त्यर्थस्य लोटि
तद्रूपं॥ यं वयं अया अनया छांदसो वर्णलोपः। नवया नूतनया प्रत्यग्रया महा महत्या गिरा वररूपया स्तुतिलक्षणया वाचा वि
धेम परिचरेम। विधतिः परिचरणकर्मा इत आश्विनो ... मीढ्वान् ... स्तवते। तावकीतियावत् तव सखा मित्रभूतः सन्नय
थायं नप्रकारेण यजमानः यास्तवते तथा स्तौति। हे बृहस्पते ब्रह्मणो मंत्रस्य स्वामिन् स त्वं नास्माकं मतिं मदभिमतफलं सीषधः साधय
सीद सेत्स्यतिर्वा सिधेर्लुङि तद्रूपं॥ ॥अथ द्वितीया॥ ॥ यो नंतान्यनमन्न्योजसोतादर्दर्मन्युना शंबराणि वि॥ प्राच्यावयदच्युता ब्रह्मणस्पति
राचाविशद्वसुमंतं विपर्वतं॥ ॥यो ब्रह्मणस्पतिः नंतानि नमनीयानि शरीरादीनि स ओजसा बलेन न्यनमत् नितरामनमयत् प्रह्वी
भूतान्यकरोत्। उत अपिच स ब्रह्मणस्पतिर्मन्युना मनुनाक्रोधेन वा मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वेति यास्कः। शंबराणि मेघ
नामैतत् मेघान् व्यदर्दः वर्षणार्थं विदारितवान् दृ विदारणे इत्यस्माद्यङ्लुगंताल्लङि तद्रूपं। योब्रह्मणस्पतिः नंतानि नमनीयानि
राक्षसादीनि तदनंतरं अच्युता अच्युतानि नाशयितुमशक्यानि मेघे वस्थितान्युदकानि प्राच्यावयत् प्रकर्षेण गमयत् मेघान्निर्गमय
दित्यर्थः। तथा वसुमंतं गोरूपधनवंतं पर्वतं बलनाम्नासुरेण बिलद्वारपिधानार्थं विहितं शैलं अयं आचाविशत् आभिमुख्येन च तत्र च
प्रविवेशेत्यर्थः॥ समुच्चयार्थ एवेनु चवाव्यो गप्रथमेति पूर्वस्यामन्यावयदित्यस्याख्यातस्य॥ अस्य च सर्वानुदात्तत्वं चेदर्थे तु निपाः
तेर्ययदिह्येहंततिनिघातप्रतिषेधः। सिध्यति यावि शतेर्विशेषेणप्रविशतितदानीं तद्रूपं धर्मत्राप्रादित्यर्थः॥ ॥अथ तृतीया॥
॥ ॥ तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदंत वीळिता। उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः॥ ॥ देवता
नामिंद्रादीनां मध्ये देवतमाय अतिशयेन दानादिगुणयुक्ताय चतुर्थ्यर्थे चतुर्थी॥ इदं तस्य ब्रह्मणस्पतेस्तत्कर्त्वं कर्तव्यं कर्म किं पु
नस्तदित्युच्यते। दृळ्हा दृढानि पर्वतादीनि अश्रथ्नन् श्रथविमोचनप्रतिहर्षणयोः अस्य बलेन श्रथितानि विश्लिष्टानि भूय
वन्। तथा वीळितानि संस्तंभितानि दृढीकृतानि वृक्षादीनि वीळयति श्च व्रीळयतिश्च संस्तंभकर्माणाविति यास्कः अव्रदंत मृ
दूभ्यभवन्। व्रदतिर्मृदूभावकर्मा॥ अपिच स ब्रह्मणस्पतिः बलेनापिहितानि गा उदाजत्। अजगतिक्षेपणयोः देवान्प्रत्यु ११ १
दगमयत् तथा ब्रह्मणा आत्मीयेन मंत्रेण बलं सर्वस्याव्रकमसुरं अभिनत् मंत्रसामर्थ्येनाभैत्सीत्। तदनंतरं बलेनात्मा
दितं तमः ध्वांतं अगूहत्। गुहू संवरणे। गूढमदृश्यमकरोत्। तदनंतरं स्वरादित्यं च व्यचक्षयत् तमसा निराकरणेन तत्र मद

र्शयत् चष्टिः पश्यतिकर्मा॥ ॥अथ चतुर्थी॥ ॥ अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत्। तमेव विश्वे प 219/1914
पिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणं॥ ॥ब्रह्मणस्पतिः ब्रह्मणो मंत्रस्य पतिः पालयिता देवः अश्मास्यं अश्मवदृढतरास्यं
यस्य तथाक्तं॥ अवतं अवतं नमास्यं दनवंतमिति व्यापनेर्यतं आसेचनवंतमिति। तस्यार्थः मधुधारं मधु मादयित्री उदकधारा यस्य
तादृशं अवतं अवलानं तं विस्तृतं यं मेघं तेजसा बलेन अभ्यतृणत् उतृदिर् हिंसानादरयोः आहिंसीत वर्षणार्थमवधीदित्यर्थः।
तमेवमेघं विश्वे सर्वे स्वर्दृशः स्वरादित्यः तस्य संबंधिनो द्रष्टारो रश्मयः पपिरे घर्मकाले पिबंति मेघेनदपस्यादकस्य पानात्तमे
व पिबंतीत्युच्यते। ते च रश्मयो वर्षासु उत्सं आसेचनवंतं उद्रिणं उदकवंतं मेघं साकं सह युगपदेव बहु सिसिचुः घर्मकाले यत्पीतं त
त्सर्वं बहुतरं सहस्रगुणितं सिंचंतीत्यर्थः॥ ॥अथ पंचमी॥ ॥ सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरंत वः अयतं
ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः॥ ॥ हे कुलिश्यजमाना युष्मदर्थं सना सनातनानि का चित् कानिचित् ब्रह्मणस्पतः
सतानानि भुवनानां या गृ ... भुवना भुवनानामुदकानां भुवनानां भवीत्वा भाव्यानां दृ शद्भिः शरद्भिर्माद्भिः मासैः वर्षैः नित्याद्दिनामास
उत्सस्य मासस्व भावः ब्रह्मणस्पतेर्नु यत्नतुगतिं। शरद्भिः संवत्सरैश्च वरंत विवृण्वंति तत्काल वर्षणार्थं मघद्वाराण्युद्घाटयंतीत्यर्थः॥ का
नि पुनस्तानि ब्रह्मणस्पतिर्यावापि युना ज्ञानानामेतज्ज्ञानानि मंत्रविषयाणि चकार कृतवान्। तदनंतरं अयतंता अयतमानौ प्रय
त्नौ उभौ लोकौ द्यौश्च पृथिवी च अन्यदन्यदिति अन्यदन्यदिव पृथिवीं च उदकं द्यौरुदकार्यं च विलक्षणं पार्थिवमन्नं च वप
रस्परस्याहारेण चरतो भुंजाते चरगति भक्षणयोः॥ ॥इति द्वितीयस्य सप्तमे प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥अभिनक्षंतो अभि ये तमानशु
र्निधिं पणीनां परमं गुहा हितं। ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशं॥ ॥ गा स मद्र्युः पणिभिरसुरैरपहृतः
सति पणीनां स्थानं समाख्याय ... ब्रह्मणस्पतिना सह अंगिरसस्तत्स्थानं प्राप्य गास मद्रेभ्यः पणिभिर्निर्मिता मायाश्च
दृष्ट्वा असुरनिवासस्थानं स्वदं गाद्वनापि नाद्य प्रत्यागच्छन् तदेतद्वक्ष्यते॥ अभिनक्षंतः अभिगच्छंतो ये अंगिरसः तांनि
धिं गा समद्रेदग्मन्थानं धनं परमं उत्कृष्टं पणीनां तन्नामकानामसुराणां पणिभिः गुहाहितं स्थापितं अभ्यानशुः अभिलक्ष्यान
शिरे प्राप्नुवंतः विद्वांसः पितरोंगिरसः अनृता अनृतानि असुरैः कृता मायाः प्रतिचक्ष्य दृष्ट्वा आविशं आवेष्टुं प्रवेष्टुं यत उ य
त एव स्थानादायन्। आगच्छन् तत्स्थानं पुनरुदीयुः उद्गच्छन्। उत्कर्षेण प्राप्ताः॥ ॥अथ सप्तमी॥ ॥ ऋतावानः प्रतिचक्ष्यानृता पुन
रात आ तस्थुः कवयो महस्पथः। ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तं॥ ॥ ऋतावानः ऋतमिति सत्यनाम
धेयं तद्वंतः कवयः क्रांतदर्शिनः सर्वे ता अंगिरसः अनृता अनृतानि प्रतिचक्ष्य पूर्वोक्तप्रकारेण दृष्ट्वा अतः अस्मात्स्थानात
पुनरागत्य महस्पथः महतो मार्गान् आतस्थुः अवतस्थिरे अयतिष्ठमानाश्च ते बाहुभ्यां हस्ताभ्यां धमितं मथनोत्या
दितं प्रज्वालितं अग्निं अश्मनि पर्वते निपणिनां निवासभूते शिलोच्चये जहुर्हि उत्सृष्टवंतः खलु अरणः अरमयिता दाहनेन दुःखका
री तान्ग्निः पूर्वं न नकिः ... ज्वलितवान् अग्निस्तु सामर्थ्यात् ... प्रतिवहति पुनरित्यर्थः॥ ॥अथाष्टमी॥ ॥ऋ

भा॰ अ॰ २ ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ॥ तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥ ऋतं सत्य अ॰ १
११८ मवञ्च्याय यस्य तेन क्षिप्रेण दुष्टानां क्षेपकेन धन्वना धनुषा यत्र ब्रह्मणस्पतिः ब्रह्मणो मंत्रस्य पालयिता देवः यत्र यस्मिन्विषये वष्टिका
मयते तत्प्राप्नोति प्रकर्षेण व्याप्नोति । अश्नोतिर्व्याप्तिकर्मा यत्परं संमपर्द्दंत तस्य धनुषः साध्वीः साधिकास्ता इषवो भवंति याभिरिषुभिः ब्र
ह्मणस्पतिरस्यति शत्रून्क्षिपति । कीदृश्यस्ताः नृचक्षसः नृपश्यंतः उपलक्षणमेतत् सर्वस्य ब्रह्मणस्पतेः दृशये दर्शनाय
ज्ञानाय ज्ञाताः कर्णयोनयः श्रोत्रेंद्रियेण ग्राह्य मंत्र प्रभृता आकर्णकृष्टा वा बाणाः ब्रह्मणस्पतिर्मंत्रैरेव सर्वं साधयतीति भावः ॥
अथ नवमी ॥ ॥ स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ॥ चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्य
तुर्वृथा ॥ ॥ पुरोहितो देवैः पुरतो नस्थापितः स ब्रह्मणस्पतिः संनयः सम्यक् संगमयिता भवति । विनयः संगतानां
विविधं नेता पृथक्कर्ता स एव ॥ तथा सुष्टुतः शोभनं स्तोतृभिः स्तुतश्च भवति । तथा युधि संग्रामे सत्ताभूतानां मनुष्याणां प्रादुर्भवतीति
शेषः ॥ यद्यदा चाक्ष्मः चक्षः क्षमतेर्वा सर्वस्य द्रष्टा सर्वस्य ज्ञाता ब्रह्मणस्पतिः । वाजं मंत्रं मतिमननीयं प्रशस्तं धनाधनं च स्तोतृणा
मर्थाय भरते बिभर्ति विषयद्वारा पोषयति । आदित् अनंतरमेव तप्यतुस्तापकः सूर्यः वृथा अनायासवचनमेतत् अनायासेन तपति
दीप्यते ब्रह्मणस्पतिना दत्तेरं नैर्थेनैश्वर्यतस्य सिद्धत्वात्स्वयं केवलं हवींषि भुंजान एव वर्तत इत्यर्थः ॥ ॥ अथ दशमी ॥ ॥ विभुप्र
भुप्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ॥ इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुंजते विशः ॥ ॥ विभु विभूनि व्याप्ता
नि प्रभु प्रभूणि प्रौढानि प्रथमं प्रथमानि मुख्यानि एवंभूतानि मेहनावतः वर्षणवतो वृष्टिप्रदस्य बृहस्पतेः बृहतां मंत्रस्य पालयि
तुः संबंधीनि सुविदत्राणि विद्रुलाभः काविहर कन् सुष्टुलब्ध व्यानि काविदत्रं धनं भवतीति यास्कः ॥ राध्या राध्यानि सम्यक् साधनी
यानि प्राप्तव्यानीति यावत् इमा सातानि इमानि धनानि वेन्यस्य कमनीयस्य वाजिनोऽन्नवतो ब्रह्मणस्पतेः तृतीयार्थे षष्ठी ॥ ब्रह्मण
स्पतिना दत्तानि येन धनेन उभये उभयविधा जनाः स्तोतारो यजमाना अथवा मनुष्याश्च वा विशो निविष्टाः संतो भोगान् लभंते
भुंजते तत्सर्वं ब्रह्मणस्पतिना दत्तमित्यर्थः ॥ ॥ इति द्वितीयस्य सप्तमे द्वितीयो वर्गः ॥ ॥ अथैकादशी ॥ ॥ योऽवरे वृजने विश्वथा
विभुर्महामु रण्वः शवसा ववक्षिथ ॥ स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥ ॥ विश्वथा सर्वप्रकारेण विभुः
रव्याः रमयिता स्तोतव्यो वा यो ब्रह्मणस्पतिः अवरे निकृष्टे वृजने वर्जनहेतुभूते बले वर्तमानं दुर्बलमिति यावत् महा मुमहांतं वक्षांर
मा वृणं लोपः ॥ उभयाविधं स्तोतारं शवसा आत्मीयेन बलेन ववक्षिथ वोढुमिच्छति सर्वदा वहतीति यावत् ॥ वहतेः सनंतस्य
लिङि तद्रूपं पुरुषव्यत्ययः स देवो दानादिगुणयुक्तः देवान्प्रति सर्वेषां देवानां प्रतिनिधिः सन्पृथु पप्रथे अत्यंतं प्रथते यशसा वि
स्तीर्णो भवतीति यावत् ॥ यस्मादेवं तस्मात् विश्वेदु सर्वाण्येव ता तानि सर्वाणि भूतजातानि परिभूः परिभवन् अभिभवन्वर्त ११८
त इति शेषः ॥ ॥ अथ द्वादशी ॥ ॥ विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनंति व्रतं वां ॥ अच्छेंद्राब्रह्मणस्पती हविर्नोऽन्नं युजेव
वाजिना जिगातं ॥ ॥ हे मघवाना मघमिति धननाम तद्वंतौ हे इंद्राब्रह्मणस्पती युवोरित युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थं

स्तुत्याय गुणज्ञातं प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव न तु युवयोरपि तमित्यर्थः ॥ यथा वा नेत्येतत्पद इयसमुदायः एकपदं तद्व्यापकः
मांत्र वाचिकं यद्वा शब्दस्य पूर्वपदं न आपश्च आपो व्याप्त्यलक्षणमेतत् न तु उपलक्षितानि सर्वाण्यपि भूतानि वा युवयोर्व्रतं कर्म न प्रमिनंति 221 / 1914
न हिंसंति मीङ् हिंसायां क्र्यादिकः मीनातेर्निगम इति ह्रस्वत्वं । हे इंद्राब्रह्मणस्पती नोऽस्माकं हविरच्छाभिमुख्येन जिगातं गच्छतं आग च्छ
तमिति यावत् जिगातिर्गतिकर्मा जौहोत्यादिकः ॥ तत्र दृष्टांतः ॥ युजेव वाजिना युजा रथे नियुक्तौ वाजिनौ वजनवंतावश्वौ अन्नं घासं प्रति
यथा स्वयमेव शीघ्रं गच्छतस्तद्वच्छीघ्रमागच्छतमित्यर्थः ॥ युजेत्यत्र सुपां सुलुगिति प्रथमाद्विवचनस्याकारः तृतीयायां हिंसा वक्षाच
इति विभक्तेरदादेशः ॥ ॥ अथ त्रयोदशी ॥ ॥ उताशिष्ठा अनु शृण्वंति वह्नयः सभेयो विप्रो भरते मती धना ॥ वीळुद्वेषा अनु वश ऋण
मादादिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥ ॥ उत अपि च आशिष्ठाः आशुतराः शीघ्रगामिनो वह्नयः अश्वनामैतत् । वोढारो ब्रह्मण
स्पते रथा अनुशृण्वंति । अस्माभिः कृतं स्तोत्रं अनुक्रमेण शृण्वंति यद्वा ब्रह्मणस्पतिना कृतमनुशासनं शृण्वंति । अतस्तत मस्मदीयं यज्ञ
ं प्रापयंतीति शेषः ॥ सभेयः सभायां साधुः ढक्छंदसीति ढः विप्रो मेधावी अध्वर्युर्होता वा मती मत्या मननीयेन स्तोत्रेण सुपां सुलु
गिति पूर्वसवर्णदीर्घः धना हविर्लक्षणानि धनानि तस्मै ब्रह्मणस्पतये भरते बिभर्ति संपादयतीति यावत् यद्वा स्तोत्रेण धनानि भ
रते बिभर्ति वा पूरयति अतो वीळुद्वेषाः वीळुन दृढान प्रबलान राक्षसादीन द्वेष्टीति तादृशो ब्रह्मणस्पतिः वशावशो यागमकं सुपां सुलुगि
ति यद्यालुक् । कृत्यकृ इति प्रकृतिभावः ॥ ऋणं अस्माभिर्यज्ञेभिः प्रदेयं अवदानादिकं अनुक्रमेण आददिरादाता भवतीति शेषः ॥ अव
दानस्य ऋणत्वं च तैत्तिरीयैरेभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्य इत्यादिना स्पष्टमाम्नातं ॥ यद्वा अनुरानुगुण्ये वशा वशस्य काम
स्याभिलाषस्यानुगुणं आदाता भवतीति योज्यं ह वाजी प्रसिद्धो सर्व तु ब्रह्मणस्पतिः समिथे यंति संगच्छंतेस्मिन्नाहुतिभिर्देवा इति
समिथो यज्ञः तस्मिन्वाजी अन्नवानतस्मादु विष आदाता भवतीत्यर्थः ॥ ॥ अथ चतुर्दशी ॥ ॥ ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्यु
र्महि कर्मा करिष्यतः ॥ यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥ ॥ महि महत् कर्म करिष्यतो ब्रह्मणस्पतेर्म
न्युः मननसाधनो मंत्रः क्रोधो वा यथावशं यथाकामं सत्यः अवितथो भवत् ॥ सत्यं यथा कामयते तथा करोतीत्यर्थः ॥ यो ब्रह्मण
स्पतिः पणिभिरपहृता गाः उदाजत् उदगमयत् गुहाया निरगमयदित्यर्थः ॥ स ब्रह्मणस्पतिः दिवे द्युलोकाय तत्रत्येभ्यो देवे
भ्य इत्यर्थः ॥ व्यभजत् विभक्ता अकरोत् ॥ स च गोसमूहः महीव रीतिः महती स्रुतिरिव शीघ्रः स्रवणं यथा गंगादीनां स्रोतः विभक्तं
सत् निम्नदेशाभिमुखं प्रसरति तथा आत्मीयेन बलेन तत्र देव गृहं पृथक् विभिन्नं असरत् अगच्छत् ॥ ॥ अथ पंचदशी ॥ ॥ ब्रह्म
णस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो वयस्वतः ॥ वीरेषु वीराँ उप पृंग्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवं ॥ ॥ हे ब्रह्मणस्पते
मंत्राधिपते सुयमस्य सुनियंतव्यस्य वयस्वतोऽन्नयुक्तस्य रायो धनस्य विश्वहा विश्वेषु सर्वेष्वहःसु रथ्यो अधिपतयः स्याम भू
यास्म रथ्या एव संतीति रथ्यः ॥ छंदसि निपातितिमत्वर्थं यईकारः ॥ अपि च नोऽस्माकं वीरेषु वीर्योपेतेषु पुत्रेषु वीरान् पु
त्रान् त्वं उपपृंग्धि संपर्कान् कुरु अस्मत्पुत्राः संपर्कं धारिका ॥ वयं पौत्रान् पितृत्वं भजामहीति यावत् । ईशानः सर्वस्येश्वरस्त्वं ब्रह्मणा

भा० अ० २ भंगनामेतत् हविर्लक्षणेनान्नेन सह मदेदं मदीयस्त्वामिति लक्षणमादानं वेविकामयसे वीगतिप्रजनकान्त्यशनखादनेषु अतोमयोकंकु अ० २
र्वित्यर्थः॥ ॥अथषोडशी॥ ॥ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व॥ विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः
११० ॥ ॥ हे ब्रह्मणस्पते यंता सर्वस्य जगतो नियंता त्वं अस्य सूक्तस्य ईदृक्क्रियाया ग्रहणार्थं बुध्यस्वेति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥
बोधि बुध्यस्व बुध्वा तनयं पुत्रं चास्मभ्यं जिन्व प्रेरय। जिविः प्रेरणार्थः अत्र प्रेरणे वर्तते॥ धातूनामनेकार्थत्वात्॥ यद्भद्रं कल्याणं दे
वाः सर्वे अवंति रक्षंति विश्वं सर्वं यद्भद्रं च जिन्वेति शेषः वयं च सुवीराः॥ शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः संतः बृहत्प्रौढं स्तोत्रं वि
दथे विदंति यष्टव्यत्वेनास्मिन्देवानिति विदथो यज्ञः॥ तस्मिन्वदेम भृशमुच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे त्रयोदशो वर्गः॥ ॥इंधान
इति पंचर्चं तृतीयं सूक्तं गार्त्समदं जागतं ब्रह्मणस्पत्यं। तथा चानुक्रांतं॥ इंधानः पंच जागतं त्विति। लैंगिको विनियोगः॥ ॥तत्र प्रथमा
मृचमाह॥ ॥इंधानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत्॥ जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः
॥ ॥अग्निमिंधानः ब्रह्मणस्पतेर्यागार्थं अग्निं प्रज्वलयन्यजमानः वनुष्यतः हिंसिष्यतः हिंसां कुर्वतो वा शत्रून्वनवत् वनुयात् हिंस्या
त् वनुष्यतिर्हंतिकर्मेति यास्कः॥ उतिदिवार्थे कृतब्रह्म ब्रह्मणः स्तोत्रं कृतं येन स तथोक्तः शूशुवत् हव्यः रातं दत्तं हव्यं हविर्येन एवं भूतः सन्नरू
ऊवन्वर्धतां दुओश्वि गतिवृद्ध्योः॥ अस्माल्लण्यतो लुङ्रूपं॥ तथा यजमानः जातेन पुत्रेण जातं जनितं उत्पादितं स्वस्य पौत्रं अतिप्रसर्स्र्
ते अतीत्य शत्रुं प्रसरति पौत्रमपि प्रपौत्रं चिरकालं जीवतीत्यर्थः॥ सतेर्यङ्लुक् ताच्छन्दसं तस्य नात्मनेपदं। यंयं यजमानं ब्रह्मणस्पतिर्ला
त्र हविषां स्वीकरणेन युजं सखायं कृणुतेकुरुते स समानएव भवतीत्यर्थः॥ ॥अथ द्वितीया॥ ॥वीरेभिर्वीरान्वनवद्वनुष्यतो गो
भी रयिं पप्रथद्बोधति त्मना॥ तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः॥ ॥स यजमानः वीरेभिर्वीरैरात्मीयैः
पुत्रैः वनुष्यतो हिंसतः वीरान् शत्रुपुत्रान्वनवत् वनुयात् हिंस्यात्। अपि च गोभिः सहितं धनं पप्रथत् प्रथयति विस्तारयति प्रथ
यतेर्लुङि चङ्यत्रूपं॥ तथा त्मना आत्मना स्वेनैव बोधति सर्वं जानाति अनन्याधीनज्ञानो भवतीत्यर्थः। किंच तस्य यजमानस्य तोकं पु
त्रः तरयं विभक्तिव्यत्ययः तनयं तस्य पुत्रश्च वर्धते प्रवृद्धो भवति। यद्वा तोकं तनयं पुत्रं पौत्रं च ब्रह्मणस्पतिर्वर्धयति वृद्धिं त
भावितण्यर्थो द्रष्टव्यः अन्यद्गतं॥ ॥अथ तृतीया॥ ॥सिंधुर्न क्षोदः शिमीवां ऋघायतो वृषेव वध्रींरभि वष्ट्योजसा॥ अग्नेरिव
प्रसितिर्नाह वर्तवे यंयं सिंधुः स्यंदनशीलानदी क्षोदेन क्षुद्यमानं कूलं यथाभिनत्ति तथा शिमीवान् शमीवान् शमीति कर्मनाम ब्र
ह्मणस्पतेः परिचरणात्मना कर्मणा युक्तो यजमानः ऋघायतो हिंसतः शत्रून् ओजसा बलेन अभिवष्टि हंतुमभितः कामयते वश
कांतौ वृषभ पर इत्रिर्दर्शनं॥ वृषेव च यथा वृषभो निष्पिष्टमुष्कान्वीर्यविहीनान् वध्रीः तान्यथा स्पर्धमानः सत् अभिभवति तद्वत्
तित इतः शत्रूनभिभवतीत्यर्थः॥ अपि चासौ अग्नेरिव प्रसितिः प्रसीयते बध्यते अनया इति प्रसितिर्ज्वाला। षिञ् बंधने। करणे क्तिन्
। उ यथा अग्नेर्ज्वाला अप्रतिहतप्रसरा एवमपि न वर्तवे वारयितुं निवर्तयितुं वा न येत शक्यते॥ अहशब्दोवधारणे॥ वृणोतेरंत ११०
र्भावितण्यर्थात् वर्तते वा तुमर्थे तवेन्प्रत्ययः अन्यद्गतं॥ ॥अथ चतुर्थी॥ ॥तस्मा अर्षंति दिव्या असश्चतः स सत्वभिः प्रथ

223
1914

मो गोषु गच्छति॥ अनिभृष्टतविषिर्हंत्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः॥ तस्मै यजमानाय दिव्या दिवि भवा वृष्टिलक्षणाः आपः असश्चतः असज्यमानाः अनिरुद्धाः स
त्यः अर्षंति गच्छंति प्राप्नुवंति अर्तेर्लेटि रूपं। तथा स यजमानः सत्वभिः सत्वानः साधकाः परिचारकाः तैः सहितः प्रथमो अन्येभ्यो यजमानेभ्यः
पूर्वं भावि सन् गोषु गच्छति गवादिधनं प्राप्नोतीत्यर्थः॥ किंच अनिभृष्टतविषिः तविषीति बलनाम। अनिभृष्टापरैरबाधितान तविषीर्बलं यस्य तादृशः
सन् ओजसा बलेन हंति शत्रून्॥ ॥अथ पंचमी॥ ॥तस्मा इद्विश्वे धुनयंत सिंधवोच्छिद्रा शर्म दधिरे पुरूणि॥ देवानां सुम्ने सुभगः स एधते यं०॥ ॥
तस्मा इत् तस्मा एव यजमानाय विश्वे सर्वे सिंधवः सर्वाः स्यंदनशीला नद्यः धुनयंत चालयंति एनं स्वभावं फलसिध्यर्थं प्रवहंतीत्यर्थः। तथा अच्छिद्राः अ
च्छिद्राणि छिद्ररहितानि संततानि पुरूणि बहूनि शर्म शर्माणि सुखानि दधिरे तस्मा एव धार्यंते। यद्वा शर्मेति गृहनाम छिद्ररहितानि बहूनि सदनानि
निधार्यंते सुभगः शोभनधनः देवानां सुम्ने देवैः प्रत्तसुखे वर्तमानः सन् एधते वर्धते ज्ञियं प्राप्नोति॥ इति द्वितीयस्य सप्तमे चतुर्दशो वर्गः॥ ॥ऋजुरि
ति चतुरृचं चतुर्थं सूक्तं गृत्समदस्यार्षं जागतं ब्राह्मणस्पत्यं। तथा चानुक्रांतं। ऋजुश्चतुष्कमिति गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥ऋजुरिच्छंसो
वनवद्वनुष्यतो देवयन्निददेवयंतमभ्यसत्॥ सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनं॥ ऋजुरिति आर्जवयुक्तः। यद्वा ऋजुगतिः प्र
साधनकर्मा॥ स्तोत्राणां प्रसाधकः वर्धकः स अब्रह्मणस्पतेः स्तोता वनुष्यतो हिंसतः शत्रून्वनवत् वनुयात् हिंस्यात् वनोतेर्हंतिकर्मणस्तद्रूपं। तथा देव
यन्नित् देवं कामयमानः ब्रह्मणस्पतिमात्मन इच्छन्नेव अदेवयंतं तादृशं इतरं पुरुषं अभ्यसत् अभिभवत् असेर्लेट्यत् रूपं॥ तथा सुप्रावीरि
त् अवतेरस्य प्रथमार्थो दाणादिकई कारप्रत्ययः सुष्टु प्रकर्षेण ब्रह्मणस्पतेः तर्पयिता वनवत् तेन पृत्सु संग्रामेषु दुष्टरं तरितुमशक्यं वनवत् हिंस्यात् त
था यज्वा इत् यज्वा ब्रह्मणस्पतिं हविषा यष्टा नैव अयज्योः अयजनः भोजनं भोगसाधनं विभजाति विशेषेण भजत इत्यर्थः॥ ॥अथ द्वितीया॥ ॥
यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये॥ हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे॥ ॥ऋषिरात्मीयं पुरुषं
प्रत्याह हे वीर विशेषेण स्तोतॄणां प्रेरक सर्वं यजस्व ब्रह्मणस्पतिं स त्वा प्रविहि मनायतः मनउवर्त्तीं प्रवर्तमानान् हिंसकान्यद्वा अभिमन्य
मानान् शत्रून्प्रति प्रविहि प्रकर्षेण युद्धार्थं गच्छ॥ वीगत्यादिषु॥ दस्यो हत्वा वृत्रतूर्ये वृत्राणामावरकाणां शत्रूणां हिंसाहेतुभूते संग्रामे भद्रं क
ल्याणं धार्ष्ट्यं च मनः कृणुष्व कुरुष्व॥ ब्रह्मणस्पतेरनुग्रहात् त्वं शोभनधनो भविष्यतीति यावत् अपि च त्वं ब्रह्मणस्पतेर्भ्रंशनुग्रहात्वं च
शोभाविष्यसि। तथा ब्रह्मणस्पतये हविः चरुपुरोडाशादिकं कृणुष्व कुरु॥ तथा त्वं सुभगः शोभनधनः असि भवः अस्मिन्नप्युपागमः अ
ब्रह्मणस्पतेर्हविर्योगेन त्वं शोभनधनो भविष्यतीति यावत् अपि च वयं ब्रह्मणस्पतेरवोरक्षणं अभिमुख्येन वृणीमहे प्रार्थयामहे॥ ॥अ
थ तृतीया॥ ॥स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः॥ देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिं
॥ ॥यो यजमानः श्रद्धमानः श्रद्धामनसि यस्य तादृशः सन् देवानां पितरं पालयितारं ब्रह्मणस्पतिं हविषा च पुरोडाशादिना आ
विवासति परिचरति॥ विवासतिः परिचरणकर्मा॥ स इत् स एव यजमानः जनेन जातेन सवर्णेन लौकिकेन वा जनं भरते बिभर्ति संभर
ति स एव विशा प्रजया आत्मीयेन बंधुजनेन वा जं भरते स एव पुत्रैरात्मीयैरपत्यैर्वाजं भरते॥ तथा नृभिः नेतृभिः स्वैः परि
चारकैः धना धनानि भरते बिभर्ति संपादयति वा। ब्रह्मणस्पतिर्मित्रवतो यजमानस्य सर्वतो जनादिभिः धनयोः साधको

अ०अ०२ भवंतीति यावत्॥ ॥अथ चतुर्थी॥ ॥यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः॥ उरुष्यतीमंहसो रक्षती रिषोंऽहोश्चिदस्मा उरुचक्रिरद्भुतः॥ ॥यो यजमानः अस्मै ब्रह्मणस्पतये यष्टव्याय हव्यं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। इमं ब्रह्मणस्प अ०१
१२० तिं घृतवद्भिः उपस्तरणाभिघारणात्मकेनाज्येनोपेतैर्हविर्भिः अविधत् परिचरति विधतिर्विधविधाने तौदादिकः अयं परिचरण कर्मसु पठितः तं यजमानं ब्रह्मणस्पतिः प्राचा प्रचीनेन अकुटिलेन मार्गेण प्रणयति प्रकृष्टं फलं प्रापयति। अपि च ईं एनं अंहसः पापात् उरुष्यति रक्षति उरुष्यती रक्षाकर्मेति यास्कः॥ तथा रिषः हिंसकाच्छत्रोः रक्षति अंहोश्चित् अवश्यमेव दारिद्र्यात् यद्वा। आगत्य हंतुरपि रक्षति। अपि चास्मै यजमानाय अद्भुतः महान् आमेनत्। आश्चर्यभूतो महान् ब्रह्मणस्पतिः। उरुचक्रिः उरोर्विस्तीर्णस्यापकारस्य
२४ कर्ता भवति॥ ॥इति द्वितीयस्य सप्तमे पंचमो वर्गः॥ ॥इमा गिर इति सप्तर्चं पंचमं सूक्तं। गृत्समद पुत्रस्य कूर्मस्यार्षं गृत्समद
व स्यैव वा त्रैष्टुभमादित्यदेवताकं॥ तथा चानुक्रांतं॥ इमा गिरः सप्त कूर्मो गार्त्समदो वादित्यमिति। सत्रविनियोगो लैंगिकः। आदित्यदेवताके पशौ पुरोडाशस्य इमा गिर इत्येषानुवाक्या। अग्नीषोमाविति खंडे सूत्रितं। इमा गिर आदित्येभ्यो घृतस्नूरुत आदित्यास उरवो गंभीरा इति। सैषा सूक्ते प्रथमा॥ ॥इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥ ॥आदित्येभ्यः अदितेः पुत्रेभ्यः राजभ्यः राजमानेभ्यः ईश्वरेभ्यो मित्रादिभ्यः घृतस्नूः घृतप्रस्राविणीः घृतक्षरंतीः इमा गिरः स्तुतिलक्षणा वाचः सनात् सर्वदा जुह्वा वाङ्नामैतत् वागिंद्रियेण जुहोमि करोमीति यावत्॥ यद्वा जुह्वा स्रुचा यथा घृतं क्षरति तथा स्तुतीः करोमीत्यर्थः। यद्वा हविषा सह घृतमपि जुहोमि आदित्यानुद्दिश्य त्यजामि मंत्राणां पयोघृतादिरक्षणहेतुत्वं च यद्वचोऽधीते पयसः कुल्या अस्य भवंत्यादिना तैत्तिरीये समाम्नातं॥ ता अस्मदीयास्ता गिरः मित्रादयः प्रत्येकं शृणोतु॥ ते च तैत्तिरीये अष्टौ पुत्रा सो अदितेरित्यत्र पक्षस्य समनुक्रांताः मित्रश्च वरुणश्च धाता चार्यमा च अंशश्च भगश्च इंद्रश्च विवस्वांश्चेत्येत इति। मित्रः प्रमीतेस्त्रायकः। यद्वा सर्वं प्राणिवधं अरीन् नयच्छति नियच्छतीत्यर्यमा॥ भगो भजनीयो देवः तुवीति बहुनाम॥ बहुषु देशे बहुष्वनुग्रहार्थं प्रादुर्भूतः। वरुणविशेषणमेतत् स्यात्। पापनिवारणाद्वरुणः दक्षः समर्थः एतत्प्रत्येकं शृणोतु एतच्चांशस्य विशेषणं। पूर्वोक्त एव पशौ इमं स्तोममित्येषानुवाक्या याज्या॥ सूत्रितं च॥ इमं स्तोमं सक्रतवो मे अद्य तिस्रो भूमीर्धारयन्त्रीरुत द्यूनिति॥ ॥सेयं सूक्ते द्वितीया॥ ॥इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषंत॥ आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः इमं मे अस्मदीयं स्तोमं स्तावं सक्रतवः समानकर्माणः समानप्रज्ञा वा मित्रादयः अद्य इदानीं जुषंत जुषंतां सेवंतां कीदृशास्त आदित्यासः अदितेः पुत्राः शुचयो दीप्यमानाः धारपूताः उदकधाराभिः पूताः निर्मला इत्यर्थः। अवृजिनाः वृजी वर्जने अवर्जितारः सर्वानुग्राहका इत्यर्थः। अनवद्याः अवद्यरहिताः अनिंद्याः अरिष्टाः केनाप्यहिंसिताः॥ तस्मिन्नेव पशौ त आदित्यास इति १२०
द्वितीयानुवाक्या। सूत्रितं पूर्वमेवोदाहृतं॥ ॥सेषा सूक्ते तृतीया॥ ॥त आदित्यासः अदितेः पुत्राः उरवो गंभीरा अदब्धासो दिप्संतो भूर्यक्षाः। अंतः पश्यंति वृजिनोत साधु सर्वं राजभ्यः परमा चिदंति॥ त आदित्यास अदितेः पुत्राः उरवो महांतः

गंभीरासः गांभीर्योपेताः अदब्धासः शत्रुभिरहिंसिताः संतः दिप्संतः शत्रून् दंभितुं हिंसितुमिच्छंतः। दंभु दंभे। अस्मात् सन्नि सनीवंतर्धेति इट् अभावपक्षे दंभ इच्चेतीकारः दंभ इत्यग्रहणस्य जातिवाचकत्वात् सिध्यमिति सनः कित्वे नलोपः। अनुनासिकलोपः तथा भूर्यक्षाः भूरीणि बहूनि अक्षीणि च दर्शकानि येषां ते तथोक्ताः बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् समासांतः एवंभूता आदित्याः अंतः मध्ये प्राणिनां हृदि परकृत्यावर्तमानाः संतः वृजिना वृजिनानि पापानि उत अपि च साधु साधूनि पुण्यानि च प्राणिभिः कृतानि पश्यंति जानंति परमा चित् परमाणि दूरदेशावस्थितान्यपि सर्वं सर्वाणि दृश्यमानानि राजभ्यः राज्ञामीश्वराणामादित्यानां अंति अंतिके समीपे वर्तंत इति शेषः। कादिलोपो बहुलमिति अंतिकस्य कादिलोपः सार्वविभक्तिकः। तादीक्षणीयायां आदित्ययागस्य धारयंत इत्याद्यिका याज्यानुवाक्या। अत एव भुवद्भुवनपतिविशेषणविशिष्टादित्ययागेऽपि तथा च दीक्षणीयायामिति खंडे सूत्रितं। धा
रयंत आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि। जगज्ज
७ गमं स्थास्थावरं च वर्तितः कर्तयेत् एतत् द्विविधं भूतजातं धारयंत अवस्थापयंतः देवाः दानादिगुणयुक्ताः विश्वस्य भुवनस्य सर्वस्य लोकस्य गोपाः गोपायितारो रक्षकाः दीर्घाधियः कर्माणि नानाविधानि येषां ते दृशाः अन्येषामपि दृश्यंत इति पूर्वपदस्य दीर्घः। असुर्यं असवः प्राणाः तेन च तद्वंतो भूताः भावाः असुर्यं अपांतद्गुणं च छांदोग्ये समाम्नातं। आपोमयः प्राण इति। असुर्यं कंदर्पात् यत् तं मघः तत्र भयं मघो तत्र वर्तमानमुदकं रक्षमाणाः तत्कालं स्तुत्या दत्वा यजमानेभ्यः। तत्र अस्माच्छब्दादिवं छंदसीति यत् वा तावानः सत्यवंतः यज्ञवंतो वा छंदसीवनिपाविति मत्वर्थीयो वनिप् पूर्वपददीर्घः। ऋणानि स्तोतृभिः अन्येभ्यः प्रदेयानि चयमानाः अपगमयंतः अयर्णता आप्यादिका नुदानात् एवं गुणविशिष्टाय यज्ञाय अस्मदर्थीना भवंतीति शेषः॥ ॥अथ पंचमी॥ ॥विद्यामादित्या अवसो वो अस्य यदर्यमन् भय आ चिन्मयोभु। युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्यां॥ ॥हे आदित्याः अदितेः पुत्रा वा युष्माकं अस्य अवसः कर्मणि षष्ठी। रक्षणं विद्यां लभेय भये राक्षसादिभ्यः आगते सति यत् मयोभु रक्षणं चित् सुखार्थे मयो यस सुखं भावयितृ च। तद्विद्यं लभेयत्यन्वयः। हे अर्यमन् हे मित्रावरुणा युष्माकं प्रणीतौ अस्मद्विषये प्रकृष्टनयने सति श्वभ्रेव श्वभ्राणि गर्तानीव मतयोग्यानि गर्तवंति स्थलानीव दुरितानि पापानि परिवृज्यां परित्यजेयं। वृजी वर्जने बहुलं छंदसीति विकरणस्य लुक्।
॥ ॥इति द्वितीयस्य सप्तमे षष्ठो वर्गः॥ ॥७॥ अथ षष्ठी॥ ॥सुगो हि वो अर्यमन् मित्र पंथा अनृक्षरो वरुण साधुरस्ति। तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहंतु शर्म॥ ॥हे अर्यमन् हे मित्रावरुणौ युष्माकं सुगः सुखेन गंतव्यः अनृक्षरः कंटककुशादिरहितः साधुः साधकः शोभनो वा एवंगुणविशिष्टः पंथा मार्गोऽस्ति विधत्स्व लभेत तेन यथा अस्मान् शोभनं नयत तिशेषः। हे आदित्याः नोऽस्माकं अधिवोचत अधिवचनं पक्षपातवचनं कुरुत। अपि नोऽस्मभ्यं दुष्परिहंतु विनाशयितुमशक्यं शर्म सुखं यच्छत दत्त दाण् दाने अपि पाघ्रेत्यादिना यच्छादेशः॥ ॥अथ सप्तमी॥ ॥पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः। बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः॥ ॥राजपुत्रा राज्ञां नो राजमानानां मित्रादयः पुत्रा यस्याः तादृशी अदितिरदीनाऽखंडनीया वा देवानां अस्मा

न दुर्गाणि दुरितानि रक्षांसि अतिपिपर्तु अतिपारयतु अतिक्रम्य तद्रहितं देशं प्रापयत्वित्यर्थः ॥ अर्यमा च सुगेभिः सुष्ठु गंतव्यैः मार्गैरस्मान्
पारयितु । अपि च वयं पुरुवीराः बहुभिर्वीरैः पुत्रादिभिरुपेताः अरिष्टाः केनाप्यहिंसिताश्च संतः मित्रस्य वरुणस्य च बहुयाख्यं शर्म सु
१२१ खं उपश्याम उपगता भवेम ॥ पूर्वोक्तप्रयोगे तिस्रो भूमीरिति पुरोडाशस्य याज्या । सूत्रं पूर्वमेवोदाहृतम् ॥ ॥ सैषा सप्तमी ॥ ॥ तिस्रो
भूमीर्धारयन्त्रीँरुत द्यून्त्रीणि व्रता विदथे अंतरेषां ॥ ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ ॥ तिस्रो भूमीः अत्र भूमिशब्दो
लोकत्रयवर्तनः ॥ या द्युलो यस्यां तृतीयस्यां पृथिव्यामित्यत्र यथा पृथिव्यादयः भूम्यंतरिक्षस्वर्गाख्यान् त्रीन् लोकान् आदित्याः धारयन्ति रश्मि
प्रदानादिना धारयंति उत अपि च द्यून् दीप्यमानान् त्रीन् उपरितनान् महरादिकान् पवित्रान् लोकान् धारयंति । यद्वा दीप्यमानान् अग्निं वायुं सू
र्यं च धारयंति । अपि च एषामादित्यानां विदथे यज्ञे अंतर्मध्ये त्रीणि व्रता सवनत्रयनिष्पाद्यानि त्रीणि कर्माणि संति यद्वा एषां लोकानां
अंतर्मध्ये विदथे यज्ञनिमित्तभूते सति एषामादित्यानां त्रीणि कर्माणि रसादान धारणा । विसर्गलक्षणानि संति ॥ उत्तरार्धर्चः प्र
त्यक्षकृतः । हे आदित्याः ऋतेन सत्येन यज्ञेन वा महि महत् प्रभूतं वो युष्माकं महित्वं महत्त्वं । यन्महाभाग्यं हे अर्यमन् वरुण मित्र तन्महाभा
ग्यं चारु शोभनं सर्वोत्कृष्टमित्यर्थः ॥ ॥ अथ नवमी ॥ ॥ त्री रोचना दिव्या धारयंत हिरण्ययाः शुचयो धारपूताः ॥ अस्वप्नजो अनि
मिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ ॥ त्री रोचना त्रीणि रोचनानि रोचमानान्यग्न्यादीनि तेजांसि दिव्या दिव्यानि दिवि भवानि धा
णां रयंत आदित्या अवष्टम्भयन् किमर्थं ऋजवे ऋजुकाय स्तोत्रे मर्त्याय मनुष्याय भोगसिध्यर्थमिति यावत् कीदृशा आदित्याः हिरण्ययाः
हिरण्मयाः हिरण्यालंकृतसर्वांगाः यद्वा हितरमणीयरूपाः शुचयो दीप्यमानाः धारपूताः उदकधारया क्षालिता उ निर्मलाः अस्वप्न
जः असंजातस्वप्नाः कथं सुलुगिति जसः सुः अपर आह ॥ अस्वप्नजः अस्वपंतः विगतनिद्राः स्वपितेर्जानिति नजिङ् प्रत्यय इति
तदेतत्पदकारस्यानभिमतं ॥ अनिमिषाः निमेषरहिताः अदब्धाः असुरादिभिरहिंसिताः उरुशंसाः उरुभिर्बहुभिः शंसनीयाः
स्तुत्याः एवं गुणविशिष्टा अधारयंतेत्यन्वयः ॥ ॥ अथ दशमी ॥ ॥ त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ॥ शतं नो
रास्व शरदो विचक्षेश्यामायूंषि सुधितानि पूर्वा ॥ ॥ हे असुर शत्रूणां क्षेपक वरुण त्वं विश्वेषां सर्वेषां राजासि स्वामी भवसि ॥ ये च देवा देवजनाः
॥ ये च मर्ता मरणधर्माणो मनुष्याः तेषामित्यर्थः ॥ अतस्त्वं नोस्मभ्यं शतं शरदः शतसंख्याकान् संवत्सरान् विचक्षे विशेषेण दर्शनाय रा
स्व प्रयच्छ ॥ रातेर्लोट्यत्ययेनात्मनेपदं ॥ वयं च पूर्वा पूर्वैर्यैः कैश्चित् सुधितानि सुहितानि निहितानि संवत्सरलक्षणान्यायूंषि अश्याम व्याप्नुया
म ॥ सुधितवसुधितनेमधितधिषधीपीयुष्वेति निपात्यते ॥ गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् ॥ पूर्वा सुपां सुलुगिति तृतीयाया डा
देशः ॥ ॥ इति द्वितीयस्य सप्तमे सप्तमो वर्गः ॥ ॥ आदित्यदेवताके पशौ न दक्षिणेत्येषा हविषो याज्येति तिस्रो भूमीर्धारयन्त्रीँरुत द्यू
न्न दक्षिणा विचिकिते न सव्येति ॥ ॥ सैषा एकादशी ॥ ॥ न दक्षिणा विचिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ॥ पाक्या चिद्व
सवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्यां ॥ ॥ हे आदित्याः दक्षिणा दक्षिणभागः न विचिकिते मया न विज्ञायते सव्या सव्या १२१
वामभागोपि न ज्ञायते ॥ सुपां सुलुगिति सोराजादेशः तथा प्राचीनं पुरस्ताद्भिन्नं ज्ञायते विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः उ

227/1914

त अपि च पश्चा पश्चात् पृष्ठभागोपि न ज्ञायते नैशेन तमसा आवृतत्वात् अंतरा दूरत्वाद्वा पश्च पश्चा च च्छंदसीति निपात्यते ॥ किं बहुना
पाक्या चित् पाक्यः पाक्यः ॥ परिपक्वज्ञानोपि डुपचष् पाके हलोर्ण्यत् तितस्वरितः । धीर्या चित् धीरेण तत्र भवेन भयाधीर्यः कातरः भवः
छंदसीति यत् कातरोपि । उभयत्र सुपां सुलुगिति आकारः ॥ हे वसवः वासयितार आदित्याः युष्मानीतः युष्माभिर्नीतः शोभनेन मार्गे
ण प्रापितः सन् अभयं भयरहितं ज्योतिः सारं तेजः आंतरं वा ज्ञानात्मकं अश्यां प्राप्नुयां ॥ ॥ अथ द्वादशी ॥ ॥ यो राजभ्य ऋतनिभ्यो
ददाश यं वर्धयंति पुष्टयश्च नित्याः ॥ स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ ॥ यो यजमानः राजभ्यो राजमानेभ्यः ऋतनि
भ्यः ऋतस्य यज्ञस्य सत्यस्य वा नेतृभ्यः आदित्येभ्यो ददाश चरुपुरोडाशादिकं ददाति ॥ यं यजमानं पुष्टयः पोषकाः नित्याः शाश्वताः आदि
त्याश्च वर्धयंति स यजमानो रेवान् धनवान् प्रथमः प्रथितः प्रख्यातः वसुदावा वसूनां धनानां दाता सन् प्रशस्तः सर्वैः प्रशस्यमानः विद
थेषु वेदिषु लक्ष्येषु रथेन वाहनेन याति गच्छति ॥ ॥ अथ त्रयोदशी ॥ ॥ शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ॥ न
किष्टं घ्नंत्यंतितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ ॥ स यजमानः शुचिर्दीप्यमानः शुद्धो वा अदब्धः सपत्नैरबाधितः वृद्धवयाः प्र
भूतान्नः सुवीरः शोभनपुत्रश्च सन् सूयवसाः शोभनसस्यान्यपः उदकलक्षणान्युदकान्युपक्षेति उपनिवसति सर्वदा सुसस्यानां अपां
समीपे निवसतीत्यर्थः । तथा न किर्न च तं घ्नंति हिंसंति अंतितो अंतिकात् समीपदेशाच्च दूरात् विप्रकृष्टाच्च देशादागताः बाधकाः अंति
कस्य तसिः कादिलोप इति लोपः । यो यजमानः आदित्यानां अदितेः पुत्राणां मित्रादीनां प्रणीतौ प्रकृष्टेन यज्ञे प्रापणे भवति वर्तते ॥ स इति पू
र्वेण संबंधः ॥ ॥ अथ चतुर्दशी ॥ ॥ अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ॥ उर्वश्यामभयं ज्योतिरिंद्र मा नो दीर्घा अभि
नशंतमिस्राः ॥ ॥ उत अपि च हे अदिते मित्र वरुण आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवद्भावात् ॥ सर्वेषां आ
ष्टिकस्यामंत्रितस्याष्टकाद्युदात्तत्वं ॥ यूयं प्रत्येकं मृळ अस्माकमुपरि दयां कुरु रक्षेत्यर्थः यत् यद्यपि वयं वो युष्माकं कच्चित् किंचिदागोप
राधं चकृम अकर्म तथापि मृळेत्यर्थः ॥ हे इंद्र परमैश्वर्योपेतादित्य उरु विस्तीर्णं अभयं भयरहितं ज्योतिस्त्वदीयं प्रकाशं ज्ञानात्मकं वा
अश्यां अहं प्राप्नुयां दीर्घा विस्तृताः तमिस्राः तमसा युक्ता निशाः ज्योत्स्नातमिस्रादिगणेति निपात्यते ता नोस्मान् माभि नशं माभिमु
ख्येन प्राप्नुवंतु ॥ ॥ अथ पंचदशी ॥ ॥ उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ॥ उभा क्षयावाजयन्याति पृत्सूभा
वर्धौ भवतः साधू अस्मै ॥ ॥ य आदित्यानां भवति प्रणीताविति व्यवहितोप्यत्र तच्छब्देन परामृश्यते ॥ अस्मै यजमानाय समीची सं
गच्छमाने उभे द्यावापृथिव्यौ पीपयतः प्याययतः कामान् वर्धयतः प्यायतेर्ण्यंताच्छंदसि लुङ् व्यत्ययेन तसस्तामादेशा
भावः धातोः पीभावश्च ॥ स च सुभगः शोभनधनः दिवोंतरिक्षादागतां वृष्टिं पुष्यन् वर्धयन् भवतीति नाम प्रसिद्धौ वर्तते किंच
एतावता संग्रामे प्रभाजयन् शत्रूनभिमुख्येनाभिभवन् ॥ उभा क्षया उभौ निवासौ क्षियंति निवसंत्यस्मिन्निति क्षयो निवास
स्थानं पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः क्षयो निवासे इत्याद्युदात्तत्वं तापरैरनाक्रांतं स्वकीयनिवासस्थानं आत्मनापहृतं प
रितरितं निवासस्थानं च याति गच्छति ॥ तथास्मै यजमानाय उभाव धौ संगतौ भोगौ चराचरात्मकौ मर्त्यामर्त्यात्मकौ वा साधू

 साधको भवत॥ ॥अथ षोडशी॥ ॥या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः॥ अश्वीव ताँ अति येषं रथेनारिष्टा उ
रावा शर्मन्त्स्याम॥ ॥हे यजत्राः यष्टव्याः आदित्याः वो युष्माकं या मायाः अभिद्रुहे अभितो द्रोहं कुर्वते राक्षसादये निर्मिताः ये च पा
 शाः रिपवे शत्रवे विचृत्ताः वृत्तिर्हिंसाग्रंथनयोः प्रसारिता इत्यर्थः तान् पाशान् मायाश्च रथेन अति येषं अतीत्य प्रयते यं अतितरेयमि
त्यर्थः॥ तत्र दृष्टांतः अश्वीव यथा शोभनाश्वः कश्चित्पुरुषः दुस्तरान् मार्गान् शीघ्रमतिक्रामति तद्वत् येषं प्रयत्ने भ्वादिकोनुदात्तेतः
छांदसो लङ्॥ व्यत्ययेन परस्मैपदं॥ तथा वयं अरिष्टाः शत्रुभिरहिंसिताः संतः उरौ विस्तीर्णे शर्मन् शर्मणि गृहे नामत्वयादत्ते सुखे गृहे वा
आसमंतात्स्याम वर्तमाना भवेम॥ अथ सप्तदशी॥ ॥माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः॥ मा रायो राजन्त्सुय
माद्व स्थां बृहद्वदेम विदथे सुवीराः॥ ॥हे वरुण मघोनो धनवतः प्रियस्य अनुकूलस्य भूरिदाव्नः भूरेर्बहुलस्य दातुराघस्याहं आविदं आ
वेदयामि॥ आवेदनं विज्ञापनं मा करवाणि॥ विदज्ञाने वेदयंति॥ आपेः आप्तेः शूनं शून्यं दारिद्र्यं वर्णलोपः छांदसः यद्वा श्वनं गतं प्राप्तं दारिद्र्यं॥
टुओश्वि गतिवृद्ध्योः श्वयतिर्निष्ठायामिति इट्प्रतिषेधः यज्ञादित्वात्संप्रसारणं ओदितश्चेति नकारः पृषोदरादित्वात् कृदत्तं॥ एतदुक्तं भ
वति॥ असमदीयाः पुत्राद्यः क्षुधिता इति प्रभुसमीपे अभिधाय याचमाना मा भूवन्निति॥ हे राजन् सुयमात् सुष्ठु नियम्यते अनेन पुरुषा
र्थ इति सुयमः॥ ईषद्दुःसुष्विति खल्॥ तादृशात् रायो धनात् मा अव स्थां अवयुत्य स्थिता मा भूवं वयं सुवीराः शोभनपुत्रा विदथे यज्ञेषु वे
र्तमानाः संतो बृहत्प्रौढं स्तोत्रं वदेम उच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे अष्टमो वर्गः॥ ॥७॥ इदमित्येकादशर्चं षष्ठं सूक्तं॥ अत्रा
नुक्रम्यते॥ इदमेकादश वारुणमिति त्रिष्टुप् छंदः वरुणो देवता विनियोगो लैंगिकः॥ अन्ये केचिदाहुः इदमेकादशर्चं तु वारुणं भयपाप
तुतरणे दारिद्र्यदुःस्वप्ननाशनं च वति शुश्रुम इति॥ कूर्मः सूक्तकर्म कपिः गार्त्समदो वाहि वक्तृत्वात् स्योत्तरस्य च कूर्मो गृत्समदो वा॥ ॥तत्र प्र
थमा॥ ॥इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना॥ अति यो मंद्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः॥ ॥कवेः क्रां
तदर्शिन आदित्यस्य अदितेः पुत्रस्य स्वराजः स्वयमेव राजमानस्य ईश्वरस्य वारुणस्य इदं हविः स्तोत्रं वा यजमानः करोतीति शेषः स च विः
श्वानि सर्वाणि सांति द्वितीयभाव विकारभांजि भूतजातानि मह्ना महिम्ना वरुणप्रसादाल्लब्धेन अभ्यस्तु अभिभवतु यो देवो द्योत
मानो वरुणः यजथाय यष्टुं पुरुषाय अति अतिशयेन मंद्रः स्तुत्यो हर्षयिता वा भवति तस्य भूरेः भर्तुर्वरुणस्य सुकीर्तिं शोभनां स्तु
तिं भिक्षे प्रार्थये॥ यद्वा वरुणस्य तितृती यार्थे षष्ठी॥ तेन वरुणेन दातव्यां शोभनां कीर्तिं अहं याचे॥ ॥अथ द्वितीया॥ ॥तव व्रते
सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः॥ उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून्॥ ॥हे वरुण स्वाध्यः शोभ
नध्यानाः तुष्टुवांसः स्तुतवंतो वयं तव व्रते तत्संबंधिपरिचरणाख्ये कर्मणि वर्तमानाः सुभगासः स्याम शोभनधनाः भवेम अपि च
गोमतीनां रश्मिभिर्युक्तानामुषसां उपायने उपागमने सति अग्नयो न अग्निहोत्रादि कर्मार्थं समिध्यंते एवमनु द्यून् अनुदिनं जरमाणाः स्त
स्तुवंतो वयं दीप्यमाना भवेम॥ ॥अथ तृतीया॥ ॥तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः॥ यूयं नः पुत्रा अदितेर
दब्धा अभि क्षमध्वं युज्याय देवाः॥ ॥हे प्रणेतः सर्वस्य जगतः प्रकर्षेण नेतः वरुण पुरुवीरस्य पुरुभिर्बहुभिर्वीरैः रूपेतस्य य

द्वा पुरूणां बहूनां शत्रूणां विशेषेण प्रेरकस्य उरुशंसस्य उरुभिर्बहुभिः शस्यमानस्य च शर्मन् शर्मणि सुखे गृहे वास्याम अदितेः पुत्रमि
त्रादयः परमपि छंदसीति परस्य षष्ठ्यंतस्य पूर्वस्य मनांग वद्भावेना नुप्रवेशात्। पदद्वयस मुदायस्याष्टमिकं सर्वानुदात्तत्वं॥ अदब्धा शत्रु
भिरहिंसिताः एवंभूता हे देवा यूयं नोस्मान् कृतापराधान् युज्याय सख्याय अभि क्षमध्वं अस्माभिः कृतमपराधं सहध्वं॥ ॥अथ चतु
र्थी॥ ॥प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिंधवो वरुणस्य यंति॥ न श्राम्यंति न वि मुचंत्येते वयो न पप्तू रघुया परिज्मन्॥ ॥विधर्ता सेतुरि
व जलस्य विधारयिता आदित्यः अदितेः पुत्रो वरुणः ऋतं विधारणहेतुभूतं सत्यं यद्वा नदीनामुपादानभूतं उदकं सीं सर्वतः प्रासृजत
प्रकर्षेण सृष्टवान् अणोप्रगृह्यस्यानुनासिक इत्याकारः सानुनासिकः तेन वरुणस्य ऋतं ता सिंधवः स्यंदनशीला नद्यो यंति गच्छंति प्रवहंति
॥ एताः सिंधवः न श्राम्यंति श्रांतिं न प्राप्नुवंति न वि मुचंति उपरता न भवंति अलसाः सर्वदैकरूप्येण प्रवहंतीत्यर्थः॥ एतदेवोच्यते॥ वयो न
वयः पक्षिण इव रघुया रघवः शीघ्रगामिनः परिज्मन् परिज्मनि भूम्यां पप्तुः पतंति गच्छंति॥ पत्लृ गतौ लिटि सुसितानि पत्योः छंदसि लि
पधालोपः स्थानिवद्भावाद्द्विर्वचनादिः रघुया इत्यत्र सुपां सुलुगिति जसो याजादेशः॥ ॥अथ पंचमी॥ ॥वि मच्छ्रथाय रशनामिवा
ग ऋध्याम ते वरुण खामृतस्य॥ मा तंतुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः॥ ॥हे वरुण मत् मत्सकाशात् रशनामि
व आगः विहितानुष्ठानजनितपापं विश्रमय शिथिलीकुरु॥ विमोचयेत्यर्थः॥ तव त्वत्संबंधिनः ऋतस्य उदकस्य पूर्णां खां नदीं खा इति
नदीनामसु ऋध्याम लभेमहि अपि च धियं कर्म वयतः संतन्वतो मम मम तंतुः कर्मसंततिः मा छेदि छिन्ना मा भूत्। नैरंतर्येण त्यर्थः॥
तथा ऋतोः समासिकालात् पूर्वं पूर्वं अपसः कर्मणः मात्रा शरीरं प्रारब्धं मा शारि शीर्णं विकलं मा भूत्॥ शृ हिंसायां
कर्मणि लुङ्॥ पुर ऋताविति शकल्यकत्व इति प्रकृतिभावः॥ ॥इति द्वितीयस्य सप्तमे नवमो वर्गः॥ ॥अथ षष्ठी॥ ॥अपो सु म्यक्ष वर
ण भियसं मत्सम्राळृतावोनु मा गृभाय॥ दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे॥ ॥हे वरुण भि
यसं भयं मत् मत्तः सु सुष्ठु अपो म्यक्ष अपगमय हे सम्राट् सम्यग्राजमान हे ऋतावः सत्यवन् यज्ञवन्वा वरुण मा मां अनु गृभाय
अनुगृहाण॥ छंदसि शायजपीति श्नः शायजादेशः हृग्रहोर्भ इति भत्वं अपि च दामेव वत्सात् यथा दाम धावत्सकाशात् धेनी रज्जुं
विमुंचंति॥ तथा अंहः पापं मत्सकाशात् विमुमुग्धि विमुंच छांदसः शपः श्लुः एथक्कुर॥ त्वदारे त्वत्तो दूरदेशे वर्तमानः त्वदन्य इत्यर्थः॥
त्वत्तोन्यः कश्चित् निमिषश्चन निमेषस्यापि अक्षिपक्ष्माचलनस्यापि न हि ईशे नेष्टे न मवईश्वर इत्यर्थः॥ लोपस्त आत्मनेपदेष्विति त
लोपः॥ ॥अथ सप्तमी॥ ॥मा नो वधैर्वरुण ये त इष्टावेनः कृण्वंतमसुर भ्रीणंति॥ मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्र
थो जीवसे नः॥ हे वरुण नोस्मान् वधैः हननसाधनैरायुधैर्मा हिंसीरिति शेषः॥ ॥हे असुर पापकर्तॄन् निरसितः तव दीये इष्टाय
ज्ञेन विहितानुष्ठानेन जनितं पापं कृण्वंतं कुर्वंतं पुरुषं एव ये धा भ्रीणंति हिंसंति तानि इति पूर्वत्र संबंधः भ्री वृहिंसायां क्र्यादिः
कृः अपि च ज्योतिषः प्रद्योतमानात् दिवः सोरप्रकाशाद्वा प्रसवथानि प्रवसानमाङ्गन्म मा गच्छाम सर्वदा दृष्टे वर्तमानः सूर्यं पश्येम चिरका
लं जीवेयमित्यर्थः॥ गमेर्लुङि मंत्रे घसेति च्लेर्लुक् तथा नोस्माकं जीवसे जीवनाय मृधो हिंसकान् सु वि शिश्रथः विश्लथय बाधस्वेत्यर्थः॥

भा॰अ॰२ ॥ ॥अथाष्टमी॥ ॥नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम। त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि॥ ॥हे वरु अ॰७
ण पुरा पूर्वस्मिन्काले ते तुभ्यं नमः नमस्कारशब्दप्रतिपादकं नम इति शब्दं अब्रवाम्हि उत अपि च नूनं अद्य चापि अब्रवाम उत अपि च तुवि
१२३ जात बहुषु प्रदेशेषु प्रादुर्भूत वरुण अपरं काल आगामिन्यपि काले ब्रुवं अब्रवाम उच्चारयाम। कस्मादिति चेदुच्यते दूळभ दुर्दभ
भितुं हिंसितुमशक्य दुरो दाशो नाश दूडाश दूळभ इति रेफस्योत्व मुत्तरपदादेष्टुत्वं॥ कमित्यनर्थकः पूरणः। हि यस्मात्त्वे त्वयि पर्वते
न शिलोच्चय इव अप्रच्युतानि अन्यैः प्रच्यावयितुमशक्यानि व्रतानि कर्माणि विधरणानि श्रितानि आश्रितानि तस्मादित्यर्थः॥ ॥अ
थ नवमी॥ ॥परः ऋणानि। हे वरुण ऋणानि पित्रादिभिः कृतान्यस्माभिर्देयानि परा सावीः परासुव परस्ताच्चानं प्रेरय पृथक् प्रेरण॥
छांदसो लुङ्। अध अधुना मत्कृतानि मया निष्पादितानि ऋणानि परासुव॥ अपि च हे राजन् स्वामिन् वरुण अहं अन्यकृतेन अन्ये
नार्जितेन धनेन भोजं भोगं माकं भेयं बिभृयां कारणमिति चेदुच्यते भूयसीः भूयस्यो बहुतराः उषसः अव्युष्टा इत् नु सत्यं अव्युष्टा एव अप
रराज्ञे पूर्वाघ ऋणानि निर्वर्तयतो ज्ञायते मम व्युष्टकल्पा आसन् हे वरुण तासु उषःसु नोऽस्मान् जीवनः आशाधि आसमंतादनु
शिष्टान् कुरु॥ ऋणान्यपहत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः॥ ॥अथ दशमी॥ ॥यो मे राजन्युज्यो वा सखा वा॰॥ हे राजन् वरुण मम
ध्याया युज्यो योजनसमर्थः पित्रादिर्यो सखा समानख्यानो धवो वा स्वप्ने लिङ्गविषयं भयं भीरवे भयशीलाय मह्यं य आ
हं ब्रूते तथा स्तेनश्चोरो वा वृक आरण्यश्वा वा यो नोऽस्मान् दिप्सति जिघांसति। सनीवंतर्धेति विकल्प्यानादिभावः दंभ इच्छतीति। हे वरुण
त्वं तस्मात्सर्वस्मान्नोऽस्मान् रक्ष पाहि रक्ष॥ ॥अथैकादशी॥ ॥माहं मघोन इति॰॥ हे वरुण प्रियस्य भूरिदाव्नः भूरेर्दातुर्धनवतः आप
स्य पुरतः पुत्रादेर्दारिद्र्यं अहं आविदं आवेदयामि ज्ञापयामि हे राजन् सुहितियामं कर्णधनात् मा भूवं शोभनपुत्राः यतेम हे वावर्त
मानं प्रोदं स्तोत्रं उच्चारयाम॥ ॥इति द्वितीयस्य सप्तमे दशमो वर्गः॥ ॥धृतव्रता इति सप्तर्चं सप्तमं सूक्तं गार्त्समदस्य कूर्मस्य गृ
त्समदस्य वार्षं त्रैष्टुभं वैश्वदेवं तथा चानुक्रांतं। धृतव्रताः सप्त वैश्वदेवमिति गतो विनियोगो लैंगिकः॥ ॥सूक्ते प्रथमामृचमाह
॥ ॥धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः॥ शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः॥ ॥हे धृतव्रताः धृ
तकर्माणः अदितेः पुत्राः इषिराः गमनशीलाः सर्वैरभ्येषणीयाः प्रार्थनीया वा हे विश्वे देवाः मत्तो मत्तः दूरदेशे आगः विहिता
ननुष्ठानादिजनितं पापं कर्त कुरुत। कर्त छांदसो विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तबादेशः। तत्र दृष्टांतः। रहसूरिव रहसि
अन्यैरज्ञातप्रदेशे सूयत इति रहसूः व्यभिचारिणी सा यथा गर्भं पातयित्वा दूरदेशे परित्यजति तद्वत्॥ हे वरुण मित्र देवाः वायुः
पर्दायस्य भद्रस्य युष्माभिः करणीयं श्रेयो विद्वान् जानन् अहं शृण्वतः मत्कृतानि स्तोत्राणि श्रोत्रेण जानतो वो युष्मान् अवसे रक्ष
णार्थं हुवे आह्वयामि॥ ॥अथ द्वितीया॥ ॥यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत। अभिक्षत्तारो अभि च क्षमध्वम
द्या च नो मृळयतापरं च॥ ॥हे देवाः प्रमतिः प्रकृष्टा मतिर्यस्य प्रिन्नादेः सा द्वेशा अपि यूयमेव भवथ यूयं द्वेषांसि द्वेष्टॄणि रक्षः १२३
पिशाचादीनि सनुतः सनुतरित्यव्ययं अंतर्हितनामैतत् अंतर्हितप्रदेशे युयोत पृथक् कुरुत युमिश्रामिश्रयोः छांदसः शपः श्लुः पूर्ववत्तस्य

तबादेशः अभिक्षत्तारः शत्रूणां हिंसितारो यूयं अभि च क्षमध्वं अभिभवत च शत्रून् अद्यास्मिन् दिने नोऽस्मान् मृळयत सुखयत 231 1914
अपरं च अपरमपि काले आगामिन्यपि काले अस्मान् मृळयत॥ ॥अथ तृतीया॥ ॥किमू नु वः कृणवामापरेण किं सनेन वसव
आप्येन॥ यूयं नो मित्रावरुणादिते च स्वस्तिमिंद्रामरुतो दधात॥ ॥हे देवाः वो युष्माकं तु अघेदानीं किमु कृणवाम किं खलु कर्तुं शक्नुवा
म न किमपीत्यर्थः। तथा अपरेण अपरभाविकाले भाविना कर्मणा किं कर्तुं शक्ताः तथा हे वसवो वासयितारो देवाः सनेन सनातनेन आप्ये
न आप्यभ्येन कर्मणा युष्माकं किं कर्तुं शक्ताः सर्वदापि युष्मद्गुणपरिचरणं कर्तुं न शक्ता इत्यर्थः। हे मित्रावरुणौ हे अदिते हे इंद्र मरुतः देव
ता इंद्र इति पूर्वपदस्यानङ्॥ तत्र सर्वे यूयं स्वस्तिं अविनाशं नोऽस्मभ्यं दधात धत्त प्रयच्छत॥ अदितिस्यत बादेशेऽपि ङित्वाभावेनानालोपाभावः॥
॥ ॥अथ चतुर्थी॥ ॥हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यं॥ मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म॥ हये
देवाः॥ छांदसो वर्णोपजनः हे देवाः यूयमित् यूयमेव आपयः धनस्य प्रापयितारो बंधवः स्थ भवथ ते पूर्वं नाधमानाय अभिमत
फलं याचमानाय मह्यं मृळत सुखयत तथा वो युष्माकं रथो ज्ञात स्वकीयो यज्ञनिमित्तं मध्यमवाट् मा भूत् मध्यमं मंदगमनं
नवाहकामाभूत्॥ शीघ्रं युष्मानवहत्वित्यर्थः॥ वयं युष्मावत्सु युष्मत्सदृशेष्वापिषु बंधुषु सत्सु मा श्रमिष्म श्रांता मा भूम॥ वतुप्प्रकरणे
युष्मदस्मभ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् आ सर्वनाम्न इत्यात्वं॥ ॥अथ पंचमी॥ ॥प्र व एको मिमय भूर्यागो यन्मा पितेव कि
तवं शशास॥ आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट॥ ॥हे देवाः वो युष्माकं मध्ये अहमेकः संन् भूरि बहुलं आगः
पापं प्र मिमय अहं प्रकर्षेण हिंसितवान् पृथक् अस्माकं मध्ये बहुलमेव इति चेदुच्यते। यत् यस्मात् वो पितेव कितवं यथा अयथाप्रवृत्तं पुत्रं पिता
नुशासित तथा शशास अनुशिष्टं चकर्तु। शासु अनुशिष्टाविति लिटि मध्यमस्यरूपं अपि च हे देवा युष्मदीयाः पाशाः आरे अस्म
त्तो दूरदेशे संतु अघानि पापानि च आरे संतु मा मां अधि पुत्रे अधि मत्तस्यानुवादी पुत्रे पश्यति स तं पितरं संतं विमिव पक्षिणमिव
व्याधः मा ग्रभीष्ट मा गृह्णीध्वं। मा ङि लुङि हृग्रहोर्भश्छंदसीति भत्वं॥ ॥अथ षष्ठी॥ ॥अर्वांचो अद्या भवता यजत्रा आ वो हार्दि भयमानो
व्ययेयं॥ त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः॥ ॥हे यजत्राः यष्टव्या देवाः अद्य इदानीं अर्वांचो अस्मदभिमुखा भव
त। वो युष्माकं हार्दि हृदयवासितं रक्षणं भयमानो बिभ्यदहं आव्ययेयं अभिमुख्येन प्राप्नुवतियां॥ व्ययगतौ भौवादिकः हे देवाः वृक
स्य तस्करस्य आरण्यश्वनो वा संबंधिनः निजुरो निहननात् नृशंसार्थं अस्मात् स्वपदादिलक्षणाभावं क्षिपग्रहं स्तात्स्वः। नोऽस्मान् त्रा
ध्वं त्रायध्वं। तथा हे यजत्राः अवपदः आपदः कर्तात् कर्तुः सकाशात् त्राध्वं त्रायध्वम्॥ ॥अथ सप्तमी॥ ॥माहं मघोन इति व्याख्ये
यं॥ ॥इति द्वितीयस्य सप्तमे एकादशो वर्गः॥ ॥ऋतं देवाय त्येकादशर्चं अष्टमं सूक्तं। गार्त्समदं अंत्या जगती शिष्टास्त्रिष्टुभः। प्र
हि क्रतुमित्येषा इंद्रासोमदेवताका सरस्वति त्वमस्मानित्यर्धर्चः सारस्वतः शेषः संनुत्य इत्येषा बार्हस्पत्या अंत्या मारुती। इंद्रः
तथा चानुक्रांतं। ऋतमेकादश जगत्यंतं षष्ठ्यैंद्रासौमी सरस्वति त्वमिति सारस्वतोऽर्धर्चो यो नो बार्हस्पत्यांत्या मारुतीति॥ गतो विनियोगो
लैंगिकः॥ ॥तत्र प्रथमा॥ ॥ऋतं देवाय कृण्वते सवित्र इंद्रायाहिघ्ने न रमंत आपः॥ अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसां॥

भा०अ०२ ॥ ॥ऋतमुदकं वृष्टिलक्षणं कृण्वते कुर्वते देवाय द्योतमानाय सवित्रे सर्वस्य प्रेरकाय अहिघ्ने अहिं वृत्रं हतवते इंद्राय यागार्थं आपो न रमंत अ०२
न रमा दुतास्मिंस्थानोपरता भवंति। तस्मान्नल्पयेन चतुर्थी। अपि तु तासामपां अक्तुः सेचकं स्रोतः अहरहः प्रत्यहं याति गच्छति आसां प्रथ
१२४ मः सर्गः प्राथमिकं गमनक्रियात्याक्रियति कालेतिष्यन आकारः प्रश्ने किंशब्दः आक्षेपे यावति काले ता अज्ञायंत स कालः कियान् किं परिमाणं
तस्य कालस्यन किमपि नित्या एव हिता इत्यर्थः॥ ॥अथ द्वितीया॥ ॥यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच। पथो रदंतीरनु जो
षमस्मै दिवेदिवे धुनयो यंत्यर्थं॥ ॥यः पुरुषो वृत्राय सुराय सिनमन्नं अत्र पाकस्थाने अहर्तुम अभरिष्यत संपादितवान् तं पुरुषं जनित्री ज
ननयित्री इंद्रस्य माता अदितिः विदुषे अभिज्ञायेंद्राय प्रोवाच प्रोक्तवती प्रवचनस्य हननार्थत्वात् तं वृत्रं हतवानिति शेषः अपि चास्मै अस्मे
इंद्रस्यानुजोषमनुकामं इच्छामनुसृत्य पथो मार्गान् रदंतीः विलिखंतीः धुनयो नद्यः दिवेदिवे प्रतिदिवसं अर्थं अर्तव्यं गंतव्यं समुद्रं प्रति यंति गच्छं
ति॥ ॥अथ तृतीया॥ ॥ऊर्ध्वो ह्यस्थादध्यंतरिक्षेधा वृत्राय प्र वधं जभार। मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिंद्रः॥ हि हेतौ
यास्मादयं वृत्रः अंतरिक्षे ऊर्ध्वः सन् सर्वमावृत्याध्यस्थात् अधिष्ठितो भूत् अध अतः कारणात् वृत्राय वृत्रं प्रति वधं हननसाधनं वज्रम्
इंद्रः जभार प्राचिक्षेप हृ ग्रहणे। भः॥ स हि खलु वृत्रो मिहं वृत्तं सकामं मेघं वसानः आच्छादयन् इमं इंद्रं उपादुद्रोत् उपागमत् द्रु गतौ ल
ङ्। छांदसः शपः श्लुः तिग्मायुधः तीक्ष्णायुधः इंद्रः शत्रुं शातयितारं तं वृत्रं अजयत् जितवान्॥ ॥अथ चतुर्थी॥ ॥बृहस्पते तपुर
षाश्नेव विध्य वृकद्वरसो असुरस्य वीरान्॥ यथा जघंथ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिंद्र॥ ॥हे बृहस्पते॥ बृहतां परिवृढानां
पालयितरिंद्र तपुषा तापकेन दीप्तेन वज्रेण अश्नेव अशन्या इव वृकद्वरसः संवृतद्वारस्यासुरस्य वीरान् पुत्रान् यद्वा संवृतद्वारान् असुर
स्य वीरान् विध्य ताडय॥ वृणोतेः सरविः भृभुषिभ्यः क्विप् इति कर्मणि क्विप्रत्ययः द्वरंतो अस्मादौणादिको असन् प्रत्ययः वृकानि संवृतानि
द्वारांसि द्वाराणि येषां बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥ हे इंद्र पुरा चित् पुरापि धृषता धर्षकेण वज्रेण यथा जघंथ त्वं हतवान् एवमेवास्मा
कं शत्रुं जहि नाशय यद्वा तजं इति ह्योतादेशः॥ ॥अथ पंचमी॥ ॥अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मंदसानो निजूर्वाः॥ तोकस्य सा
ता तनयस्य भूरेरस्मां अर्धं कृणुतादिंद्र गोनां॥ ॥हे इंद्र दिवो नभसः सकाशात् अस्मानं अश्मवत् कठिनं वज्रं उच्चा उच्चैः वर्तमानस्त्वं अवक्षि
प अस्मदीयान् शत्रून् उद्दिश्याधस्तात् क्षिप। येन वज्रेण मंदसानः स्तोतृभिः स्तूयमानः सन् शत्रून् निजूर्वाः न्यहिंसीः जुर्व हिंसार्थः॥
लङि अडागमः तथा तोकस्य भूरेः भर्तव्यस्य तनयस्य पौत्रस्य साता संभजननिमित्ते सं प्रत्येषां संभजनार्थं तथा हे इंद्र गोनां गवां संभज
नार्थं चास्मान् अस्माकं विभक्तिव्यत्ययः अर्धं समृद्धं कृणुतात् कुरु गोः पादांत इति णोनुद्धस्यामोनुडागमः॥ ॥इति द्वितीयस्य सप्तम
द्वादशो वर्गः॥ ॥अथ षष्ठी॥ ॥प्रहि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ। इंद्रासोमा युवमस्मां अविष्टमस्मिन् भ
यस्थे कृणुतमु लोकं॥ ॥हे इंद्रासोमौ यं वैरिणं वनुथः हिंसथः वनुष्यतिर्हंतिकर्मेति यास्कः। तं क्रतुं रूपस्य कर्तारं प्र हि वृहथः हि प्रकर्षेण १२४
छिंदथः उन्मूलयथ इत्यर्थः। वृहू उद्यमने तौदादिकः तथा रध्रस्य राधस्य यजमानस्य चोदौ शत्रूणां प्रेरकौ स्थो भवथः। तथा हे इं
द्रासोमौ युवं युवां अस्मान् अविष्टमवतं अस्मिन् भयस्थे भयस्थाने युद्धे घञर्थे कविधानमित्यधिकरणे कप्रत्ययः मरुद्वृधादित्वात्

पूर्वपदांतोदात्तत्वं। तस्मिन् युद्धे लोकं भयरहितं स्थानं कृणुतं कुरुतं इति प्रार्थना॥ ॥अथ सप्तमी॥ ॥न मा तमन्न श्रमन्नोत तंद्रन्न वोचाम मा 233/1914
सुनोतेति सोमं। यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वंतमुप गोभिरायत्॥ ॥स इंद्रो मा न तमत् न तमयतु न ग्लपयतु न श्रमत् श्रा
तं मा करोतु। नमुस्मा नाश्रमुतपमिव इच॥ अनयोर्हेतुमण्ण्यंतयोर्लङ्यडागमः। छंदस्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णि
लोपः उत अपि च मा मां न तंद्रत् न तंद्रयत् तंद्रा आलस्यं न युक्तं मा करोतु॥ तंद्राशब्दात् तत्करोतीति णिच् णाविष्टवत्प्रातिपदिकस्येति टिलो
पः अन्यत् पूर्ववत् इंद्र यागाय सोमं मा सुनोत माभिषुणोत इति रुद्रिर्युक्तां मध्यमस्थानादिवाचो न वोचाम अन्योन्यं यजमाना न प्रतिन वोचाम न
ब्रवाम। वचेश्छांदसो लुङ् सुनोतेस्यत तप्तनप्तनथनाश्चेति तस्य तनबादेशः॥ तस्य पित्त्वन ङित्वाभावाद्गुणः यं इंद्रो मम पृणात् कामान् पूर
यतु यश्च ददत् अभीष्टफलं दद्यात् यश्च निबोधत् अस्मदीयं स्तोत्रं यागं वा अवगच्छतु यः इंद्रः सुन्वंतं सोमं अभिषुण्वंतं मां अस्मभ्यं
दातव्यैर्गोभिः सह उपायत् उपागच्छत् स इंद्र इति पूर्वत्रान्वयः पृणादित्यादि पुलस्यडागमः॥ ॥अथाष्टमी॥ ॥सरस्वति त्वमस्मां अ
विड्ढि मरुत्वती धृषती जेषि शत्रून्। त्यं चिच्छर्धंतं तविषीयमाणमिंद्रो हंति वृषभं शंडिकानां। हे सरस्वति सरणवति देवि त्वं अस्मान् स्तोतृ
न् अविड्ढि रक्ष। रक्षार्थस्याव तेर्लेटि यतद्रूपं तथा मरुत्वती मरुद्भिर्युक्ता मध्यमस्थानाहि वाक्सरस्वती मरुतश्च मध्यमस्थानस्थाः अ
तस्त्वद्गता सती धृषती धर्षयंती शत्रून् शातयितृन् वैरिणान् अपि भयाज्जयतु छांदसः शपः श्लुः। किंच यमिंद्रः त्यं चित् तमप्यसुरं हंति ह
तवान् व्यत्ययेन भूतार्थे लट्॥ कीदृशं शर्धंतं प्रहसनशीलं। शृधु प्रहसने। तविषीयमाणं तविषी बलमिवाचरंतं सर्वस्य भंजनेश
तं शंडिकानां शंडामर्कौ वसुरपुरोहितौ इदं शब्दानां मध्ये वृषभं प्रधानं॥ ॥अथ नवमी॥ ॥यो नः सनुत्य उत वा जिघत्नुरभिख्याय
तं तिगितेन विध्य। बृहस्पत आयुधैर्जेषि शत्रून् द्रुहे रीषंतं परि धेहि राजन्॥ ॥हे बृहस्पते यो नास्माकं सनुत्यः सनुतरित्यंतर्हितनाम अंतर्हि
ते देशे भवः चोरः स गर्भसयुथ सनुतात्यत्। उत वा अपि वा यो जिघत्नुर्जिघांसुः भवति। तमभिख्याय संवीक्ष्य तिगितेन तीक्ष्णेनायुधेन
विध्य ताडय। तथास्मदीयान् आयुधैः यो धनसाधनैः खड्गादिभिः जेषि जयसि तथा राजन् राजमान बृहस्पते द्रुहे द्रोग्ध्रे शत्रवे रीषंतं हिंसं
तं वज्रं परिधेहि परितो धारय प्रक्षिपेत्यर्थः॥ ॥अथ दशमी॥ ॥अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि। ज्योगभू
वन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि॥ ॥हे शूर शौर्यवन्निंद्र अस्माकेभिरस्माकीनैः सत्वभिः परेषां साधकैः शूरैः शौर्योपेतै
र्भटैः यानि वीर्याणि वीरकर्माणि कृधि कुरु॥ तानि ते त्वया कर्त्वानि करणीयानि। कृत्यार्थे तवे केनि केन्य त्वन इति त्वन् प्रत्ययः ज्योक् चि
रकालं अनुधूपितासः धूपायमाना दह्यमाना मदीयाः शत्रवो भवंति अभूवन् तस्मात् हत्वी तान् हत्वा स्नात्व्यादयश्चेति आकारः तेषां शत्रूणां वसूनि धना
नि अस्मभ्यं आभर आहर॥ ॥अथैकादशी॥ ॥तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनं। यथा रयिं सर्ववीरं नशामहा
अपत्यसाचं श्रुत्यं दिवेदिवे॥ ॥हे मरुतः वो युष्माकं शर्धं बलं मारुतं मरुत्सम् दृश्यं दैव्यं देवजनं गणं सवत्यंजनं प्रादुर्भूतं तं गुणविशि
ष्टं बलं नमसा नमस्कारेण हविषा वा गिरा स्तोत्रेण उप ब्रुवे स्तौमि। यथा येन प्रकारेण वयं सर्ववीरं सर्वैर्वीरैः पुत्रैः शत्रूणां प्रेरकैर्भटै
रुपेतं अपत्यसाचं अपत्यैः पतनहेतुभूतैः पुत्रादिभिः उपेतं श्रुत्यं श्रवणीयं प्रशस्यं भूतं रयिं दिवेदिवे प्रतिदिवसं नशामहै व्याप्नुवा

भा०अ०२ मनद्यानि व्याप्तिकर्माणि पठ्यागमः वेतोन्यनेस्येकारः॥ ॥इति द्वितीयस्य सप्तमे त्रयोदशो वर्गः॥ ॥अस्माकमिति सप्तर्चं नवमं सूक्तं। गृत्समदस्या अ०७
१२५ र्षं वैश्वदेवं अंत्याग्निपुष्टिशाह्वा गत्यः तथा चानुक्रांतं। अस्माकं सप्त वैश्वदेवं त्रिष्टुबंतं मिति विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥अस्मा
कं मित्रावरुणा वतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा। प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवंतो वनर्षदः॥ ॥हे मित्रावरुणा मित्रावरु
णौ आदित्यैः धात्र्यर्यमादिभिः द्वादशभिः रुद्रैः एकादशसंख्याकैः वसुभिः ध्रुवो ध्वरश्च इत्याभिरष्टसंख्याकैः एवं त्रिभिर्देवगणैः सचा
भुवा सह भवंतौ सह वर्तमानौ युवां अस्माकं रथं अंतकाभाय प्रसक्तं अवतं। यद्यदास्मदीया रथाः वस्मनस्परि वसंत्यास्मिन्निति वस्मानि
वासस्थानं भोगादिकामाननि तस्मात् स्थानात् परि उपरि देशांतरे पंचम्याः पराव ध्यर्थ इति सत्वं। अ ध्यर्थ उपर्यर्थ इति वृत्तिः वयो न पक्षि
ण इव प्रपेपेन प्रपतित प्रकर्षेण गच्छंति। पतेः छंदसि लुङि लुर्दित्वात् चूरउन देशः पतःपुमिति पुमागमः कीदृशा श्रवस्यवो अन्नकामाः
हृषीवंतः प्राप्तहर्षाः वनर्षदः वने रक्षादौ निषण्णाः सांहितिकः छांदसो रेफोपजमानः॥ ॥अथ द्वितीया॥ ॥अध स्मा न उदवता सजो
षसो रथं देवासो अभि विक्षु वाजयुं। यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जंघनंत पाणिभिः॥ ॥हे सजोषसः समानं प्रीयमा
णाः देवासो देवाः अध अधुना नोऽस्माकं वाजयुं वाजमन्नं कामयमानं गातिविशेषयुक्तं वा रथं विक्षु प्रजासु जनपदेषु अभि

235/1914

१२६

२ रुद्रं नमोभिः नमस्कारैः हविर्भिर्वा नमस्य पूजय वयं च रुद्रस्य महादेवस्य त्वेषं दीप्तं नाम नमनं नामानि स्मरणीमः संकीर्तयामः॥ ॥अथ नवमी॥ 237/1914
स्थिरेभिरंगैरिति। स्थिरेभिः स्थिरैः दृढैः अंगैरवयवैः युक्तः पुरुरूपः बहुभिः रूपैरुपेतः उग्रः उद्गूर्णः तेजस्वी बभ्रुः भर्ता रुद्रः शुक्रेभिर्दी
प्ताहिरण्यैः रोचमानैः अलंकारैः कुंडलादिभिः पिपिशे अपश्यत अवयवं कर्मणि लिट् ईशानात् ईश्वरात् अस्य भुवनस्य भूतजातस्य भूरेः भर्तुः रु
द्रात असुर्यं असुरत्वं बलं असुरः क्षेमात न साधुः असुर्यं बलं न वा उ योषत् न पृथग्भवति॥ ॥अथ दशमी॥ ॥अर्हन्
बिभर्षीति। हे रुद्र त्वं अर्हन् योग्यः सन् सायकानि शरान् धन्व धनुश्च बिभर्षि धारयसि तथा अर्हन् एव यजनं यजनीयं पूजनीयं विश्वरू
पं बहुविधरूपयुक्तं। निष्कं हारं बिभर्षि तथा अर्हन् एव इदं विश्वं सर्वं अभ्वं अतिविस्तृतं जगत् दयसे रक्षसि हे रुद्र त्वत् त्वत्तो अन्यत् किंचिन ओजीयः
ओजस्वितरं बलवत्तरं नैव अस्ति न खलु विद्यते न तस्य लोके व्यापारे पुत्रोऽस्य इत्यर्थः॥ ॥इति द्वितीयस्य सप्तमे सप्तदशो वर्गः॥ ॥स्तुहि
श्रुतमिति। हे स्तोतः श्रुतं प्रख्यातं गर्तसदं गर्तः रथः तत्र सीदन्तं युवानं नित्यतरुणं मृगं न भीमं सिंहमिव भयंकरं उपहत्नुं
उपहन्तारं शत्रूणां उग्रं उद्गूर्णं हे रुद्र त्वं स्तवानः अस्माभिः स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळ सुखय ते त्वदीयाः सेनाः अस्मत् अन्यं
अस्मद्व्यतिरिक्तं पुरुषं नि वपन्तु निघ्नन्तु॥ ॥अथ द्वादशी॥ ॥कुमारश्चिदिति॥ वंदमानं आयुष्मान्भव सौम्येति स्तुवन्तं पितरं कुमारश्चित्
शिशुरिव तद्यथार्थं यथा कुमारः हे रुद्र उपयन्तं अस्मत्समीपं गच्छन्तं त्वां प्रतिनना म प्रतिनताः स्मि अपि च भूरेः बहुनः धनस्य दातारं सत्पतिं
सतां पालयितारं हे रुद्र एवं भूतं त्वां गृणीषे स्तौमि स त्वं गृणानः अस्मभ्यं भेषजानि रासि देहि॥ ॥अथ त्रयोदशी॥ ॥या वो भेषजा
ति। हे मरुतः रुद्रपुत्राः वः युष्माकं यानि भेषजानि औषधानि शुचीनि शुद्धानि संति हे वृषणः कामानां वर्षितारः मरुतः यानि
निच युष्मदीयानि भेषजानि शंतमा शंतमानि अतिशयेन सुखकराणि यानि च भेषजानि मयोभु मयसः भूमि सुखस्य भाव
यितृणि अस्मत् पिता मनुः यानि भेषजानि युष्मदीयानि अवृणीत वृतवान् तानि भेषजानि रुद्रस्य महादेवस्य संबंधि शं च यो
श्च यच्च शमनीयानां रोगाणामुपशमनं यावनं यानां भयानां यत् यावनं अस्मत्तः पृथक्करणं तदुभयं च वश्मि कामयते। वहुकांतो
अश्नाद्रिकः॥ ॥अथ चतुर्दशी॥ ॥परि णो हेतिरिति॥ रुद्रस्य महादेवस्य हेतिः आयुधं नः अस्मान् परि वृज्याः परिवर्जयेत॥ तथा त्वे
षस्य दीप्तस्य रुद्रस्य महि महती दुर्मतिः दुःखकारिणी। बुद्धिश्च परि गात् अस्मान्वर्जयित्वा अन्यत्र गच्छतु हे मीढ्वः सेचनसमर्थ रुद्र स्थिराः
स्थिराणि त्वदीयानि धनूंषि मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यः यजमानेभ्यः अवतनुष्व अवततज्यानि कुरु तथा तोकाय आत्मपुत्रा
य तनयाय तत्पुत्राय च मृळ सुखं कुरु॥ ॥अथ पंचदशी॥ ॥एवा बभ्रो इति। हे बभ्रो जगतो भर्तः वृषभ कामानां वर्षितः चेकिता
न सर्वं जानन् हे देव द्योतमान रुद्र यथा येन प्रकारेण न हृणीषे न क्रुध्यसि न च हंसि एवं हवनश्रुत् अस्मदीयमाह्वानं शृण्वन् नः अ
स्मान् हे रुद्र इह अस्मिन् देशे बोधि बुध्यस्व विदथे यज्ञे सुवीराः शोभनपुत्राः सन्तो बृहत् प्रौढं त्वदीयं स्तोत्रं वदेम उच्चारयाम॥ ॥
इति द्वितीयस्य सप्तमे अष्टादशो वर्गः॥ ॥धारावरा इति पंचदशर्चं द्वितीयं सूक्तं गृत्समदस्यार्षं अन्त्या त्रिष्टुप् शिष्टा जगत्यः म
रुतो देवता तथा चानुक्रान्तं धारावरा मारुतं त्रिष्टुबन्तं॥ ॥तत्र प्रथमा॥ ॥धारावरा इति उदकधारया। अंतरिक्षमरुण्वत।

भा॰ अ॰ २ यद्वा धारणं धूतानां शिराणां पूर्णादीनां निवारयितारः खादयितारः ॥ धृष्णवोजसः परेषां धर्षकेण बलेन युक्ताः अत एव मृगाः न भीमाः सिंहाद अ॰ १
३२७ य इव भयंकराः तविषीभिः आत्मीयैः बलैः अर्चिनः पूजिताः अग्नयो न अग्नय इव शुशुचानाः दीप्यमानाः वृष्टिप्रदानादिना ऋजीषिणः स
जीषं इत्युक्त इंद्रः एवंभूताः मरुतः भृमिं भ्राम्यंतं मेघं धमंतः वर्षणार्थमुत्क्षिपंतः प्रेरयंतः तदंतर्गता गावः अपः अपावृण्वत अ
पावृताः कुर्वंति। यथा सर्वे द्रष्टुं तथा प्रवर्षंतीत्यर्थः ॥ यद्वा गावः नाम्ना सूर्येण पिहिताः अपावृण्वत अपगतावरणा अकुर्वन् ॥ ॥
अथ द्वितीया ॥ ॥ द्यावो न स्तृभिश्चितयंत खादिनो व्यभ्रिया न द्युतयंत वृष्टयः ॥ रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊ
धनि ॥ ॥ स्तृभिर्नक्षत्राणामिति नक्षत्रैः द्यावो न यथा द्युलोकाश्चितयंत चेतयंति स्वात्मानं ज्ञापयंति चिती संज्ञाने प्रकाशयंत इत्यर्थः ॥ तथा
खादिनः खादका मरुतः चेतयंति नक्षत्रनामैतत् यद्वा द्यावः कलाभिः स्तृभिरिति लुप्तबहुवचनम् आभरणैर्ज्ञायंते ॥ यद्वा खादः कटकं तद्यु
ताः संतः प्रकाशंते तथा अभ्रियाः वर्षका मरुतः ॥ अभ्रियान अभ्रे भवा वि द्युत इव ॥ विद्युतयंत सर्वं जगद्द्योतयंति प्रकाशयंतीतिशेषः
अभ्रशब्दाद्भवार्थे समुद्राभ्राद्घ इति घप्रत्ययः ॥ प्रत्यक्षकृतः रुक्मवक्षसः रुक्मं रोचमानाभरणं वक्षस्सु उरःसु येषां तादृशा हे मरुतः वः
दानाय युष्मान् इत्वा सेचनसमर्थो रुद्रो महादेवः पृश्न्याः पृश्निर्माध्यमिका वाक् तस्याः संबंधिनि शुक्रे निर्मले ऊधनि उधस्थे प्रदेशे अजनि
अजनयत् जनने दीप्ताविति पूर्ववत् संबंधः यद्वा पृश्निर्नानावर्णा इयं भूमिः पुरा गोरूपधरासीत् तस्यां महेशो भूत्वा मरुत उत्पादयामासेत्या
ख्यायते तत्राख्यते हे मरुतः यद्यस्माद्रुद्रो युष्मान् एषा पृश्न्याः गोः शुक्रे निर्मले ऊधसि पयस इत्यपि स्थाने अजनि अ
जीजनत। तस्माद्यूयं एवं महानुभावा जाता इत्यर्थः ॥ तथा च तैत्तिरीयकं। पृश्नियै वै पयसो मरुतो जाता इति ॥ ॥ अथ तृतीया ॥ ॥ उ
क्षंते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयंत आशुभिः ॥ हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥ ॥ मरुतः
अश्वान् व्याप्तान् लोकान् उक्षंते सिंचंति अत्यान् इव अत सातत्यगमने औणादिकः क्नप्रत्ययः ॥ आजिषु संग्रामेषु अत्यान् सततगामिनस्तुरगान् यथा
खेदापनोदाय उक्षंति सिंचंति तद्वत् अपि च हे मरुतः आशुभिः शीघ्रगमनैः रवैः नदस्य शब्दवतो मेघस्य कर्णैः कृतैः मध्यप्रदेशैः तुरयंत
वर्षणार्थं क्षिप्रमस्य प्रसादनाय त्वरितं गच्छंति। तुर त्वरणे ॥ प्रत्यक्षकृतः हे हिरण्यशिप्राः शिप्रं शिरस्त्राणं सुवर्णमयानि शिरस्त्राणानि येषां ते। समन्यवः
समानवयस्काः समानक्रोधा वा हे मरुतः दविध्वतः मेघं प्रकंपयंतः पर्वतानपि धूनयंतः धूञ् कंपने इत्यस्माद्दाधर्तीत्यादिना निपात्यते पृषतीभिः
युष्मदीयवाहिनीभिः श्वेतबिंदुयुक्ताभिः श्वेतमृगीभिः वडवाभिर्वा पृक्षं अन्नमभिगच्छथ ॥ हविर्लक्षणान्नवंतं यजमानं अर्थं आहिता
याय गच्छथ ॥ ॥ अथ चतुर्थी ॥ ॥ पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ॥ पृषदश्वासो अनवभ्रराधस ऋजि
प्यासो न वयुनेषु धूर्षदः ॥ ॥ पृक्षे पृक्षवते हविर्लक्षणान्नयुक्ताय यजमानाय ता तानि विश्वा सर्वाणि भुवना भुवनान्युदकानि मित्रा
य वा अन्यरूपमार्थः मित्राय वा सदं सदा आववक्षिरे मरुत आवहंति यद्वा वाक्यधारणे मित्रभूताय यजमानाय वा पृक्षो अन्ननिमित्त ३२७
भूते सति उदकान्याव हंतीति। हे मरुतः जीरदानवः क्षिप्रदानाः पृषदश्वासः पृषद्भिः श्वेतबिंदुभिर्युक्ता अश्वा येषां ते तथोक्ताः
अनवभ्रंशेन रहितं राधो धनं येषां ते बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ अनवभ्रराधसः अवभ्रंशः अधःपतनं अवभ्रंशनं

अवभ्रः ड अन्यत्रापि दृश्यत इति ड प्रत्ययः नास्ति अवभ्रो यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् ॥ ऋजिप्यासो न ऋजु अ
कुटिलं प्राप्नुवंतो गच्छंतोऽश्वा इव वयुनेषु गंतव्येषु मध्ये धूर्षदः धुरि संचस्य वहने सीदंतो निषण्णा इत्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ इंधन्वभि
र्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ॥ आ हंसासो न स्वसराणि गंतन मधोर्मदाय मरुतः समन्यवः ॥ ॥ समन्य
वः समानमनस्काः समानक्रोधाः समानतेजसो वा हे मरुतः भ्राजदृष्टयो दीप्यमानायुधा यूयं इंधन्वभिः समिंधनवद्भिः इंधनशब्दा
दुत्तरस्मान्निपातितिमत्वर्थे यावनिप ॥ स्तोत्रसारवर्णलोपः धेनुभिः प्रीणयित्रीभिः रप्शदूधभिः विरप्शमिति महन्नाम महाधस्कैः ऊधां
सि ऊधस्थानानि मार्गाः ॥ यद्वा रप्शत् उभ्यमानोभूतप्रदेशः अध्वस्मभिः ध्वंसनरहितैः पथिभिः पतंति गच्छंति पंथा
नामेत्यादि एवंभूते मेघे सह मार्गैर्वा आगंतन आगच्छत किमर्थं मधोर्मदाय सोमस्य मदार्थं। तत्र दृष्टांतः। हंसासो न यथा हंसाः
स्वसराणि स्वकीयानि वासस्थानानि प्राप्नुवंति तद्वत् ॥ ॥ इति द्वितीयस्य सप्तमे एकोनविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ आ नो ब्रह्माणि
मरुतः समन्यवो नरां न शंसः सवनानि गंतन ॥ अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसं ॥ समन्यवः समानमनसः समा
नक्रोधा वा हे मरुतः नः अस्माकं ब्रह्माणि स्तोत्राणि अन्ननामैतत् ॥ अन्नानि सवनानि अभिषुतसोमलक्षणानि हवींषि आगंतन आगच्छत ॥ गमेर्लोटि छां
दसः शपो लुक्। तप्तनप्तनथनाश्चेति तस्य तनबादेशः ॥ अत एव ङित्वाभावादनुनासिकलोपाभावः ॥ तत्र दृष्टांतः ॥ नरां न शंसः नराः संस्मा
शंसः कर्माणि शंसनीयस्तोत्रं यथा आगच्छथ तद्वत् ॥ नराशंसो नाम यज्ञः तत्र हि नित्यमागमाशंसनमिति तु भावः शंसकर्माणि यज्ञे
त आघृ दातः सर्पा गत्युत्थितः सः आहुताः आगत्य च धेनुं उदकदानेन प्रीणयितारः अश्वामिव ऊधनि पिप्यत तयथा अश्वाः पीनाः वय
वा भवंति तद्वत् पयसा समर्थं अप्याययित्रीं कुरुतेत्यर्थः ॥ अपि च जरित्रे स्तोत्रे वाजपेशसं अन्नरूपां संपत्तिं अवश्यं धियं कर्म
कर्त कुरुत कृतं स्मः छांदसः पूर्ववत् तनबादेशः ॥ ॥ अथ सप्तमी ॥ ॥ तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितय
द्दिवेदिवे ॥ इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ॥ हे मरुतः तं पुत्रं नः अस्मभ्यं दात दत्त प्रयच्छत छांदसः शपो
लुक् वाजिनं बलवंतं रथे रंहणे युष्मदीय आगमननिमित्तभूते सति दिवेदिवे प्रतिदिवसं चितयत प्रज्ञापयत युष्मद्गुणप्र
ख्यापकं ब्रह्म स्तोत्रं आपानं आप्नुवंतं अपि च इषमन्नं स्तोतृभ्यः अस्मभ्यं दात प्रयच्छत तथा वृजनेषु संग्रामेषु कारवे स्तोत्रवचनस्य
कर्तुः मेधां युद्धप्रज्ञां सनिं धनदानं च अरिष्टं शत्रुभिः अहिंसितं दुष्टरं शत्रुभिस्तरितुमशक्यं सहः बलं च प्रयच्छत ॥ ॥ अथाष्टमी ॥ ॥
यद्युंजते मरुतो रुक्मवक्षसोऽश्वान् रथेषु भग आ सुदानवः ॥ धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषं ॥ ॥ रुक्मवक्ष
सः रोचमानाभरणाः सुदानवः शोभनदाना मरुतः यद्यदा रथेषु भगे भजनीये स्थाने धुरीत्यर्थः ॥ अश्वान् आयुंजते आभिमु
ख्येन युंजते तदानीं रातहविषे दत्तहविष्काय यजमानाय महीं महतीं इषं अन्नं कारणभूतं मेघं वा स्वसरेषु स्वकीयेषु गृ
हेषु पिन्वते सिंचति वर्षंति। तत्र दृष्टांतः ॥ धेनुर्न शिश्वे यथा धेनुः प्रस्नुतस्तनी सती स्वकीयाय वत्साय क्षीरं प्रयच्छति तद्
वत् ॥ ॥ अथ नवमी ॥ ॥ यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ॥ वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हंतना

239 / 1914

भा०अ०७ वधः॥ ॥आदातारक्षः आदाने रक्षःतृ ताभ्यां तिरुता तिलोपश्छंदसि तिसार्थिकत्वात्तिरुप्रत्ययः तादृशाः सन्तो मा अस्मान् रिपुरे धरिपुतया आ अ०७
१२८ त्मानं धारयति॥ हे मरुतो वास्मियितारो मरुतः रिपावि हिंसकाद्रस्मान् रक्षत पाल्यत अस्माकं अनुभृतं मर्त्यं पुतपालाप कियाच क्रियाकृत्या
स्पृयाऽऽज्ञया अभिवर्तयत अभिताभिवर्तयत हे रुद्राः रुद्रपुत्राः यद्वा रुद्रप्रमाणाद्द्रवंतः अशंसो भक्षकस्य अशासा लन इत्यस्मात्तौणा
दिकाम्प्रत्ययः॥ तादृशस्य राक्षसस्य वधः हननसाधनमायुधं अवहंत न अवयुत्ताम्मतः पृथक्कुरुत नाशयत हंतेर्लोडि तप्तनप्तनथः
नाश्चेति तनप्॥ ॥अथदशमी॥ ॥चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः॥ यद्वा निदे नवमानस्य रुद्रियास्त्रितं जरा
य जुरतामदाभ्याः॥ ॥हे मरुतः वो युष्माकं चित्रं चायनीयं याम प्राप्यणं चेकिते सर्वैर्ज्ञायते॥ इदानीं तदेवाह॥ अप्रियाः प्र
मिद्धाग्नि पृश्न्याः माध्यमिकाया वाचः संबंधिनं ऊधः उधनं अप्यं आपयः प्रापयितारो मरुतः दुदुहुः दुहंति दुहेश्छंदसा लिट्
छंदसि चेतिवत्तस्यमितिद्विर्वचनाभावः यद्वा यदा च नवमानस्य स्तुवतः त्रितस्य निदे निंदकाय शत्रवे हिंसां कुरुत वत इति शेषः निंदिकं
तायां। त्रिप चूतिभिक्षु पततरत दानीं हे अदाभ्याः अहिंस्याः रुद्रियाः रुद्रस्य पुत्राः मरुतः त्रितमृषिं जुरतां जरणाद्रोयकुरणाय वि
नाशाय अभूत इति शेषः॥ ॥इति द्वितीयस्य सप्तविंशो वर्गः॥ ॥अथैकादशी॥ ॥तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृ
थे हवामहे॥ हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे॥ ॥हे मरुतः एवयाव्नः एवं गंतव्यं स्तोत्रं यत्तं वा गंतॄन्
महो महतः महानुभावान् तान् वो युष्मान् विष्णोर्व्यापकस्य यद्वास्य च मासादिषु सर्वत्र व्याप्य वर्तमानस्य एषस्य एषणीयस्य प्रार्थ
नीयस्य सोमस्य प्रभृथे प्रभरणे अभिषवादिभिः प्रकर्षेण संपादने सति हवामहे आह्वयामहे आहूय च हिरण्यवर्णान् हितरमणीयव
र्णान् ककुहान् महतः स्तुत्यान् एवंभूतांस्तान् यतस्रुचः याग्याय यतस्रुचः ब्रह्मण्यन्तः ब्रह्मस्तोत्रं तदिच्छंतो वयं शंस्यं प्रशंसनीयं
राधो धनं ईमहे याचामहे॥ ॥अथ द्वादशी॥ ॥ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु॥ उषा न रामीररुणैरपोर्णु
ते महो ज्योतिषा शुचता गोअर्णसा॥ ॥ते मरुतः दशग्वाः ये दशभिर्मासैः सिद्धिं गता अंगिरसस्ते दशग्वाभूताः प्रथमा आदित्येभ्यः
प्रथमभाविनः संतः यज्ञमूहिरे अवहन् आदित्यानामंगिरसां च स्वर्गमनं प्रति स्पर्धमानानां मध्ये पूर्वमेवांगिरसो यागानं वुहूवुः
स्वर्गं प्राप्ताः तथा च श्रूयते॥ आदित्याश्च वै ह्यांगिरसश्च ते अग्निना अग्निमयजंतेति तादृशास्ते उषसो व्युष्टिषु विवासेषु प्रभाते
षु मरुतः नोऽस्मान् हिन्वंतु प्रेरयंतु॥ हि गतौ वृद्धौ च॥ रामीः कृष्णवर्णा रात्रीः उषा न यथा उषाः अरुणैरारोचमानैः स्वतेजोभिः अ
पोर्णुते अपवृणोत्यपसारयति। तथा महो महता शुचता दीप्यमानेन गोअर्णसा गच्छदुदकेन ज्योतिषा सूर्याख्येन तयो निवारय
ति सूर्यमंडलमाख्यतो रात्र्यादीन् सर्वं जगत् प्रकाशयंतीत्यर्थः॥ ॥अथ त्रयोदशी॥ ॥ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा
ऋतस्य सदनेषु वावृधुः॥ निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम्॥ ॥रुद्राः रुद्रपुत्रास्ते मरुतः क्षोणीभिः शब्द १२८
कारिभिः अरुणेभिरुषौरुणाविरोचैः अरुणैर्भि नांजिभिः न शब्दः समुच्चये॥ आरोचमानैररुणवर्णैर्वा रूपाभिर्व्यंजकरलंकारैश्च
समन्विताः संतः ऋतस्योदकस्य सदनेषु निवासभूतेषु मेघेषु वावृधुः वर्धंते अपि च अत्येन सततगामिना पाजसा बलेन

तमा आत्मीयेन बलेन निमेघमानाः नितरां मेघादुदकं सिंचंतस्ते सुश्चन्द्रं शोभनाह्लादनं सुपेशसं पेश इति रूपनाम शोभनरूपं वर्णं दधिरे
धारयंति॥ ॥अथ चतुर्दशी॥ ॥ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि॥ त्रितो न यान्पञ्च होतॄनभिष्टय आववर्त
दवरांश्चक्रियावसे॥ ॥तान् मरुतो महि महत् वरूथं वरणीयं प्रशस्तं धनं तान्मरुतः ऊतये रक्षणार्थं इयानः इयानाः याचमानाः वयं।
सुपां सुलुगिति जसः सुः एना अनेन नमसा नमस्कारेण स्तोत्रेण वा उपेत्य उपेत्य गृणीमसि स्तुमः॥ घेति पादपूरणः॥ एनं तस्य त्र सुपां सु
लुगिति तृतीयाया आकारः॥ नः समुच्चये त्रितः ऋषिश्च यानेतान्मरुतः पञ्च होतॄन् अध्यात्म प्राणापानादिपंचरूपात्मना वर्तमाना
न् अतएव होमनिष्पादकान् अवरान् मुख्यान् अभि अभिलषितसिध्यर्थं चक्रिया नाभि चक्रेण अवसे अवनं तु संगंतु आववर्तत स्वः
स्मान्निर्गमिषून् प्राणान् स्वात्माभिमुखमावर्तयत॥ यद्वा चक्रियाऽकृत्या स्वेन आयुधेन युक्तान् अवसे स्तुत्यादिभिः पर्ययितुमावर्त
यत तान् स्तुम इति पूर्वेण संबंधः ववर्तेर्णिजन्तस्य लुङि चङि रूपम्॥ ॥अथ पंचदशी॥ ॥यया रध्रं पारयथात्यंहो यया निदो
मुञ्चथ वन्दितारम्॥ अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु॥ ॥हे मरुतः यया ऊत्या रध्रं आराधयंतं यजमानं अंहः पापं
अतिपारयथ अतिक्रमयथ। यया ऊत्या वंदितारं स्तोतारं निदो निंदितुः शत्रोः सकाशात् मुञ्चथ मोचयथ हे मरुतो वो युष्मदीया या ऊतिः
सा अर्वाची अस्मदभिमुखा भवतु॥ तथा सुमतिर्युष्मदीया शोभमाना मतिः अनुग्रहात्मिका बुद्धिः वाश्रेव हंभारवं कुर्वती धेनु
रिव वत्सं गमनशीला उ आ जिगातु एवं गच्छतु अस्मान् प्रति सर्वथा आगच्छत्वित्यर्थः॥ इति द्वितीयस्य सप्तम एकत्रिंशो वर्गः॥ ॥उपेमिति पंच
दशर्चं त्रयोदशं सूक्तं गार्त्समदं त्रैष्टुभं अपांनपाद्देवताकं॥ तथा चानुक्रान्तं उपेम यौन अर्प्रीयामिति॥ सूक्तविनियोगो लैंगिकः॥ ॥
तत्र प्रथमा॥ ॥उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे॥ अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि
॥ ॥वाजयुः वाजमन्नमात्मनः इच्छन्नहं इमं वो वचस्यां वचसः स्तोत्रस्येच्छां उपासृक्षि उपासृजामि इत्यादयामि अपांनपातं स्तोतुं
प्रवृत्तोऽस्मीत्यर्थः सृजतेश्छांदसो लुङ्। इडिङिति वा आत्मनेपदे [illegible] सिचः क्वितात्गुणाभावः सच नाद्यः नदीनां शब्दकारिणीनां मध्ये
स्थानामपां संबंधी आशुहेमा आशुगामी ग्रगताद्धिगतौ विस्मात् दृत्यापादयन्त इति मनिन् एवंभूतोऽपांनपात् अपां पौत्रस्था
नीयः अग्नः औषधिवनस्पतयो जायंते ओषधिवनस्पतिभ्यो वा अग्निर्जायत इति पौत्रत्वं एतत्संज्ञको देवः गिरः गृणाति गीः
स्तोता तस्य मम कुवित् बहुलं मन्यते। बहुलं [illegible] अन्नं दधीत दधातु विदधातु। प्रयच्छत्वित्यर्थः॥ अपि वा स्मात् सुपेश
सः रूपवान् शोभनालंकारान् करोति कृञ् तु करोतेर्व्यत्ययेन शपकुः करत करति [illegible] यस्य सत्वं। हि यस्मा
द्यं दनः ज्यापिपत स्तोत्राणि सेवतेत स्मान् स्मानयं मनुगृह्णत्वित्यर्थः॥ जुषी प्रीतिसेवनयोः॥ लेट्यडागमः विकरणः सिप्। इडाग
मश्च हि चेति निघातप्रतिषेधः॥ ॥अथ द्वितीया॥ ॥इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत्॥ अपां नपादसुर्यस्य
मह्ना विश्वान्यर्यो भुवना जजान॥ ॥अस्मै अपांनपाते तत्काय देवाय हृदो हृदयात् सुतष्टं सुष्ठु निर्मितं इमं मंत्रं स्तुतिमा अभि
मुख्येन वोचेम ब्रवाम। अस्य अस्माभिरुक्तमिमं मंत्रं। कुवित् वेदत् बहुलं जानातु वेत्तेर्लेट्यडागमः॥ निपातितयं यद्यहितं तत्रानि

241
1914

भा॰अ॰२ पातमतिषेधः। किं स्तोत्रमिति चेद् उच्यते। अर्यः स्वामी अपां नपात् तनको वै घृतोऽग्निः असुर्यस्य असुरस्य कृत्स्नक्षेमात स्यस्य भूत बलस्य मह्ना अ॰७
महिम्ना महत्त्वेन विश्वा सर्वाणि भुवना भुवनानि शत्रुदकानि रत्नसादनन भूतजातानि वा जजान जनयामास॥ अपां नपाती यव सती परीसमी
१२१ पेण कुर्धना सप्राप्नाक समन्या यंती त्वियानुवर्त्या सुवितं च स मान्यायंत्न पर्यंत्या उत्तितीर्थ देवा इति मा रक्षत चसत्रय घृषपतन तदानी
मापोन मीयः श्वरः कार्यः। तत्रैषैव पात्या॥ सूत्रितं च। समन्यायंत्न पर्यंत्यन्या इत्यातः समानं सर्वपामिति॥ ॥सेषास केन्तीया॥ ॥सम
न्यायंत्न पर्यंत्यन्याः समान मूर्वं नघः पृणंति॥ न मूच्छ्यं च स यार्दा श्चिसं मपांनपातं परितस्थुरापः॥ ॥अन्या वयन्त्या आपः संयंति भूत्यासं
गच्छंते अन्याश्च पूर्वंत त्रा वल्लिका उपयंति उपगच्छंति ता सर्वा आपः समानं समूहन घानदी भूता द्धृ वै समुद्र मध्ये वर्तमानं वडवानलं पृणंति प्र
णप्रीणने। तो दारिका न मृत मेवापांनपातं शुचिं निर्मलं। दीदिवांसं दीप्यमानं दीदेतिः। छां दसो दीप्तिकर्मा लिटः क्वसुः वस्वेका जाद्युसामिति
नियमादिड्भावः। छंदसि चोत वल्न त्यामिति वचनादुर्वचनाभावः एवं भूतं शुचयः शुभ्रा आपिः परितस्थुः परिगृह्य तिष्ठंति एष वै ह्याग्निरूपे
णम ध्ये वर्तमानो स्मान्ज्ञातिर ज्ञनदिति बुध्या वडवानलरूपेण वर्तमानं तं पर्युपासत इत्यर्थः। यद्वा अन्या एकं यनास्था आपः संयंति चाल्वालो
लकर यामध्ये वसती वर्षाभिः संगच्छंते॥ अन्याश्च मती वर्षाख्या आपश्च उपयंति उपगच्छंति एकमल्पं प्राप्ताभवंति एताश्च मिलित्वा यन्तृ साधयं
ति स्वसाध्य वृष्टि द्वारा न शोभना उर्वं पृणंती त्यादि समानं॥ एवं हि आपो वा अस्य धेतवयं पूर्वं यत्तं वश्याम इत्यादिकं ब्राह्मणविनि योगश्चानु
गृह्यते॥ ॥अथ चतुर्थी॥ ॥तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परियंत्यापः॥ स शुक्रेभिः शिक्वभिरे वदस्मे दीदायानिध्मो घृतनिर्णि
गप्सु॥ ॥तमपांनपातमग्निं अस्मेरा अस्मयमाना दर्परहिता युवतयः युवानं युवराजमिव मर्मृज्यमानाः अत्यर्थमलंकुर्वाणा आपः
म..ज्यो चालंकारयोः परियंति परितो गच्छंति॥ प्राप्नुवंति घृतनिर्णिक् क्षरण शील उदकनिर्णेजनः। यद्वा निर्णिगिति रूपनाम दीप्तिरूपाः सो
पांनपादग्निः अप्सु मेघांतर्गतासु समुद्रगतासु वा मध्य अनिध्मः इंधनरहित एव सन अस्मे अस्माकं रेवद् धनयुक्तमन्नं यथा भवति तथा
शुक्रेभिः शुभ्रैर्निर्मलैः शिक्वभिः स्तोतृभिः दीदाय दीप्यते॥ ॥अथ पंचमी॥ ॥अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषंत्य
न्न॥ कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनां॥ ॥शिक्वभिस्तोतृभिः नारीर्नार्यः तिस्रो देवी देव्यः इडासरस्वती भार
त्याख्याः अव्यथ्याय अव्यथनाय अस्मै देवाय अपांनपातेऽन्नं सोमाख्यं दिधिषंति धारयंति॥ धिषत्याहोली होत्यादिकः व्यत्ययेनांता
देशः धातूनामनेकार्थत्वादत्र धारणार्थः। अप्सु दकेषु कृता इव उप प्रसर्स्रे॥ प्रसरति। सरतेर्लिटि इरयो रे इति रे आदेशः। छा
दसो हलादिशेषाभावः यस्माद्येवं तस्मात्पूर्वसूनां पूर्वं प्रसूत्रेणः सकाशादुत्पन्नानामपां पीयूषं सारभूतं सोमाख्यममृतं सोमांन
पादग्निर्धयति पिबति दिप्ररणः॥ ॥इति द्वितीयस्य सप्तमे द्वाविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥अश्वस्यात्र जनिमास्य च स्वर्द्रुहो
रिषः संपृचः पाहि सूरीन्॥ आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि॥ अत्रास्मिन्नपांनपात्संज्ञके देव अश्वस्य जनि १२१
म जन्म भवति अपांनपादग्निर्विता समुद्रात्। उच्चैःश्रवसो जातत्वात् किं बहुना अस्य चस्वः सूर्यः अरणीयस्य सर्वस्य जगतो
जन्मास्मिन्नेव भवति अयं हि मेघमध्ये वर्तमानो वृष्टिद्वारेण सर्वं जगज्जनयतीति तादृशो पांनपात् द्रुहः द्रोग्धुः रपहर्तुः रिषो हिं

सकस्य च संपृचः संपर्कात् सूरीन् स्तोतॄन् अस्मान्याहि रक्ष आमासु अपरिपक्वासु पूर्षु पूरस्थितत्वात् स्वरूपः परः परस्तादूर्वमानं अप्रमृष्यं अ
प्रधृष्यमानं देवं अरातयः अदातारः पुरुषाः न विनशन्नं प्राप्नुवंति। नशत्तिर्व्याप्तिकर्मा लिङ्यडागमः अनृतानि मायाविनः रक्षांसि च
न प्राप्नुवंति॥ ॥अथ सप्तमी॥ ॥स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति॥ सो अपांनपादूर्जयन्नप्स्वन्तर्वसुदेया
य विधते वि भाति॥ ॥योऽपांनपात् स्वे दमे स्वकीये गृहे नरिश आसीदित्यस्य च धेनुर्माध्यमिका वाक् सुदुघा सुखेन दोग्धव्या भवति
स देवः स्वधां सुखदं पिबाय वर्धयति प्याय्यिर् धातोर्छिः पीभावः सुभु अन्नं। सः सकाशात् दुत्पन्नं दुविलक्षणं मन्नं च
अत्ति भक्षयति सोपांनपात् संज्ञको देवः ऊर्जयन् बलं कुर्वन् अप्सु अंतः मेघस्थास्वप्सु मध्ये विधते परिचरति। यजमानाय वसुदेयाय
धनदानार्थं विभाति विशेषेण दीप्यते॥ ॥अथाष्टमी॥ ॥यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति॥ वया इदन्या भुव
नान्यस्य प्रजायंते वीरुधश्च प्रजाभिः॥ ॥योऽपांनपात् ऋतं मिथ्युदकनामत द्रूनसत्य वान्ता अजस्रो नित्यः एकरूपेण सदा वर्तमानः
उर्विया उरुर्निम्नार्णः अप्सु मेघस्थासु मध्ये शुचिना शुचेन दैव्येन देवसंबंधिना तेजसा आसमंताद्विभाति विशेषेण प्रकाशते। अ
स्यापांनपातः अन्याः अन्यानि भुवनानि गवाणि भूतजातानि वया इत शाखा पववीरुध आपधयः प्रजाभिः स्वकार्याभिः पुष्पफलादिभिः
सह अस्मादेव प्रजायंते च प्ररणः पूर्वमिसार स्वलस्य अस्यापांनपात्रोऽयं चरो अपांनपादाहाल्येषानुवाक्या॥ सूत्रितं च॥ अपांनपा
चरमपांनपादा ह्यस्थादुपस्थमिति॥ ॥सेषा सकेन नवमी॥ ॥अपांनपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः॥ तस्य ज्येष्ठं म
हिमानं वहंतीर्हिरण्यवर्णाः परियंति यह्वीः॥ ॥अपांनपात्संज्ञकोग्निः उपस्थं अपामुपस्थानं अंतरिक्षं आ ह्यस्थात् आश्रितवान् आरूढवा
न स्वरूपं कुर्वन् जिह्मानां कुटिलगतानामपां मध्ये ऊर्ध्वः स्वयमूर्ध्वं ज्वलन् विद्युतं विद्योतमानं मेघं वसानः आच्छादयन् अंतरिक्षमास्था
य वर्षणं करवान तस्य चर्षिनुमानपातः उत्पन्नं प्रकाश्यन्न मेमहिमानं महत्त्वं यदंती वहंत्यः सर्वत्र प्रापयंत्यः यह्वीर्यह्व्यः महत्यः हिर
ण्यवर्णाः नदी नामैतत्॥ हिरण्यवर्णा निर्मलरूपा नद्यः परियंति परितो गच्छंति अपांनपात्साम द्वितीयाहिरस्माकं प्रवहंतो याल्यादिता इतिक्
ततस्त्यानदी यं महत्त्वं सर्वत्र प्रकटयंत्य इव नद्यः प्रवहंतीत्यर्थः॥ ॥अथ दशमी॥ ॥हिरण्यरूपः स हिरण्यसंदृगपांनपात्सेदु हि
रण्यवर्णः॥ हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै॥ ॥सोऽपांनपात् हिरण्यरूपः हृष्यतेरिति रूपं शरीरं सुवर्णमयशरी
रः। हितरमणीयशरीर इति तथा हिरण्यसंदृक् समस्यक् पश्यंतीति संदृशः इंद्रियाणि सुवर्णमयेंद्रियः हितरमणीयेंद्रियो वा सेदु स एवापां
नपात् हिरण्यवर्णः हिरण्यसदृशकांतियुक्तः एवंभूतः सन् हिरण्ययात् सुवर्णमयात् योनेः स्थानात् पर्युपरि निषद्य उपविश्य राजत इति
शेषः। अस्मै इत्थंभूताय अपांनपाते हिरण्यदाः दक्षिणारूपस्य सुवर्णस्य दातारो यजमानाः अन्नं हविर्लक्षणं ददति प्रयच्छंति॥ ॥
॥ ॥इति द्वितीयस्य सप्तमे त्रयोविंशो वर्गः॥ ॥अथैकादशी॥ ॥तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपां॥ यमिंधते युवतयः॥
समित्थं हिरण्यवर्णं घृतमन्नमस्य॥ अस्यापांनप्तुर्देवस्य अनीकं तेजः सत् मृदुरूपं शरीरं चारु शोभनं उत अपि च अस्य नाम संज्ञा च चा
रु शोभनं नपातयतिर्न विनाशयतीति॥ अपांनपात् इति तत् द्युस्थः तत् उभयं अपीच्यं अंतर्हितं नाम नत्वे अंतर्हितं सत् वर्धते यु

243/1914

भा॰ अ॰ २ वनयः संगमनस्वभावा आपः॥ हिरण्यवर्णो हिरण्यसमानतेजस्कं अयमपांनपातं तथा अमुत्रांतरिक्षे समिंधते सम्यक् दीपयंति। अस्यैव अ॰ ७
इदमस्य घृतं क्षरणशीलमुदकमन्नं भक्ष्यं अविंधनो ह्ययं सोऽयं घृताग्निः॥ ॥अथ द्वादशी॥ ॥अस्मै बहूनामवमाय सख्ये यज्ञै-
३३० र्विधेम नमसा हविर्भिः। सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वंद ऋग्भिः॥ ॥अस्मै पुरोवर्तिने बहूनां देवानामवमाय सख्ये
अस्माभिः समानाख्यानायापांनपाते यज्ञैर्यागसाधनैः हविर्भिः चरुपुरोडाशादिभिः नमसा नमस्कारेण च विधेम परिचरेम अस्या-
पांनपातः सानु समुच्छ्रितप्रदेशं संमार्ज्मि सम्यक् शोधयामि। अलंकरोमि वा। मृजूशौचालंकारयोः चादिकोऽपि भावयत्यस्यानि घातप्र-
तिषेधः। दिधिषामि धारयामि च बिल्मैर्भासनैः काष्ठैरिंधनैः अन्योऽयं धारणार्थोऽपि जुहोत्यादित्वात्॥ छांदसः श्लुः। मिपो व्यत्ययेनाडाग-
मः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। दधामि धारयामि च एनं गार्हपत्यादिरूपेण स्थितं। अन्नैर्हविर्लक्षणैः तथा ऋग्भिः मंत्रैः परिवं-
दे परिस्तौमि॥ ॥अथ त्रयोदशी॥ ॥स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहंति। सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह
तन्वा विवेष॥ स ईं स। यमपांनपात संज्ञको देवः वृषा सेक्ता भूत्वा तासु अप्सु गर्भं घस्तात्व गर्भं जनयत आत्मानमेव रूपेण वर्षणार्थं कृतवा-
नित्यर्थः। गर्भभूतो वई सोऽयं माध्यमको वैद्युतोऽग्निः तासां शिशुः पुत्रः संबंधयति मे घस्तात् पिबति अंबिधनो ह्ययं सोऽयं पुत्रस्थानीयः
मद्भिः आपश्चारं हंति लिहंति ह्यास्वादनेन कविवादित्वात् तुलयित्वा सोऽयमपांनपात् वृष्टया सह भूमौ निपतितः अनभिम्लातवर्णः अ-
भितो म्लानः क्षीणो वर्णो यस्य तद्विपरीतोऽयं दीप्यमानः सन् इहास्मिन् काले अन्यस्येव इव ज्वाल्येव धारणे॥ अन्यस्य पार्थिवस्येवा-
ग्नेस्तन्वा शरीरेण काष्ठं धनलक्षणं विवेष व्याप्नोत् भूयावद्व्याप्नो॥ ॥अथ चतुर्दशी॥ ॥अस्मिन्पदे परमे तस्थिवांसमध्वस्मभि-
र्विश्वहा दीदिवांसं। आपो नप्त्रे घृतमन्नं वहंतीः स्वयमत्कैः परि दीयंति यह्वीः॥ परमे उत्कृष्टे अस्मिन्नंतरिक्षलक्षणे स्थाने तस्थिवांसं स्थित-
वंतं गोभिः स्वकीयरूपैः परिदीयंति परिगच्छंति दीयतिर्गतिकर्मा। दीरुक्षयेऽस्य स्यात् परस्मैपदे कुर्वंत्यः नप्ते अपांनपाते घृतं क्षरण-
शीलमुदकमन्नं अन्नं वहंतीर्वहंत्यः॥ ॥अध्वस्मभिः ध्वंसनरहितैः स्वतेजोभिः विश्वहा सर्वदा व्याप्नुवानं दीदिवांसं दीप्यमानमपांनपा-
तं यह्वीः महत्य आपः स्वयमात्मानमिव अत्कैः तनूभिः सततं गंतृभिः॥ ॥अथ पंचदशी॥ ॥अयांसमग्ने सुक्षितिं जनायायां-
समु मघवद्भ्यः सुवृक्तिं। विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः॥ ॥हे अग्ने सुक्षितिं शोभननिवासं त्वां अयांसमुपागमं
किमर्थं जनाय यायास्मदीयपुत्रादिजननार्थं। तथा मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यश्च सुवृक्तिं शोभनावर्जकं तद्विषयं स्तो-
त्रं अयांसमुपागमं किमर्थं जनायास्मदीयाय मह्यं परमे अतः कारणात् यद्भद्रं सर्वे देवा अवंति रक्षंति विश्वं सर्वं तद्भद्रमस्माकं भवतु।
सुवीराः सुपुत्रा वयं विदथे यज्ञे बृहत् प्रौढं स्तोत्रं वदेम उच्चारयाम भूयः॥ ॥इति द्वितीयस्य सप्तमे चतुर्विंशो वर्गः॥ ॥तुभ्यमि-
ति षड्डचं चतुर्थं सूक्तं गार्त्समदं प्रथमा इंद्रो मधुश्च देवता द्वितीयाया मरुतो माधवश्च तृतीयायास्त्वष्टा शुक्रश्च तुर्याया आ- ३३०
ग्निः शुचिश्च पंचम्या इंद्रो नभश्च षष्ठ्या मित्रावरुणौ नभस्यश्च॥ तथा चानुक्रांतं। तुभ्यं षट् कृतव्यं तु जागतं त्विति हस्तात्रैष्टुभं हि तिज-
त्याग्यपृक्तानि ऋत्विक्प्रैषैः प्रैषितस्य यज्ञस्य जनता यागो पर्णा प्रैषाणामुपरि दृष्टदेवताः पक्वान्नो होत्रादिभिः कर्मणा च पत्नी-
याः॥

तथा च सूत्रितं। इपा यादृढ्व कृतुयाजानामित्युपक्रम्य तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादशैतेन॥ ॥तत्र प्रथमा॥ ॥तुभ्यं हिन्वानो
वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः॥ पिबेंद्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे॥ ॥हे इंद्र तुभ्यं त्वदर्थं हिन्वानः
प्रेर्यमाणः सोमः गाः गोविकाराणि दधिपयः प्रभृतीनि श्रयण द्रव्याणि वसिष्ट वसीवर्णात्या आपश्च वसिष्ट वस्ते आच्छादयति तैः संयुज्य-
त इत्यर्थः। नरा यज्ञस्य नेतार अध्वर्यवः सीमेनं सोमं अविभिः अवयवलोममयैर्दशापवित्रैः अद्रिभिर्ग्रावभिश्च अधुक्षन् क्षारयन्। ग्रावभि-
रभिषुत्य दशापवित्रेण पुनंतीत्यर्थः। हे इंद्र यस्त्वमीशिषे सर्वस्य जगत ईश्वरो भवसि त्वं प्रथमः अन्येभ्यो देवेभ्यः पूर्वो भावी सन् स्वाहा
स्वाहाकारेण प्रहुतं प्रकर्षेण अग्नौ क्षिप्तं वषट्कृतं वषट्कारेण च युक्तं तं सोमं होत्रात् होतुर्यागाद्वासमंतात् पिब॥ ॥अथ द्वितीया॥ ॥यज्ञैः सं-
मिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः॥ ॥हे मरुतो यज्ञैर्या-
गैः संमिश्लाः संयुक्ताः पृषतीभिः स्ववाहनभूताभिः पृषद्वर्णाभिर्वडवाभिर्युक्ता यामन् यामनि गमनसाधने रथे स्थिताः ऋष्टिभिः स्वकी-
यैरायुधैः शुभ्रासः शुभ्राः शोभमानाः उत अपि च अंजिषु आभरणेषु प्रियाश्च हे भरतस्य सूनवः सर्वस्य जगतो भर्तुः रुद्रस्य पुत्राः
दिवो नरः दिवोंतरिक्षस्य नेतारः एवंभूता हे मरुतः ते यूयं बर्हिरास्तीर्णं बर्हिषि आसद्य उपविश्य पोत्रात् पोतुर्यागात् सोममापिब-
त। तत्रीयस्य नेऽभ्यमनदुत्वपानट्टः प्रोक्तितया स्याच॥ तथा च सूत्रितं। अमेव नः सुहवा आ हि गंतन इति द्राविणोदसं पिबतं मध्वो अस्यति
॥ ॥सेषा ऋक् तृतीया॥ ॥अमेव नः सुहवा आ हि गंतन नि बर्हिषि सदतना रणिष्टन॥ अथा मंदस्व जुजुषाणो अंधसस्त्वष्टर्देवेभिः
र्जनिभिः सुमद्गणः॥ ॥इव शब्द एवार्थे अवधारणे सुहवाः शोभनाह्वानाः त्वष्टृप्रभृतयः नोऽस्मान् अमेव सह एव आगंतन आगच्छत। गम-
च्छांदसः शपो लुक्। तप्तनप्तनथनाश्चेति तनबादेशः। हिशब्दः पूरणः आगत्य च बर्हिषि वेधा मास्तीर्णे निषदतन निषण्णा भवत।
सदेश्छांदसः सीदादेशाभावः उपविश्य च रणिष्टन रमध्वं। रणशब्दार्थः अत्र क्रीडार्थो वर्तते धातूनामनेकार्थत्वात्। अस्माकं छं-
दसो देवः॥ पूर्ववत्तनबादेशः॥ अथानंतरं हे त्वष्टः देवेभिः देवैः जनिभिः देवपत्नीभिश्च सुमद्गणः शोभनगणस्त्वं अंधसः सोम-
लक्षणस्यान्नस्य द्वितीयार्थे षष्ठी सोमलक्षणमन्नं जुजुषाणः सेवमानो मंदस्व तृप्तो भव॥ ॥अथ चतुर्थी॥ ॥आ वक्षि देवाँ इह वि-
प्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु। प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि॥ ॥हे विप्र मेधाविन्नग्ने
देवान् यज्ञस्य अनिद्राविने आ वक्षि आवह। यक्षि च तान् यज च॥ हे होतः देवानामाह्वातः त्वं च उशन् स्वर्दीयं कामयमानः सन् त्रि-
षु योनिषु गार्हपत्यादिलक्षणेषु नि षद उपविश उपविश्य च प्रस्थितं होमार्थमुत्तरवेदिं प्रत्यानीतं सोम्यं सोममयं मधु प्रति वी-
हि प्रतिकामय स्वकामयित्वा च आग्नीध्रात् आग्नीध्रयागात् सोमं पिब पीत्वा च तव भागस्य त्वदीयेन भागेन तृप्णुहि तृप्तो भव॥ ॥
अथ पंचमी॥ ॥एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः॥ तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृप-
त्पिब॥ ॥हे इंद्र स्यः एषः सोमः ते तव तन्वः शरीरस्य नृम्णवर्धनः बलस्य वर्धकः तुभ्यं सुत उत्कृष्टं तेन संबंधः येन सोमेन प्र-
दिवि पुराणे। त्वयि बाह्वोर्हस्तयोः सह परेषामभिभवलक्षणं सामर्थ्यं ओज स्तत्कारणभूतं बलं च हितः निहितं भवति गम्य

245
1914

भा०अ०२ त्वष्टः हे मघवन् धनवन् इंद्र तुभ्यं त्वदर्थं ना इमः सोमः ऋतो अध्वर्युभिरभिषुतः तुभ्यं होतुं आभृतः इतरे वेषां मत्या हृतश्च अस्य इमं सोमं अ०७
ब्राह्मणात् ब्राह्मणाछंसिनो याजनात् पूत तव्यं स्वं आपिब आभिमुख्येन पिब। क्रिया ग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वात् दस्येति
१३१ चतुर्थ्यर्थे षष्ठी॥ ॥अथ षष्ठी॥ ॥ जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु॥ अच्छा राजाना नम एत्यावृतं प्रशास्त्रा
दापिबतं सोम्यं मधु॥ ॥हे मित्रावरुणौ मदीयमिमं यज्ञं जुषेथां मम हवस्य हवमाह्वानं युवं च नमणि षष्ठी। बोधतं मबगच्छतं।
तथा सत्तः निषण्णः मदीयो होता पूर्व्याः चिरंतनीः निविदः वाक् नामैतत् शास्त्रलक्षणा वाचः अनुशंसति तिस्रोपः इष्टाभिः स्तुत
स्य स्तोत्रस्यानुगुण्येन आदीनि शस्त्राणि शंसतीत्यर्थः॥ अपि च नमः सोमलक्षणमन्नं आवृतं ऋत्विग्भिर्वेष्टितं राजाना रा
जमानौ युवां अच्छाभिमुख्येन एति गच्छति। प्राप्नोति तादृशं सोम्यं सोममयं मधु मादकं हविः प्रशास्त्रात् प्रशास्तुर्यागात् आपिबतं
आभिमुख्येन पिबतं॥ ॥इति द्वितीयस्य सप्तमे पंचविंशो वर्गः॥ ॥इति श्रीमद्राजाधिराज परमेश्वर वैदिक मार्ग प्रवर्तक श्रीवी
रबुक्क भूपाल साम्राज्य धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थ प्रकाशे ऋक्संहिता भाष्ये द्वितीयाष्टके सप्तमो
ध्यायः॥ ॥ ॥० ० ०

श्रीगणेशाय नमः॥ ॥अथ द्वितीयाष्टकस्याष्टमोध्याय आरभ्यते॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वं
दे विद्यातीर्थ महेश्वरं॥ शुभं भवतु॥ ॥अथ द्वितीय मंडलस्य चतुर्थानुवाके मंदस्वेति षडृचं पंचमं सूक्तं गार्त्समदं॥ मंदस्वेत्यनुक्रां
तं॥ पूर्वत्र ऋतव्यं त्वनुक्तं आगतं लिखितं तु आद्यप्रयोगादिदमपि जागतमृतव्यं॥ तत्र प्रथमस्य ऋचो द्रविणोदो देवताका पंच स्याश्विनी षष्ठ्या
ग्नेयी॥ दशरात्र पंचमे दनि ऋतुयाजेषु॥ प्रेषान् कृशिरस्कान् कृत्वा तैः प्रैषैः प्रेषितव्यं यष्टव्यं च तत्र संप्रमाद्दीनां प्रेषाणामुपरिष्टा
त मंदस्वेत्याद्याः षडृचः क्रमेण प्रक्षेपणीयाः सूत्रितं तु पूर्वमेवोदाहृतं॥ ॥तत्र प्रथमा॥ ॥मंदस्व होत्रादनु जोषमंधसोऽध्वर्य
वः संपूर्णां वष्टास्विचं। तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ ॥हे द्रविणोदः द्रविणसो धनस्य दातः ए
तनामक देव अंधसः देवानामन्नरूपस्य सोमस्य सोमन होत्रात् होतृकर्तृकाद्यागात् अनु जोषं प्रीतिमनु मंदस्व॥ ॥हे अध्वर्यवः स द्रविणोदाः
पूर्णां आसिचं सिच्यमानां हुतिं वष्टि कामयते अतस्मै ते द्रविणोदसे नय एतं सोमं भरत प्रापयत यजत तद्वशस्तत्कामो द्रविणोदाः ददि
र्दाता युष्माकमभीष्टफलस्य दाता भवतीति शेषः॥ किंच हे द्रविणोदः होत्रात् होतुर्यागात् ऋतुभिः इषमासाभिमानिभिः ऋतुदेवैः स
ह सोमं पिब॥ ॥अथ द्वितीया॥ ॥यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते। अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्र
विणोदः पिब ऋतुभिः॥ ॥हे द्रविणोदः यमु यं त्वामेव पूर्वं होतृकर्तृके सोमयागे हुवे आहूतवानस्मि इदं संप्रति तं तमेव पोतृक
र्तृके सोमयागे हुवे आह्वयामि। स त्वमेव द्रविणोदाः हव्यः ह्वातव्यः उ इति पूरणे। ददिरभीष्टफलस्य दाता यो नाम यः खलु प
त्यते ईश्वरो भवति तस्मै द्रविणोदसे। सोम्यं सोमात्मकं मधु अध्वर्युभिः प्रस्थितं प्रणीतमासीत् हे द्रविणोदः पोत्रात् पोतुर्यागात् १३१

243
1914

ऋतुभिः ऋतुसंज्ञकैः ऋतुपत्यैः देवताभिः नेष्टत्रस्मै द्रविणोदसे अस्य सोमं पिब॥ ॥अथ तृतीया॥ ॥मेद्यंतु ते वह्नयो येभिरीयसेऽरिषण्य
न्वीळयस्वा वनस्पते। आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ ॥हे द्रविणोदः येभिर्यैर्वाहैः ईयसे प्राप्नोषि। ते वह्नयो वोढार इति यास्क
नातत्वात्। ते मेद्यंतु तर्प्यंतु हे वनस्पते वनानां पते अरिषण्यन् अहिंसन् वीळयस्व दृढो भव। हे धृष्णो धर्षकत्वं आयूय आगत्य अ
भिगूर्य उद्यम्य नेष्ट्रात् नेष्टुर्यागात् ऋतुभिः सह संततैः सह सोमं पिब॥ ॥अथ चतुर्थी॥ ॥अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रा
दजुषत प्रयो हितं। तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः॥ ॥अच्छावाकस्येयं॥ यो द्रविणोदाः होत्रात् होतुर्या
गात् सोममपात् अपाद्यात् उत किंच पोत्रात् पोतुर्यागात् अमत्त सोमं पीत्वा अमाद्यत्॥ उत अपि च नेष्ट्रात् नेष्टुर्यागात् हितं दत्तं प्रयः देवा
नामन्नरूपं सोमं अजुषत असेवि स द्राविणोदसः हविरुपविद्रविणस्य प्रदातृभ्य ऋत्विग्भ्यो हितः ऋत्विजोत्र द्रविणोदस उच्यंते।
हविषा दातारः स्तंवं नयंतीति यास्केनोक्तत्वात्॥ तादृशो द्रविणोदाः अमृक्तं दशापवित्रेण मृष्टं अमर्त्यं अमरण साधनं तुरी
यं पात्रं चतुर्थं पात्रस्थं सोमं पिबतु॥ ॥अथ पंचमी॥ ॥अर्वांचमद्य यय्यं नृवाहणं रथं युंजाथामिह वां विमोचनं। पृंक्तं हवींषि म
धुना हि कं गतमथा सोमं पिबतं वाजिनीवसू॥ हे अश्विनौ अद्यास्मिन् दिनि यय्यं यागं गंतारं नृवाहणं नेतारौ युवयोर्वोढारं इह यज्ञे वां
युवयोर्विमोचनं विमोचयितारं रथं अर्वांचं यथावर्गं भवति। यथा युंजाथां किंच मधुना स्वादुरसेन हवींषि पृंक्तं संयोजयतं अथ च
आगतं आगच्छतं। हि कमिति पूरणे। अथानंतरं हे वाजिनीवसू वाजिनीवसू अन्नेन वासयितारौ बलस्य धनौ वा सोमं पिबतं॥ ॥
अथ षष्ठी॥ ॥जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिं। विश्वेभिर्विश्वाँ ऋतुना वसो मह
उशन्देवाँ उशतः पायया हविः॥ ॥हे अग्ने समिधं जोषि जुषस्व आहुतिं जोषि। जुषस्व ब्रह्म स्तोत्रं जन्यं जाते भ्यो हितं जोषि जुषस्व
सुष्टुतिं शोभन स्तोत्रं जोषि जुषस्व॥ किंच वसो सर्वेषां वासक भूत हे अग्ने उशतः कामयमानान् महः महतः विश्वान् सर्वान् देवान्
उशन् कामयमानस्त्वं ऋतुना तत्पस्य संज्ञकेन सहैतत्यान्विश्वेभिः सर्वैर्देवैः सह हविः हविरूपं सोमं पायय॥ ॥इति द्वितीयाष्टके
अष्टमाध्यायस्य प्रथमो वर्गः॥ ॥उदु ष्य इत्येकादशर्चं षष्ठं सूक्तं गार्त्समदं त्रैष्टुभं सवितृदेवताकं॥ अत्रानुक्रमणिका॥ उदु
ष्य इत्येकादश सावित्रमिति। ऋग्विधाने पंचमेहनि वैश्वदेवशस्त्रे एतत्सूक्तं सावित्रं निविद्धानीयं। सूत्रं च इति खंडे सूत्रितं॥ उदु ष्य
स्य उदु ष्य देव इति गात्समदमिति॥ ॥तत्र प्रथमा॥ ॥उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात्। नूनं देवेभ्यो
वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ॥ ॥स्यः स्यद्दीप्यमानः सविता सवाय लोकानां प्रसवाय अनुज्ञानाय शश्वत्त
मं प्रतिदिनं उदस्थात् उत्तिष्ठति॥ कीदृशः सविता तदपा तत्प्रसवकर्मं॥ अपः अप्न इति कर्मनामसु पाठात्॥ वह्निर्वोढा जगतः।
किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यो रत्नं धनं विदधाति प्रयच्छति। हीति पूरणे॥ अथ अपि च वीतिहोत्रं कांतयज्ञं यजमानं स्वस्तौ
अविनाशे क्षेमे अभजत् शोभनं करोतु॥ यद्वा पि स्वस्तिशब्देन विभक्तयंत निर्दिष्टेन द्वंद्वः परः स्तथाप्य पर्यवसानादर्थपरो भव
ति॥ ॥अथ द्वितीया॥ ॥विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति॥ आपश्चिदस्य व्रत आ निमृग्रा अयं

भा॰ अ॰२ ज्ञि इत्यतो रमते परिज्मन्॥ देवो द्योतमानः सविता पृथुपाणिः महत्कारः विश्वस्य सर्वस्य जगतः सुखाय ऊर्ध्व उदितः सन् बाहू बाहू अ॰८
प्रसिसर्ति प्रसारयति आ पश्चित्॥ अपाश्चि अस्य व्रते प्रसवाख्ये कर्मणि सति व्रतं कर्वरमिति तं नामसु पाठात्॥ आस्यंदत इति शेषः
१३२ ।ताश्च निमृग्राः नितरां शोधयित्र्यः। गंगादिरूपेण जगत्या वर्ततामित्यर्थः॥ अयंचिद्वातः। अयमपि वायुः परिज्मन् परितो गंतव्या
मंतरिक्षे रमते॥ ॥अथ तृतीया॥ ॥आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः॥ अह्यर्षूणां चिन्न्ययां अविष्या
मनु व्रतं सवितुर्मोक्यागात्॥ ॥यान् गच्छन् सविता आशुभिश्चित्। शीघ्रगामिभिरपि रश्मिभिर्विमुचाति विमुच्यते नूनमिति प्र
रणः। अतमानं चित् अततं गच्छंतमपि जनं एतोः गमनात् अरीरमत् उपरमयति। किंच अह्यर्षूणां अहिमा हंतारं शत्रुं अर्षंति
अभिगच्छंतीत्यहिमर्षवः तेषामपि अविष्यां गमने छां न्ययान् नियच्छन् सवितुः प्रेरकस्य सूर्यस्य व्रतं कर्म अनुपश्चात्। मोकी
रात्रिः मोकी शोकीति रात्रिनामसु पाठात्। आगच्छति। सवितुश्च द्यो परितो रात्रिरागच्छतीति यावत्॥ ॥अथ चतुर्थी॥ पुनः
समव्यद्विततं वयंतीम ध्या कर्तोर्न्यधाच्छक्म धीरः॥ उत्संहायास्थाद्व्यृतूंरदर्धररमतिः सविता देव आगात्॥ वयंतीव वस्त्रं वयंती
नारीव रात्रिः विततं आलोकं पुनः समव्यत् संवेष्टयति पुनः शब्दः पूर्वं धुरण्यवमकार्षपुरिति द्योतयति। धीरः प्राज्ञोपि सर्वलोकः कर्तोः
क्रियमाणं कर्म कर्तोः कर्तना इति तं नामसु पाठात् शक्मं कर्तुं शक्यमपि मध्या मध्ये उपक्रांतं कर्म अपरिसमाप्यैवेत्यर्थः। न्यधात् नि
हितवान् सवितर्युपरते इति शेषः। स चालोकः सं हाय शय्यां विहाय उदस्थात् अवतिष्ठते कर्मकर्तुं पुनरुत्तिष्ठति। संपूर्वो जिहातिः श
य्योपरित्यागे वर्तते। तथा च श्रूयते। कलिः शयानो भवति संजिहानस्तु द्वापर इति॥ सविता सर्वस्य प्रसविता सूर्यस्य अरमतिः
अनुपरतिः देवः द्योतमानः आगात्। आगच्छति उदेतीति यावत्। अतः कालविशेषांश्च व्यदर्दः विदारयतीति। ॥अथ पंचमी
॥ ॥नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः॥ ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा॥
॥ ॥प्रभवः प्रभूतः अग्नेः शोकः। तेजः दुर्यः गृह्यः गृहभवः नानौकांसि यजमानानां पृथग्भूतान् गृहान् वितिष्ठते अधिति
ष्ठति विश्वमायुः सर्वमन्नं वाधितिष्ठति। आयुः सन्नंतसंयन्नामसु पाठात् माता उषाः सवित्रा अन्विषितं प्रेषितं अस्य केतुं प्रज्ञापकं
अग्नेः ज्येष्ठं प्रथमं अग्निहोत्राख्यं भागं सूनवे अग्नये अधात् आदधाति॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य द्वितीयो वर्गः॥
॥ ॥अथ षष्ठी॥ ॥समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत्॥ शश्वां अपो विकृतं हित्व्यागादनु व्रतं स
वितुर्दैव्यस्य॥ ॥जिगीषुः विजयेच्छुः योद्धा विष्ठितः युद्धार्थं प्रस्थितः समाववर्ति समावर्तयति विश्वेषां अमाचरतां गमनानां अ
माभूत् अमा गृहमिति॥ गृहनामसु पाठात्। गृहं प्रतिकामो भूत् भवति शश्वान् नित्यं कर्मरतः अपः कर्म विकृतं अर्धकृतं हित्वा हि
त्वा आगात् गृहं आगच्छति तत्सर्वं दैव्यस्य दिविभवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतं अस्तमयाख्यं कर्मानुजायत इत्यर्थः॥ ॥अथ १३२
सप्तमी॥ ॥त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः॥ वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनंति
॥ ॥हे सवितस्त्वया अप्सु अंतरिक्षे आपः पृथिवीति अंतरिक्षनामसु पाठात्। तत्साधारं वा हितं निहितं अप्यं अप्सु संबंधि

नं भागं धन्वानु निर्जलप्रदेशान् अनु मृगयसः मृगयमाणा मृगाः आसमंतात् वितस्थुः रक्षितिष्ठंति किंच वनानि वृक्षा ॥ 249/1914
विभ्यः पक्षिभ्यः आ वा मा इति रूपेण त्वया भागादत्तः अस्य देवस्य सवितुः तानि तानि दृष्टानि व्रतानि कर्माणि न किर्मिनंति कुपिन
हिंसंति। ॥अथाष्टमी॥ ॥याद्राध्यं वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः॥ विश्वो मार्तांडो व्रजमा पशुर्गात्स्थशो जन्मा
नि सविता व्याकः॥ ॥वरुणः याद्राध्यं यातां गच्छतां गंतव्यं सरा धनीयं आसुं यां शुभ निशितं अतीक्ष्णां सततकरमिति याव
त् यानिं स्थानं निमिषि निमेषे सवितुः गमयतीति विश्वमाप्यं प्राणिभ्यः प्रयच्छति वरुणस्य रात्रिनिर्वाहकत्वात्। जर्भुराणः शयं गच्छ
न् विश्वः सर्वो मार्तांडः मृतानजितादि दुत्पद्यमानः पक्षी आगात्। आगच्छति। विश्वः पशुरपि व्रजं गोष्ठमागात् सविता प्रेरकः
स्थशः स्थानं स्थानं जन्मानि तानि भूतानि व्याकः पृथक्करोति ॥अथ नवमी॥ ॥न यस्येंद्रो वरुणो न मित्रो व्रतमर्यमा न मि
नंति रुद्रः॥ नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः॥ ॥यस्य सवितुर्देवस्य व्रतं प्रसवाख्यं कर्म इंद्रो न मिनाति न हिनस्ति वरुणश्च
न मिनाति मित्रश्चार्यमा न मिनाति रुद्रश्च न मिनाति अरातयः शत्रवश्च न मिनंति मिनातीति श्रुतमाख्यानं यथायोगं विपरिणामेन प्रत्येकम
भिसंबध्यते॥ तं सवितारं सर्वस्य प्रेरकं देवं द्योतमानं इदं इदानीं नमोभिः अन्नरूपैर्हविर्भिः सह हुवे नमः आयुरित्यन्ननामसु पाठात्। स्वस्ति
क्षेमाय हुवे स्तौमि॥ ॥अथ दशमी॥ ॥भगं धियं वाजयंतः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः॥ आये वामस्य संगथे रयीणां प्रिया
देवस्य सवितुः स्याम॥ ॥भगं भजनीयं धियं ध्यातव्यं पुरंधिं पुरस्य धारयितारं च हुवे नर्त्तं वा सवितारं। पुरंधिर्बहुधीरिति यास्कः। वाजयंतः
वाजिनं वाजिनं कुर्वंतः विभक्तिव्यत्ययः॥ नः स्तुवतोस्मान् नराशंसः नरैः शंसनीयः ग्नाः पतिः देवपत्नीनां पतिः कामं संपतिर्वा॥ तथा च श्रूय
ते ग्नास्त्विश्वा इति ग्ना वा अनु देवपत्नीरिति च॥ सविता अव्याः अव्यात्। किंच वामस्य धनस्य रयीणां पश्वनां च तथा च श्रूयते। पशवो
वै रयिरिति। आये आगमने संगथे संगमने च निमित्ते देवस्य द्योतमानस्य सवितुः प्रेरकस्य वयं प्रियास्याम भवेम॥ ॥अथैकादशी॥ ॥
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आगात्॥ शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे॥ ॥हे सवितः
अस्मभ्यं त्वया दत्तं तत्प्रसिद्धं काम्यं कमनीयं राधः धनं दिवः द्युलोकात् अद्भ्यः अंतरिक्षलोकात् पृथिव्याः भूमेश्च आगात् आगच्छतु॥ किंच स्तो
तृभ्यः स्तोतॄणां आपये बंधवे तदुशंसाय बहुभिः शंसनीयाय भवाति भवेत्। उरुशंसाय बहुस्तुतये जरित्रे स्तोत्रे मह्यं जरिता कारुरिति
स्तोतृनामसु पाठात्॥ हे सवितः तत्प्रयच्छ॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य तृतीयो वर्गः॥ ॥ग्रावाणेवेत्यष्टर्चं सप्तमं सूक्तं गार्त्सम
दं त्रैष्टुभमाश्विनं ग्रावाणेवाश्विनमित्यनुक्रांतत्वात्॥ प्रवर्ग्ये भिष्टव पूर्ववदस्य विनियोगः॥ सूत्रितं च ग्रावाणेव तद्द्यावापृथिवी
इति। प्रातरनुवाकाश्विनक्रतौ त्रैष्टुभे अस्य सूक्तं। सूत्रितं च। ग्रावाणेव नासत्याभ्यामिति त्रीणीति॥ ॥तत्र प्रथमा॥ ॥ग्रावाणेव तदिदर्थं
जरेथे गृध्रेव वृक्षं निधिमंतमच्छ॥ ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा॥ ॥हे अश्विनौ ग्रावाणेव अरातिं प्रति प्रापितौ पाषा
णाविव। तदिदर्थं अर्थं तारयतेर्वा। अर्ता तीति यास्कः। न मरातिमित्यर्थः॥ इति पूरणः। जरेथे जरेथे अरातिं बाधेथां। यद्वा यथा ग्रा
वाणौ क्षिप्तौ तौ दैनौ भवतः। ग्रं गच्छतः। तथा ततमर्थं गंतारं जरेथे ग्लानौ कृतमित्यर्थः। जरति स्तुतिकर्मा। किंच गृध्रेव गृ

भा॰अ॰२ प्रातिवनपक्षिणाविव रक्षं कलितेरक्षं निधिमंतं धनवंतं यजमानं। अच्छ आगच्छतामिति शेषः। विदथ्येव विदथः सवनमिति यज्ञनाम तत्र भवौ।
उक्थशासा उक्थशंसितारौ ब्रह्माणा ब्राह्मणाविव जन्याजनपदेषु दूतेव राज्ञा प्रेषितौ दूताविव पुरुत्रा बहुभिः पुरुषैर्ह्वातव्यौ युवां अत्र उपमेय
३३३ द्वित्वानुसारेणोपमानद्वित्वं॥ ॥अथ द्वितीया॥ ॥प्रातर्यावाणा रथ्येव वीरा जेव यमा वरमासचेथे॥ मेने इव तन्वा३ शुंभमाने दंपतीव क्र
तुविदा जनेषु॥ ॥हे अश्विना प्रातर्यावाणा प्रातरेव यज्ञार्थं गंतारौ रथ्येव रथिनाविव वीरा शूरौ स्वकर्मणि शूरौ अजेव अजाविव छागाविव य
माय मत्तौ मनेइव नार्याविव तन्वा शरीरेण शुंभमाने शोभमाने दंपतीव जायापती इव संगतौ जनेषु विषयेषु क्रतुविदा कर्मविदौ युवां वरं सं
भजनीयं आमचेथे आगच्छतं॥ ॥अथ तृतीया॥ ॥शृंगेव नः प्रथमा गंतमर्वाक् छफाविव जर्भुराणा तरोभिः॥ चक्रवाकेव प्रति वस्तोरुस्रार्वा
ञ्चा यातं रथ्येव शक्रा॥ ॥हे अश्विना शृंगेव पशोः शृंगे इव नः प्रथमा देवानां प्रथमौ शफाविव अश्वादेः खुराविव तरोभिर्वेगैर्जर्भुराणा भ्रमं
तौ युवां नोस्मान्प्रति अर्वाक् अभिमुखं आगंतमागच्छतं। किंच हे अश्विना वस्तोः प्रतिअहः प्रति चक्रवाकाविव हे उस्रौ उत्कृष्टौ मुत्सारको
गमनशीलौ वा रथ्येव रथिनाविव हे शक्रा स्वकर्मशक्तौ अर्वांचा अस्मदभिमुखौ आयातं गच्छतं॥ ॥अथ चतुर्थी॥ ॥नावेव नः पारयतं युगे
व नभ्येव न उपधीव प्रधीव॥ श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान्॥ ॥हे अश्विना नावा इव नावाविव सिंधून् नोस्मान् दु
र्गाणि पारयतं युगेव युगाविव यथा रथस्य युगे नभ्येव यथा च रथचक्रनाभिफलके विविस्रसः पातमस्मान् उपधीव यथा तत्पार्श्वफलक
उपधी इव यथा वा चक्रवाधकवल्यौ रथं पारयतः तथा नोस्मान् दुर्गाणि पारयतं। किंच श्वानेव॥ श्वानाविव यथा श्वानौ बाधकेभ्यो
रक्षंतौ नतौ हिंसामपनयतः तथा नोस्माकं तनूनामंगानामरिषण्या अहिंसकौ भवतं। खृगलेव तनुत्राणे तनूहिंसायाः रक्षतः तथापि
विस्रसः जरायाः अस्मान् युवां पातं॥ ॥अथ पंचमी॥ ॥वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक्॥ हस्ताविव तन्वे३ शंभविष्ठा
पादेव नो नयतं वस्यो अच्छ॥ ॥हे अश्विना वाता इव वाताविव अजुर्या अजरौ तमग्नयान घा इव नद्याविव रीतिः गत्येव नैकवचनं अक्षी गंतारौ
युवां अक्षी इव चक्षुषा दर्शनेन अर्वाक् अस्मदभिमुखं आयातमागच्छतं। किंच हस्ताविव हस्ताविव पादेव पादाविव तन्वे शरीराय शंभविष्ठा
सुखस्य भावयितृतमौ युवां नोस्मान् वस्यः वसीयः श्रेष्ठं धनं अच्छ प्रति नयतं प्रापयतं॥ ॥इति द्वितीयस्याष्टमे चतुर्थो वर्गः॥ ॥
अथ षष्ठी॥ ॥ओष्ठाविव मध्वास्ने वदंता स्तनाविव पिप्यतं जीवसे नः॥ नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे॥ ॥हे
अश्विना ओष्ठाविव आस्ने आस्याय मधुररसवद्वचनं वदंतौ स्तनाविव स्तनाविव नः अस्माकं जीवनाय पिप्यतं प्याययतं किंच नासेव नासिकेव
नः अस्माकं तन्वः तनोः रक्षितारा रक्षितारौ भूतं भवतं अपि च कर्णाविव अस्मे अस्माकं सुश्रुता सम्यक्श्रवणे युवां भूतं भवतं॥ ॥अथ स
प्तमी॥ ॥हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि॥ इमा गिरो अश्विना युष्मयंतीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतं॥ हे
अश्विना हस्ताइव हस्ताविव शक्तिं सामर्थ्यं नोस्माकं अभि संददी आभिमुख्येन सम्यक् प्रयच्छंतौ भवतं। किंच क्षामा इव द्यावापृथिव्याविव र
जांसि स्थानानि उदकानि वा उदकं रज उच्यत इति यास्कः। नोस्माकं समजतं प्रेरयतं अपि चाश्विना हे अश्विना इमा गिरः अस्माभिः
कृताः स्तुतीः युष्मयंतीः युवामिच्छंतीः स्वधितिमसिं क्ष्णोत्रेणेव तेजनशाणेन संशिशीतं सम्यक् तीक्ष्णीकुरुतं॥ ॥अथाष्ट॥ ३३३

मी॥ ॥एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन्। तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः॥ ॥अश्विना हे
अश्विनौ वां युवयोः एतानि वर्धनानि वृद्धिसाधनानि ब्रह्म ब्रह्माणि मंत्रान् स्तोमं स्तोत्रं च गृत्समदा अक्रन् अकुर्वन् तानि ब्रह्माणि नरा नेता
रौ जुजुषाणा भजमानौ प्रीयमाणौ युवां उपयातं उपगच्छतं। किंच सुवीराः शोभनपुत्रा वयं विदथे यज्ञे युवां बृहद्वदेम प्रभूतं स्तुमः॥ ॥
इति द्वितीयाष्टके अष्टमाध्यायस्य पंचमो वर्गः॥ ॥सोमापूषणेति षडृचं अष्टमं सूक्तं गार्त्समदं त्रैष्टुभं सोमापूषदेवताकं। तथा चानुक्रां
तं॥ सोमापूषणा षड्सोमापौष्णमंत्या धर्चाप्यदितिर्वाति॥ अंत्यर्चोर्धर्चस्याः अदितिर्वा देवता। सोमापौष्णे पशौ
रा... हविषामाप्यायस्व। क्रमेणानुवाक्या... याज्या। अग्नीषोमाविति खंड सूत्रितं। सोमापूषणा जनना रयीणामिति
॥ ॥तत्र प्रथमा॥ ॥सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः॥ जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य
नाभिं॥ ॥सोमापूषणा हे सोमापूषणौ युवां रयीणां धनानां जनना जनयितारौ दिवः द्युलोकस्यापि जनयितारौ पृथिव्याः पृथिव्या
श्च जनयितारौ भवतः। किंच जातौ जातमात्रावेव युवां विश्वस्य भुवनस्य कृत्स्नस्य जगतः गोपौ गोपायितारौ देवा अमृतस्यामरणस्य ना
भिं कृतवंतः अकृण्वन् अकार्षुः॥ ॥अथ द्वितीया॥ ॥इमौ देवौ जायमानौ जुषंतेमौ तमांसि गूहतामजुष्टा। आभ्यामिंद्रः पक्वमामास्व
तः सोमापूषभ्यां जनदुस्रियासु॥ ॥इमौ सोमापूषणौ देवौ द्योतमानौ जायमानौ उत्पन्नमात्रावेव जुषंत सर्वे देवा अजुषंत सेवितवंत
इति यावत्। किंच इमौ सोमापूषणौ अजुष्टा असेव्यानि तमांसि सर्वस्य गूहमानानि गूहतः। किंच आभ्यामेताभ्यां सोमापूषभ्यां सह इंद्रः आ
मासु तरुणीषु उस्रियासु गोषु अंतर्मध्ये ऊधः प्रदेशे पक्वं परिपक्वं पयो जनत् जनयति॥ ॥अथ तृतीया॥ ॥सोमापूषणा रजसो
विमानं सप्तचक्रं रथमविश्वमिन्वं। विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पंचरश्मिं॥ ॥वृषणा वृषणौ कामानां वर्षितारौ सो
मापूषणौ हे सोमापूषणौ रजसो लोकस्य लोकार्जनस्य यंत इत्याह। विमानं परिच्छेदकं सर्वमानमित्यर्थः। सप्तचक्रं सप्त ऋतुचक्रं
यादृशा मासः सप्तमकऋतुः अस्ति यादृशा मासद्वयं श्रुतः। अविश्वमिन्वं विश्वस्यापरिच्छेद्यं विषूवृतं विषु सर्वत्र परिवर्तमानं पंच
रश्मिं पंचऋतुरश्मिं हेमंतशिशिरयोः समासेन पंचर्तवः। पंचते ऋतवस्तु द्वादश मासाः पंचर्तवो हेमंतशिशिरयोः समासेनेति मनसा
युज्यमानं मनोमात्रेण युज्यमानं तं प्रसिद्धं रथं जिन्वथः अस्मान् प्रति प्रेरयथा॥ ॥अथ चतुर्थी॥ ॥दिव्य१न्यः सदनं चक्र उच्चा पृ
थिव्यामन्यो अध्यंतरिक्षे॥ तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं विष्यतां नाभिमस्मे॥ ॥अन्यः तयोरेकः पूषा उच्चा उच्चैः उच्छ्रिते
दिवि द्युलोके सदनं स्थानं चक्रे चकार अन्यः अपरः सोमः पृथिव्यामोषधिरूपेण अध्यंतरिक्षे अंतरिक्षे च चंद्ररूपेण सदनं चक्रे तौ सोमा
पूषणौ युवां पुरुवारं बहुभिर्वरणीयं पुरुक्षुं बहुकीर्तिं रायस्पोषं धनस्य पुष्टं पश्वात्मकं धनमित्यर्थः। तथा च ब्राह्मणं। पशवो वै रा
यस्पोष इति। अस्मे अस्माकं नाभिं विश्वस्य भोगस्य हेतुभूतं अस्मभ्यं विष्यतां विमुंचतां प्रयच्छतामित्यर्थः॥ ॥अथ पंचमी॥ ॥
विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति॥ सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम॥ ॥हे सोमा
पूषणौ अन्यः युवयोरेकः सोमः विश्वानि भुवना भुवनानि भूतानि जजान अजनयत्। तथा च मंत्रः। सोमः पवते जनिता मतीनां

251
1914

भा॰अ॰२ इति। अन्यः अपरः पूषादित्यो विश्वमभिचक्षाणः अभिपश्यन्नेति। गच्छति तौ युवां सोमापूषणौ मे धियं कर्म धीः शचीति कर्मनामसु पा अ॰८
ठात्। अवतं रक्षतं। किंच युवाभ्यां विश्वाः पृतनाः सर्वाः शत्रुसेनाः जयेम अभिभवेम॥ ॥अथ षष्ठी॥ ॥धियं पूषा जिन्वतु विश्व
१३४ मिन्वो रयिं सोमो रयिपतिर्दधातु॥ अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः॥ ॥पूषादित्यो विश्वमिन्वः विश्वस्य प्रीणयिता धिय
मस्मदीयं कर्म जिन्वतु तर्पयतु॥ रयिपतिर्धनपतिः सोमः रयिं धनं ददातु अस्मभ्यं ददातु। किंच देवी द्योतमाना अनर्वा अप्रत्यृता कैः
पिप्रातिकूल्यमप्रापिता अदितिः अवतु अस्मान् रक्षतु॥ अन्यत्समितं॥ ॥इति द्वितीयाष्टके षष्ठाध्यायस्य पंचमो वर्गः॥ ॥वायो ये त
इत्येकविंशत्यृचं नवमं सूक्तं गार्त्समदं गायत्रं अंत्ये द्वे अनुष्टुभौ तृतीया त्वनुष्टुभ्यादिकरवृत्ति। अनुष्टुभौ तृतीयाद्यै तृचा वायो ये त इत्यादिके
द्वे कृचे वाय्व्यावाश्विनस्यादयो द्वे ऐंद्रवायवी अयं वां मित्रावरुणेति पंचानां मित्रावरुणावश्विनौ विश्वेदेवाः सरस्वतीति क्रमेण देवताः
। प्रैतां यज्ञस्य शंभुवेति तृचो बाह्वनुवाक्यादिकं धावापृथिव्यनिकद्ग्नसव्येनत्र विनियुक्तत्वात् द्यावापृथिव्यो हविर्धाने द
वत्यावा॥ अग्निं च हव्यवाहनमिति पादोऽग्निदेवत्यावा॥ तथा चानुक्रांतं। वायो सैका गायत्रमुक्ता देवताः प्रउगेणाद्येन तृचेन ऐंद्राय
वी धावापृथिव्यास्तु वोत्ता हविर्धाना वा तृतीयः पादोऽग्नेयो वांत्यमनुष्टुभौ द्व तृतीति। पृष्ठ्याभिप्लवषडहे द्वितीये हनि प्रउगे त्य
स्तं चवर्गमेतत्सूक्तं। वायव्यस्तृचस्य वायो ये तेस हस्रिण इत्याद्ये चौपैंद्रवायवतृचस्य शुक्रस्याद्य इत्यादितृतीयास्तथा च सूत्रितं।
वायो ये ते सहस्रिण इति द्वे तास्याः सोमास आगहि त्वं को भाद्दे वाद्विभिस्य शाति द्व शुक्रस्याद्य गवाशिरइत्येका अयं वां मित्रावरु
णेति पंचतृचा इति॥ चातुर्विंशिकेहनि प्रातः सवने मैत्रावरुणशस्त्रे अयं वां मित्रावरुणेति षष्ठे इह स्तोत्रियसंतिकाः चतुर्विंशाहा
ता नि इति खंडे सूत्रितं। अयं वां मित्रावरुणा पुरुरुणा विश्व्यस्तीति। आभिप्लविकेष्वहः सु प्रातः सवने मैत्रावरुणशस्त्रे अय
मेव तृचः पंचदशेऽहनि तामानिभिमन्त्रमान पर्नीयः। अयं वां मित्रावरुणा आ नो मित्रावरुणेति तृचा इति। सूत्रितत्वात॥ आद्यो मैत्राव
रुणग्रहस्यानुवाक्या सूत्रितं च। मैत्रावरुणस्य अयं वां मित्रावरुणेति। प्रातरनुवाके आश्विनशस्त्रे यो गौ यत्र छंदसि गोमद्द्विति। तृचो
विनियुक्तः गोमदू षु नासत्येति तृचा इति। सूत्रितत्वात। अतिरात्रे प्रथमपर्याये ब्राह्मणाच्छंसिशस्त्रे इंद्रो अंग महद्भयमिति तृचः।
अतिरात्रपर्यायाणामिति खंडे सूत्रितं। इंद्रो अंग महद्भयमभिन्नपुवाचमिति। आग्रयणे वैश्वदेवस्य हविषो विश्वेदेवास इत्यनु
वाक्या॥ आग्रयणमिति खंडे सूत्रितं॥ विश्वेदेवास आगत शृणुता म इमं हवं ना महिनो अहिमायाइति॥ दशरात्रे प्रथमेहनि प्रउगशस्त्रे अंबित
मे नदीतम इति सारस्वतः सतमस्तृचः चतुर्थेहनीति खंडे सूत्रितं॥ अंबितमे नदीतमे इत्यानुष्टुभप्रउगमिति। व्यूढदशरात्रे प्रथ
मे छंदोमे वैश्वदेवशस्त्रे प्रैतां यज्ञस्य शंभुवेति धावापृथिव्यानिविद्धानीय स्तृचः। अथ छंदोमा इति खंडे सूत्रितं। प्रैतां यज्ञस्य शंभुवा
यं देवा यज्ञमनड इति तृचा इति॥ ॥तत्र प्रथमा॥ ॥वायो ये ते सहस्रिणो रथासस्तेभिरा गहि॥ नियुत्वान्त्सोमपीतये॥ ॥हे वायो १३४
ते तव दीयाः ये सहस्रिणः सहस्रसंख्याकाः रथासः रथाः। तेभिः तैर्नियुत्वान् नियुद्भिर्युक्तस्त्वं सोमपीतये सोमपानार्थं आगहि आ
गच्छ॥ नानारूपत्वात् द्वायोः सर्वाभिर्विभूतिभिः सहागमनं प्रार्थ्यत इति भावः॥ ॥अथ द्वितीया॥ ॥नियुत्वान्वायवा गह्य

253
1914

यं शुक्रो अयामि ते॥ गंतासि सुन्वतो गृहं॥ ॥हे वायो नियुत्वान् नियुतो वाहनानि वाय्योः तैर्युक्तस्त्वं आगहि आगच्छ॥ अयं शुक्रो
दीप्यमानः सोमः। ते तुभ्यं अयामि नियतो गृहीतः आसीत। यमेः कर्मणि लुङ्। सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य गृहं
गंता अभिगंता भवसि॥ ॥अथ तृतीया॥ ॥शुक्रस्याद्य गवाशिर इंद्रवायू नियुत्वतः॥ आ यातं पिबतं नरा॥ ॥हे नरा नेतारौ हे इंद्रवा
यू अद्यास्मिन्नहनि नियुत्वतः विभक्तिव्यत्ययः नियुत्वंतौ युवां गवाशिरः गव्यं पयः आशिरः आश्रीयते अभिषवण साधनं यस्य
तस्य शुक्रस्य दीप्यस्य सोमस्य पानार्थं आयातं आगच्छतं। आगत्य सोमं पिबतं॥ ॥अथ चतुर्थी॥ ॥अयं वां मित्रावरुणा सु
तः सोम ऋतावृधा॥ ममेदिह श्रुतं हवं॥ ॥मित्रावरुणा हे मित्रावरुणौ युवाभ्यां अयं सोमः सुतः अभिषुतः ऋतावृधा हे सत्यस्य यज्ञस्य वा
वर्धकौ मम मत मयैव क्रियमाणं इहास्मिन्यज्ञे श्रुतं शृणुतं॥ ॥अथ पंचमी॥ राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते
॥ ॥राजानौ ईश्वरौ दीप्यमानौ वा अनभिद्रुहा अनभिद्रुहावनभिद्रोग्धारौ यौ मित्रावरुणौ॥ ध्रुवे स्थिरे उत्तमे उत्कृष्टे सहस्रस्थूणे सद
सि स्थाने आसाते उपविशतः। तावागच्छतमिति शेषः॥ ॥इति द्वितीयाष्टके षष्ठाध्यायस्य सप्तमो वर्गः॥ अथ षष्ठी॥ ॥ता सम्राजा
घृतासुती आदित्या दानुनस्पती॥ सचेते अनवह्वरं॥ संम्राजौ आत्मैव सर्वेषां शास्तारौ घृतासुती घृतान्नौ तद्वा महितं घृतान्नाव
सिंचति मंत्रांतरात। आदित्या अदितेः पुत्रौ दानुनस्पती दानुना दानस्य वा धनस्य पती स्वामिनौ तौ तौ मित्रावरुणौ अनवह्वरमकुटिलं
यजमानं सचेते सेवेते॥ ॥अथ सप्तमी॥ ॥गोमदू षु नासत्याश्वावद्यातमश्विना॥ वर्ती रुद्रा नृपाय्यं॥ ॥आश्विना हे अश्विनौ
हे नासत्या अनृतभाषणरहिता हे रुद्रा रुद्रौ स्तूयमानौ द्रवंतौ युवां वर्तिः मार्गः। तेन मार्गेण नृपाय्यं नृभिः नेतृभिर्देवैः पातव्यं सो
मं गोमत् यथा भवति तथा अश्ववत् अश्वैश्च यथा भवति तथा यातं गच्छतं इत्थिति पूरणौ॥ ॥अथाष्टमी॥ ॥न यत्परो नांतर
आदधर्षद्वृषण्वसू॥ दुःशंसो मर्त्यो रिपुः॥ वृषण्वसू हे धनस्य वर्षितारौ यत्स्थानं परः दूरस्थो दुःशंसः दुःशंसनाय योग्यो मर्त्यो रिपुः॥
यं नादधर्षत। तथांतः लक्षणा नरः अंतरः समीपवर्ती मर्त्यो रिपुरपि यं नादधर्षत॥ तद्धनमावोढमिति शेषः॥ ॥अथ नव
मी॥ ॥ता न आ वोळ्हमश्विना रयिं पिशंगसंदृशं॥ धिष्ण्या वरिवोविदं॥ ॥हे धिष्ण्याधिषणार्हौ अश्विनौ तौ तौ युवां पिशंगसंदृशं
नानारूपं वरिवोविदं धनस्य लंभकं रयिं पशूनां समूहं आ वोळ्हमावहतं॥ ॥अथ दशमी॥ ॥इंद्रो अंग महद्भयमभी षदप
चुच्यवत्॥ स हि स्थिरो विचर्षणिः॥ इंद्रः महत् अधिकं अभीषत् अभिभवत् भयं भयकारणं अपचुच्यवत् अपच्यावय
तु हि यस्मात्कारणात् स स्थिरः केनापि चालयितुमशक्यः विचर्षणिः विश्वस्य द्रष्टा॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य अष्ट
मो वर्गः॥ अथैकादशी॥ ॥इंद्रश्च मृळयाति नो न नः पश्चादघं नशत्॥ भद्रं भवाति नः पुरः॥ इंद्रश्च परमैश्वर्यवानिंद्रश्च नो
स्मान् मृळयाति सुखयेत्। पश्चात् पृष्ठतो नोऽस्मान् अघं दुरितं न नशत् न प्राप्नोति नोऽस्माकं पुरः पुरस्तात् भद्रं कल्याणं च भवाति भवा
ति॥ ॥अथ द्वादशी॥ ॥इंद्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्॥ जेता शत्रून्विचर्षणिः॥ विचर्षणिः विविधस्य द्रष्टा जेता
शत्रून् असुरान् जेता। जेतृत्वात् पष्ठ्यभावः। इंद्रः परमैश्वर्यवान् सर्वाभ्य आशाभ्यो दिग्भ्योऽस्माकं अभयं करत् करोतु॥

भा॰ अ॰ २ परांतिपंचमी चानुकः॥ ॥अथ त्रयोदशी॥ ॥विश्वे देवास आगत शृणुता म इमं हवं॥ एदं बर्हिर्निषीदत॥ ॥विश्वे देवासः हे विश्वे देवाः आ अ॰ ८
गत इहागच्छत मम दीयं इमं हवमाह्वानं शृणुत इदं बर्हिरस्मिन्बर्हिषि आनिषीदत उपविशत॥ ॥अथ चतुर्दशी॥ तीव्रो वो मधुमाँ अयं शुनहो
३३५ त्रेषु मत्सरः॥ एतं पिबत काम्यं॥ ॥हे विश्वे देवा वो युष्माकं तीव्रः तीव्रमदः मधुमान् रसवान् मत्सरो मदकरः सोमोयं युष्मदर्थं शुनहोत्रेषु गृत्समदेषु
मासुतिः काम्यं कमनीयमेतं सोमं पिबत॥ ॥अथ पंचदशी॥ ॥इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः॥ विश्वे मम श्रुता हवं॥ हे इंद्रज्ये
ष्ठाः इंद्रपुरोगमा मरुद्गणाः मरुत्समूहरूपाः पूषरातयः पूषाख्यो देवः रातिर्दाता येषां ते पूषरातयः देवासः देवा विश्वे सर्वे यूयं मम यम
दीयं हवमाह्वानं शृणुत इंद्रज्येष्ठासः इत्याः संबोधनांताः॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य नवमो वर्गः॥ ॥अथ षोडशी॥ ॥अं
बितमे नदीतमे देवितमे सरस्वति॥ अप्रशस्ता इव स्मसि प्रशस्तिमंब नस्कृधि॥ अंबितमे मातॄणां श्रेष्ठे नदीतमे नदीनां श्रेष्ठे देवितमे
देवीनां श्रेष्ठे हे सरस्वति अप्रशस्ता इव धनाभावात् समस्थाः इव वयं स्मसि भवामः॥ अंब हे मातः सरस्वति नोस्मभ्यं प्रशस्तिं धनस
मृद्धिं कृधि कुरु प्रयच्छेत्यर्थः॥ ॥अथ सप्तदशी॥ ॥त्वे विश्वा सरस्वति श्रितायूंषि देव्यां॥ शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः॥ ॥हे सरस्व
ति देव्यां द्योतमानायां त्वे त्वयि विश्वा विश्वानि सर्वाण्यायूंषि अन्नानि आयुः सूनृतेत्यन्ननामसु पाठात्॥ श्रिता श्रितानि सा त्वं शुनहोत्रेषु गृत्सम
देषु मासु विषयेषु मत्स्व सोमपानेन तृप्य॥ किंच हे देवि सरस्वति नः॥ अस्मभ्यं प्रजां दिदिड्ढि पुत्रान्देहि॥ ॥अथाष्टादशी॥ ॥इमा ब्रह्म
सरस्वति जुषस्व वाजिनीवति॥ या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति॥ ॥वाजिनीवति अन्नवति ऋतावरि उदकवति हे सर
स्वति इमा इमानि ब्रह्म ब्रह्माणि स्तोत्राणि हवींषि जुषस्व सेवस्व स्वीकुरु यानि मन्म मननीयानि देवेषु प्रिया देवानां मध्ये तुभ्यं प्रियाणि देवेषु प्रिया
णि वा तानि त्वदर्थं गृत्समदा जुह्वति॥ ॥अथैकोनविंशी॥ ॥प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे॥ अग्निं च हव्यवाहनं॥ ॥यज्ञस्य या
गस्य शंभुवा सुखसंपादकौ हविर्धाने अनसी तद्रूपे द्यावापृथिव्यौ प्रेतां उत्तरवेदेः पश्चिमभागं प्रतिगच्छतां॥ अथ प्रत्यक्षस्तुतिः॥ युवामि
द युवामेव आ वृणीमहे प्रार्थयामहे हव्यवाहनमग्निं च आ वृणीमहे अग्निरत्र निपातभागिति॥ ॥अथ विंशी॥ ॥द्यावा नः पृथिवी इमं
सिध्रमद्य दिविस्पृशं॥ यज्ञं देवेषु यच्छतां॥ द्यावा द्यौः पृथिवी च उभे हविर्धाने वा यच्छतां सिध्रं स्वर्गादेः साधकं दिविस्पृशं देवान्गच्छं
तं नः अस्माकं इमं यज्ञं देवेषु यच्छतां नियच्छतां॥ ॥अथैकविंशी॥ ॥आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः॥ इहाद्य सोमपीतये
॥ ॥अद्रुहा द्रोहरहिते हविर्धाने तद्रूपे द्यावापृथिव्यौ वां युवयोरुपस्थं समीपं यज्ञियाः यज्ञार्हाः देवाः इह यज्ञे अद्यास्मिन्नह
नि सोमपीतये सोमपानाय आसीदंतु॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य दशमो वर्गः॥ ॥कनिक्रददिति त्र्यृचं द्वादशं सूक्तं॥
अत्रेयमनुक्रमणिका॥ कनिक्रदत्त्र्यधिकमिति॥ मंडलद्रष्टा गृत्समद एवास्य ऋषिः॥ त्रिष्टुप् छंदः॥ कपिंजलरूपी इंद्रो देवता॥ वयसा ममनोक्तां वाचं श्रु
त्वा तस्मात् कं जपेत॥ स्मृतिं च॥ वयसा ममनोक्ता वाचः श्रुत्वा कनिक्रदज्जनुषं प्रब्रुवाण इति सूक्तं जपेदिति॥ ॥तत्र प्रथमा॥ ॥कनिक्रदज्ज ३३५
नुषं प्रब्रुवाण इयर्ति वाचमरितेव नावं॥ सुमंगलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत्॥ ॥कनिक्रदत् पुनः पुनः शब्दायं
मानः जनुषं जनिष्यमाणमर्थं प्रब्रुवाणः सूचयन् कपिंजलः अरितेव कर्णधार इव नावं वाचमियर्ति प्रेरयति॥ अथ प्रत्यक्षस्तुतिः॥

हे शकुने कपिंजल त्वं सुमंगलः प्रकृष्टकल्याणश्च भवासि भव॥ किंच का चित् अभिभा अभिभवः त्वा त्वां विश्व्या विश्वतः सर्वतः सुदिक्षु मा 255/1914
विदत् मा प्राप्नोतु यत् शकुनिः शकुनोत्यन्नेनु मात्मानं॥ न्युकंदी ज्ञनमनु प्रवाणा यथा स्वशब्दस्तथा नाम स्यतिवा नमीरयितेवनाः सुमंगलश्च
शकुने भव कल्याणमंगलो मंगलं शिरते येणात्यर्थं गिरत्यनर्थानिति वतिपाम्॥ ॥अथ द्वितीया॥ ॥मा त्वा श्येन उद्वधीन्मा सुपर्णो
मा त्वा विदद्दिषुमान्वीरो अस्ता॥ पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादी वदेह॥ हे शकुने त्वां श्येनः प्रबलः पक्षिविशेषो मा व
धीत् मा हिंसीत् उत अपि च सुपर्णो गरुडः पक्षी मा वधीत् तथा इषुमान् बाणवान् वीरः अस्ता शराणां क्षेप्ता धन्वी त्वां मा विदत्
मा प्राप्नोतु॥ पित्र्यां पित्र्या प्रदिशं दक्षिणां दिशमनु दक्षिणस्यां दिशीत्यर्थः॥ कनिक्रदत् पुनःपुनः शब्दं कुर्वन् सुमंगलः कल्याणमंगलः
भद्रवादी शोभनवादी सन्निह अस्माकं विषये वद मंगलं सूचय॥ ॥अथ तृतीया॥ ॥अव क्रंद दक्षिणतो गृहाणां सुमंगलो भद्रवादी श
कुंते॥ मा न स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः॥ ॥शकुंत हे कपिंजल त्वं सुमंगलो भद्रवादी वसन् गृहाणां दक्षिणतः द
क्षिणस्यां दिशि अवक्रंद शब्दं कुरु॥ दक्षितः शब्दायमानः शकुंते मंगलसूचकास्तिनास्माकं स्तेनस्तस्करो मा ईशत॥ मा ईशिष्ट अघशं
सः अनर्थकानां शंसकोपि मा शिषत् अन्यद्व्याख्याततरं॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य एकादशो वर्गः॥ ॥प्रदक्षिणिदि
ति त्र्यृचमेकादशं सूक्तं गार्त्समदं शाकुनं तथा चानुक्रांतं॥ प्रदक्षिणिद्गा गतं मध्यास्तिशकुर्यात्पिवर्ति॥ द्वितीयातिजाद्दगी अष्टिर्वा दतर् जगत्या
॥ कपिंजलरूपी इंद्रो देवता वयसा ममनोक्तां वाचं श्रुत्वा प्रदक्षिणिदिति सूक्तं जपेत॥ सूत्रं प्रागेवोदाहृतं॥ ॥तत्र प्रथमा॥ ॥प्रदक्षिणि
दभि गृणंति कारवो वयो वदंत ऋतुथा शकुंतयः॥ उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति॥ ॥शकुंतयः कपिंजलः
ऋतुथा काले काले वयो नीवर्तः सच वदंतः कारवः स्तोतार इव प्रदक्षिणं अभि गृणंति अभिवदंतु बहुवचनं पूजार्थो किंच उभे वाचौ
गानं च आनध्वमसामगाः गायत्रं त्रैष्टुभं च सामनी इव शकुनिर्वदति अनुराजति च शृण्वतो नुरंजनं करोतीत्यर्थः॥ ॥अथ द्वितीया
॥ ॥उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा
वद विश्वतो नः शकुने पुण्यमा वद॥ ॥शकुने हे कपिंजल उद्गातेव सामगो यथोद्गाता साम गायति तथा त्वं गायसि गानस्वनं करोषि
ब्रह्मपुत्र इव यथा ब्राह्मणाच्छंसी सवनेषु शस्त्राणि शंसति तथा त्वं कालपुत्रं ससि शंसि तस्त्वं शब्दं करोषि वृषेव वाजी सेचनसमर्थो
श्वः शिशुमतीर्बडवी अपीत्यर्थं॥ अपीत्य अभिगत्य यथा शब्दं करोति॥ तथा त्वमपि वद डिशोस्पष्टं॥ ॥अथ तृतीया॥ ॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः॥ यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः॥ ॥श
कुने हे कपिंजल आवदन् शब्दं कुर्वंस्त्वं भद्रमा वद मंगलं वद तूष्णीमासीनः तूष्णीमपि सन्नस्माकं सुमतिं चिकिद्धि बुध्यस्व यद
दा उत्पतन् वदसि तदा कर्करिर्यथा कर्करिर्वीणा वा वादिविशेषः॥ अन्यद्व्याख्याततरं॥ ॥इति द्वितीयस्याष्टके अष्टमा
ध्यायस्य द्वादशो वर्गः॥ ॥इति द्वितीयमंडले चतुर्थोनुवाकः॥ समाप्तं च द्वितीयं मंडलं॥ वैश्वामित्रे तृतीये पंचानुवाकाः॥ तत्र
प्रथमेनुवाके द्वादश सूक्तानि। तत्र सोमस्य मेति त्रयोविंशत्यृचं प्रथमं सूक्तं॥ तथा चानुक्रांतं॥ सोमस्य अधिकेति अस्य म

मा०अ०२ इत्यस्य द्रष्टा विश्वामित्र ऋषिः अनुक्तत्वात्त्रिष्टुप् छंदः। मंडलादित्वादाग्नेयमिति परिभाषयाग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छं अ०८
दसि विनियोगः। तथाच सूत्रितं। सोमस्य मा तवसं प्रत्यग्निरुषस इति त्रीणीति॥ ॥तत्र प्रथमा॥ ॥सोमस्य मा तवसं वक्ष्यग्ने वह्निं च
१३६ कर्थ विदथे यजध्यै। देवाँ अच्छा दीद्यद्युंजे अद्रिं शमाये अग्ने तन्वं जुषस्व॥ ॥हे अग्ने त्वं विदथे यज्ञे यजध्यै यष्टुं सोमस्य वह्निं वोढारं च
मां चकर्थ। कृतवानसि। तं मां तवसं तवस्विनं बलिनं वक्षि कामयस्व। किंच देवानच्छ अभि दीद्यत् दीप्यमानोहं अद्रिं ग्रावाणं युंजे अभि
षवणाय युनज्मि। शमाय शम्यामि च। तथा च मंत्रांतरं॥ कृते न देवः सविता शमायतेति। यद्वा शमाये स्तोमि शब्दमानः जरतीति स्तुतिक
र्मसु पाठात्। तथा च मंत्रांतरं॥ सो अग्न ईजे शशमे च मर्त इति। किंच हे अग्ने तन्वं शरीरं जुषस्व रक्षार्थं सेवस्व। यद्वा कर्मणि तन्वं तं मां सेव
स्वेत्यर्थः॥ ॥अथ द्वितीया॥ ॥प्रांचं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन्। दिवः शशासुर्विदथा कवीनां गृत्साय चित्तव
से गातुमीषुः॥ ॥हे अग्ने वयं यज्ञं प्रांचं प्रकर्षेण गच्छंतं चकृम अकार्ष्म। गीः मदीया स्तुतिः वर्धतां एधतां अग्निं समिद्भिर्नमसा हविषा
च दुवस्यन् अस्मदीयाः परिचेरुः। किंच दिवः द्युलोकात् आगत्य देवाः कवीनां स्तोतृणां विदथा ज्ञानानि स्तोत्राणि च शशासुः अन्वशिष
न्। अपि च गृत्साय गृणातेः रिदं रूपं। स्तोतव्याय अग्नये तवसे वृद्धाय गातुं स्तोतुं ईषुः इच्छंति स्तोतारः इच्छंतिच विदितिर्वार्थः॥ ॥अथ तृ
तीया॥ ॥मयो दधे मेधिरः पूतदक्षो दिवः सुबंधुर्जनुषा पृथिव्याः। अविंदन्नु दर्शतमप्स्वंतर्देवासो अग्निमपसि स्वसॄणां॥ ॥मेधि
रः मेधावान् प्राज्ञः पूतदक्षः शुद्धबलः जनुषा जन्ममात्रेण सुबंधुः शोभनबंधुः याग्निर्दिवा द्युलोकस्य पृथिव्याः भूमेश्च मयः सुखं दधे
विदधाति देवानां मनुष्याणां च सुखं करोतीति यावत्। तद्दर्शतं दर्शनीयमग्निं देवासो देवाः स्वसॄणां सरणशीलानां नदीनामप्स्वंत
र्मध्ये अपसि यज्ञवहनरूपकर्मणि निमित्ते। उ इति पूरणः। अविंदन्नलभंत॥ ॥अथ चतुर्थी॥ ॥अवर्धयन्त्सुभगं सप्त
यह्वीः श्वेतं जज्ञानमरुषं महित्वा। शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन्॥ ॥सप्त सर्पणशीलाः यह्वीः यह्वाः महत्यो
नद्यः सुभगं शोभनधनं श्वेतं शुभ्रं यज्ञानं महित्वा महत्त्वेन अरुषं आरोचमानं अप्स्थितमग्निं अवर्धयन् स्वकार्यभूताभिराप
धीभिर्वृद्धिं प्रापितवत्यः। यद्वा स्थितमग्निं आपो वर्धयंति। अग्निंधनत्वात्तस्य। किंच शिशुं न जातं यथा जातं शिशुं अश्वा वडवाः अभ्यारुः
अभिगच्छंति। तथा नद्यः इत्थं तमग्निं अभ्यारुः अभिजग्मुः। अपि च देवासः देवाः अग्निं जनिमन् जन्मन्युदके वा वपुष्यन् वपुष्टिमम
कुर्वन्॥ ॥अथ पंचमी॥ ॥शुक्रेभिरंगै रज आततन्वान्क्रतुं पुनानः कविभिः पवित्रैः। शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीर
नूनाः॥ ॥अग्निः शुक्रेभिः शुक्लैः अंगैः स्वतेजोभिः रजः अंतरिक्षमाततन्वान् आतन्वन् व्याप्नुवन् क्रतुं कर्मणां कर्तारं यजमानं कविभिः पर्यायुर
पां कांतप्रज्ञैः स्तोतृभिः पवित्रैः शोधकैः तेजोभिः पुनानः शोधयन् शोचिर्दीप्तिं वस्त्रस्थानीयं परितो वसान आच्छादयन् अपां अपस्य
तां कर्मवतां आयुरन्नं बृहतीः प्रभूताः अनूनाः संपूर्णाः श्रियः संपदश्च मिमीते करोति॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य त्रयो १३६
दशो वर्गः॥ ॥अथ षष्ठी॥ ॥वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः। सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त
वाणीः॥ ॥अनदतीः अभक्षयंतीः अदब्धाः अहिंसिताः मातृभूताः अपो अग्निः सीं सर्वतो वव्राज व्रजति अग्निरपां शोषकः तेजा

257
1914

पः शामयंति तद्रूपमाविर्भावत्वात् तुल्यं भवति। कीदृश्यस्ताः दिवो यह्वीः अंतरिक्षस्यापत्यभूताः अवसानाः वस्त्रमनाच्छादयंत्यः वस्त्रस्था
नीयस्य जलस्य विद्यमानत्वात्। अत एवानग्नाः दिग्वता अपि सनाः सनातन्यः युवतयः नित्यतरुण्यः नित्यरुद्धा इत्यर्थः। सयोनिः समा
नमंतरिक्षं स्थानं यासां ताः सप्तवाणीः नद्यः एकं अग्निं गर्भं गर्भस्थं दधिरे दधत॥ ॥अथ सप्तमी॥ ॥स्तीर्णा अस्य संहतो विश्वरूपा
घृतस्य योनौ स्रवथे मधूनां। अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची॥ ॥घृतस्य उदकस्य योनौ स्थाने अंतरिक्षे संहतः पुंजी
भूताः विश्वरूपाः नानारूपाः स्तीर्णाः सर्वत्र प्रसृताः अस्य अग्नेः रश्मयः। मधूनां उदकानां स्रवथे स्रवणे सति वर्णः अस्थुः तिष्ठति॥ पि
न्वमानाः पूर्यमाणाः अत्र अग्नौ आपः धेनवः सर्वेषां प्रीणयित्र्यः अभवन्। समीची च संगच्छमाना मही महत्यौ द्यावापृथिव्यौ
दस्मस्य दर्शनीयस्याग्नेर्मातरा मातरौ भवतः॥ ॥अथाष्टमी॥ ॥बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि। श्चोतं
ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन॥ ॥हे सहसः सूनो सहसस्पुत्र बभ्राणः सर्वं धार्यमाणः त्वं शुक्राणि भास्वराणि रभ
सानि गच्छंति वपूंषि अर्चींषि दधानः धारयन् व्यद्यौत् विद्योतसे। यत्राग्निः यत्र यस्मिन् यजमानकाव्येन स्तोत्रेण वृषा वर्धे वृद्धिं प्राप्नोति तदा
नीं मधुनः अत्यंतमधुरस्य घृतस्य उदकस्य धाराः श्चोतंति स्रवंते मद्यजमानस्तोत्रेण अग्निस्तुष्टो भवति। तदानीं वृष्टिर्भवतीत्यर्थः
॥ ॥अथ नवमी॥ ॥पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः। गुहा चरंतं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव॥ ॥
पितुः अंतरिक्षस्य ऊधः ऊधःस्थानीयं जलप्रदेशं अयमग्निः जनुषा जन्मनैव विवेद जानाति। किंचायमग्निः अस्याधसः संबंधिन्याः धाराः पयो
धाराः व्यसृजत्। धेनाः माध्यमिका वाचश्च विसृजति। शिवेभिः शिवंकरैः सखिभिः आत्मनः सखिभूतैर्वायुभिः दिवो यह्वीभिः अंतरिक्ष
स्यापत्यभूताभिरद्भिश्च सह गुहा गुहायां चरंतं वर्तमानमेनमग्निं गुहा चित गुहायां स्थितः कोपि न बभूव प्राप्तुं समर्थो नाभवत॥ ॥अथ
दशमी॥ ॥पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः। वृष्णे सपत्नी शुचये सबंधू उभे अस्मै मनुष्ये३ नि पाहि॥ ॥अय
मग्निः पितुश्च अंतरिक्षस्य गर्भं गृह्णीत गर्भभूतं जनितुः सर्वस्य लोकस्य जनयितुश्च ब्राह्मणस्य लोकं तु पश्चाहिकं बभ्रे बिभर्ति। एक
एवाग्निः पूर्वीः बह्वीः पीप्यानाः प्यायमानाः वृद्धिं प्राप्तुं ओषधीः अधयत् धमति भक्षयति। सपत्नी समानपतिके सूर्यः पतिर्ययोः त
मनुष्ये मनुष्यैर्हिते उभे द्यावापृथिव्यौ वृष्णे वर्षित्रे अस्मै शुचये अग्नये सबंधू भवतः अनयोः अग्निर्बंधुरित्यर्थः। हे अ
ग्ने त्वं द्यावापृथिव्यौ निपाहि नितरां रक्ष॥ ॥इति द्वितीयाष्टके अष्टमाध्यायस्य चतुर्दशो वर्गः॥ ॥अथैकादशी॥ ॥उरौ महाँ
अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः। ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणां॥ ॥महान् अयमग्निः अ
निबाधे असंबाधे उरौ विस्तीर्णे अंतरिक्षे ववर्ध ववर्धे। अस्य वर्धनकारणमाह। हि यस्मात्कारणात् पूर्वीः बह्व्यः यशसः यशोन्न
तुल्य आपः अग्निं संवर्धयंति एवं अद्भिर्वृद्धिं प्राप्ताग्निः ऋतस्य उदकस्य योनौ स्थाने अंतरिक्षे स्थितः स्वसॄणां स्वतः सरंतीनां जामीनां
भगिनीस्थानीयानां नदीनां अपसि अपसि दमूनाः दांतमनाः सन् अशयत शेते॥ ॥अथ द्वादशी॥ ॥अक्रो न बभ्रिः समि
थे महीनां दिदृक्षेयः सूनवे भाऋजीकः। उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः। जनिता सर्वस्य लोकस्य जनयितः।

भा॰अ॰२ अपां उदकानां गर्भः गर्भरूपः नृतमः नेतृतमः अतिशयेन मनुष्याणां रक्षिता यद्वः महान् यो ऽग्निः अक्रः परेषामाक्रमिता परैरना अ॰८
क्रमणीयो वा। नेति पादपूरणः। समिथे संग्रामे महीनां महतीनां स्वसेनानां वक्षिः भर्ता हिरण्यः सर्वैर्दर्शनीयः। भाऋजीकः स्व
३३० दीप्त्या प्रकाशमानः सो ऽग्निः मनवे हवींषि प्रदात्रे यजमानाय तदर्थं उस्रियाः अपः। अजनयत् उदपादयत्। सूनवे षूप्रेरण इत्यस्मा
द्धातोरौणादिको नुप्रत्ययः॥ ॥अथ त्रयोदशी॥ ॥अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपं। देवासश्चिन्मनसा
सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन्॥ ॥सुभगा सुभाग्या वना सर्वैर्वननीया अरणिः दर्शतं दर्शनीयं विरूपं नानाविधरूपं
अपां ओषधीनां च रूपं च गर्भं अग्निं जजान अजनयत् देवासश्चित् सर्वे देवा अपि पनिष्ठं स्तुत्यं तवसं वृद्धं जातं जातमात्रं तमग्निं
मनसा स्तुत्या संजग्मुः उपागच्छन्। हि पूरणः। तमेव दुवस्यन् पर्यचरन्॥ ॥अथ चतुर्दशी॥ ॥बृहन्त इद्भानवो भाऋजीकमग्निं
सचन्त विद्युतो न शुक्राः। गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः॥ ॥अपारे अगाधे ऊर्वे समुद्रे अंतरिक्षे अमृतं उद
कं दुहानाः क्षरंतः बृहंतः उत भानवः महान्तः सर्वा उन्नत्या दीप्यमानाः विद्युतो न विद्युत इव स्वकीये सदसि सदने अंतरिक्षे
गुहेव गुहायामिव वृद्धं प्रवृद्धं भाऋजीकं प्रभया दीप्यमानं अग्निं सचंत आश्रयंति॥ ॥अथ पंचदशी॥ ॥ईळे च त्वा यजमानो
हविर्भिरीळे सखित्वं सुमतिं निकामः। देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः॥ ॥यजमानो ऽहं हविर्भिः साधनैः त्वां ईळे
च पश्वादिलक्षणं धनं च याचे सुमतिं धर्मविषयां बुद्धिं निकामः नितरां कामयमानः त्वां स्तुवे सखित्वं ईळे याचे देवैः सह जरित्रे
स्तोत्रं कुर्वते मह्यं अवः रक्षणार्थं अवः पश्वादिविषयं रक्षां मिमीहि कुरु। दम्येभिर्दमनीयैर्नयैस्तेजोभिः प्रयत्ननियन्त्यत या उर्द्ध्व
ज्वालाभिः। अनीकैर्ज्वालाभिः नः अस्मान् रक्ष च॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य पंचदशो वर्गः॥ ॥अथ षोडशी॥
उपक्षेतारस्तव सुप्रणीते ऽग्ने विश्वानि धन्या दधानाः। सुरेतसा श्रवसा तुंजमाना अभि ष्याम पृतनायूँरदेवान्॥ ॥हे सुप्रणीते
शोभनप्रणयन हे अग्ने तव उपक्षेतारः उपगंतारः अवक्षितिर्गत्यर्थे वर्तते। विश्वानि सर्वाणि धन्या धनानि पश्वादिधनप्रा
प्तिहेतुभूतानि कर्माणि दधानाः कुर्वंतः तुंजमानाः दूरं विप्रयच्छंतो वयं सुरेतसा शोभनवीर्येण श्रवसा लब्धेनान्नेन अदेवान्
देवेभ्यो ऽन्नमददतः पृतनायून् संग्रामेच्छून् यज्ञविघ्नकारिणस्तान् पृतनायून् शरीराद्युपद्रवकारिणः शत्रूंश्च अभि
ष्याम अभिभवेम। यद्वा अदेवान् अयजतः शत्रून् जितवन्तो भवेम॥ ॥अथ सप्तदशी॥ ॥आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि
काव्यानि विद्वान्। प्रति मर्ताँ अवासयो दमूना अनु देवान् रथिरो यासि साधन्॥ ॥हे अग्ने मंद्रः स्तुत्यः केतुर्यज्ञे पुरस्तात्प्रज्ञापकश्च
आ भव आ समंताद्भव असि सर्वव्यापको भवसीत्यर्थः। किंच विश्वानि सर्वाणि काव्यानि यजमानादिभिः कृतानि स्तोत्राणि विद्वान् जा
नन् त्वं मर्तान् मर्त्यान् स्तोतॄन् ऋत्विजः वसुसंपादनेन प्रीतान् विधाय गृहेषु प्रत्यवासयः प्रतिवासयसि। रथिरः रथी साधन् ३३०
देवानां हितानि कर्माणि साधयन् देवान् अनु यासि च अनुगच्छसि च॥ ॥अथाष्टादशी॥ ॥नि दुरोणे अमृतो मर्त्यानां राजा ससा
द विदथानि साधन्। घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान्॥ ॥अमृतः नित्यः राजा राजमानो यो ऽग्निः विदथा

259/1914

यज्ञान् साधन् साधयन् मर्त्यानां अग्निहोत्रिणां दुरोणे गृहे निषसाद निषीदति विश्वानि काव्यानि विद्वान् जानन् घृतप्रतीकः घृतेन संयुक्षिताङ्ग यवः उर्वि
या विस्तीर्णः सो ऽग्निः व्यद्यौत् व्यद्योतत॥ ॥अथैकोनविंशी॥ ॥आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन्। सरण्यन् सर्वत्र सरणं
गमनं इच्छन् महान् त्वं शिवेभिः शिवकरैः सख्येभिः सख्यैः सखिकर्मभिः महतीभिः ऊतिभिः रक्षाभिश्च नः अस्मान् प्रति आगहि आगच्छ। अस्मे
अस्मभ्यं बहुलं विस्तीर्णं संतरं सर्वेषामुपद्रवाणां संतारकं सुवाचं शोभनवाचं भागं सर्वैर्भजनीयं यशसा कीर्त्या संयुक्तं रयिं धनं नो
अस्मभ्यं कृधि देहि। अस्मभ्यमिति पुनर्वचनं आदरातिशयार्थं॥ ॥अथ विंशी॥ ॥एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन्निहितो जातवेदाः॥ ॥हे अग्ने पूर्व्याय पुरातनाय ते तुभ्यं सनानि सनातनानि हविः संभजनीयानि वा
नूतनानि अभ्युदयविधमानानि प्रवर्तनानि वा एतानि एतानि जनिमा जन्मानि कर्माणि स्तोत्राणि वा प्र वोचं। जातवेदाः जातप्रज्ञो जातधनो वा जन्म
न् जन्मन् जायंते देहिनो जन्मानः तेषु सर्वेषु मनुष्येषु निहितः यागार्थं स्थापितः वृष्णे कामानां वर्षित्रे अग्नये इमानि सवनानि कृतानि
॥ ॥अथैकविंशी॥ ॥जन्मञ्जन्मन्निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः। तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम॥ जन्मन् जन्मन् सर्वेषु मनुष्येषु नि
हितो जातवेदाः विश्वामित्रेभिः विश्वामित्रैः प्रजायां बहुवचनं महर्षिणा विश्वामि॰ तस्य वयं सुमतौ यज्ञियस्या॰ ऽजस्रेण यो जातवेदाः अजस्रः
अजस्रं अनवरतं अध्वर्य्वादिभिः इध्यते दीप्यते सुमतौ वर्तमाना वयं तस्य यज्ञियस्य यज्ञार्हस्य अग्नेः भद्रे भजनीये सौमनसे सुमनोभावे अनुग्रहबु
द्धौ अपि स्याम अपि भवेम प्रार्थनायां लिङ्॥ ॥अथ द्वाविंशी॥ ॥इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः। प्र यंसि होतर्बृहती
रिषो नो ऽग्ने महि द्रविणमा यजस्व॥ ॥हे सहसावन् सहस्वन् बलवन् सुक्रतो शोभनकर्मन् हे अग्ने रराणः सर्वदा रममाणः दानं कुर्वाणो वा
त्वं नः अस्मदीयं इमं यज्ञं देवत्रा देवेषु धेहि। हे होतः देवानामाह्वातः बृहतीः महतीः इषः अन्नानि नः अस्मभ्यं प्र यंसि प्रयच्छ। हे अग्ने महि मह
त् द्रविणं पश्वादिलक्षणं धनं आ यजस्व प्रयच्छ। अत्र यजिर्दानकर्मा॥ ॥अथ त्रयोविंशी॥ ॥इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमा
नाय साध। स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥ ॥इयं सर्वेषां पशूनां पशुपुरोडाशस्य स्विष्टकृतः पुरोनुवाक्या। सूत्रितं हि
इळामग्ने पुरुदंसं सनिं गोर्ज्ञातायस्व दृष्टिं पुरोडाशस्य स्विष्टकृत् हव्या समिधा दिदीहीति। पुरोडाशस्विष्टकृत इति॥ हे अग्ने पुरुदंसं बहु
कर्माणं गोः गवां सनिं संदात्रीं इळां भूमिं हवमानाय स्तुवते मह्यं शश्वत्तमां चिरकालं यथा भवति तथा साध साधय। नः अस्माकं सूनुः पुत्रः तन
यः संतानस्य विस्तारयिता विजावा पुत्रपौत्रादिरूपेण स्वयं विजायत इति विजावा स्यात्। हे अग्ने सा प्रसिद्धा ते सुमतिः त्वदीया अनुग्रहा
त्मिका बुद्धिः अस्मे अस्माकं भूतु भवतु॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य षोडशो वर्गः॥ ॥वैश्वानरायेति पंचदशर्चं द्वितीयं सूक्तं। त
था चानुक्रांतं। वैश्वानराय पंचोना वैश्वानरीयं तु जागतं त्विति॥ विश्वामित्र ऋषिः जगती छंदः वैश्वानरो ऽग्निर्देवता। पृष्ठ्याभिप्लविकयोस्तृती
ये ऽहन्याग्निमारुते वैश्वानराय धिषणामिति वैश्वानरनिविद्धानीयं सूक्तं। तथा यस्येति खंडे सूत्रितं वैश्वानराय धिषणां धारावरा मरुत इति
॥ ॥तत्र प्रथमा॥ ॥वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि। द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः
समृण्वति॥ ॥ऋतावृधे ऋतस्य यज्ञस्य सत्यस्य वा वर्धयित्रे वैश्वानराय वैश्वानरशब्दो यास्केन व्याख्यातः वैश्वानरः कस्माद्विश्वान्नरान्

भा॰अ॰२ यतिविश्वं पूर्नंनरंतं यंतंति विथापियाविश्वानरस्य स्यात्प्रस्तुतः सर्वाणि भूतानि तस्य वैश्वानरस्य स्वैयाभवतीति॥ तस्मै अग्नये घृतं घृतंनघृ अ॰८
१३९ तमिवधियणां स्तुतिं जनामसि जनयामः॥ यथा घृतं प्रीतिं जनयति तथा प्रीतिकरामीत्यर्थः॥ द्विताद्विधा गार्हपत्याहवनीयरूपाभ्यां युक्तं
होतारं देवानामाह्वातारमग्निं मनुषः मनुष्याः आघतश्च कुलितस्य धियाकर्मणा कुलिशोवास्यादिः रथं न रथमिव समृण्वतिसंस्कुर्वंति॥
॥ ॥ अथद्वितीया॥ ॥ सरोचयज्जनुषारोदसी उभेसमात्रोरभवत्पुत्र ईड्यः॥ हव्यवाळग्निरजरश्चनोहितो दूळभाविशामतिथिर्विभावसुः
॥ ॥ सोग्निर्जनुषाजन्मनाउभेरोदसी द्यावापृथिव्यौ रोचयत प्रकाशयति समात्रोर्द्यावापृथिव्योः ईड्यः स्तुत्यः पुत्रोभवत्। हव्यवाड्हव्य
यानां वोढा अग्निः अंगनादिगुणयुक्तः अजरः जरादिरहितः चनोनं हितं यजमानेन हितं येनासौ चनोहितः दूळभः हिंसितुमशक्यः सोयं
विभावसुः प्रधानः विशां मनुष्याणां अतिथिरिव पूज्योभवति। ॥अथतृतीया॥ ॥क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जन
यंतचित्तिभिः॥ रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे॥ ॥चित्तिभिर्ज्ञानैः उपलक्षिता देवासः देवाः तरुषः। व्यसनेभ्यः
तारकस्य दक्षस्य बलस्य क्रत्वा कर्मणा विधर्मणि विधारकयज्ञे अग्निं जनयंत जनयत।भानुना भासमानेन ज्योतिषा रुरुचानं रोचमानं
महांतं अग्निं अत्यं न भारसहमश्वमिव वाजमन्नं सनिष्यन् लिप्समानोहं उप ब्रुवे स्तौमि॥ ॥ अथचतुर्थी॥ ॥ आमंद्रस्य सनिष्यंतो वरेण्यं
वृणीमहे अह्रयं वाजमृग्मियं॥ रातिं भृगूणामुशिजं कविक्रतुमग्निं राजंतं दिव्येन शोचिषा॥ ॥मंद्रस्य स्तुत्यस्य वैश्वानरस्य संबंधिनं वरेण्यं
वरणीयं अह्रयं अलज्जावाहं ऋग्मियं पथ्यं। वाजमन्नं सनिष्यंतः लिप्समानावयं भृगूणां कृपाणां अभिलषितार्थप्रदातारं उशिजं आभि
लष्यं तं कविक्रतुं क्रांतप्रज्ञं दिव्येन दिवि भवेन शोचिषा शोचिषा दीप्तं भ्राजमानमग्निं आवृणीमहे संभजामहे॥ ॥अथपंचमी॥ ॥अग्निं
सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः॥ यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम्॥ ॥वृक्तबर्हिषः स्तीर्ण
बर्हिषः यतस्रुचः प्राप्तस्रुचः अकुलिशः सुम्नाय सुखार्थं वाजश्रवसं मनुष्येभ्यः प्रदितान्नं सुरुचं प्रशस्तदीप्तिमंतं विश्वदेव्यं विश्वेभ्यो देवे
भ्योहितं रुद्रं दुःखानां द्रावकं अपसां कर्मवतां यज्ञानां यजंतीति यज्ञा यजमानास्तेषां साधदिष्टिं साधितयज्ञं अग्निं इह यज्ञे पुरो दधिरे
स्थापयंति॥ ॥इतिद्वितीयस्याष्टके अष्टमाध्यायस्य सप्तदशोवर्गः॥ ॥अथषष्ठी॥ ॥पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्त
बर्हिषो नरः॥ अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः॥ ॥हे पावकशोचे शोधकदीप्ते हे होतः देवानामाह्वातः यज्ञेषु
परिपरितः वृक्तबर्हिषः स्तीर्णबर्हिषः दुवः परिचरणमिच्छमानासः इच्छंतो नरो नेतारो यजमाना आप्यं आप्तुं योग्यं तव तव संबंधिनं क्ष
यं निवासं यागगृहं उपासते तेभ्यो द्रविणं धनं देहि विधेहि विधेहि पूरण॥ ॥अथसप्तमी॥ ॥आ रोदसी अपृणदा स्वर्महज्जातं यदेन
मपसो अधारयन्॥ सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः॥ ॥रोदसी द्यावापृथिव्यौ अपृणत् आपूरयत् तथा
महत् प्रभूतं स्वः अंतरिक्षं आपृणत् अपसः कर्मवंतो यजमानाः जातं यत् एनमग्निं अधारयन् अत्यान् अश्व इव कविः क्रांतः सर्वत्र व्या १३९
प्तः चनोहितः निहितान्नः सोयमग्निर्वाजसातये वाजस्य अन्नस्य कीर्तिर्वासातये लाभाय परिणीयते यज्ञार्थं नीयते॥ ॥अथाष्टमी॥ ॥
नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसं॥ रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः॥ ॥रथीर्ऋतस्य

261
1914

हुतो महतो बृहतस्य यज्ञस्य विचर्षणिः द्रष्टाग्निर्देवानां पुरोहितः पुरस्तादृश्यतया स्थापिता भवत्। हव्यदातिं देवेभ्यो हवीषां दातारं शोभ
नयज्ञं दम्यं दमेभ्यो गृहेभ्यो हितं जातवेदसं जातप्रज्ञं तमग्निं नमस्यत नमस्यत दुवस्यत परिचरत॥ ॥अथनवमी॥ ॥तिस्रो यह्वस्य समि
धः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः॥ तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः॥ ॥उशिजः कामयमानाः अमृ
त्यवाम् अकरहिताः देवा यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजा अमृत्यवः। तासामेकामदधुर्मर्त्ये[?] महतः परिज्मनः परितो गंतुः समिधः सम
धिकाः प्रकाशिकास्तिस्रः पार्थिवं वैद्युतं सौर्यं रूपा स्तिस्र स्तनः अपुनन् अशोधयन्त देवाः भुजं सर्वेषां पालयित्रीं तासां तन्नाम ध्येएकां
पार्थिवानलं मर्त्ये मर्त्यलोके अदधुः न्यदधुः उ इति पादपूरणः इतरद्वे तन्नू जामिं लोकं आसंनं अंतरिक्षं उपयतुः गच्छथः अथवा तिस्रः समि
धः आधारसमिधौ द्वे अनूयाजसमिदेका इति तासां समिधां एकां अनूयाजसमिधं मर्त्ये इहलोक भागहेतुमनूयाजपर्यंतमदधुः धारयंति
प्रजाया अनूयाजाद्वा इत प्रजात्वेनानुयाजानां संततत्वान्तदाश्रयत्वाच्चानुयाजसमिधुः। इतरद्वे समिधौ अंतरिक्षदिव्यभागहेतुउपयतुः
उपगच्छतः। द्वौ ह्याघारौ तिस्रः समिधः इतिश्रुतेः॥ ॥अथदशमी॥ ॥विशां कविं विश्पतिं मानुषीरिषः संसीमकृण्वन्स्वधितिं न ते
जसे॥ स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत्॥ इषः पश्वादिलक्षणं धनमिच्छंत्यः मानुषीः मनुष्यप्रजाः विशां प्रजानां
विश्पतिं प्रभुं कविं। मथनेन सीमनं स्वधितिं न असिमिव तेजसे तीक्ष्णत्वार्थं संसमकृण्वन् समर्थं कुर्वन् साग्निः उद्वतः उच्छ्रायवतः निवतो नी
चभावतश्च प्रदेशान्वेविषत् व्याप्नुवन् याति गच्छति स एषु भुवनेषु गर्भं अरण्यादीधरत् धारयत् इत्॥ ॥इतिद्वितीयस्याष्टके अष्टमाध्या
यस्य अष्टादशोवर्गः॥ ॥अथैकादशी॥ ॥स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः॥ वै॰ष॥ प्रजज्ञिवान् जातः वृषा
वर्षकः स वैश्वानरः चित्रेषु नानाप्रकारेषु जठरेषु प्राणिनां भक्षातजठराणां भेदः। स पुनः जिन्वते वर्धते चित्रेषु नानाविधेषु अरण्येषु ना
नदत् भक्ष्यार्थं शब्दं कुर्वन् सिंहो न सिंह इव। किंविधो वैश्वानरः पृथुपाजाः पृथुतेजाः अथवा पृथुवेगः अमर्त्यः मरणधर्मरहितः दा
शुषे हवींषि प्रदात्रे यजमानाय रत्नारमणीयानि वसूनि धनानि विविधानि विभजमानः प्रयच्छन्॥ ॥अथद्वादशी॥ ॥वैश्वानरः
प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भंदमानः सुमन्मभिः। स पूर्ववज्जनयञ्जंतवे धनं समानमज्मं पर्येति जागृविः॥ सुमन्मभिः स्तोतृभिः भंद
मानः वैश्वानरः जातमात्रेण प्रत्नथा प्रत्न इव चिरंतन इव नाकं। कं सुखं अकं दुःखं न विद्यते अकं यस्मिन् तरुनाकं दिवः अंतरिक्षस्य पृष्ठं उ
परितनप्रदेशं स्वरितोग्निः आरुहत् आरोहति स वैश्वानरः पूर्ववत् पूर्वेभ्य ऋषिभ्य इव जंतवे स्तोत्रे यजमानाय धनं पश्वादिलक्षणं जनय
त् संपादयत् जागृविः सदा प्रबुद्धः समानं सर्वेषां देवानां साधारणं अज्मं आकाशमार्गं पर्येति सूर्यरूपेण गच्छति॥ ॥अथत्रयोदशी॥
ऋतावानं यज्ञियं विप्रमुक्थ्य१मा यं दधे मातरिश्वा दिवि क्षयं। तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे॥ ॥ऋतावानं
बलवंतं यज्ञियं यज्ञार्हं विप्रं मेधाविनं उक्थ्यं स्तुत्यं दिवि द्युलोके क्षयं निवसंतं यमग्निं मातरिश्वा वायुः द्युलोकादाहृत्य पृथिव्यां आदधे आहि
तवान् चित्रयामं नानाविधगमनं हरिकेशं पिंगलार्चिषं सुदीतिं शोभनदीप्तिं तमग्निं नव्यसे नवतराय सुविताय सुप्रामस्याय धनाय
तं तदर्थं इममहे याचामहे॥ ॥अथचतुर्दशी॥ ॥शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधं॥ अग्निं मूर्धानं दिवो अप्रति

भा॰अ॰२ कृतं तमीमहे नमसा वाजिनं बृहत्॥ ॥नेति संप्रत्यर्थे। शुचिं दीप्तं यामन् यामनि यज्ञे इषिरं एषणीयं स्वर्दृशं सर्वपदार्थविज्ञानयुक्तं दिवः अ॰८
द्युलोकस्य केतुं प्रज्ञापकं रोचनस्थं रोचनस्थं। रोचनः सूर्यः तस्मिन् तिष्ठंतं उषर्बुधं अग्निहोत्ररूपेण उषसि प्रबुध्यमानं दिवः स्वर्गस्य मूर्धा
३३० नं प्रधानं अप्रतिष्कुतं अप्रतिहतशब्दं। वाजिनं अन्नवंतं महत् महांतं तं अग्निं नमसा स्तोत्रेण ईमहे याचामहे॥ ॥अथ पंचदशी॥ ॥मंद्रं होता
रं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिं॥ रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे॥ ॥मंद्रं स्तुत्यं होतारं देवानामाह्वाता
रं शुचिं सर्वदा शुद्धं अद्वयाविनं अकुटिलं दमूनसं दानमनसं उक्थ्यं श्लाघ्यं विश्वचर्षणिं विश्वस्य द्रष्टारं चित्रं नानाविधवर्णं रथं न रथमिव वपु
षाय रूपार्थं दर्शतं दर्शनीयं सदमित् सदैव मनुर्हितं सर्वेभ्यो मनुष्येभ्यो हितं तं अग्निं राये धनाय ईमहे याचामहे अत्र याच्ञार्थत्वादस्य द्वि
कर्मकत्वं॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्यैकोनविंशो वर्गः॥ ॥वैश्वानरायेत्येकादशर्चं तृतीयं सूक्तं वैश्वामित्रं। अत्रेयमनु
क्रमणिका। वैश्वानराय एकादशेति पूर्वसूक्ते वैश्वानरीयं तु जागतमित्युक्तत्वादस्यापि सूक्तस्य जगती छंदः वैश्वानरोऽग्निर्देवता॥ अस्य सूक्
स्य अग्निष्टोमे आग्निमारुते शस्त्रे विनियोगः॥ सूत्रितं हि वैश्वानराय पृथुपाजसे वैश्वानरः क्रत्वेति॥ ॥तत्र प्रथमा॥ ॥वैश्वानरा
य पृथुपाजसे विपो रत्ना विधंत धरुणेषु गातवे॥ अग्निर्हि देवां अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत्॥ ॥विपो मेधाविनः स्तो
तारः पृथुपाजसे बहुबलाय बह्वन्नाय वा पाजः इत्यन्नस्य बलस्य वा नाम। पाजः इति। वैश्वानराय अग्नये धरुणेषु धर्मेषु यज्ञेषु रत्ना रमणीयानि
स्तोत्राणि गातवे सन्मार्गलाभाय विधंत परिचरंति कुर्वंति अमृतः मरणरहितोऽग्निः देवान् दुवस्यति हविषां प्रदानेन परिचरति हि प्रसिद्धौ
अथ अतः कारणात् कोपि सनता सनातनानि धर्माणि यज्ञान् न दूदुषत् न दूषयति॥ ॥अथ द्वितीया॥ ॥अंतर्दूतो रोदसी दस्म ईयते
होता निषत्तो मनुषः पुरोहितः॥ क्षयं बृहंतं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः॥ ॥दस्मो दर्शनीयो होताग्निः दूतः देवानां दू
तः सन् रोदसी रोदस्योः द्यावापृथिव्योः अंतर्मध्ये ईयते गच्छति मनुषः मनोर्जातस्य मनुष्यस्य पुरोहितः आहवनीयादिरूपेण पुरतः स्था
पितः निषत्तो निषण्णः सन् अग्निः द्युभिः दीप्तिभिः बृहंतं महांतं क्षयं यज्ञगृहं परि भूषति। अलंकरोति देवेभिः देवैः इषितः प्रेषितो
धियावसुः प्रज्ञया व्याप्यमानः एतद्वै अग्निविशेषणं॥ ॥अथ तृतीया॥ ॥केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयंत चित्तिभिः॥ अ
पांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन् सुम्नानि यजमान आ चके॥ ॥यज्ञानां केतुं प्रज्ञापकं विदथस्य यज्ञस्य गृहस्य वा साधनं प्राप्तिसाधनं अ
साधारणकारणं संतं अग्निं विप्रासो विप्राः चित्तिभिः स्वकर्मभिः महयंत पूजयंति। किंच गिरः स्तोतारः यस्मिन्नग्नौ अपांसि स्वानुष्ठेया
नि कर्माणि अधि संदधुः संदधते यजमानः तस्मिन्नग्नौ सुम्नानि सुखानि प्राप्य आ चके कामयते॥ ॥अथ चतुर्थी॥ ॥पिता यज्ञाना
मसुरो विपश्चितां विमानमग्निर्वयुनं च वाघतां॥ आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भंदते धामभिः कविः॥ ॥यज्ञानां पिता
पालयिता विपश्चितां विदुषां स्तोतॄणां असुरः बलप्रदः वाघतां ऋत्विजां वयुनं ज्ञानसाधनं विमानं विमीयते फलमिति विमानं यज्ञादिकर्म ३३०
साधनं सोऽग्निः भूरिवर्पसा पार्थिववैद्युतादिबहुविधरूपेण रोदसी द्यावापृथिव्यौ आ विवेश प्रविशति पुरुप्रियः मनुष्येषु अधि
कप्रियः अथवा पुरूणां देवानां पुरुप्रियः धामभिः तेजोभिर्युक्तः कविः अग्निः भंदते यजमानैः स्तूयते॥ ॥अथ पंचमी॥ ॥

चंद्रमग्निं चंद्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदं॥ विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः॥ ॥देवासो दे 263/1914
वाः चंद्रमाह्लादकं चंद्ररथं चंद्रमाह्लादको रथो यस्य तं हरिव्रतं पिंगलवर्णं हरितवर्णं हरित्वं च मिति शाखांतरं॥ अप्सुषदमप्सु सीदं
तं स्वर्विदं सर्वज्ञं विगाहं विगाहमानं सर्वत्र व्याप्तं। तूर्णिं क्षिप्रगामिनं शत्रूणां हिंसितारं वा तविषीभिर्बलैरावृतं भूर्णिं भर्तारं सुश्रियं शो
भनदीप्तिं वैश्वानरं इह दधुः धृतवंतः आदधुः॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥अग्निर्देवेभि
र्मनुषश्च जंतुभिस्तन्वानो यज्ञं पुरुपेशसं धिया॥ रथीरंतरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः॥ ॥देवैः साधदिष्टिभिः
साधितयज्ञैः जंतुभिः ऋत्विग्भिः धिया कर्मणा मनुषः यजमानस्य पुरुपेशसं बहुरूपं पेश इति रूपनाम पुरोडाशपशुसोमहविर्भि
दः एकाहाहीनसत्रात्मकत्वेन नानाविधरूपं यज्ञं तन्वानः कुर्वन् रथीः सर्वस्य लोकस्य नेता जीरः क्षिप्रकारी दमूनाः दांतमनाः दानम
नावा अभिशस्तिचातनः अभिशस्तिनामरातीनां यज्ञविघ्नकारिणां रक्षसां चातयिता नाशयिताग्निः अंतः द्यावापृथिव्योर्मध्ये ईयते गच्छ
ति॥ ॥अथ सप्तमी॥ ॥अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः॥ वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सु
क्रतुर्विपां॥ ॥हे अग्ने स्वपत्य सुपुत्र आयुनि आयुषि निमित्ते सति स्तुयिः॥ आयुर्निमित्तं जरस्व देवान् स्तुहि होतारमधिष्ठाय ऊर्जा रस
न अन्नेन वा पिन्वस्व देवान् प्रीणय नः अस्माकं इषः अन्नानि अर्थं सं दिदीहि संदीपय वयांसि अन्नानि च वय इत्यन्ननाम सुपाठात्।
जिन्व प्रीणय हे जागृव सर्वदा जागरणशील बृहतः महतो यजमानस्य जिन्वेति संबंधः॥ सुक्रतुः शोभनकर्मा शोभनयज्ञो वा त्वं विपां मे
धाविनां देवानां उशिक् कांतोसि॥ ॥अथाष्टमी॥ ॥विश्पतिं यह्वमतिथिं नरः सदा यंतारं धीनामुशिजं च वाघतां॥ अध्वराणां चेत
नं जातवेदसं प्र शंसंति नमसा जूतिभिर्वृधे॥ नरः नेतारः स्तोतारो वा विश्पतिं विशां मनुष्याणां पतिं विश्वस्य पतिमिति वा यह्वं महांतं
अतिथिं सर्वस्यातिथिभूतं धीनां कर्मणां वा यंतारं नियंतारं वाघतां च ऋत्विजां च उशिजं कांतं मनोज्ञं अध्वराणां यागानां चेतनं प्रज्ञापकं जू
तिभिर्वेगयुक्तं जातवेदसं अग्निं वृधे समृद्ध्यै नमसा नमस्कारेण स्तुतिभिश्च सदा प्रशंसंति। प्रशंसां कुर्वंति॥ ॥अथ नवमी॥ ॥विभावा
देवः सुरणः परिक्षितीरग्निर्बभूव शवसा सुमद्रथः॥ तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः॥ ॥विभावा दी
प्तिमान् देवः स्तूयमानः सुरणः अत्र वर्णलोपश्छांदसः शोभनं रमयतीति सुरमणः सुमद्रथः शोभनरथः अग्निः शवसा बलेन क्षि
तीः सर्वाः प्रजाः परि बभूव परितो गृह्णाति। अत्र भवतेरुपसर्गवशात् परिग्रहार्थत्वं। भूरिपोषिणः बहूनां पोषयितुः दमे यज्ञगृहे
दम इति गृहनाम सुपाठात्। निवसतः तस्याग्नेः व्रतानि कर्माणि वयं सुवृक्तिभिः स्तोत्रैः उप भूषेम उपभूषयामः प्रकाशयामः॥
अथ दशमी॥ ॥वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण॥ जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि
त्मना॥ ॥हे वैश्वानर तव धामानि तेजांसि धीमितेजांसि आ चके अभिकामे हे विचक्षण प्रज्ञातत्त्व येभिः यैस्तेजोभिः स्वर्वित् सर्ववित्
सर्वज्ञो भवः भवसि॥ जातमात्रस्त्वं भुवनानि भूतजातानि रोदसी द्यावापृथिव्यौ आपृणः आपूरयः। हे अग्ने ता विश्वा विश्वानि सर्वाणि भू
तजातानि त्मना आत्मना परिभूरसि परिगृहीतासि॥ ॥अथैकादशी॥ ॥वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः॥

भा॰अ॰२ उभापितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा॥ ॥वैश्वानरस्याग्नेः दंसनाभ्यः तोपकारिभ्यः क्रियाभ्यः सुहव्यहुतं भवतीति अ॰८
यत। तदेवितर्थं। यतः कारणात् एको मुख्यः कविरग्निः स्वपस्यया शोभनयज्ञादिकर्मेच्छया यजमानादिभ्यो धनमरिणात् ददाति सो
१४० यमग्निः भूरिरेतसा भूरिरेतसा बहुरेतस्कौ उभा उभौ पितरा पितरौ मातापितरौ द्यावापृथिव्यौ महयन् पूजयन् अजायत॥ ॥इ
ति द्वितीयस्याष्टके अष्टमाध्यायस्य एकविंशो वर्गः॥ ॥समित्समिदित्येकादशर्चं चतुर्थं सूक्तं। वैश्वामित्रं त्रैष्टुभं अत्रानुक्रमणिका॥ समित्स
मिदाप्रियमिति। इत्यादिस्वाहाकृत्यंताः पूर्वोक्ताः प्रत्यृचं देवताः। पशौ विश्वामित्राणामाप्रीसूक्तं दर्शपूर्णमासयोः पत्नीसंयाजेषु त्वष्टु
र्याज्या यज्ञमित्येषा। सूत्रितं च। इह त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु वीति तावाष्ट्रपशोः पुरोडाशस्यानुवाक्या। सूत्रितं च। तं नस्तुरी
पमध पोषयित्नु देव त्वष्टा सविता विश्वरूप इति॥ ॥तत्र प्रथमा॥ ॥समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः। आ
देव देवान्यजथाय वक्षि सखा सखीन्सुमना यक्ष्यग्ने॥ ॥समित्समित् अत्यर्थं समिद्धस्त्वं सुमना बोधि बुध्यस्व। शुचाशुचा अत्यर्थं
प्रसर्पणकुर्णया ज्योतिषा युक्तः त्वं वस्वः वसुनो धनस्य तद्विषयां सुमतिं शोभनां बुद्धिं अस्मे अस्मभ्यं रासि देहि हे देव द्योतमान देवान्यज
नीयान् यजथाय यजनाय तदर्थं आ वक्षि आवह। हे अग्ने सखा देवानां सखा त्वं सुमनाः सन् सखीन् देवान् यक्षि यजस्व॥ ॥अथ द्विती
या॥ ॥यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः। सेमं यज्ञं मधुमंतं कृधी नस्तनूनपाद्घृतयोनिं विधंतं॥ वरुणो मित्रो अग्निः
एते त्रयो देवाः यमग्निं दिवेदिवे प्रतिदिवसं अहन् अहनि त्रिः प्रातर्मध्यान्हसायंननेषु त्रिवारं आयजन्ते तं हे तनूनपात् तनूनां शरीराणां
नपातः सन् त्वं घृतयोनिं घृतस्योदकस्य कारणं विधंतं विधीयमानं क्रियमाणं नोस्मदीयमिमं यज्ञं मधुमंतं मधिवत् उदकनामैतत् स्वादुफलयु
क्तं कृधि कुरु॥ ॥अथ तृतीया॥ ॥प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै। अच्छा नमोभिर्वृषभं वंदध्यै स देवान्यक्ष
दिषितो यजीयान्॥ ॥विश्ववारा विश्वैर्जनैर्वरणीया दीधितिः स्तुतिः स्तुतिः दीप्तिर्वा होतारं देवानामाह्वातारमग्निं प्र जिगाति जिगातु
प्रकर्षेण गच्छतु प्रथमं मुख्यं अच्छ आभिमुख्येन वृषभं संपदां वर्षितारं वंदध्यै वंदितुं योग्यमिति शेषः। अग्निं नमोभिः नमस्कारैः स
ह इळः इषः हविरूपाण्यन्नानि यजध्यै यष्टुं प्रीणयितुं प्र जिगातु इति इषितः। अस्माभिः प्रेरितः यजीयान् यष्टृतमः सोग्निर्देवान्यक्ष
त् यजत॥ ॥अथ चतुर्थी॥ ॥ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि। दिवो वा नाभा न्यसादि होता स्तृणीमहि देव
व्यचा वि बर्हिः॥ वां युवयोः अग्निश्च बर्हिश्च उभौ वामित्युच्येते। समिदादिभिः सहितस्य वाग्नेर्देवतात्वात्। ऊर्ध्वः उन्नतः गातुर्यज्ञमा
र्गः अध्वरे यज्ञे अकारि आश्रयः क्रियते शोचींषि आर्चींषि तिरजांसि हुवींषि ऊर्ध्वा ऊर्ध्वं प्रस्थिता होताग्निर्दिवः दीप्यमानस्य यागगृह
स्य नाभा नाभौ मध्यप्रदेशे न्यसादि निषीदति देवव्यचाः देवैर्व्याप्तं बर्हिश्च बार्थं धाजाह्नः वि स्तृणीमहि विशेषेण स्तृणीमः॥ ॥अ
थ पंचमी॥ ॥सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन। नृपेशसो विदथेषु प्र जाता अभीमं यज्ञं वि चरंत पूर्वीः॥ म १४०
नसा वृणानाः प्रार्थ्यमानाः ऋतेन इदकेन विश्वं इन्वंतः प्रीणयंतः देवाः सप्त होत्राणि होतॄणां वषट्कर्तॄणां कर्माणि प्रति यन् प्रतिगच्छंति
अतः परं द्वारो स्तुतिः। नृपेशसः नररूपाः विदथेषु यागेषु जाताः इमं नोः पूर्वीः बह्व्यः॥ विश्वे हवन्त्या यज्ञ द्वाराभिमानिन्यो देवताः

265
1914

इमममदीयं यज्ञं अभि वि चरंत प्रविचरंतु॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य द्वाविंशो वर्गः॥ ॥अथ षष्ठी॥ आ भन्दमाने उषसा उपाके
उत स्मयेते तन्वा विरूपे। यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः॥ ॥आभंदमाने स्तूयमाने उपाके परस्परं संगते उषसा
नक्ता पक्षयाह्निवचनेनैकोपसारान्यरजनी आगच्छतां उत अपि च विरूपे पृथग्रूपे तन्वा प्रकाशरूपेण शरीरेण स्मयेते प्रकाशेते मित्रो वरु
णः उत वा अपि च इंद्रः मरुत्वान् महोभिः महोभिर्यथा जुजोषत् यथा सेवेत तथा महोभिः तेजोभिर्युक्ते इमे द्यावापृथिव्यौ कुरुतां॥ ॥अथ स
प्तमी॥ ॥दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति। ऋतं शंसंत ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः॥ ॥दैव्यादि
व्यौ प्रथमा प्रथमौ मुख्यौ होतारा आह्वातारौ अग्नी न्यृंजे प्रसाधयामि ऋतं मुहुः कंशंसंतः। आशंसमानाः सप्त पृक्षासः पृक्षमन्नं त
द्वंतः ऋत्विजः तमग्निं स्वधया सोमेन हविषा मदंति मादयंति व्रतपाः व्रतानां कर्मणां रक्षितारः दीध्यानाः दीप्यमानाः अथवा स्व
र्मभिरग्निं दीपयंतः ऋत्विजः अनुव्रतं व्रते कृतमित अग्निमेव माहुः अग्निमेव कृतभूतमाहुरित्यर्थः। एवकारार्थ इच्छब्दः॥ अथाष्ट
मी॥ ॥आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः। सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु॥ ॥भार
तीभिः भा तस्य सूर्यस्य संबंधिनीभिः संगताः संगता भारती वाक् आगच्छतु देवैर्मनुष्येभिः मनुष्यैश्च संगता इळा च भूमिश्च आग
च्छतु अग्निश्च सारस्वतेभिः सरस्वतेभिः सरस्वतीसंबंधिभिः मध्यमस्थानैः सह सरस्वती माध्यमिका वाक् आगच्छतु तिस्रो देव्यः
वाग्निळा भारत्यः आगच्छतु आयातु अर्वाक् आभिमुख्यं देवीः तिस्रः एतद्बर्हिः सदंतु आसीदंतु॥ ॥अथ नवमी॥ ॥तन्नस्तुरीपमध
पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व। यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः॥ ॥हे देव त्वष्टः सृष्टिकर्तः विरराणः र
ममाणः त्वं अध अनंतरं नोस्मान् तुरीपं तारकं पोषयित्नु पोषकं तत् प्रसिद्धं रेतः वि ष्यस्व समाचय॥ यतो विमोचनाद्वीरः सत्ववान्
कर्मण्यः कर्मसु कुशलः सुदक्षः सुबलः युक्तग्रावा अभिषवार्थं ग्रावा युक्तः सोमः सन् इत्यर्थः। देवकामः देवान्कामयमानः
पुत्रो जायते जायेत॥ ॥अथ दशमी॥ ॥वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति। सेदु होता सत्यतरो यजाति
यथा देवानां जनिमानि वेद॥ ॥हे वनस्पते देवानुपावसृज समीपं कुरु शमिता पशोः संस्कर्ता अग्निः वनस्पतिश्च हविः सूदयाति
देवान्प्रति प्रेरयतु सत्यतरः अत्यर्थं सत्यः सत्यतरः सत्यस्वरूपः स इत् स एव होता यजाति यजतु यथा यतः कारणात् स ए
वाग्निर्देवानां जनिमानि जन्मानि वेद यतिभतः स एव यजत्वित्यर्थः॥ ॥अथैकादशी॥ ॥आ याह्यग्ने समिधानो अर्वाङिन्द्रेण
देवैः सरथं तुरेभिः॥ बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां॥ ॥हे अग्ने अर्वाक् अस्मदभिमुखं समिधानाः
समिध्यमानाः ज्वालारूपेण दीप्यमानः त्वं अयाहि देवतारूपेणागच्छ॥ कथमिति उच्यते। नोस्माकं यज्ञं इंद्रेण देवैश्च तुरेभिः
त्वरमाणैर्देवैः सरथं समानरथं यथा आयाहि। किंच सुपुत्रा अदितिः अग्निर्नो बर्हिः आस्तां अध्यास्तां स्वाहा स्वाहाकारेण युक्ता अमृताः
नित्या देवा मादयंतां तृप्यंतु॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य त्रयोविंशो वर्गः॥ ॥प्रत्यग्निरुषस इत्येकादशर्चं पंच
मं सूक्तं वैश्वामित्रं त्रैष्टुभं आग्नेयं॥ अत्रानुक्रमणिका॥ प्रत्यग्निरिति। प्रातरनुवाकाश्विनशस्त्रयोरिदमादि सूक्तं यस्यायिनि

भा॰ अ॰ ३ योगः । सूत्रितं च । प्रत्यग्निरुषस इति त्रीणीति इकामग्न इति । अस्य सूक्तस्य विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ प्रत्यग्निरुषसश्चेकि अ॰ ८
तानो बोधि विप्रः पदवीः कवीनां । पृथुपाजा देवयद्भिः समिद्धोप द्वारा तमसो वह्निरावः ॥ ॥ उषसः चेकितानो जानन् विप्रः
३४१ मेधावी कवीनां क्रांतदर्शनां पदवीः मार्गानुगच्छन् योग्निः प्रत्यबोधि प्रतिबुध्यते पृथुपाजाः पृथुतेजाः देवयद्भिः देवकामैः समि
द्धः सम्यक् दीप्तः स वह्निः तमसः अज्ञानस्य द्वारा आगमनद्वाराणि अपावः अपावृणोति ॥ ॥ अथ द्वितीया ॥ ॥ प्रेद्वग्निर्वावृधे स्तोमे
भिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः ॥ पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥ ॥ नमस्यः पूज्यो योग्निः स्तोतॄणां स्तोत्रै
उक्थैः र्गीर्भिर्वाग्भिः शास्त्रैश्च प्रववृधे । वृद्धिं प्राप्नोति दूतः देवानां दूतः सः पूर्वीः बह्वीः ऋतस्यादित्यस्य संदृशः दीप्तीः चकानः कामयमानः
सन् उषसः विरोके विरोचने प्रातःकाले समद्यौत् अद्योतत । इत उपूरणे ॥ ॥ अथ तृतीया ॥ ॥ अधाय्यग्निर्मानुषीषु विक्ष्वपां गर्भो मित्र
ऋतेन साधन् । आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनां ॥ ॥ मित्रः यजमानानां मित्रभूतः ऋतेन सत्येन साधनकामान् साधयन्
अपां गर्भोग्निः मानुषीषु मनोः संबंधिनीषु विक्षु प्रजासु अधायि देवैराहितः किंच हर्यतः स्पृहणीयः यजतो यष्टव्यः सः सानु उच्छ्रितं धिष्ण्य
उत्तरवेद्याख्यं आस्थात् अध्यतिष्ठत् विप्रः प्राज्ञः अग्निः मतीनां मातॄणां स्तोतॄणां हव्यः स्तुत्यः अभूत् उ पूरणः ॥ ॥ अथ चतुर्थी ॥ ॥ मित्रो
अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ॥ मित्रो अध्वर्युरिषिरो दमूना मित्रः सिंधूनामुत पर्वतानां ॥ यत् यदा समिद्धोग्निः
तदा मित्रो भवति सूर्यो भवति मित्र एव सन् होता भवति वरुणो भवति जातवेदाः जातप्रज्ञः स मित्रः अध्वर्युर्भवति दमूनाः दानमनाः
दांतमना वा स एव इषिरः प्रेरको वायुर्भवति उत अपिच सिंधूनां नदीनां पर्वतानां च मित्रः सहायो भवति ॥ ईदृश मकु अग्निं सर्वात्मक
त्वेन स्तौति ॥ ॥ अथ पंचमी ॥ ॥ पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ॥ पाति नाभा सप्तशीर्षाणमग्निः पाति दे
वाना मुपमादमृष्वः ॥ ॥ ऋष्वो दर्शनीयोग्निः वेः गंत्र्याः सर्वव्यापिकायाः रिपोः भूम्याः प्रियं अग्रं प्रथमं पदं स्थानं पाति रक्षति यह्वो
महान् सूर्यस्य चरणं चरत्यत्रेति चरणमंतरिक्षं पाति नाभा नाभौ अंतरिक्षस्य मध्ये सप्तशीर्षाणं मरुद्गणं पाति देवानां उप
मादं उपमादकं यज्ञं पाति रक्षति ॥ ॥ अं इति द्वितीयस्याष्टके अष्टमाध्यायस्य चतुर्विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ ऋभुश्चक्र ई
ड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ॥ ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥ ॥ ऋभुर्महान् विश्वानि स
र्वाणि वयुनानि ज्ञातव्यानि पदार्थानि विद्वान् जानन् देवोग्निः ईड्यं स्तुत्यं चारु मनोज्ञं नाम उदकं चक्रे करोति जलनामैतत् उदकनाम
सु पाठात् ॥ वेर्व्याप्तस्य ससस्य सर्पतः शांतज्वालस्याप्यग्नेः चर्म रूपं घृतवद्दीप्तिमद्भवति सोग्निः तज्जलम प्रयुच्छन् अप्रमा
द्यन् रक्षति पालयति इत् पादपूरणः ॥ ॥ अथ सप्तमी ॥ ॥ आ योनिमग्निर्घृतवंतमस्थात्पृथुप्रगाणमुशंतमुशानः ॥
॥ ॥ दीद्यानः शुचिरृष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥ ॥ उशानः कामयमानोग्निर्घृतवंतं दीप्तिमंतं पृथुप्रगाणं पृथुगी ३४३
तिं उशंतं कामयमानं योनिं स्थानमायतनं आ अस्थात् आतिष्ठति । दीद्यानो द्योतमानः शुचिः दर्शनीयः शुद्धो वा ऋष्वो महान् पा
वकः अन्यपापशोधयिताग्निः मातरा मातरौ द्यावापृथिव्यौ पुनःपुनर्नव्यसी नवतरे कः करोति ॥ ॥ अथाष्टमी ॥ ॥ सद्यो

जातं ओषधीभिर्ववक्षे यदी वर्धंति प्रस्वो घृतेन ॥ आप इव प्रवता शुंभमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ॥ सद्यो जातोग्निः यदि यदा
तं धीभिः ववक्षे उह्यते तदा प्रवता प्रवणेन मार्गेण गच्छंत्यः अप इव शुंभमानाः शोभमानाः स्तामुषबुध्यः ॥ प्रस्वः फलानि प्रसुवा
नाः घृतेनोदकेन वर्धंति वर्धयंति ॥ पित्रोः द्यावापृथिव्योरुपस्थे मध्यप्रदेशे वर्धमानोग्निः उरुष्यत् अस्मान् रक्षतु ॥ ॥ अथ नवमी
॥ ॥ उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ॥ मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ॥ इदु
ति पादपूरणः ॥ स्तुतः अस्माभिः स्तुतः समिधा समिंधनेन यह्वो महान् । अग्निः पृथिव्या उत्तरवेद्याः नाभा नाभौ मध्यप्रदेशे स्थि
तः सन् दिवः अंतरिक्षस्य वर्ष्मन् वर्षणि रूपे उदद्यौत् अद्योतत मित्रः सर्वेषां मित्रभूतः ईड्यः स्तुत्यः मातरिश्वा तर्यंतरिक्षे श्वसिति प्रा
णिति सूर्यरूपेण चरन् इति मातरिश्वा अथवा मातरि अरण्यां श्वसिति निश्वसितीति मातरिश्वा तथा च यास्कः मातर्यंतरिक्षे श्वसिति
मातर्याश्वनितीति वा दूतः देवानां दूतः स नः यजथाय यज्ञाय देवान् आ वक्षत् आवहतु ॥ ॥ अथ दशमी ॥ ॥ उदस्तंभीत्समिधा ना
कमृष्वोग्निर्भवन्नुत्तमो रोचनानां ॥ यदी भृगुभ्यः परि मातरिश्वा गुहा संतं हव्यवाहं समीधे ॥ ॥ ऋष्वो महानग्निः समिधा तेजसा नाकं स्वर्गं
उदस्तंभीत् । उदस्तभ्नात् रोचनानां शोभमानानां मध्ये उत्तमो भवत् उत्कृष्टतमो भवत् मातरिश्वा वायुः भृगुभ्यः आदित्यरश्मिभ्यः गुहा
गुहायां संतं हव्यवाहं हव्यानां वोढारमग्निं यदि यदा समीधे समधत्त तदा नाकं अस्तंभ्नादिति संबंधः ॥ ॥ अथैकादशी ॥ ॥ इळामग्न
इति पूर्वं व्याख्याता ॥ ॥ इति द्वितीयस्याष्टके अष्टमाध्यायस्य पंचविंशो वर्गः ॥ ॥ प्रकारव इत्येकादशर्चं षष्ठं सूक्तं ॥ वैश्वामित्रमाग्नेयम् ।
प्रकारव इत्यनुक्रांतत्वात् ॥ प्रातरनुवाकाश्विनशस्त्रयोः सूक्तविनियोगः । पूर्वसूक्त एव प्रत्यग्निरुषसस्त्रीणीत्यनेनोक्तः ॥ आद्याग्नेयपशौ
हविषो याज्या ॥ सूत्रितं च ॥ प्रकारवो मननावच्यमाना एका चतस्य सरस्वती नदीनामिति । एभिरग्न इति पत्नीवत ग्रहस्य याज्या ॥ सूत्रितं च ।
आग्नीध्रः पात्नीवतस्य यजत्याभिरग्ने सरथं याह्यर्वाङिति ॥ ॥ ॥ तत्र प्रथमा ॥ ॥ प्रकारवो मनना वच्यमाना देवद्रीचीं नयत देवयंतः
॥ दक्षिणावाड्वाजिनी प्राच्येति हविर्भरंत्यग्नये घृताची ॥ ॥ हे कारवः कर्तारः देवयंतः देवकामाः यूयं मननाम मननेन मंत्रेण वच्यमानाः
प्रेर्यमाणाः संतः देवद्रीचीं देवानंचतीं स्रुचं प्रणयत प्रकर्षेण नयत प्रापयत दक्षिणावाट् आहवनीयस्य दक्षिणतः उह्यमाना वाजिनी अं
नवती प्राची प्राग्गता अग्नये अग्न्यर्थं हविर्भरंती धारयंती घृताची घृतेनाक्ता कृणोति गच्छति ॥ ॥ अथ द्वितीया ॥ ॥ आ रोदसी अपृणा
जायमान उत प्ररिक्था अध नु प्रयज्यो ॥ दिवश्चिदग्ने महिना पृथिव्या वच्यंतां ते वह्नयः सप्तजिह्वाः ॥ ॥ हे अग्ने जायमानस्त्वं रोदसी द्यावा
पृथिव्यौ आ अपृणाः आपूरय ॥ अधा अपिच हे प्रयज्यो प्रयष्टव्य दिवश्चित् दिवश्च अंतरिक्षात् पृथिव्याश्च महिना महिम्ना प्ररिक्थाः ॥ अ
तिरिक्तश्चासि अनेन वक्त्रतिशय उक्तः । इत्थंविधस्य ते तव वह्नयः अग्नयः अंशभूता वह्नयः आहवनीयादयः वच्यंतां किंविधास्ते
सप्तजिह्वाः सप्तज्वालात्मका नु पूरणः ॥ ॥ अथ तृतीया ॥ ॥ द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयंते दमाय ॥ यदी विशो मानुषी
र्देवयंतीः प्रयस्वतीरीळते शुक्रमर्चिः ॥ द्यौश्च अंतरिक्षं पृथिवी च यज्ञियासः यज्ञार्हा देवाश्च होतारं त्वा त्वां दमाय दमो यज्ञः तस्मै अर्थं
निषादयंते उपगमयंति । यदि यदा मानुषीः मनोः संबंधिन्यः देवयंतीः देवकामाः प्रयस्वतीः हविष्मत्यः विशः प्रजाः होतारः शुक्रं

267/1914

भा॰अ॰२ दीप्तिं अर्चिः इंकते स्तुवंति॥ ॥अथ चतुर्थी॥ ॥महान्त्सधस्थे ध्रुव आ निषत्तोंतर्द्यावा माहिने हर्यमाणः॥ आस्क्रे सपत्नी अजरे अमृक्ते सब अ॰८
२४२ र्दुघे उरुगायस्य धेनू॥ महान् अधिको हर्यमाणः यजमानादिभिः काम्यमानः यद्वा यजमानाय धनं कामयमानः॥ अग्निर्द्यावा अंतः शुभ्र
योर्मध्ये माहिने महिम्नायुक्ते सधस्थे स्थाने ध्रुवः अचलः सन् निषत्तः निषण्णो भवति॥ आस्क्रे आक्रमणशीले सपत्नी समानः ए
कः सूर्यः पतिर्ययोस्ते सपत्न्यौ अजरे जरारहिते अमृक्ते अन्येनाहिंसिते सबर्दुघे सबर्दुघे अमृतमुदकं तस्य दोग्ध्र्यौ द्यावापृथिव्यौ उरुगायस्य
पृथुगमनस्य अधिकस्तुतेर्वा अग्नेर्धेनू प्रीणयित्र्यौ भवतः॥ ॥अथ पंचमी॥ ॥व्राता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततंथ॥ त्वं
दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनां॥ ॥हे अग्ने महतः सर्वोत्कृष्टस्य ते तव व्राता व्रतानि कर्माणि महानि महांति भवंति तव
न क्रत्वा कर्मणा प्रकाशकेन रोदसी द्यावापृथिव्यौ आततंथ विस्तृतवानसि त्वं दूतो अभवः भव हे वृषभ वर्षणशील त्वं जायमानः सन् चर्षणीनां यजमाना
नां नेतासि फलप्रापकोसि॥ ॥इति द्वितीयस्याष्टके अष्टमाध्यायस्य षड्विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रो
हिता धुरि धिष्व॥ अथा वह देवान् देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः॥ ॥हे देव केशिना प्रशस्तकेशयंतौ योग्याभिः योजनसाधनभूताभि
रज्जुभिः युक्तौ घृतस्नुवा घृतं क्षरंतौ रोहिता रोहितौ अश्वौ ऋतस्य यज्ञस्य वा वाशब्द अर्थे धुरि धिष्व धेहि योजयेत्यर्थः॥ अथानंतरं विश्वान्
सर्वान् देवान् रथे समारोप्य आवह हे जातवेदः तान् स्वध्वरान् स्वध्वरान् शोभनाध्वरान् कृणुहि कुरु॥ ॥अथ सप्तमी॥ ॥दिवश्चिदा ते रुच
यंत रोका उषो विभातीरनु भासि पूर्वीः॥ अपो यदग्न उशधग्वनेषु होतुर्मंद्रस्य पनयंत देवाः॥ ॥हे अग्ने यत् यदा वनेषु अरण्येषु अ
पः उशधक् कामयमानो दहंश्च वर्तसे तदा ते रोकाः ज्वाला दीप्तयः दिवश्चित् सूर्यादपि आरुचयंत आरोचंते विभातीः विशेषेण भा
तीः प्रकाशमानाः पूर्वीः पुराणीः उषः उषसः अनु भासि मंद्रस्य स्तुत्यस्य होतुः तव रोकान् देवाः स्तोतारः पनयंत स्तुवंति॥ ॥अथाष्ट
मी॥ ॥उरौ वा ये अंतरिक्षे मदंति दिवो वा ये रोचने संति देवाः॥ ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः॥ ॥उरौ विस्तीर्णे ह
अंतरिक्षे ये देवा मदंति हृष्यंति दिवः सूर्यस्य रोचने प्रकाशने आलोके ये देवाः संति ऊमाः ऊमसंज्ञकाः पितरः संति यजत्राः यष्टव्याः
देवाः सुहवासः शोभनाह्वानाः आयेमिरे आयच्छंति रथ्यः रथिनः॥ तव ये अश्वाः संति हे अग्ने तैः सर्वैः सार्धं आयाहीति उत्तरय
र्चा संबंधः वा पूरणः॥ ॥अथ नवमी॥ ॥ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः॥ पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वध
मा वह मादयस्व॥ ॥हे अग्ने एभिः पूर्वोक्तैर्देवगणैः सार्धं सरथं समानरथं नानारथं वा पृथक् रथे समारोप्य अर्वाङ् अस्मदभिमुखं प्र
णः आयाहि यतः कारणात् अश्वाः विभवः प्रभवः समर्थाः हि प्रसिद्धाः पत्नीवतः पत्नीभिः सहितान् त्रिंशतं त्रींश्च त्रयस्त्रिंशतं देवांश्च
अनुष्वधं सोममुद्दिश्य आवह मादयस्व सोमेन तर्पय॥ ॥अथ दशमी॥ ॥स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः॥ प्रा
ची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये॥ ॥स एव होता भवति उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यौ अपि यस्याग्नेः यज्ञं २४२
यज्ञं सर्वयज्ञं वृधे समृद्धये अभिगृणीतः प्रशंसतः ऋतजातस्य सत्यस्य यज्ञस्य होतुः सुमेके सुरूपे ऋतवरी उदकवत्यौ सत्यस्वरूपे प्रा
ची अनुकूले तस्थतुः तिष्ठतः कुत्र अध्वरेव अध्वरविषये इव॥ ॥अथैकादशी॥ ॥इळामग्न इति पूर्ववत् व्याख्येयं॥ ॥इति द्वितीयस्याष्ट
के अष्टमाध्यायस्य सप्तविंशो वर्गः॥२७॥ ॥इति द्वितीयाष्टकं संहिताभाष्यं समाप्तः॥ शुभं भवतु॥ ॰ ॰ ॰ ॰ ॰ ॰॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भा॰अ॰२ दीप्तिं अर्चिः ईंकते स्तुवंति॥ ॥अथ चतुर्थी॥ ॥महान्सधस्थे ध्रुव आ निषत्तोंतर्द्यावा माहिने हर्यमाणः॥ आस्क्रे सपत्नी अजरे अमृक्ते सब अ॰८
३४२ दुघे उरुगायस्य धेनू॥ महान् अधिको हर्यमाणः यजमानादिभिः काम्यमानः यद्वा यजमानाय धनं कामयमानः॥ अग्निः द्यावा अंतः द्युभू
म्योर्मध्ये माहिने महति स्थाने सधस्थे ध्रुवः अचलः सन् निषत्तः निषण्णो भवति॥ आस्क्रे आक्रमणशीले सपत्नी समानः ए
कः भर्ता पतिर्ययोस्ते सपत्न्यौ अजरे जरारहिते अमृक्ते अन्येनाहिंसिते सबर्दुघे सबः अमृतं तस्य दोग्ध्र्यौ द्यावापृथिव्यौ उरुगायस्य
पृथुगमनस्य अधिकस्तुतेर्वा अग्नेः धेनू प्रीणयित्र्यौ भवतः॥ ॥अथ पंचमी॥ ॥व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततंथ॥ त्वं
दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनां॥ ॥हे अग्ने महतः सर्वेभ्योधिकस्य ते तव व्रतानि कर्माणि महानि महांति भवंति तव
न क्रत्वा कर्मणा प्रकाशनेन रोदसी द्यावापृथिव्यौ आततंथ विस्तारितवानसि त्वं दूतो अभवः भव हे वृषभ वर्षणशील त्वं जायमानः सन् चर्षणीनां यजमाना
नां नेता फलप्रापकोसि॥ ॥इति द्वितीयाष्टके अष्टमाध्याये षड्विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रो
हिता धुरि धिष्व॥ अथा वह देवान्देव विश्वान्स्वध्वरा कृणुहि जातवेदः॥ ॥हे देव केशिना प्रशस्तकेशयुक्तौ योग्याभिः योजनसाधनभूताभिः
रज्जुभिः युक्तौ घृतस्नुवा घृतं क्षरंतौ रोहिता रोहितौ अश्वौ ऋतस्य यज्ञस्य वा धुरि धिष्व धेहि योजय॥ अथानंतरं विश्वान्
सर्वान् देवान् रथे समारोप्य आवह हे जातवेदः॥ तान् स्वध्वरान् शोभनाध्वरान् कृणुहि कुरु॥ ॥अथ सप्तमी॥ ॥दिवश्चिदा ते रुच
यंत रोका उषो विभातीरनु भासि पूर्वीः॥ अपो यदग्न उशधग्वनेषु होतुर्मंद्रस्य पनयंत देवाः॥ ॥हे अग्ने यत् यदा वनेषु अरण्येषु अ
पः उशधक् कामयमानो दहंश्च वर्तसे तदा ते रोकाः ज्वलदीप्तयः दिवश्चित् सूर्यादपि आ रुचयंत आरोचंते विभातीः विशेषेण भा
तीः प्रकाशमानाः पूर्वीः पुराणीः उषः उषसः अनुभासि मंद्रस्य स्तुत्यस्य होतुः तव रोकान् देवाः स्तोतारः पनयंत स्तुवंति॥ ॥अथाष्ट
मी॥ ॥उरौ वा ये अंतरिक्षे मदंति दिवो वा ये रोचने संति देवाः॥ ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः॥ ॥उरौ विस्तीर्णे ९
अंतरिक्षे ये देवा मदंति हृष्यंति दिवः सूर्यस्य रोचने प्रकाशने आलोके ये देवाः संति ऊमाः ऊमसंज्ञकाः पितरः संति यजत्राः यष्टव्याः
देवाः सुहवासः शोभनाह्वानाः आयेमिरे आयच्छंति रथ्यः रथिनः॥ तव ये अश्वाः संति हे अग्ने तैः सर्वैः सार्धं आयाहीति उत्तरय
र्चा संबंधः वा पूरणः॥ ॥अथ नवमी॥ ॥ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः॥ पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वध
मा वह मादयस्व॥ ॥हे अग्ने एभिः पूर्वोक्तैः देवगणैः सार्धं सरथं समानरथं नानारथं वा त्वद्रथे समारोप्य अर्वाङ् अस्मदभिमुखं च पूर
णः आयाहि यतः कारणात् अश्वाः विभवः प्रभवः समर्थाः हि प्रसिद्धौ पत्नीवतः पत्नीभिः सहितान् त्रिंशतं त्रींश्च त्रयस्त्रिंशतं देवांश्च
अनुष्वधं सोमम् उद्दिश्य आवह मादयस्व सोमेन तर्पय॥ ॥अथ दशमी॥ ॥स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः॥ प्रा
ची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये॥ ॥स एव होता भवति उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यौ अपि यस्याग्नेः यज्ञं ३४२
यज्ञं सर्वं यज्ञं वृधे वर्धनाय अभिगृणीतः प्रशंसतः ऋतजातस्य सत्यस्य यज्ञस्य होतुः सुमेके सुरूपे ऋतावरी उदकवत्यौ सत्यस्वरूपे प्रा
ची अनुकूले तस्थतुः तिष्ठतः कुत्र इव अध्वरा इव यज्ञ इव॥ ॥अथैकादशी॥ ॥इळामग्ने इति पूर्ववत् व्याख्येयं॥ ॥इति द्वितीयाष्ट
के अष्टमाध्याये सप्तविंशो वर्गः॥ २७॥ ॥इति द्वितीयाष्टके संहिताभाष्यं समाप्तं॥ शुभं भवतु॥ ०. ०. ०. ०. ०. ०॥

269
1914
LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY